गूजरातपुरातत्त्वमन्दिरग्रन्थावली

आचार्यश्रीसिद्धसेनदिवाकरप्रणीतं

सन्मतितर्क-प्रकरणम् ।

जैनश्वेताम्बर-राजगच्छीय-प्रद्युम्नसूरिशिष्य-तर्कपञ्चानन-

श्रीमद्-अभयदेवसूरिनिर्मितया तत्त्वबोधविधायिन्या

व्याख्यया विभूषितम् ।

पञ्चमो विभागः ।

[समाप्तश्चायं ग्रन्थः]

गूजरात विद्यापीठ

अमदावाद

गूजरात
पुरातत्त्वमन्दिर
ग्रन्थावली

ग्रन्थाङ्क २१

गूजरातपुरातत्त्वमन्दिरग्रन्थावली

आचार्यश्रीसिद्धसेनदिवाकरप्रणीतं

सन्मतितर्क-प्रकरणम्।

जैनश्वेताम्बर-राजगच्छीय-प्रद्युम्नसूरिशिष्य-तर्कपञ्चानन-
श्रीमद्-अभयदेवसूरिनिर्मितया तत्त्वबोधविधायिन्या
व्याख्यया विभूषितम्।

पञ्चमो विभागः।

(तृतीयं काण्डम्)

गूजरातविद्यापीठप्रतिष्ठितपुरातत्त्वमन्दिरस्थेन
संस्कृतसाहित्य-दर्शनशास्त्राध्यापकेन
पं० सुखलालसंघविना
प्राकृतवाङ्मयाध्यापकेन जैनन्याय-व्याकरणतीर्थ-
पं० बेचरदासदोशिना च
पाठान्तर-टिप्पण्यादिभिः परिष्कृत्य संशोधितम्।

गूजरात विद्यापीठ
अमदावाद

प्रथमावृत्तिः, प्रतिसं० ५००] संवत् १९८७ [मूल्यम्-१० रूप्यकाणि.

टीका–टिप्पण्युपयुक्तग्रन्थसंकेतस्पष्टीकरणम् ।

संकेतः	ग्रन्थः
अनुयोगद्वारवृत्तिः	
आचारा० सू०	आचाराङ्गसूत्रम्
आवश्यकनि० उवग्घायनि०	आवश्यकनिर्युक्तौ
,, पढमाव०	उपोद्घातनिर्युक्तिः, प्रथमावश्य-
,, सामायिकनि०	कनिर्युक्तिः, सामायिकनिर्युक्तिः
उत्तरा०	उत्तराध्ययनसूत्रम् ।
ओघनि०	ओघनिर्युक्तिः ।
का०	कारिका ।
गु० मू०	गुलाबविजयसत्का सन्मतिसूत्रमूलप्रतिः ।
जीवविचा०	जीवविचारप्रकरणम् ।
जीवाजीवाभि० प्रतिप०	जीवाजीवाभिगमसूत्रे प्रतिपत्तिः ।
जम्बूद्वीपप्र० वक्ष०	जम्बूद्वीपप्रज्ञप्तौ वक्षस्कारः ।
तत्त्वार्थ० तत्त्वार्थसू०	तत्त्वार्थसूत्रम् ।
तत्त्वार्थ० भा०	तत्त्वार्थभाष्यम् ।
तत्त्वार्थराजवा०	तत्त्वार्थराजवार्तिकम् ।
द्रव्यगुणपर्यायरासः	
धर्मसं०	धर्मसङ्ग्रहणीसूत्रम् ।
नवत०	नवतत्त्वप्रकरणम् ।
नैषध०	नैषधकाव्यम् ।
न्यायकुमुद० लि०	न्यायकुमुदचन्द्रोदयः लिखितः ।
पराशरमाधवः	
पातञ्जलद०	पातञ्जलदर्शनम् ।
पञ्चाध्या०	पञ्चाध्यायी अमृतचन्द्रीया
पञ्चाश०	पञ्चाशकम् ।
पञ्चाशकटी०	पञ्चाशकटीका ।
पञ्चास्ति०	पञ्चास्तिकायः ।
प्रवचन० प्रवचनसा०	प्रवचनसारः ।
प्रवचनसारो० द्वा०	प्रवचनसारोद्धारे द्वारम् ।
बृहत्सं० वृक्ष०	बृहत्संहिता (वाराही संहिता) वृक्षायुर्वेद-प्रकरणम्
ब्रह्मसू० शां०	ब्रह्मसूत्रशाङ्करभाष्यम् ।
भगव० भगवतीसू०	भगवतीसूत्रम् ।
मनु० मनुस्मृ०	मनुस्मृतिः ।
महाभा० शान्ति० मो० प० अ०	महाभारतम् शान्तिपर्वणि मोक्षपर्व अध्यायः ।
महाव्युत्पत्तिः	बौद्धग्रन्थः ।
यास्कनि०	यास्कनिरुक्तम् ।

वाच०	वाचस्पत्य ।
वायुपुराणम्	
विशेषाव०	विशेषावश्यकभाष्यम् ।
वैद्यक० सिं०	वैद्यकशब्दसिन्धुः ।
वैशेषिकद्वात्रिंशिका	
श० } शात० }	शतकम् ।
शास्त्रदी०	शास्त्रदीपिका ।
शास्त्रवा० समु० स्तब०	शास्त्रवार्तासमुच्चये स्तबकः ।
श्लो० वा० वाक्याधि०	श्लोकवार्तिके वाक्याधिकारः ।
,, औत्पत्तिकसू०	,, औत्पत्तिकसूत्रम् ।
षड्द० स०	षड्दर्शनसमुच्चयः ।
षड्द० वृ०	षड्दर्शनसमुच्चयस्य बृहद्वृत्तिः ।
सनातन प्र० गु०	सनातनजैनग्रन्थमाला प्रथमो गुच्छकः ।
सनातन प्र० गु० स्वयंभूस्तो० अर०	,, अरनाथस्तोत्रम् ।
सूर्यसिद्धान्तः	
स्वयंभू० } स्वयंभूस्तो० }	स्वयंभूस्तोत्रम् ।

विषयानुक्रमः ।

विषयः	पृष्ठम्
साङ्ख्यसम्मतस्य सत्कार्यरूपस्य सद्वादस्य सदोषत्वख्यापनम्	७०६
सत्कारणककार्यरूपस्य सद्वादस्य सदोषत्वप्रकटनम् ।	७०७
कथञ्चित् सदसद्वादस्य निर्दोषत्वसमर्थनम् ।	"
प्रसङ्गात् चित्ररूपचर्चा ।	७०८
५१ गाथाव्याख्या ।	**७०९**
अन्वय-व्यतिरेकाभ्यां निरपेक्षनयद्वये मिथ्याज्ञानरूपत्वस्य दृढीकरणम् ।	"
५२ गाथाव्याख्या ।	**७१०**
कार्य-कारणयोर्भेदाभेदरूपत्वदर्शनेनानेकान्तरूपत्वोपपादनम् ।	"
५३ गाथाव्याख्या ।	**७१०-७१७**
सदाद्येकान्तवत् कालाद्येकान्तेऽपि मिथ्यात्वख्यापनम् ।	"
कालैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः ।	७११
स्वभावैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः ।	"
नियत्येककारणवादमुपन्यस्य " ।	७१४
कर्मैककारणवादमुपन्यस्य " ।	"
पुरुषैककारणवादमुपन्यस्य " ।	७१५
५४ गाथाव्याख्या ।	**७१७-७१८**
आत्मन्येकान्तरूपस्य नास्तित्वादिवादषट्कस्य मिथ्यारूपत्वकथनम् ।	"
५५ गाथाव्याख्या ।	**७१८**
आत्मन्येकान्तरूपस्यास्तित्वादिवादषट्कस्य मिथ्यारूपत्वकथनम् ।	"
५६ गाथाव्याख्या ।	**७१९-७२५**
एकान्तवादिनः साधर्म्येण वा वैधर्म्येण वैकान्तधर्मयुक्तधर्मिसाधनाशक्तत्वाभिधानम् ।	"
प्रसङ्गाद् हेत्वाभाससङ्ख्याविषया चर्चा ।	"
५७ गाथाव्याख्या ।	**७२५**
परस्परभिन्नं सामान्य-विशेषयोः स्वरूपमनूद्य तस्य निराकरणम् ।	"
५८ गाथाव्याख्या ।	**"**
अनेकान्तरूपतया वस्तु साधयतो वादिनोऽजेयत्वाभिधानम् ।	"
५९ गाथाव्याख्या ।	**७२६**
एकान्तानिश्चितरूपाभ्यां वस्तु वदतो लौकिकपरीक्षकाग्राह्यवचनत्वकथनम् ।	७२७
६० गाथाव्याख्या ।	**७२७-७३१**
निर्दोषभावप्ररूपणाया मार्गप्रकाशनम् ।	७२७
एकान्तक्षणिकाक्षणिकत्वे निरस्य तदुभयात्मकत्वसाधनम् ।	७२८
६१ गाथाव्याख्या ।	**७३१**
विवेचनविकलामागमस्य प्रतिपत्तिमाश्रयतां तत्त्वानभिज्ञत्वख्यापनम् ।	"
६२ गाथाव्याख्या ।	**७३२**
निरपेक्षैकनयप्रवृत्तानां दोषोद्भावनम् ।	"
६३ गाथाव्याख्या ।	**७३२-७४५**
न शासनभक्तिमात्रेण नाप्यांशिकज्ञानमात्रेणानेकान्तप्ररूपणाकुशल इति कथनम् ।	७३२
तत्त्वसप्तके निरूप्ये पूर्वं जीवाजीवौ निरूप्य तत्र कणादादिसम्मततत्त्वानामन्तर्भावप्रदर्शनम् ।	"
ध्यानचतुष्कस्य समेदप्रमेदं व्यावर्णनम् ।	७३४
ऐकान्तिकं वाच्यस्वरूपं निरसितुं लडादेरर्थविचारपक्षाः ।	७३७

संपादकीय निवेदन ।

सन्मतिना पांचमा भागमां त्रीजुं कांड पूरुं आवी गयुं छे. अने ए रीते त्रिकांडी आ आखो ग्रंथ मूळ अने टीका साथे पांच भागोमां पूरो थाय छे.

१९८६ नी शरुआतमां ज छपाई गयेलुं आखुं त्रीजुं काण्ड तैयार हतुं एथी मात्र मूळ अने टीकाटिप्पणी पूरतो पांचमो भाग बीजा भागोनी जेम प्रगट करी शकाय तेम तो हतो पण एमां केटलांक आवश्यक परिशिष्टो उमेरवानां होवाथी तेनुं प्रकाशन लंबाववामां आव्युं छे. आ पांचमा भागने अंगे अमारुं निवेदन नीचेना मुद्दा परत्वे छे.

१ त्रीजा कांडना मूळ अने टीकानुं परिमाण.

२ मूळनो विषय अने मूळकारनी तेजस्विता.

३ टीकाना स्वरूपनी चर्चा अने टीकाकारना समयनुं वातावरण.

४ कांडनां नामो अने ग्रंथना पूर्वमुद्रित नामनुं परिवर्तन.

५ प्रतिओनो उपयोग अने परिशिष्टोनो परिचय.

(१) आ कांडनी मूळ गाथाओ मात्र मूळवाळा लिखित पुस्तकमां ७० छे अने मूळसहित टीकावाळां लिखित पुस्तकोमां एक गाथा ओछी छे—६९ छे. मूळवाळा लिखित पुस्तकमां जे गाथा ७० मी छे ते गाथाने टीकावाळां पुस्तकोमां छेल्ली एटले ६९ मी गणवामां आवी छे. एटले मूळवाळा पुस्तकमां जे गाथा ६९ मी छे ते गाथाने टीकावाळां पुस्तकोमां स्थान आपवामां नथी आव्युं. अमारा मुद्रणमां अमे ए गाथाने पाठांतर तरीके पृ. ७५७ मां नोंधेली छे.

सन्मति प्रकरणनी छेल्ली गाथा आशीर्वादात्मक मंगळ सूचवे छे. अने आ वधारानी गाथा नमस्कारात्मक मंगळरूप छे. कहेवाय छे के शास्त्रना आदि, मध्य अने अंतमां मंगळ होवां जोइए, ते प्रमाणे आ प्रकरणमां पण आदि अने अंतमां मंगलात्मक शब्दनो निर्देश मळे छे. ए रीते विचार करीए अने आ वधारानी गाथाने वधारानी न मानीए तो अंते बे मंगळ थई जाय छे जेनो खास कंई उपयोग जणातो नथी. तेथी एम कल्पी शकाय छे के कदाच आ नमस्कारात्मक मंगळने सूचवती गाथा वधारानी ज होय अने मूळग्रंथकारनी कृति न होय. आ एक वात.

बीजी वात ए छे के टीकाकारे आ प्रकरणनी बधी गाथाओनी व्याख्या करेली छे. जे गाथा सहजमां समजाय एवी छे तेनी पण व्याख्या करवी छोडी नथी. जो आ गाथा मूळनी ज होत तो टीकाकारे पोतानी शैली प्रमाणे जरूर तेनी व्याख्या करी होत. छेवटे कांई नहि तो आ गाथा लखीने 'सुगमार्था' के 'स्पष्टार्था' आवुं पण लख्युं होत. पण टीकानी कोई प्रतिओमां—जेमांनी केटलीक आजथी ५०० वर्ष जेटली जूनी छे तेमां—एकेमां आ गाथानो उल्लेख ज नथी. आ बन्ने कारणोथी अमारी कल्पना एवी थाय छे के अनेकांतवादना कोई भक्ते आ गाथाद्वारा अनेकांतवादनुं खरुं महत्त्व बतावी अनेकांतवादना आ प्रतिष्ठित प्रकरणमां एने उमेरेली होवी जोईए.

बृहट्टिप्पनीकारे आ प्रकरणनी १७० गाथा नोंधेली छे. अने जैनग्रंथावलीमां ए १६८ नोंधायेली छे. पण अमारी सामेनी टीकावाळी बधी प्रतिओमां १६६ थी वधारे गाथाओ क्यांये मळती नथी. तेथी वधारानी गाथानो खुलासो अमे उपर प्रमाणे करीए छीए, अने एथी आ त्रीजा कांडनी ६९ गाथाओ होवानुं प्रमाणित करीए छीए.

आगळना भागो–कांडो–नी जेम आ भागमां पण टीकाकारे पोतानी टीकाने केटलेक स्थळे विस्तारेली छे अने केटलेक स्थळे टूंकावी छे. एकंदर जोतां कोई पण भाग करतां आ भागमां टीकानुं परिमाण खास ओछुं जणाशे नहि. आ भागमां द्वितीय भागनी अपोहचर्चानी जेम कणादमतनी परीक्षाना प्रकरणमां श्रीशांतरक्षितना तत्त्वसंग्रहनुं पूरेपूरुं प्रतिबिंब छे, जे अमे टिप्पणमां एनी कारिकाओ वगेरे मूकीने जणाव्युं छे.

(२) न्यायना कोई पण ग्रंथमां प्रमाण अने प्रमेय ए बे तत्त्वनी चर्चा प्रस्तुत होय छे ज्यारे जैनन्यायना ग्रंथमां ए बे उपरांत त्रीजी नयनी चर्चा पण होय छे. प्रस्तुत प्रकरणमां पहेलामां नयनी, बीजामां ज्ञान वा प्रमाणनी अने त्रीजा कांडमां ज्ञेय के प्रमेयनी चर्चा करेली छे.

गौतम के दिग्नागनी प्रमेयनी चर्चाओनी जेम आ प्रकरणनी प्रमेयनी चर्चामां पदार्थना स्वरूप विषे एटले के संसारमां मुख्य तत्त्वो अमुक अमुक छे, तेना भेदो प्रभेदो अमुक छे अने ते प्रत्येकनुं स्वरूप अमुक जातनुं छे, एवी खास कंई चर्चा करवामां नथी आवी. परंतु पदार्थना स्वरूपने कई रीते समजवुं जोईए अने पदार्थने कई रीते जोईए तो बराबर समजाय एवी समजण वधु वीगतथी आपवामां आवी छे, अने विचारना जगतमां जीव अने जगत विषे जे जे विरोधी मान्यताओ चाली आवे छे तेनो समन्वय करवानी दृष्टि पण आ प्रकरणमां खास मूकवामां आवी छे.

एक अनुभवी कहे छे के दृश्य अने अदृश्य बधुं नित्य छे, अने बीजो अनुभवी कहे छे के ए बधुं अनित्य छे. आ मान्यताओ जे बे दृष्टिकोण उपर रहीने स्थिर करवामां आवी छे ते दृष्टिकोण जिज्ञासुओना ख्यालमां आवी जाय तो ए बे वच्चेनो विरोध तुरत टळी जाय. ए विरोध टाळनारी सरळ अने समाधायक पद्धति आ ग्रंथमां खास स्पष्ट करवामां आवी छे.

एक द्रष्टा एम कहे छे के अमुक पदार्थ मने तो लांबो देखाय छे, बीजो कोई एम कहे के मने तो ए ज पदार्थ टूंको देखाय छे अने त्रीजो एम कहे के ए त्रिकोण देखाय छे; त्यारे आ बधाना दृष्टिकोणने समजनारो वैज्ञानिक एम कहे के ए पदार्थ लांबो, टूंको अने त्रिकोण देखाय छे ए बधुं सापेक्ष भावे बराबर छे. कारण के जोनाराओनी निर्दोष दृष्टिओ अने पदार्थ वच्चेनो संबंध जुदी जुदी जातना छे. आ समाधानकारी दृष्टिनुं नाम अनेकांतवाद विभज्यवाद के स्याद्वाद छे.

जैन आगमोमां आ दृष्टिनुं दिग्दर्शन तो छे ज पण आ ग्रंथकारे आ प्रकरणमां ए दृष्टिने एक वैज्ञानिकनी रीते समजावेली छे. एटले के जेम कोई वैज्ञानिक कोई तत्त्वनुं पृथक्करण करीने तेमांना प्रत्येक अंशने स्पष्ट करी बतावे छे तेम आचार्य सिद्धसेन दिवाकरे आ कांडमां अनेकांतवादनी बधी बाजुओने खुल्ली रीते समजावेली छे. एम अनेकांतवादनुं शास्त्रीय पृथक्करण आ पुस्तकमां ज पहेलुं थयुं छे.

आ प्रकरणना प्रांत भागमां केटलीक गाथाओ एवी पण छे जे उपरथी आपणे तेना कर्तानी तेना पोताना युगमां व्यापेली मंदताने तोडनारी तेजस्विता अने रूढ विचारधारानी सामे स्थापेला रचनात्मक विचारप्रवाहने पण जोई शकीए छीए.

केटलीक वार एवुं बने छे के पोताने सत्यद्रष्टा माननारा भलभला मोटा माणसो पण मात्र शब्दस्पर्शी होय छे, जे शब्दस्पर्शथी पोतानुं जीवन अने सामाजिक जीवन छिन्नभिन्न थतुं होय छे. ज्यारे बधी बाजी हाथमांथी जवानो वखत आवे छे त्यारे पण ए शब्दस्पर्श नथी मूकातो.

आचार्य सिद्धसेनना जमानामां आवुं आवुं होवानुं झांखुं झांखुं दर्शन थाय छे.

तेओ कहे छे के—

"कांई शासन उपरना मात्र रागने लीधे कोई सिद्धांतनो ज्ञाता एटले सिद्धांतनो बधी रीते तलस्पर्शी अभ्यासी थई शकतो नथी. तेम ज कोई अमुक अमुक ज दृष्टिकोण उपर रहीने शास्त्रने समजावतो होय ते पण तेनी प्ररूपणामां निश्चित होई शकतो नथी" (गाथा. ६३).

"सूत्र अर्थना आधाररूप छे. माटे सूत्रने ज वळगी रहेवामां आवे अने तेना व्यापक अर्थनो विचार न करवामां आवे तो कदी पण अर्थनी प्रतिपत्ति थई शकती नथी. ए अर्थनुं भान तो तेने ज थई शके छे जे दुर्गम एवा नयवादना गहन वनमां प्रवेश करवाने उत्साही होय." (गा० ६४)

आवुं छे माटे आचार्यश्री कहे छे के—

"सूत्रना भणनाराए अर्थसंपादनमां खूब यत्न करवो जोईए. ते न करनारा केटलाक धृष्ट अने अशिक्षित आचार्यो महापुरुषोनी आज्ञानी फजेती करे छे." (गा० ६५)

"जेने अज्ञ लोको बहु ज्ञानी समजता होय, जे एवा ज लोकोमां पूजातो होय अने जेनो शिष्य-परिवार कांई ठीक ठीक होय तेवो आचार्य जो अनेकांतना स्वरूपने निश्चितपणे न समजतो होय तो ते आचार्य सिद्धांतनो द्रोही छे." (गा० ६६)

आजना क्रांतदर्शी संतनी जेम आचार्य सिद्धसेन आटलेथी न अटकतां वधुमां जणावे छे के:—

"जेओ पोताना क्रियाकांडमां कुशळ छे अने ए क्रियाकांडने ज प्रधानपणे वळगीने चाले छे तेओ जो पोताना सिद्धांतनुं अने परसमयनुं विशाळ ज्ञान न धरावता होय तो तेओ ए क्रियाकांडना भारनो कशो उद्देश ज समजता नथी." (गा० ६७)

आचार्यश्रीनां आ वचनो उपरथी तेमना समयना तमोमय वातावरणनो ख्याल आववा साथे ते वातावरणने भेदवानुं सामर्थ्य धरावनारुं तेमनुं तेज पण प्रगट थाय छे.

(३) टीकाकारश्रीए पोतानी शैली जेवी बीजा बे कांडोमां एकसरखी राखी छे तेवी आमां पण राखी छे. तेमनो उद्देश तो ए लागे छे के मूळ ग्रंथने आश्रीने तेमना पोताना समय सुधी स्थिर थयेलां बधां तत्त्वचिंतनो आ टीकामां गोठवी देवां जे बधां कांडोमां एकसरखी रीते जळवाई रहेलो देखाय छे.

आ कांडनी टीकामां एक स्थळे ब्राह्मणत्व विषे (गाथा ४९ पृष्ठ ६९९) चर्चा छे अने एक स्थळे मूर्तिना शृंगार (भूषा) विषे (गा० ६५. पृ० ७५४) चर्चा छे. ते बन्ने चर्चाओ टीकाकारना समयना वातावरणनो ख्याल आपवाने पूरती छे.

जातिवाद विषे जैनोनो अने बौद्धोनो एकसरखो मत ए छे के कोई जाति मात्र जातिने लीधे मान्य के पूज्य गणाती नथी जो तेमां लायकात न होय तो. आ वस्तु भगवान महावीर पछी जैनोना जीवनमां घणा वखत सुधी टकी रहेली हती, आजे तो ते नथी. तेने लोपावानो प्रसंग ब्राह्मणोना जातिप्रधान बंधारणना सामर्थ्यनी असर सिवाय बीजो कल्पी शकातो नथी, पण ते लोपावानी तारीखनो निर्णय करवो कठण छे. छतां य टीकाकार अभयदेवे आ टीकामां ए जातिवादनी सामे थवाने बौद्धाचार्य शांतरक्षित जेवो ज प्रयास करेलो छे, तेथी कदाच एम कल्पी शकाय छे के एना जमाना सुधी श्वेतांबर जैनोमां ए जातिवादनी असर न होय अथवा टीकाकारे आ वात मात्र चर्चा तरीके ज लखेली होय.

बीजुं ए के टीकाकारना जमानामां मूर्तिनो शृंगार करवा न करवानी चर्चा वधु पडती चालती हशे जेथी एमणे आ टीकामां पोतानो शृंगार करवानो पक्ष स्थापित करेलो जणाय छे. वस्तुतत्त्ववि-चारना ग्रंथोमां आवी चर्चाओने अवकाश न होवो जोईए छतां ते ते समयनुं सांप्रदायिक वातावरण ज आवी चर्चाओने छेडी दे छे.

(४) टीकावाळी कोई प्रतिमां कांडनां खास नामो लखवामां आव्यां नथी. मात्र मूळनी प्रतिमां पहेला कांडनुं नाम 'नयकांड' छे, अने बीजानुं नाम 'जीवकांड' छे. त्रीजानुं कशुं नाम नथी आप्युं.

अमे अहीं कांडोनां जे नामो राखेलां छे ते मूळना विषयने अनुसरीने राखेलां छे. मूळनी प्रतिमां जे बीजा कांडनुं नाम 'जीवकांड' लखेलुं छे तेना करतां मूळनो विषय जोतां तेनुं 'ज्ञानकांड' नाम वधारे बंधबेसतुं लागे छे. तेथी ज अमे ए प्रतिमांनुं पहेलुं नाम कायम राख्युं छे. बीजा कांडनुं नाम बदल्युं छे अने त्रीजा कांडनुं नाम तो अमारे विषय प्रमाणे नवुं कल्पवुं पड्युं छे.

आगळना चारे भागोमां परंपराप्रसिद्ध एवुं 'सम्मति' नाम कायम राखेलुं पण ए विषे विशेष ऊहापोह करीने अमे आ भागमां 'सन्मति' एवुं नाम राखेलुं छे. ए विषे अमे तेम करवाना कारणनी सप्रमाण चर्चा छट्ठा भागमां प्रस्तावनामां करेली छे.

(५) पाठांतरोनी पद्धति आ भागमां बीजा भागोना जेवी ज राखी छे अने बीजा भागोमां वपरायेली प्रतिओनो उपयोग पण तेटलो ज थयो छे. कोई खास नवी प्रति उमेराणी नथी पण ताडपत्रनी बे प्रतिमांनी ल० संज्ञावाळी प्रतिनो अंतनो घणो भाग अधूरो होवाथी तेनो उपयोग अमे आमां करी शक्या नथी.

परिशिष्टोनो परिचय.

ग्रंथनुं रहस्य, संशोधकोने उपयोगी एवी ऐतिहासिक वस्तु अने संपादनशैली वगेरेने समजवा माटे ग्रंथने अंते नीचे जणावेला स्वरूपवाळां १३ परिशिष्टो अकारादि क्रममां आपवामां आव्यां छे.

१. पहेला परिशिष्टमां सन्मतिनी मूळ गाथाओ तेना कांडना अने गाथाना अंक साथे मूकवामां आवी छे.

२. जे जे श्वेताम्बरीय के दिगम्बरीय न्यायग्रंथो प्रस्तुत संपादनने अंगे अमारा जोवामां आवेला, तेमां ज्यां ज्यां सन्मतिसूत्रनी मूळ गाथाओ उद्धृत करायेली छे, तेने लगतुं बीजुं परिशिष्ट छे. एमां नयचक्र अने सिद्धिविनिश्चय जेवा केटलाक हस्तलिखित दुर्लभ ग्रंथोनी पण नोंध छे.

३. त्रीजुं परिशिष्ट पण बीजाना जेवुं ज छे, मात्र तेमां सन्मतिना रहस्यने पूरेपूरुं पामी पोतानी कृतिमां परिणमावनाराओमां विरल एवा श्रीमान् यशोविजय उपाध्यायजीना लगभग बधा मुद्रित ग्रंथोनो उपयोग करेलो छे.

श्रीमान् यशोविजयजीए पोताना ग्रंथमां ज्यां ज्यां सन्मतिसूत्रनी गाथाओ उद्धरेली छे त्यां त्यां बधे तेमणे विवरण पण करेलुं छे. एमांनुं केटलुंक विवरण तो स्वतंत्र छे, जे प्रस्तुत टीकाने अनुसरतुं पण नथी. अमे एम धारेलुं के श्रीमान् यशोविजयजीना विवरणवाळी बधी गाथाओनो एक संग्रह करवो, जे सन्मतिनी लघु टीका जेवो बनी जाय; पण ए माटे एक खास जुदो बीजो भाग ज तैयार करवो पडत जेथी ग्रंथ प्रकाशनमां घणो वधारे विलंब थात, तेथी ए संग्रह न करतां अहिं आ परिशिष्ट ज एवुं आपेलुं छे के तेने वांचनारो कोई व्युत्पन्न विद्यार्थी पण ए संग्रहने सुखेथी करी शके.

४. परिशिष्ट चोथामां कांडना अने गाथाना अंक साथे तथा गाथानी व्याख्याना पृष्ठांक साथे मूळगाथागत शब्दोनो कोश आपेलो छे. जे एक ज शब्द ज्यां ज्यां जेटली वार वपरायो छे, तेना पण उपर लख्या प्रमाणेना बधा अंको आपी दीधा छे.

५. पांचमा परिशिष्टमां पूर्वपक्ष दर्शाववा के संवाद माटे टीकाकारे उद्धरेलां अन्यग्रंथगत सघळां गद्य के पद्य अवतरणोनो ग्रंथना पृष्ठांक साथे उतारो छे. तथा जे अवतरणो उपर विशेष टिप्पणो

करवामां आव्यां छे, ते अवतरणो पासे कोष्ठकमां टिप्पणीना अंको पण मूकवामां आव्या छे. (आ प्रत्येक अवतरणोनां टीकाकारे नहिं दर्शावेलां मूळ स्थानो मळ्यां त्यां सुधी शोधी शोधीने मूकेलां छे. जे मूळ स्थानो मळी शक्यां नथी ते अवतरणो पासे ग्रंथमां खाली [ ] आवुं निशान मूकेलुं छे.

६. परिशिष्ट छट्ठामां टीकाकारे नोंधेला ग्रंथकारो अने ग्रंथोनां नामोनो उल्लेख छे.

७. सातमा परिशिष्टमां टीकाकारे चर्चेला वादो अने वादीओनां नामोनो निर्देश छे.

८. परिशिष्ट आठमामां दर्शनशास्त्र अने खास तो जैनदर्शनने लगता अने टीकाकारे निर्देशेला विशिष्ट शब्दोनो कोश ग्रंथना पृष्ठांक साथे आपवामां आव्यो छे. जे शब्दो उपर खास टिप्पणो करवामां आव्यां छे ते शब्दोनी पासे कोष्ठकमां टिप्पणीना अंको पण जणाववामां आव्या छे.

९. नवमा परिशिष्टमां समग्र ग्रंथमां टीकामां वपरायेला देशसूचक, स्थळसूचक, आचाररूढिसूचक, वस्तुसंज्ञासूचक अने ग्रन्थान्तर विषय वगेरेना सूचक एवा खास ऐतिहासिक विशिष्ट शब्दोने पृष्ठना अने पंक्तिना अंको साथे मूकवामां आव्या छे. अने जे शब्दो उपर टिप्पणो करेलां छे तेओ पासे कोष्ठकमां टिप्पणीना अंको पण आपेला छे.

१०. टीकाकारे जेनां स्थळोनो निर्देश नथी कर्यो एवां अवतरणोनां अमोए शोधेलां स्थळोनां नामोनो आ दशमा परिशिष्टमां निर्देश छे.

११. परिशिष्ट अगीआरमामां प्रतिओमां मळी आवेलां टिप्पणोनो ते ते प्रतिना नाम साथे अने अमे करेलां टिप्पणोनो ग्रंथ-पृष्ठ अने टिप्पणना अंक साथे संग्रह करेलो छे.

१२. परिशिष्ट बारमामां संपादन माटे एटले विवेचन, तुलना, टिप्पण के अवतरण वगेरे माटे संपादकोए निर्देशेला ग्रंथकारो अने ग्रंथोनां नामोनो ग्रंथना पृष्ठ अने टिप्पणना अंक साथे निर्देश करेलो छे.

१३. परिशिष्ट तेरमामां संपादनने अंगे वपरायेला ग्रंथमात्रनां मुद्रण स्थान, संपादक अने मुद्रणसमय वगेरेनो उल्लेख छे.

श्रीमान् प्रवर्तक कान्तिविजयजीना शिष्य श्रीमान् चतुरविजयजी अने पुण्यविजयजीना आभारनो उल्लेख अमे प्रत्येक भागमां करता आव्या छीए. पण आ भागमां तो अमारा उपर एमनुं ऋण निःसीम छे, एम कहेवामां कांई उपचार करवा जेवुं नथी. कारण के आ भागमां आपेलां बधां परिशिष्टोनां तथा छट्ठा भागमां आवनार गुजराती अनुवाद अने प्रस्तावनानां बधां प्रूफो तेमणे घणी काळजीथी तपासी आपवानी कृपा करी छे. जो तेमनी आ कृपानो लाभ अमे न मेळवी शक्या होत तो अमारी शारीरिक अगवडोने लीधे आ भाग कोण जाणे क्यारे बहार पडत अने समग्र ग्रंथ प्रकाशमां पण क्यारे आवत ए कही शकात नहि. आ साथे जैनसाहित्यप्रेमी श्रीकेशवलालभाई प्रेमचंद मोदीना पण अमे कृतज्ञ छीए, जेमना तरफथी आ प्रवृत्तिने अंगे अनेक वार उपयोगी सहायता अमे मेळवेली छे. परिशिष्टना विधानमां खास सहायक एवा सहृदय विद्वान् मित्र श्रीमान् रसिकलाल भाईनो आभार पण भूली शकाय तेम नथी.

सुखलाल
अने
बेचरदास.

सम्पादकीयं निवेदनम् ।

सन्मतेरस्मिन् पञ्चमे भागे तृतीयं काण्डं समाप्तम् । एवं च काण्डत्रयमितः सटीकोऽयं समग्रः समूलो ग्रन्थः पञ्चसु भागेषु पूर्णो जातः ।

गतवर्षारम्भ एव तृतीयं काण्डं मुद्रितमासीत् । ततश्च अन्यभागवदयमपि मूलटीकाटिप्पणियुक्तः पञ्चमो भागः प्राकाश्यं नेतुं योग्योऽभवत् परन्तु अनेन भागेन सह मुद्रणीयानि उपयोगीनि आवश्यकानि च परिशिष्टानि क्रियमाणानि आसन्, अत एवायं भागो विलम्बेन विदुषां करतलमागतः । अस्य भागस्य संबन्धे निवेदनीयानि मुख्यानि वस्तूनि इमानि ।

(१) तृतीयस्य काण्डस्य मूलटीकयोः परिमाणम् ।

(२) मूलस्य विषयो मूलकारस्य च तेजस्विता ।

(३) टीकास्वरूपचर्चा टीकाकारसमयस्य च परिस्थितिः ।

(४) काण्डानां नामानि पूर्वमुद्रितस्य च ग्रन्थनाम्नः परिवर्तनम् ।

(५) प्रतीनामुपयोगः परिशिष्टानां च परिचयः ।

(१) मूलमात्रे लिखितपुस्तकेऽस्य भागस्य सप्ततिर्गाथाः प्राप्यन्ते । मूलसहिते च तादृशे टीकापुस्तके गाथानामेकोनसप्ततिर्लभ्यते । मूलमात्रपुस्तके या सप्ततितमी गाथा सैव सटीकेषु पुस्तकेषु अन्तिमा अर्थादेकोनसप्ततितमी गणिता । या गाथा मूलपुस्तके एकोनसप्ततितमी सा टीकापुस्तकेषु क्वापि न दृश्यते । अतश्च सा मूलपुस्तकगता गाथा ७५७ पृष्ठे पाठान्तरत्वेनास्माभिर्निर्दिष्टा ।

सन्मतिप्रकरणस्यान्तिमा गाथा आशीर्वादरूपं मङ्गलं सूचयति । इयं च मूलपुस्तकगता अन्तिमा विवादग्रस्ता गाथा नमस्कारात्मकमङ्गलरूपा । शास्त्रस्यादौ मध्येऽन्ते च मङ्गलमावश्यकमिति प्राचीनः प्रवादः । प्रवादानुसारेण चास्मिन् प्रकरणे आदावन्ते च मङ्गलात्मकता व्यक्ता । यदि मूलपुस्तकगता अन्तिमा गाथा प्रक्षिप्ता नावधार्येत तदा प्रकरणस्यान्ते मङ्गलद्वयापत्तिर्जायेत । न चान्ते मङ्गलद्वयस्य कश्चिदुपयोगः । अतो मूलपुस्तकगता अन्तिमा नमस्कारात्मकमङ्गलसूचिका गाथा अधिकैव भवेत् न मूलकारकृतिरिति ।

अन्यच्चास्य प्रकरणस्य सर्वा अपि गाथाः टीकाकारेण व्याख्याताः । या गाथा श्रवणमात्रेणैव गतार्था साऽपि टीकाकृता स्वव्याख्यया नास्पृष्टा रक्षिता । इयं च गाथा यदि मूलकारकृतिरेवाभविष्यत् तदा टीकाकारस्तामवश्यं व्याख्यास्यदेव । अन्ततो नान्यत्किमपि किन्तु इमां गाथां निर्दिश्य 'सुगमार्था' 'स्पष्टार्था' वेत्युल्लेखं तु सोऽकरिष्यदेव । परन्तु टीकायाः कस्मिंश्चित् प्राचीनतमे एकस्मिन्नपि पुस्तके नेयं गाथा उल्लिखिता दृश्यते । अतो विवादाध्यासिता सा गाथा अनेकान्तवादस्य केनचिद्भक्तेन तन्माहात्म्यदर्शनाय अस्मिन् प्रतिष्ठिते अनेकान्तवादप्रकरणे प्रक्षिप्ता भवेदिति अस्मन्मतम् ।

बृहट्टिप्पणिकृता अस्य प्रकरणस्य गाथानां सप्तत्यधिकं शतं निर्दिष्टम् । जैनग्रन्थावल्यां तु अष्टषष्ठ्यधिकं शतं प्राप्यते । उपयुज्यमानासु सर्वास्वपि सटीकप्रतिषु क्वापि षट्षष्ठ्यधिकशतादतिरिक्ता एकाऽपि गाथा न लभ्यते । अतस्तस्या अधिकाया गाथायाः पूर्वोक्तमेव निराकरणं स्थिरीकृतमस्माभिः । ततश्चास्य काण्डस्य एकोनसप्ततिर्गाथाः प्रमाण्यन्ते ।

अस्मिन्नपि काण्डे टीका कियत्सु स्थलेषु विस्तारिता कियत्सु च संक्षेपिता। प्रमाणतोऽस्य काण्डस्यापि व्याख्यामानं न न्यूनं प्रतिभाति। अस्मिन्भागेऽपि कणादमतपरीक्षाप्रकरणं सर्वथा शान्तरक्षितकृततत्त्वसङ्ग्रहप्रतिच्छायैव। तच्चास्माभिस्तत्त्वसङ्ग्रहकारिकाः पञ्जिकां च टिप्पणे उपन्यस्य सुस्पष्टितम्।

(२) न्यायविषयके ग्रन्थे सर्वत्रापि प्रमाणं च प्रमेयं चेति तत्त्वद्वयी एव प्रस्तुता। जैनन्यायग्रन्थे तु सैव नयतत्त्वाधिका तत्त्वत्रयी चर्च्यते। प्रस्तुते प्रकरणे प्रथमे नयो द्वितीये प्रमाणम् तृतीये च काण्डे प्रमेयमिति तत्त्वत्रयी चर्चिताऽस्ति।

गौतमो दिग्नागो वा स्वीये स्वीये प्रकरणे 'जगति प्रधानानि तत्त्वानि इमानि, तेषां भेदाः प्रभेदा एते, तेषु एकैकस्य स्वरूपमेतत्' इत्यादिपद्धत्या यथा प्रमेयं चर्चयाञ्चकार तथा नायमाचार्योऽस्मिन् प्रकरणे किमपि तादृशं चर्चयामास। किन्तु पदार्थस्वरूपं कया रीत्या बोद्धव्यं कया रीत्या च पदार्थो दर्शनीयो येन सुज्ञानः स्यादित्येतादृशी बोधसरणी सविस्तरमत्र प्रकरणे ग्रन्थकृता निरूपिता। यच्च संसारे जीवजडविषया या या विरोधिन्यः परम्पराः परम्परातः प्रचलिताः कर्णोपकर्णमायाताश्च सन्ति तासां सर्वासां समन्वयबीजमपि अत्र प्रकरणे प्रतिष्ठापितमाचार्येण।

एकः कश्चिदनुभवी कथयति 'यदिदं दृश्यमदृश्यं वा तत्सर्वं नित्यम्'। द्वितीयश्च महानुभावः कथयति 'यदिदं सत् तत्सर्वमनित्यम्' इति। यां मूलदृष्टिमालम्ब्य एते विरुद्धे मते तैस्तैरनुभविभिः स्थिरीकृते सा दृष्टिर्यदि तत्त्वजिज्ञासुभिर्ज्ञायेत--विचारगोचरं प्राप्येत तदा तयोर्विरुद्धयोर्मतयोर्विरोधम्नूर्णमुपशान्तः स्यात्। या च तद्विरोधशमनी सरला समाधायिका पद्धतिः सैवास्मिन्ग्रन्थे सुस्पष्टिता। सा दृष्टिरनेकान्तवादो विभज्यवादः स्याद्वादो वा इति नाम्ना जैनशास्त्रे विश्रुता।

जैनागमेषु तस्या दृष्टेर्बीजं विद्यत एव परन्तु वैज्ञानिकेन इव मूलकृता सिद्धसेनाचार्येण प्रस्तुते प्रकरणे सा दृष्टिस्तदीयांशान् पृथक् पृथक् कृत्वा विशदीकृत्य च दर्शिता। अनेकान्तवाददृष्टेरेतादृशं शास्त्रीयं पृथक्करणमस्मिन् पुस्तक एव प्रथमं प्राप्यते।

अयं महावादी सिद्धसेनाचार्यो रूढमार्गानुगामी नासीत् किन्तु स्वयुगव्याप्तं सामाजिकाज्ञानान्धतमसं दूरीकर्तुं स दिवाकरो दिवाकर एव जातः। एतच्चास्य प्रकरणस्य प्रान्तस्थिताभिर्गाथाभिः स्पष्टमवगम्यते।

इतरेषां सत्प्रवृत्तिं तिरस्कुर्वन्तः स्वप्रवृत्तिमेव सत्यशोधिकां च मन्यमानाः सूरयो न सत्याचारपराः किन्तु केवलं शब्दब्रह्मविद्या वाक्पटव एव इत्यपि जगति दृश्यते। ततश्च निखिलः समाजोऽपि उत्पथानुगो भवति। तादृशं समाजं पश्यन्तोऽपि ते शब्दस्पर्शपरा गुरवः कुनृपा इव स्वसत्तासाधकं दुराग्रहं न त्यजन्ति। एतादृशान् सिद्धान्तपण्डितंमन्यमानान् सूरीन् सिद्धसेनाचार्यो एवं शिक्षयन्ति—

"जिनशासनरागमात्रेण कश्चित् सिद्धान्तज्ञो न हि भवितुमर्हति। शास्त्रज्ञोऽपि कश्चिदेकान्तग्रहेण तत्त्वनिरूपणायां निश्चितो न भवति।" (गाथा ६३)

"सूत्रमेवार्थस्य मूलम् अतस्तद्रटनमेव श्रेय इति मन्यमानाः सूत्रगतं व्यापकमर्थं न विचारयेयुः तदा कदाऽपि ते न सूत्रार्थं प्रतिपत्तुं समर्थाः। सूत्रार्थं सम्यक्तया त एव प्रतिपद्यन्ते ये दुर्गमं नयवादगहनवनमवगाहितुमुत्साहिन इति।" (गा० ६४)

सूत्रं रटद्भिस्तद्रटनापेक्षया तदर्थसंपादने भूरि भूरि यतितव्यम्। तदकुर्वन्तः कियन्तो धृष्टा अशिक्षिताश्चाचार्या महापुरुषाज्ञां विडम्बयन्ति।" (गा० ६५)

"यमज्ञा ज्ञानिनं मन्यन्ते पूजयन्ति च यस्य च शिष्यपरिवारो गणनाकोटिमागत एतादृश आचार्यो यद्यनेकान्तस्वरूपं सम्यग् नावगच्छेत् तर्हि स जिनसिद्धान्तद्रोही बोध्यः।" (गा० ६६)

अथतनः कान्तदर्शीव सिद्धसेनाचार्यो न इयतैव कथनेन विरमति किन्तु किञ्चिदधिकमपि उद्घोषयति ।

"स्वसिद्धान्तं परसमयं च गभीरतया अजानन्तः क्रियाकाण्डमेव च प्रधानया अवलगन्तस्ते कमपि क्रियाकाण्डमारोद्देशमेव नावबुध्यन्ते ।" (गा० ६७)

उपर्युक्तगाथागतैराचार्यवचनैस्तत्समयतमोमयपरिस्थितिभेदकमाचार्यतेजः सुस्पष्टतया प्रकटीभवति ।

(३) टीकाकृता काण्डद्वये या टीकाशैली योजिता सैवास्मिन्काण्डेऽपि दृश्यते । मूलग्रन्थमाश्रित्य स्वसमयं यावत् स्थिरीभूतानि सर्वाणि तत्त्वचिन्तनानि अस्यां टीकायां योजनीयानीत्युद्देशेनेयं टीका कृता इत्यवभाति । स चोद्देशस्त्रिष्वपि काण्डेषु समान एव व्यवस्थितो दृश्यते ।

ब्राह्मणत्वं नित्यमनित्यं वेति जिनमूर्तिराभूषणैराभूषणीया न वेति च चर्चाद्वयं टीकाकृता अस्य काण्डस्य टीकायां प्रक्रान्तम् । तदेतत् टीकाकृत्समयस्थितिं संसूचयितुमलम् ।

"कम्मुणा बम्भणो होइ कम्मुणा होइ खत्तिओ" (उत्तराध्ययन अध्ययन २५ गाथा ३२) इत्यागमवचनाद् जिनशासनप्रवराः कामपि जातिं जातित्वेनैव न उत्कर्षयन्ति किन्तु गुणैः प्रधाना-मेव प्रधानां मन्यन्ते । बौद्धानामपि जातिवादविषये ईदृशमेव मतम् । तच्च आचार्यशान्तरक्षितेन तत्त्वसङ्ग्रहे सुसमर्थितम् । गुणप्रधानामेव जातिं सुजातिं मन्वानः श्रीज्ञातपुत्रीयः सिद्धान्तो ज्ञातपुत्रजिन-निर्वाणानन्तरमपि तदनुयायिभिश्चिरमाचरितः, परन्तु अधुनातनजैनेषु तदाचरणा न दृश्यते । ते तु केवलं जातिमेव प्रधानां मन्वाना अधुनातनब्राह्मणा इव दृश्यन्ते । एतादृशविपरीताचारप्रसरणे जातिप्रधानब्राह्मण-समाजप्रबलसंसर्गमन्तरा नान्यत्किमपि प्रबलं कारणमवभाति । यश्च मूर्तिभूषाविषयो विवादोऽत्र टीकाकृता उदलेखि स तु साम्प्रदायिक एव । वस्तुतस्तु एतादृशेषु तत्त्वविचारग्रन्थेषु एते साम्प्रदायिका विवादा न स्थान-मर्हन्ति । किन्तु "तत्त्वाद्रूढिर्बलीयसी" इति न्यायेन तत्त्वविचारेष्वपि अहो ! रूढिसाम्राज्यं सुदुर्निवारम् ।

(४) टीकाप्रतिषु कापि काण्डनाम्नामुल्लेखो न विद्यते । केवलं मूलप्रतौ नयकाण्डेति नाम्ना प्रथमं काण्डं जीवकाण्ड इति नाम्ना च द्वितीयं काण्डमभिहितं तृतीयस्य तु किमपि नाम न निर्दिष्टम् । अत्र तु मूलग्रन्थविषयमनुसृत्य काण्डनामानि अस्माभिः परिवर्तितानि प्रकल्पितानि च ।

पूर्वमुद्रितेषु चतुर्षु अपि भागेषु मुखपृष्ठे परम्पराप्रसिद्धं 'सम्मति' इति नाम मुद्रितम् । अस्मिन् भागे तु तत्स्थाने 'सन्मति' इति नाम सविशेषं विचार्य योजितम् । एतद्विषया सप्रमाणा चर्चा षष्ठे भागे प्रस्तावनायामस्माभिः कृता ।

(५) पाठान्तरयोजनपद्धतिः प्रतीनामुपयोगश्च पूर्वमुद्रितभागवदत्रापि अवगन्तव्यः । केवलं 'ल' संज्ञिका ताडपत्रप्रतिः प्रान्ते त्रुटिताऽऽसीत् ।

परिशिष्टानां परिचयः ।

ग्रन्थरहस्यं संशोधकोपयोगि ऐतिहासिकं वस्तु सम्पादनशैलीं चावगन्तुं ग्रन्थान्ते त्रयोदश परिशि-ष्टानि अकारादिक्रमेण योजितानि । तत्स्वरूपं यथा—

(१) सन्मतेः सर्वा मूलगाथाः काण्डाङ्केन गाथाङ्केन च सह प्रथमपरिशिष्टे दर्शिताः ।

(२) श्वेताम्बरीया दिगम्बरीयाश्च ये ये न्यायग्रन्थाः प्रस्तुतसम्पादनाय अस्माभिरवलोकितास्तेषु यत्र यत्र सन्मतिसूत्रमूलगाथा उद्धृतास्तत्तद्गाथास्थलदर्शकं द्वितीयं परिशिष्टम् । नयचक्र-सिद्धिविनि-श्चयप्रमुखा हस्तलिखिता दुर्लभा ग्रन्था अपि अत्र परिशिष्टे उपयुक्ताः ।

(३) तृतीयमपि परिशिष्टं द्वितीयपरिशिष्टमिव ज्ञेयम्, नवरम् सन्मतिसूत्ररहस्यं यथार्थं प्राप्य स्वकृतौ तदवतारयत्सु प्रधानानां श्रीमतां यशोविजयोपाध्यायानां प्रायस्सर्वे मुद्रिता ग्रन्था अत्र परिशिष्टे उपयुक्ताः।

श्रीमता उपाध्यायेन स्वकृतौ यत्र या गाथा उद्धृता तत्र तस्या विवरणमपि कृतम्। तच्च विवरणं क्वचित् क्वचित् स्वतन्त्रम्–प्रस्तुतां टीकां नानुसरति। एकस्मिन् परिशिष्टे ताः सर्वाः सविवरणा गाथाः संयोज्य मुद्रणीया येन तत्संग्रहः सन्मतिलघुटीकेव स्यादित्यासीदस्माकं भावना। परन्तु तदर्थं पृथगेवैको भागो मुद्रणीयो भवेत् तत्र च स्यादसह्यः कालविलम्बः इति न तत्करणे प्रयत्नं कृतवन्तः, किन्तु इदं परिशिष्टमेवैतादृशं व्यधायि यत् केनचित् व्युत्पन्नेन च्छात्रेणापि तद्दर्शनमात्रेणैव स संग्रहः सुकरः।

(४) काण्डस्य गाथायाश्चाङ्केन तद्व्याख्यायाश्च पृष्ठाङ्केन सह मूलगाथागतशब्दानां कोशो दर्शितश्चतुर्थे परिशिष्टे। यः शब्दो यत्र यत्र यतिकृत्वः समागतस्तस्य तानि सर्वाणि स्थलानि दर्शितानि।

(५) पूर्वपक्षं दर्शयितुं स्वमतं संवदितुं च टीकाकृता यानि अन्यग्रन्थगतानि गद्यपद्यानि अवतरणानि उद्धृतानि तानि सपृष्ठाङ्कं दर्शितानि पञ्चमे परिशिष्टे। तथा यानि अवतरणानि सटिप्पणानि तेषां पार्श्वे कोष्ठके टिप्पणाङ्कोऽपि निहितः। (तेषां च टीकाकारादर्शितानि मूलस्थलान्यपि संशोध्य संशोध्य दर्शितानि यथासम्भवम्, येषाञ्च मूलस्थानानि न प्राप्तानि तेषां पार्श्वे ग्रन्थे [ ] एतादृशं रिक्तं चिह्नं विहितम्)

(६) टीकाकारेण दर्शितानां ग्रन्थकाराणां ग्रन्थानां च नामानि स्थापितानि षष्ठे परिशिष्टे।

(७) टीकाकृता चर्चितानां वादानां वादिनां च नामानि निर्दिष्टानि सप्तमे परिशिष्टे।

(८) दर्शनशास्त्रगोचरा मुख्यतया तु जैनपरिभाषाविषयाः टीकाकारनिर्दिष्टा विशिष्टाः शब्दाः सपृष्ठाङ्कं दर्शिता अष्टमे परिशिष्टे। तथा ये शब्दाः सविवेचनास्तेषां पार्श्वे कोष्ठके तट्टिप्पणाङ्कोऽपि दर्शितः।

(९) समग्रे ग्रन्थे टीकोपयुक्ता देश–स्थल–रूढाचार–पदार्थसंज्ञासूचका ग्रन्थान्तरविषयबोधकाश्च ऐतिह्यप्रधानाः शब्दाः सूचिता नवमे परिशिष्टे। तथा तेषु ये शब्दा विवेचितास्तेषां पार्श्वे कोष्ठके टिप्पणाङ्कोऽपि निक्षिप्तः।

(१०) टीकाकारानिर्दिष्टस्थलेष्ववतरणेषु येषां स्थलानि अस्माभिरुपलब्धानि तानि नामग्राहं निर्दिष्टानि दशमे परिशिष्टे।

(११) प्रतिप्राप्तानि टिप्पणानि तत्तत्प्रतिनामग्राहमस्मत्सन्निवेशितानि टिप्पणानि च सपृष्ठाङ्कं निवेशितानि एकादशे परिशिष्टे।

(१२) सम्पादनप्रवृत्तौ उपयुक्तानां ग्रन्थानां ग्रन्थकाराणां च नामानि सपृष्ठाङ्कं सटिप्पणाङ्कं च निर्दिष्टानि द्वादशे परिशिष्टे।

(१३) सम्पादनोपयुक्तानां ग्रन्थानां मुद्रणस्थानानि सम्पादकनिर्देशो मुद्रणसमयादिकं च निर्दिष्टं त्रयोदशे परिशिष्टे।

श्रीमत्प्रवर्तकश्रीकान्तिविजयशिष्याणां तत्रभवतां श्री**चतुरविजय–पुण्यविजया**नामाभारं प्रतिभागं समुल्लिखन्तो वयमस्मिन्भागेऽपि तान्भूरि भूरि स्मरामः। अस्य भागस्य परिशिष्टसंबन्धि षष्ठभागगतानुवादसंबन्धि च सर्वं प्रूफशोधनादिकं तैरेव महानुभावैर्व्यधायि। यदि ते एतन्नाकरिष्यन् तर्हि शरीरव्यथाबाधिता वयं किमपि कर्तुं समर्था न अभविष्याम। परिशिष्टविधाने सहायकानां सहृदयविद्वन्मित्राणां **रसिकलाला**नामपि सादरं नामस्मरणमावश्यकम्। सम्पादनप्रवृत्तौ धनपुस्तकादिसाहाय्यकर्तॄणां जैनसाहित्यरसिकानां श्रीमोदी**केशवलाला**नामपि नाम न विस्मर्यते।

सुखलालः
बेचरदासश्च।

सन्मति-प्रकरणम् ।

पञ्चमो विभागः ।

तृतीयः काण्डः ।

[सामान्यविशेषयोरन्योन्यानुविद्धस्वरूपत्वप्रदर्शनम्]

एवं दर्शन-ज्ञानात्मनोः परस्पराविनिर्भागरूपतां प्रतिपाद्य इदानीं सामान्य-विशेषयोरन्योन्यानुविद्धं स्वरूपमुपदर्शयन्नाह—

सामण्णम्मि विसेसो विसेसपक्खे य वयणविणिवेसो ।
दव्वपरिणाममण्णं दाएइ तयं च णियमेइ ॥ १ ॥ ५

सामान्ये 'अस्ति' इत्येतस्मिन्, **विशेषो** द्रव्यमित्ययम्; तथा **विशेषपक्षे च** घटादौ, 'अस्ति' इत्येतस्य **वचनस्य**—नाम-नामवतोरभेदात्—सत्तासामान्यस्य, **विनिवेशः** प्रदर्शनम्, **द्रव्यपरिणतिमन्यां** सत्ताख्यस्य द्रव्यस्य पृथिव्याख्यां परिणतिमन्यां सत्तारूपापरित्यागेनैव वृत्तां **दर्शयति** विशेषाभावे सामान्यस्याप्यन्यथाभावप्रसक्तेः—यद् यदात्मकं तत् तदभावे न भवति, घटाद्यन्यतमविशेषाभावे मृद्वत् विशेषात्मकं च सामान्यमिति तदभावे तस्याप्यभावः । तथा, १० **तकं च** विशेषम्, द्वितीयपक्षे सामान्यात्मनि **नियमयति** विशेषः सामान्यात्मक एव तदभावे तस्याप्यभावप्रसङ्गात् यतः सामान्यात्मकस्य विशेषस्य सामान्याभावे घटादेरिव मृदभावे न भावो युक्तः ॥ १ ॥

[सामान्यविशेषयोरेकान्तभेदं वदतो दोषापत्तिप्रकटनम्]

न च विशेषाद् व्यतिरिक्तं सामान्यमेकान्ततः, तस्माद् वा विशेषा नियमतो भिन्ना इत्यभ्यु-१५ पगन्तव्यम् अध्यक्षादिप्रमाणविरोधात् इत्याह—

एगंतणिव्विसेसं एयंतविसेसियं च वयमाणो ।
दव्वस्स पज्जवे, पज्जवाहि दवियं णियत्तेइ ॥ २ ॥

एकान्तेन निर्गता विशेषा यस्मात् सामान्यात् तद् विशेषविकलं सामान्यं **वदन् द्रव्यस्य पर्यायान्** ऋजुत्वादीन् **निवर्तयति** ऋजु-वक्रतापर्यायात्मि(त्म)काङ्गुल्यादिद्रव्यस्य २०

---

१ श्रीहरिभद्रेण ईदृशमङ्गुल्युदाहरणमित्थं सष्टितं धर्मसंग्रहण्याम्—

"दीसइ पच्चक्खं चिय एयं वक्कम्मि उज्जुए होंते । अंगुलिदव्वम्मि परं भावेतव्वं इहेक्केण ॥
वक्कत्तमंगुलीओ कहंचि अभिन्नं ति तीए जोगाओ । भिन्नं पि अवत्थंतरभावे ततो नियत्तीओ ॥
तं चिय कहं चऽवत्थंतरे वि तं तुल्लबुद्धितो इंदि । एगंतेणऽन्नत्ते भिज्जेज्ज इमी वि तह चेव" ॥
—गा० ३४८–३५० पृ० १५२–१५३ ।

"से णूणं भंते ! अत्थित्तं अत्थित्ते परिणमइ नत्थित्तं नत्थित्ते परिणमइ ?–[भगवतीसू० श० १ उ० ३ सू० ३२] इत्यादि सूत्रं विवृण्वन् श्रीअभयदेवसूरिरीदृशमङ्गुलिदृष्टान्तं दर्शितवान् ।

अध्यक्षादिप्रमाणप्रतीयमानस्य विनिवृत्तिप्रसक्तेरध्यक्षादिप्रमाणबाधापत्तिः। तथा, **एकान्तविशेषं सामान्यरहितं वदन् पर्यायेभ्यो** विशेषेभ्यो **द्रव्यं निवर्तयति,** एवं चाङ्गुल्यादिद्रव्याऽव्यतिरिक्तऋजु-वक्रतादिविशेषस्य प्रत्यक्षाद्यवगतस्य निवृत्तिप्रसक्तिः । न चाऽबाधितप्रमाणविषयीकृतस्य तथाभूतस्य तस्य निवृत्तिर्युक्ता, सर्वभावनिवृत्तिप्रसक्तेः अन्यभावाभ्युपगमस्यापि तन्निबन्धनत्वात्
५ तत्प्रतीतस्याप्यभावे सर्वव्यवहाराभाव इति प्रतिपादितम्।

अत्राह—'**सामण्णम्मि**'[१] इत्यादिकाण्डं नाऽऽरब्धव्यम् उक्तार्थत्वात् यतो न तावदनेन वस्तु अनेकान्तात्मकं प्रतिपाद्यते '**एगदवियम्मि**'[२] [प्र० का० गा० ३१] इत्यादिना '**इहरा समूहसिद्ध**'[३]– [प्र० का० गा० २७] इत्यादिना च तस्य प्रतिपादितत्वात् । तथा, '**उप्पाय-ट्ठिइ-भंगा हंदि दवियलक्खणं एयं**'[४] [प्र० का० गा० १२] इत्यनेन लक्षणद्वारेण सर्वस्य सतः
१० अनेकान्तात्मकत्वं प्रदर्शितमेव। अथ प्रमाणविषयवाक्यनिरूपणार्थमिदं प्रस्तूयते, तदपि न सम्यक्; '**सवियप्प–णिव्वियप्पं**'[५] [प्र० का० गा० ३५] इत्यादिना तस्यापि निरूपितत्वात् वाक्यस्य च वस्तुत्वात् तन्निरूपणे तस्यापि निरूपितत्वान्न तन्निरूपणार्थमप्येतदपुनरुक्तम्, एवमेतत्; किन्तु प्रमेयप्राधान्येन तद्ग्राहकस्य प्रमाणस्यापि निरूपणमित्येतत्प्रदर्शनद्वारेण तत्प्रतिपादकवाक्यावतारः प्राग् विहितः, इह त्वविद्यमानप्रमेयस्य प्रमाणस्य प्रमाणत्वासंभवात् प्रमाणनिरूपणद्वारेण प्रमेय-
१५ निरूपणमिति प्रदर्शनद्वारेणैतद्वाक्यावतार इत्यदोषः । यद्वा अनेकान्तपक्षोक्तदोषपरिहारोऽनेकधा व्यवस्थाप्यत इति न कश्चिद् दोषः '**सामण्णम्मि**'[६] इत्यादि सूत्रसंदर्भविरचने ॥ २ ॥

[आप्तवचनस्यानेकान्तात्मकवस्तुबोधकत्वेन स्वरूपकथनम्]

सामान्य-विशेषानेकान्तात्मकवस्तुप्रतिपादकं वचनमाप्तस्य, इतरदितरस्येत्येतदेव दर्शयन्नाह—

पच्चुप्पन्नं भावं विगय-भविस्सेहिं जं समण्णेइ ।
२० **एयं पडुच्चवयणं दव्वंतरणिस्सियं जं च ॥ ३ ॥**

प्रत्युत्पन्नं भावं–वस्तुनो वर्तमानपरिणामम् **विगत-भविष्यद्भ्यां** पर्यायाभ्यां **यत् समानरूपतया नयति** प्रतिपादयति वचः **तत् प्रतीत्यवचनं** समीक्षितार्थवचनं सर्वज्ञवचनमित्यर्थः, अन्यच्चानाप्तवचनम्।

ननु वर्तमानपर्यायस्य प्रागपि सद्भावे कारकव्यापारवैफल्यम् क्रिया-गुण-व्यपदेशानां च
२५ प्रागप्युपलम्भप्रसङ्गश्च। उत्तरकालं च सद्भावे विनाशहेतुव्यापारनैरर्थक्यम् उपलब्ध्यादिप्रसङ्गश्च। ततो यद् यदैवोपलम्भादिकार्यकृत् तत् तदैव न प्राक् न पश्चात् अर्थक्रियालक्षणसत्त्वविरहे वस्तुनोऽभावात्, असदेतत्; तस्य प्रागसत्त्वेऽदलस्योत्पत्त्ययोगात् । न चात्मादिद्रव्यं विज्ञानादिपर्यायोत्पत्तौ दलम् तस्य निष्पन्नत्वात् । न च निष्पन्नस्यैव पुनर्निष्पत्तिः अनवस्थाप्रसङ्गात् । न च तत्र विद्यमान एव ज्ञानादिकार्योत्पत्तिः 'तत्र' इति संबन्धाभावतो व्यपदेशाभावप्रसङ्गात्, समवाय-
३० संबन्धप्रकल्पनायां तस्य सर्वत्राविशेषात् तद्वद् आकाशादावपि तत् स्यात् । अथात्मादिद्रव्यमेव तेनाऽऽकारेणोत्पद्यत इति नाऽदलोत्पत्तिः कार्यस्य भवत्येवमुत्पत्तिः किन्त्वात्मद्रव्यं पूर्वमप्यासीत् पश्चादपि भविष्यति तत्सर्वावस्थासु तादात्म्यप्रतीतेः अन्यथा पूर्वोत्तरावस्थयोस्तत्प्रतिभासो न भवेत्। न चैकत्वप्रतिभासो भ्रान्तः, बाधकाभावे भ्रान्त्यसिद्धेः । न चार्थक्रियाविरोधो नित्यत्वे

---

१ पृ० ६२७ गा० १। २ पृ० ४३० गा० ३१। ३ पृ० ४२२ गा० २७। ४ पृ० ४१० गा० १२। ५ पृ० ४४१ गा० ३५। ६ पृ० ६२७ गा० १।

बाधकः, अनित्यत्वे एव तस्य बाधकत्वेन प्रतिपादनात् । न चोत्पाद-विनाशयोरपि तत्र प्रतिपत्तावेकान्ततो नित्यत्वमेव, परिणामनित्यतया तस्य नित्यत्वात्; अन्यथा खरविषाणवत् तस्याऽभावप्रसङ्गात् । न चैवं तस्य विकारित्वप्रसङ्गो दोषाय, अभीष्टत्वात् । न च नित्यत्वविरोधस्तथैव तत्तत्त्वप्रतीतेः । न च तस्य तथात्वप्रतिपत्तिर्भ्रान्तिः, बाधकाभावादित्युक्तत्वात् । अथ ज्ञानपर्यायादात्मनो व्यतिरेके भेदेनोपलम्भः स्यात् अव्यतिरेके पर्यायमात्रम् द्रव्यमात्रं वा भवेत् व्यतिरेकाव्यतिरेकपक्षस्तु विरोधाघ्रातः अनुभयपक्षस्त्वन्योऽन्यव्यवच्छेदरूपाणामेकनिषेधेनाऽपरविधानादसंगतः, असदेतत्; व्यतिरेकाऽव्यतिरेकपक्षस्याऽभ्युपगमात् । न च व्यतिरेकपक्षभावी तद्व्यतिरेकेणोपलब्धिप्रसङ्गो दोषः, एकज्ञानव्यतिरेकेण ज्ञानान्तरेऽपि तस्य प्रतीतेर्व्यतिरेकोपलम्भस्य सद्भावात् अव्यतिरेकोऽपि, ज्ञानात्मकत्वेन तस्य प्रतीतेः । न च व्यतिरेकाऽव्यतिरेकयोरन्योऽन्यपरिहारेणावस्थानाद् विरोधः अबाधितप्रमाणविषयीकृते वस्तुतत्त्वे विरोधाऽसंभवात्; अन्यथा संशयज्ञानस्यैकानेकरूपस्य वैशेषिकेण, ग्राह्य-ग्राहकसंवित्तिरूपस्य बुद्ध्यात्मनश्चैकानेकस्वभावस्य सौगतेन कथं प्रतिपादनमुपपत्तिमद् भवेत् यदि प्रमाणप्रतिपन्ने वस्तुतत्त्वे विरोधः संगच्छेतेत्यादि पूर्वमेव प्रतिपादितम् । वर्तमानपर्यायस्यान्वयिद्रव्यद्वारेण त्रिकालास्तित्वप्रतिपादकं प्रतीत्यवचनमिति सिद्धम् ।

परमाण्वारम्भकद्रव्यात् कार्यद्रव्यं द्व्यणुकादि **द्रव्यान्तरं** वैशेषिकाभिप्रायतः तेन **निःसृतं संबद्धं** कारणं परमाण्वादि **यत्** प्रतिपादयति तदपि **प्रतीत्यवचनम्** । तथाहि—द्व्यणुकरूपतया परमाणवः प्रादुर्भूताः द्व्यणुकतया प्रच्युताः परमाणुरूपतया अविचलितस्वरूपा अभ्युपगन्तव्याः अन्यथा तद्रूपतयाऽनुत्पादे प्राक्तनरूपताऽपगमो न स्यात् परमाण्ववस्थावत् प्राक्तनरूपानपगमे वा नोत्तररूपतयोत्पत्तिस्तदवस्थावत् । परमाणुरूपतयाऽपि विनाशोत्पत्त्यभ्युपगमे पूर्वोत्तरावस्थयोर्निराधारविगम-प्रादुर्भावप्रसक्तिः । न च तदवस्थयोरेवाऽऽधारत्वम्, तयोस्तदानीमसत्त्वात् । न च पूर्वोत्तरकार्यद्रव्यविनाश-प्रादुर्भावयोः कारणस्याविनाश-प्रादुर्भावौ, ततस्तस्यैकान्ततो हिमवद्-विन्ध्ययोरिव भेदप्रसक्तेः । न च कारणाश्रितस्य कार्यद्रव्यस्योत्पत्तेर्नायं दोषः, तयोर्युतसिद्धितः कुण्ड-बदरवत् पृथगुपलब्धिप्रसक्तेः । अयुतसिद्धावपि कार्योत्पत्तौ कारणस्याऽप्युत्पत्तिप्रसक्तिः; अन्यथाऽयुतसिद्ध्यनुपपत्तेः । अथाऽयुताश्रयसमवायित्वमयुतसिद्धिः, सा च कार्योत्पत्तौ कारणानुत्पत्तावपि भवत्येव, न; समवायासिद्धावयुतसिद्ध्यसिद्धेः । न चायुतसिद्धित एव समवायसिद्धिः, इतरेतराश्रयदोषप्रसक्तेः । न चाध्यक्षतः समवायसिद्धेर्नायं दोषः, तन्त्वात्मकपटप्रतिभासमन्तरेणाऽध्यक्षप्रतिपत्तावपरसमवायाप्रतीतेः—'इह तन्तुषु पटः' इत्यत्रापि प्रत्यये 'इह तन्तुषु' इति प्रतिपत्तिस्तन्त्वालम्बना, 'पटः' इति प्रतिपत्तिः पटालम्बना संवेद्यत इति नापरः समवायप्रतिभासः । न च 'इह तन्तुषु पटः' इति लौकिकी प्रतिपत्तिः, किन्तु 'पटे तन्तवः' इति । न चान्यथाभूतप्रतिपत्त्याऽन्यथाभूतार्थव्यवस्था । न चानुमानादपि समवायप्रसिद्धिः, प्रत्यक्षाभावे तत्पूर्वकस्य तस्य तत्राऽप्रवृत्तेः । अनुमानपूर्वकस्य तु तस्यानवस्थादिदोषाघ्रातत्वात् तत्राप्रवृत्तिरित्यनेकशः प्रतिपादितं न पुनरुच्यत इति व्यवस्थितमेतत् तथाभूतवस्तुप्रतिपादकमेवाऽऽप्तवचनम् एकान्तप्रतिपादकं तु नाप्तवचनम् ।

अथवा एकद्रव्यादन्यद् द्रव्यं **द्रव्यान्तरं** तस्मिन् **निःसृतं संबद्धं यत्** तदपि **प्रतीत्यवचनम्** । यथा—दीर्घतरं मध्यमिकाङ्गुलिद्रव्यमपेक्ष्य ह्रस्वतरमङ्गुष्ठकद्रव्यमिति वचः । ह्रस्व-दीर्घादिकस्तु स्वधर्म एव द्रव्यान्तरविशेषाभिव्यङ्ग्यः पितेव पुत्रादिना ।

यद्वा गोत्वसदृशपरिणतियुक्ताच्छाबलेयद्रव्यात् तत्सदृशपरिणतियुक्तं बाहुलेयादि **द्रव्यान्तरं** तस्मिन् **निःश्रितं संबद्धं** वाचकत्वेन 'गौः' इति **यद्** वचनं तदपि **प्रतीत्यवचनम्** । न पुनः केवलतिर्यक्सामान्य-विशेष-तदुभयादिप्रतिपादकम् असद्भूतार्थप्रतिपादकत्वाद् उन्मत्तवाक्यवत् ॥ ३ ॥

[आप्तवचने समुपतिष्ठमानाया एकान्तपक्षाश्रिताया आशङ्काया अनेकान्तपक्षाश्रयणेन निराकरणम्]

ननु प्रत्युत्पन्नपर्यायस्य स्वकालवदतीताऽनागतकालयोः सत्त्वे अतीताऽनागतकालयोर्वर्तमानकालतापत्तेः-अन्यथा तद्रूपतया तयोस्तत्सत्त्वासंभवात्-त्रैकाल्यायोगात् तस्य तद्विशिष्टतानुपपत्तेस्तथाभूतार्थप्रतिपादकं वचनमप्रतीत्यवचनमेवेत्याशङ्क्याऽऽह—

दव्वं जहा परिणयं तहेव अत्थि त्ति तम्मि समयम्मि ।
विगय-भविस्सेहि उ पज्जएहिं भयणा विभयणा वा ॥ ४ ॥

द्रव्यं चेतनाचेतनम्, **यथा** तदाकारार्थग्रहणरूपतया, घटादिरूपतया वा **परिणतं वर्तमानसमये तथैव अस्ति । विगत-भविष्यद्भिस्तु पर्यायैर्भजना** कथंचित् तैस्तस्यैकत्वम्,
५ **विभजना** विगतभजना नानात्वं कथंचित्, **'वा'** शब्दस्य कथंचिदर्थत्वात् । ततः प्रत्युत्पन्नपर्यायस्य विगत-भविष्यद्भ्यां न सर्वथैकत्वमिति कथं तत्प्रतिपादकवचनस्याप्रतीत्यवचनतेति भावः ॥ ४ ॥

[संभवद्भिः पर्यायैर्घटादेर्वस्तुनः अस्तित्व-नास्तित्वप्ररूपणम्]

ननु घटादेरर्थस्य कैः पर्यायैरस्तित्वम् अनस्तित्वं वा ? इत्याह—

परपज्जवेहिं असरिसगमेहिं णियमेण णिच्चमवि नत्थि ।
१० **सरिसेहिं पि वंजणओ अत्थि ण पुणऽत्थपज्जाए ॥ ५ ॥**

वर्तमानपर्यायव्यतिरिक्तभूत-भविष्यत्पर्यायाः **परपर्यायास्तैर्विसदृशगमैर्**विजातीयज्ञानग्राह्यैर्**नियमेन** निश्चयेन **नित्यं** सर्वदा **नास्ति** तद् द्रव्यम्, **तैरपि** तदा तस्य सद्भावे अवस्थासंकीर्णताप्रसक्तेः । **सदृशैस्तु व्यञ्जनतः** सामान्यधर्मैः सत्-द्रव्य-पृथिवीत्वादिभिः विशेषात्मकैश्च शब्दप्रतिपाद्यै**रस्ति,** सामान्य-विशेषात्मकस्य शब्दवाच्यत्वात् । सामान्यमात्रस्य तद्वाच्यत्वे
१५ शब्दादप्रवृत्तिप्रसक्तेरर्थक्रियासमर्थस्य तेनानुक्तत्वात् सामान्यमात्रस्य च तदुक्तस्यार्थक्रियाऽनिर्वर्तकत्वात्, विशेषमन्तरेण सामान्यस्यासंभवात् सामान्यप्रतिपादनद्वारेण लक्षणया विशेषप्रतिपादनमपि शब्दान्न संभवति, क्रमप्रतिपत्तेरसंवेदनात्; विशेषाणां त्वानन्त्यात् संकेतासंभवतः शब्दावाच्यत्वम् । परस्परव्यावृत्तसामान्य-विशेषयोरप्यवाच्यत्वम् उभयदोषप्रसङ्गात् । तत उभयात्मकं वस्तु गुण-प्रधानभावेन शब्देनाभिधीयत इति सदृशैर्व्यञ्जनतोऽस्तीन्युपपन्नम् । **न पुनर्नैव अर्थ-**
२० **पर्यायैः** ऋजुसूत्राभिमतार्थपर्यायेण तद् अस्ति, अन्योन्यव्यावृत्तवस्तुस्वलक्षणग्राहकत्वात् तस्य । अयं चार्थः पूर्वसूत्र एव प्रदर्शित इत्यन्यथा गाथासूत्रं व्याख्येयम्—अन्यवस्तुगताः पर्याया विसदृश-सदृशतया द्विप्रकाराः, तत्र **विसदृशै**र्विवक्षितो घटादि**र्नैवास्ति** । **सदृशैस्तु**[1] कैश्चिदुक्तवदस्ति, कैश्चिन्नेति तात्पर्यार्थः ॥ ५ ॥

[वर्तमानपर्यायेऽपि द्रव्यस्यानेकान्तात्मकत्वसमर्थनम्]

२५ ननु प्रत्युत्पन्नपर्यायेण भावस्यास्तित्वनियमे एकान्तवादापत्तिरित्याशङ्क्याह—

पच्चुप्पण्णम्मि वि पज्जयम्मि भयणागइं पडइ दव्वं ।
जं एगगुणाईया अणंतकप्पा गमविसेसा ॥ ६ ॥

वर्तमानेऽपि परिणामे स्व-पररूपतया सदसदात्मरूपताम्, अधो-मध्योर्ध्वादिरूपेण च भेदाऽभेदात्मकतां[2] च **भजनागतिमासादयति द्रव्यम्, यत एकगुण**कृष्णत्वादयो**ऽनन्त-**
३० **प्रकारा**स्तत्र **गुणविशेषा**स्तेषां च मध्ये केनचिद् गुणविशेषेण युक्तं तत् । तथाहि—कृष्णं द्रव्यं तद्द्रव्यान्तरेण तुल्यम् अधिकम् ऊनं वा भवेत् प्रकारान्तराभावात्, प्रथमपक्षे सर्वथा तुल्यत्वे तदेकत्वापत्तिः उत्तरपक्षयोः संख्येयादिभागगुणवृद्धि-हानिभ्यां षट्स्थानकप्रतिपत्तिरवश्यंभाविनी[3]।

१–दृशैकस्तु बृ० आ० । २–त्मकां च बृ० आ० हा० वि० । ३ षट्स्थानकस्वरूपमित्थमवगन्तव्यम्—

"वुड्ढी वा हाणी वा अणंत–असंख–संखभागेहिं । वत्थूण संख–ऽसंख–ऽणंतगुणणेण य विहेआ ॥

अनन्ताऽसंख्यात–संख्यातभागैः संख्याताऽसंख्याताऽनन्तगुणनेन च वस्तूनां पदार्थानां वृद्धिर्वा हानिर्वा विधेया । इह हि षट्स्थानके त्रीणि स्थानानि भागेन भागाहारेण वृद्धानि हीनानि वा भवन्ति, त्रीणि च स्थानानि गुणनेन गुणकारेण × × × । तत्र भागाहारे अनन्ताऽसंख्यात–संख्यातलक्षणः क्रमः, गुणकारे च संख्याताऽसंख्याताऽनन्तलक्षण इति" ।—प्रवचनसारो० गा० ४३२ द्वा० २६० ।

स्यादेतत् पुद्गलद्रव्यस्य तादृग्भूतापरपुद्गलद्रव्यापेक्षया अनेकान्तरूपता युक्ता, प्रत्युत्पन्ने त्वात्मद्रव्यपर्याये कथमनेकान्तरूपता ? न, आत्मपर्यायस्यापि ज्ञानादेस्तत्तद्ग्राह्यार्थापेक्षयाऽनेकान्तरूपता पुद्गलवन्न विरुध्यते। तथा द्रव्य-कषाय-योगोपयोग-ज्ञान-दर्शन-चारित्र-वीर्यप्रभेदात्मकत्वादात्मनः पुद्गलवदनेकान्तरूपता आर्षे प्रतिपादितैव—

"कइविहे णं भंते ! आया पण्णत्ते ? 5

गोयमा ! अट्ठविहे । तं जहा-दविए आया" [भगवतीसू० शत० १२, उ० १०] इत्यादौ ॥ ६ ॥

[आत्मनोऽनेकान्तात्मकत्वस्य बुद्धिगम्यतया प्रदर्शनम्]

इतश्चानेकान्तात्मकता आत्मनः प्रतिपत्तव्येत्याह—

कोवं उप्पायंतो पुरिसो जीवस्स कारओ होइ ।
तत्तो [2]विभयणिज्जो परम्मि सयमेव भइयव्वो ॥ ७ ॥ १०

कोपपरिणतिमुपनयन् पुरुषो जीवस्य परभवप्रादुर्भावे निर्वर्तको भवति, तन्निमित्तस्य कर्मण उपादानात् । कोपपरिणाममापद्यमानश्च पुरुषस्ततः परभवजीवाद् विभजनीयो भिन्नो व्यवस्थापनीयः, कार्य-कारणयोर्मृत्पिण्ड-घटवत् कथंचिद् भेदात्; अन्यथा कार्य-कारणभावाभावप्रसङ्गात् । न चासौ ततो भिन्न एव परस्मिन् भवे स्वयमेव पुरुषो भजनीयः आत्मरूपतया अभेदेन व्यवस्थाप्यत इति भावः घटाद्याकारपरिणतमृद्द्रव्यवत् कथंचिदभिन्न इत्यनेकान्तः । १५

यद्वा कोपपरिणतिमन्यस्मिन् जीवे उत्पादयन् पुरुषः कारको भवति । ततोऽसौ कोपकारकत्वेन विभजनीयः—कोपपरिणतियोग्ये जीवे कारकः, अन्यत्राकारक इति ॥ ७ ॥

[द्रव्य-गुणयोः कथंचिद्भेदमनिच्छतां केषांचित् तयोर्भेदविषयाऽऽशङ्का]

द्रव्यं गुणादिभ्योऽनन्यत् तेऽपि द्रव्यादनन्य एवेत्येतदनेकान्तममृष्यमाणा आहुः—

[3]रूव-रस-गंध-फासा असमाणग्गहण-लक्खणा जम्हा । २०
तम्हा दव्वाणुगया [4]गुण त्ति ते केइ इच्छंति ॥ ८ ॥

---

१ "कइविहा णं भंते ! आया पण्णत्ता ? गोयमा ! अट्ठविहा आया पण्णत्ता । तं जहा-दवियाया कसायाया जोगाया उवओगाया णाणाया दंसणाया चरित्ताया वीरियाया" इत्यादि संपूर्णं सूत्रम्-भगवतीसू० पृ० ५८८ सू० ४६७ ।

२ वियभइयव्वो गु० मू० विना । ३ रूप-रस-आ० हा० वि० ।

४ 'गुण'शब्दस्य वैशेषिकादिदर्शनेषु प्रतिनियतार्थत्वेन अतिप्रसिद्धत्वात् केषुचित् उत्तराध्ययन-तत्त्वार्थादिग्रन्थेषु च तस्य विशिष्टार्थत्वेन निर्देशात् भगवत्यादिषु चागमेषु गुण-पर्यायशब्दयोर्द्वयोरपि प्रयोगदर्शनात् जैनमते उपतिष्ठमानाम् 'किं गुणशब्दः पर्यायशब्दसमानार्थक एव उत भिन्नार्थकः' इति विप्रतिपत्तिं निराकर्तुकामेन श्रीसिद्धसेनदिवाकरेण गुणशब्दस्य पर्यायशब्दसमानार्थकत्वपरं स्वकीयं मतमाविष्कृतं मूलगाथायाम् ।

परन्तु तयोर्द्वयोरपि शब्दयोरर्थमर्यादामवगन्तुमपरेषामपि अनेकेषामाचार्याणां तद्विषयाणि विविधानि मतानि परिज्ञातव्यानि सन्ति । तानि चेत्थम्—

उत्तराध्ययनसूत्रे गुण-पर्यायशब्दयोः पृथक् पृथग् निर्देशः तल्लक्षणं चेत्थं निरूपितमस्ति । तथाहि—

"गुणाणमासओ दव्वं एगदव्वस्सिआ गुणा । लक्खणं पज्जवाणं तु उभओअस्सिआ भवे ॥
एगत्तं च पुहत्तं च संखा संठाणमेव य । संजोगा य विभागा य पज्जवाणं तु लक्खणं ॥
गुणानां तु रूपादीनामतिप्रतीतत्वाल्लक्षणं नोक्तमिति"—अ० २८ गा० ६ तथा १३ ।

श्रीमदुमास्वातिना सूत्रे भाष्ये च पृथक् पृथक् प्रयुक्तौ लक्षितौ च गुण-पर्यायशब्दौ तयोर्विभिन्नार्थत्वपरं तदीयं तात्पर्यं सूचयतः । तथाहि—

"गुण-पर्यायवद् द्रव्यम्"—तत्त्वार्थ० ५, ३७ ।

"सर्वं त्रित्वं द्रव्य-गुण-पर्यायावरोधात्"—१, ३५ तत्त्वार्थ० भा०। "गुणान् लक्षणतो वक्ष्यामः। भावान्तरं संज्ञान्तरं च पर्यायः। तदुभयं यत्र विद्यते तद् द्रव्यम्"—५, ३७ तत्त्वार्थ० भा०।

श्रीकुन्दकुन्देन पृथक्तया प्रयुक्त-लक्षितौ अमृतचन्द्रेण च भिन्नार्थतया स्पष्टमेव व्याख्यातौ गुण-पर्यायशब्दौ विभिन्नार्थत्वपरमेव तदीयं तात्पर्यं ज्ञापयतः। तद्यथा—

"अत्थो खलु दव्वमओ दव्वाणि गुणप्पगाणि भणिदाणि। तेहिं पुणो पज्जाया पज्जयमूढा हि परसमया" ॥ १ ॥
—प्रवचन० पृ० ११९।

"लिंगेहिं जेहिं दव्वं जीवमजीवं च हवदि विण्णादं। ते तब्भावविसिट्ठा मुत्तामुत्ता गुणा णेया" ॥ ३८ ॥
प्रवचन० पृ० १८२।

"दव्वेण विणा ण गुणा गुणेहिं दव्वं विणा ण संभवदि। अव्वदिरित्तो भावो दव्वगुणाणं हवदि तम्हा" ॥ १३ ॥—
पञ्चास्ति० पृ० २९।

अस्य गाथात्रयस्य अमृतचन्द्रीया व्याख्यापि अत्रानुसंधेया।

श्रीराजमल्लेन तु अमृतचन्द्रवत् तौ द्वावपि शब्दौ भिन्नार्थतया स्पष्टमेव परिभाषितौ। यथा—

"द्रव्याश्रया गुणाः स्युर्विशेषमात्रास्तु निर्विशेषाश्च। करतलगतं यदेतैर्व्यक्तमिवालक्ष्यते वस्तु" ॥ १०४ ॥

"क्रमवर्तिनो ह्यनित्या अथ च व्यतिरेकिणश्च पर्यायाः। उत्पाद-व्ययरूपा अपि च ध्रौव्यात्मकाः कथंचिच्च" ॥ १६५ ॥
—पञ्चाध्या० पृ० ३७, ५४।

पूज्यपादेन तु अन्वयित्व-व्यतिरेकित्वरूपेण गुण-पर्याययोः स्पष्टमेव भेदं प्रतिपाद्य तद्वाचकयोर्द्वयोः शब्दयोर्विभिन्नार्थत्वं तत्त्वार्थसूत्रव्याख्यायां प्रदर्शितम्। तथाहि—

"के गुणाः? के पर्यायाः? अन्वयिनो गुणाः व्यतिरेकिणः पर्यायाः। उभयैरुपेतं द्रव्यमिति। उक्तं च—

गुण इदि दव्वविहाणं दव्वविकारो हि पज्जवो भणिदो। तेहिं अणूणं दव्वं अजुदपसिद्धं हवे णिच्चं ॥

ततः सामान्यापेक्षया अन्वयिनो ज्ञानादयो जीवस्य गुणाः, पुद्गलादीनां च रूपादयः। तेषां विकारा विशेषात्मना भिद्यमानाः पर्यायाः। घटज्ञानम् पटज्ञानम् क्रोधः मानः गन्धः वर्णः तीव्रः मन्द इत्येवमादयः"—५, ३८ सर्वार्थसिद्धिः पृ० १७९।

श्रीमदकलङ्केन गुण-पर्याययोः द्वयोरपि शब्दयोरेकार्थत्वम् विभिन्नार्थत्वं च द्वयमपि तत्त्वार्थसूत्रव्याख्यायां समर्थितम्। तच्चैवम्—

"गुणा एव पर्याया इति वा निर्देशः। अथवा उत्पाद-व्यय-ध्रौव्याणि न (?) पर्यायाः न तेभ्योऽन्ये गुणाः सन्ति ततो गुणा एव पर्याया इति सति सामानाधिकरण्ये मतौ सति गुण-पर्यायवदिति निर्देशो युज्यते"—५, ३७ तत्त्वार्थराजवा० वा० २ पृ० २४३।

"नित्यं द्रव्यमाश्रित्य ये वर्तन्ते ते गुणा इति। पर्यायाः पुनः कादाचित्का इति न तेषां ग्रहणम् तेन अन्वयिनो धर्मा गुणा इत्युक्तं भवति तद्यथा जीवस्यास्तित्वादयः ज्ञान-दर्शनादयश्च पुद्गलस्य अचेतनत्वादयः रूपादयश्च। पर्यायाः पुनः घटज्ञानादयः कपालादिविकाराश्च"—५, ४० तत्त्वार्थराजवा० वा० ४ पृ० २४४।

प्रस्तुतविषये विशिष्टचर्चां विदधता विद्यानन्दिना पूज्यपादसरणिरेव अनुसृता। तथाहि—

"गुणाः वक्ष्यमाणलक्षणाः पर्यायाश्च तत्सामान्यापेक्षया × × × विशेषापेक्षया पर्यायाणां नित्ययोगाभावात् कादाचित्कत्वसिद्धेः"—५, ३८ तत्त्वार्थश्लो० वा० पृ० ४३८।

"कः पुनरसौ पर्यायः? इत्याह—

तद्भावः परिणामोऽत्र पर्यायः प्रतिवर्णितः। गुणाच्च सहभुवो भिन्नः क्रमवान् द्रव्यलक्षणम्" ॥—५, ४२ तत्त्वार्थश्लो० वा० पृ० ४४०।

गुण-पर्यायशब्दयोर्व्याख्यां विदधता श्रीअमृतचन्द्रसूरिणा स्वीये तत्त्वार्थसारे अकलङ्कमतमेव समाश्रितम्। तथाहि—

"गुणो द्रव्यविधानं स्यात् पर्यायो द्रव्यविक्रिया। द्रव्यं ह्ययुतसिद्धं स्यात् समुदायस्तयोर्द्वयोः ॥ ९ ॥
सामान्यमन्वयोत्सर्गौ शब्दाः स्युर्गुणवाचकाः। व्यतिरेको विशेषश्च भेदः पर्यायवाचकाः ॥ १० ॥
गुणैर्विना न च द्रव्यं विना द्रव्याच्च नो गुणाः। द्रव्यस्य च गुणानां च तस्मादव्यतिरिक्तता ॥ ११ ॥
न पर्यायाद् विना द्रव्यं विना द्रव्यान्न पर्ययः। वदन्त्यनन्यभूतत्वं द्वयोरपि महर्षयः" ॥ १२ ॥—
सनातन० प्र० गु० पृ० १२१।

रूप-रस-गन्ध-स्पर्शाः असमानग्रहण-लक्षणा यस्मात् ततो द्रव्याश्रिता गुणा इति केचन वैशेषिकाद्याः, स्वयूथ्या वा सिद्धान्तानभिज्ञा अभ्युपगच्छन्ति । तथाहि—गुणा द्रव्याद् भिन्नाः, भिन्नप्रमाणग्राह्यत्वात् भिन्नलक्षणत्वाच्च; स्तम्भात् कुम्भवत् । न चासिद्धौ हेतू, द्रव्यस्य 'यमहमद्राक्षं तमेव स्पृशामि' इत्यनुसंधानाध्यक्षग्राह्यत्वात् रूपादीनां च प्रतिनियतेन्द्रिय-प्रभवप्रत्ययावसेयत्वात् 'दार्शनं स्पार्शनं च द्रव्यम्' इत्याद्यभिधानादसमानग्रहणता द्रव्य-गुणयोः१ सिद्धा । तथा, विभिन्नलक्षणत्वमपि—

"क्रियावद् गुणवत् समवायिकारणं द्रव्यम्" [वैशेषिकद० १-१-१५] "द्रव्याश्रय्यगुणवान् संयोग-विभागेष्वकारणमनपेक्षः" [वैशेषिकद० १-१-१६] इति वचनात् सिद्धम् ॥ ८ ॥

श्रीसिद्धसेनसूरिणाऽपि एकार्थत्वम् विभिन्नार्थत्वं च द्वयमपि नयभेदेन व्यवस्थाप्य अकलङ्कीय एव पन्थास्तत्त्वार्थभाष्य-वृत्तौ स्पष्टमनुसृतः । तद् यथा—

" गुणाः शक्तिविशेषाः त एव क्रमेण सह च भवन्तः सर्वतोमुखत्वाद् भेदाः पर्यायास्तान् गुणान् पिण्डघटकपालादीन् रूपादींश्च ××× व्यवहारनयसमाश्रयणेन तु गुणाः पर्याया इति वा भेदेन व्यवहारः प्रवचने । युगपदवस्थायिनो गुणा रूपादयः, अयुगपदवस्थायिनः पर्यायाः । वस्तुतः पर्याया गुणा इति ऐकात्म्यम्"—५, ३७ तत्त्वार्थ० व्या० पृ० ४२८ ।

उक्तयोर्द्वयोरपि शब्दयोरेकार्थत्वं हृदि संमन्यमानेनापि वादिदेवसूरिणा प्राक्तनतर्कग्रन्थेषु तयोर्विभिन्नार्थत्वेन प्रयोगपरि-पाटिं पश्यता स्वीये प्रमाणनयतत्त्वालोकालङ्कारग्रन्थे पर्यायशब्दस्य अर्थं संकोच्य विभिन्नार्थत्वं तयोर्द्वयोः शब्दयोर्व्यावर्णितम् उपपादितं च स्याद्वादरत्नाकरे । तच्चैवम्—

"विशेषोऽपि द्विरूपः-गुणः पर्यायश्चेति ॥ ६ ॥

गुणः सहभावी धर्मः यथा आत्मनि विज्ञानव्यक्ति-शक्त्यादिरिति ॥ ७ ॥

पर्यायस्तु क्रमभावी यथा तत्रैव सुख-दुःखादिरिति ॥ ८ ॥ "—परि० ५ पृ० ७३५ ।

श्रीमता हरिभद्रेण तु प्रस्तुते विषये सिद्धसेनदिवाकरीय एव पन्था अनुसृतः प्रतिभासते, स एव च मार्ग उपाध्यायय-शोविजयेन अनुधावितः सविस्तरमुपपादितश्च—

"अन्वयो व्यतिरेकश्च द्रव्य-पर्यायसंज्ञितौ । अन्योन्यव्याप्तितो भेदाभेदवृत्त्यैव वस्तु तौ" ॥ ३१ ॥

—शास्त्रवा० समु० स्तव० ७ पृ० प्र० २६१ ।

"अन्वयो व्यतिरेकश्चेत्येतावंशौ द्रव्य-पर्यायसंज्ञितौ—द्रव्यं पर्यायश्चेति द्रव्य-पर्यायपदवाच्यौ । एतेन 'द्रव्यं गुणाः पर्यायाश्च' इति विभागः केषांचिद् अनभिज्ञस्वयूथ्यानाम् परयूथ्यानां वा निरस्तः, विभिन्ननयग्राह्याभ्यां द्रव्य-पर्यायत्वाभ्यामेव विभागात् । यदि च गुणोऽप्यतिरिक्तः स्यात् तदा तद्ग्रहार्थं द्रव्यार्थिक-पर्यायार्थिकवद् गुणार्थिकनयमपि भगवानुपादेक्ष्यत्, न चैवमस्ति; रूप-रस-गन्ध-स्पर्शानामर्हता तेषु तेषु सूत्रेषु "वण्णपज्जवेहिं" इत्यादिना पर्यायसंज्ञयैव नियमनात् । गुण एव तत्र पर्यायशब्देन उक्त इति चेत्, नन्वेवं गुण-पर्यायशब्दयोरेकार्थत्वेऽपि पर्यायशब्देनैव भगवतो देशना इति न गुणशब्देन पर्यायस्य तदतिरिक्तस्य वा गुणस्य विभागौचित्यम् । 'एकगुणकालः' 'दशगुणकालः' इत्यादौ गुणशब्देनापि भगवतो देशना अस्त्येवेति चेत्, अस्त्येव संख्यानशास्त्रधर्मवाचकगुणशब्देन, न तु गुणार्थिकनयप्रतिपादनाभिप्रायेण" इत्यादि—शास्त्रवा० स्याद्वादक० पृ० प्र० २६१ ।

१ रूप-रसादीनामसमानग्रहण-लक्षणता वैशेषिकैरित्थं वर्णिताऽस्ति—"रूपं चक्षुर्ग्राह्यम्" । × "रसो रसनग्राह्यः" । "गन्धो घ्राणग्राह्यः" । × "स्पर्शस्त्वगिन्द्रियग्राह्यः" ।—प्रशस्त० कं० पृ० १०४-१०५-१०६ ।

२ एतद् वाक्यमेव श्रीयशोविजयोपाध्यायः स्वीये गूर्जरभाषानिबद्धे सस्तबके द्रव्यगुणपर्यायरासे इत्थमनूदितवान्—

"शक्तिरूप गुण कोइक भाषइ ते नही मारगि निरतइं रे. जिन०" । "कोइक दिगंबरानुसारी शक्तिरूप गुण भाषइ छइ, जे माटइं ते इम कहइ छइ जे जिम द्रव्यपर्यायनुं कारण द्रव्य तिम गुणपर्यायनुं कारण गुण" इत्यादि—ढा० २ दो० १० ।

३ मुद्रिते वैशेषिकदर्शने तु एवं पाठो दृश्यते—

"क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्" । "द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्" ।

[द्रव्य–गुणयोरेकान्तभेदाशङ्कां निराकर्तुं गुणशब्दस्यार्थपरीक्षा]

एतत्परिहारायाह–

दूरे ता अण्णत्तं गुणसद्दे चेव ताव पारिच्छं ।
किं पज्जवाहिओ होज्ज पज्जवे चेव गुणसण्णा ॥ ९ ॥

५ दूरे तावद् गुण–गुणिनोरेकान्तेनान्यत्वम्—असंभावनीयमिति यावत्—गुणात्मकद्रव्यप्रत्ययबाधितत्वाद् एकान्तगुणगुणिभेदस्य । न च समवायनिमित्तोऽयमभेदप्रत्ययः, तस्य निषिद्धत्वात् । न चैकत्वप्रत्ययस्य प्रागुपन्यस्तानुमानबाधा, एकत्वप्रत्ययाध्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेनैकशाखाप्रभवत्वानुमानस्येव तस्य कालात्ययापदिष्टत्वात् । ततो गुण–गुणिनोरेकान्तान्यत्वस्यासंभवात् गुणशब्दे एव तावत् पारीक्ष्यमस्ति—किं पर्यायादधिके गुणशब्दः? उत पर्याय एव १० प्रयुक्त इति? अभिप्रायश्च न पर्यायादन्यो गुणः, पर्यायश्च कथंचिद्द्रव्यात्मक इति विकल्पः कृतः ॥ ९ ॥

[गुणस्य पर्यायाद् भेदे तृतीयस्य गुणार्थिकनयस्यापि वचनीयत्वप्रसञ्जनम्]

यदि पर्यायादन्यो गुणः स्यात् पर्यायार्थिकवद् गुणार्थिकोऽपि नयो वचनीयः स्यादित्याह–

दो उण णया भगवया दव्वट्ठिय-पज्जवट्ठिया नियया ।
एत्तो य गुणविसेसे गुणट्ठियणओ वि जुज्जंतो ॥ १० ॥

१५ द्वावेव मूलनयौ भगवता द्रव्यार्थिक–पर्यायार्थिकौ नियमितौ, तत्रातः पर्यायादधिके गुणविशेषे ग्राह्ये सति तद्ग्राहकगुणास्तिकनयोऽपि नियमितुं युज्यमानकः स्यात् अन्यथा अव्यापकत्वं नयानां भवेत् अर्हतो वा तदपरिज्ञानं प्रसज्येत ॥ १० ॥

[तृतीयस्य गुणार्थिकनयस्य भगवदनुक्तत्वोपपादनम्]

न च भगवताऽसावुक्त इत्याह–

२० जं च पुण अरिहया तेसु तेसु सुत्तेसु गोयमाईणं ।
पज्जवसण्णा णियया वागरिया तेण पज्जाया ॥ ११ ॥

---

१ अत्र टीकानुरोधेन 'पज्जवाहिए' इति पाठः संभाव्यते अथवा सप्तम्यर्थे प्रथमा समर्थनीया । २ पृ० १०६ पं० १० । ३ पृ० ६३३ पं० ३ ।

४ 'गुण–पर्यययोर्विभिन्नत्वे पर्यायप्रतिपादकपर्यायार्थिकवद् गुणप्रतिपादको गुणार्थिकोऽपि स्वतन्त्रो नयः कथमागमे नोक्तः' इत्याशङ्कया प्रेरितेन दिवाकरेण उक्तयोर्द्वयोः शब्दयोरेकार्थत्वं वर्णितं परंतु तयोर्विभिन्नार्थत्वं मन्यमानाभ्यामकलङ्क–विद्यानन्दिभ्यां सा शङ्का प्रकारान्तरेणैव अपाकृता, तदपाकरणयुक्तिरपि तयोर्द्वयोर्विभिद्यते, अकलङ्कीया युक्तिर्वस्तुस्थितिस्पर्शिनी विद्यानन्दीया च तर्कानुगामिनी इति द्वयोर्भेदः प्रतिभाति । तद्यथा–

"द्रव्यार्थिकः पर्यायार्थिक इति द्वावेव मूलनयौ । यदि गुणोऽपि कश्चित् स्यात् तद्विषयेण मूलनयेन तृतीयेन भवितव्यम् न चास्ति असौ इत्यतो गुणाभावाद् गुण–पर्यायवदिति निर्देशो न युज्यते, तन्न; किं कारणम्? अर्हत्प्रवचनहृदयादिषु गुणोपदेशात् । उक्तं हि अर्हत्प्रवचने—'द्रव्याश्रया निर्गुणा गुणाः' इति । अन्यत्र चोक्तम्—

गुण इति दव्वविधाणं दव्ववियारो य पज्जवो भणिदो । तेहि अणूणं दव्वं अजुदवसिद्धं हवदि णिच्चं ॥

यदि गुणोऽपि विद्यते ननु चोक्तं तद्विषयस्तृतीयो मूलनयः प्राप्नोति, नैष दोषः; द्रव्यस्य द्वावात्मानौ सामान्यम् विशेषश्चेति । तत्र सामान्यमुत्सर्गोऽन्वयः गुण इत्यनर्थान्तरम् । विशेषो भेदः पर्याय इति पर्यायशब्दः । तत्र सामान्यविषयो नयो द्रव्यार्थिकः, विशेषविषयः पर्यायार्थिकः । तदुभयं समुदितमयुतसिद्धरूपं द्रव्यमित्युच्यते न तद्विषयस्तृतीयो नयो भवितुमर्हति विकलादेशत्वान्नयानाम् तत्समुदायोऽपि प्रमाणगोचरः सकलादेशत्वात् प्रमाणस्य" इत्यादि—

५,३७ तत्त्वार्थराजवा० वा० २ पृ० २४३ ।

"गुणवद् द्रव्यमित्युक्तं सहानेकान्तसिद्धये । तथा पर्यायवद् द्रव्यं क्रमानेकान्तवित्तये" ॥ २ ॥

—तत्त्वार्थश्लो० वा० पृ० ४३८ ।

५ इदमन्तर्भूतण्यर्थकं बोध्यम् सेट्त्वं च बहुलाधिकारात् समर्थनीयम् ।

यतः पुनर्भगवता तस्मिंस्तस्मिन् सूत्रे "वण्णपज्जवेहिं, गंधपज्जवेहिं" [भगवतीसू० शत० १४, उ० ४ सू० ५१३] इत्यादिना पर्यायसंज्ञा नियमिता वर्णादिषु गौतमादिभ्यः व्याकृतास्ततः पर्याया एव वर्णादयो न गुणा इत्यभिप्रायः ॥ ११ ॥

[तुल्यार्थत्वाद् आगमाच्च पर्यायशब्देन गुणस्यैवाभिधानमिति कथनम्]

अथ तत्र गुण एव पर्यायशब्देनोक्तः तुल्यार्थत्वात् आगमाच्च— ५
"य एव पर्यायः स एव गुणः" [ ] इत्यादिकात् । एतदेवाह—

परिगमणं पज्जाओ अणेगकरणं गुण त्ति तुल्लत्था ।
तह वि ण 'गुण' त्ति भण्णइ पज्जवणयदेसणा जम्हा ॥ १२ ॥

परि समन्तात् सहभाविभिः क्रमभाविभिश्च भेदैर्वस्तुनः परिणतस्य गमनं परिच्छेदो यः स पर्यायः विषय-विषयिणोरभेदात्; अनेकरूपतया वस्तुनः करणं-करोतेर्ज्ञानार्थत्वात्-ज्ञानम्- १० विषय-विषयिणोरभेदादेव-गुणः इति तुल्यार्थौ गुण-पर्यायशब्दौ, तथापि न 'गुणार्थिकः' इत्यभिहितस्तीर्थकृता पर्यायनयद्वारेणैव देशना यस्मात् कृता भगवतेति ॥ १२ ॥

[भगवतो गुणद्वारेणापि देशनादर्शनान्न गुणाभाव इति पूर्वपक्षः]

गुणद्वारेणापि देशनायां भगवतः प्रवृत्तिरुपलभ्यते इति न गुणाभाव इत्याह—

जंपन्ति अत्थि समये एगगुणो दसगुणो अणंतगुणो । १५
रूवाई परिणामो भण्णइ तम्हा गुणविसेसो ॥ १३ ॥

जल्पन्ति द्रव्य-गुणान्यत्ववादिनः-विद्यते एव सिद्धान्ते "एगगुणकालए दुगुणकालए" [भगवतीसू० शत० ५, उ० ७ सू० २१७] इत्यादि रूपादौ व्यपदेशस्तस्माद् रूपादिर्गुण-विशेष एवेत्यस्ति गुणार्थिको नयः उपदिष्टश्च भगवतेति ॥ १३ ॥

[उक्तस्य पूर्वपक्षस्य सिद्धान्तवादिना निराकरणम्] २०

अत्राह सिद्धान्तवादी—

गुणसद्दमंतरेणावि तं तु पज्जवविसेससंखाणं ।
सिज्झइ णवरं संखाणसत्थधम्मो 'तइगुणो' त्ति ॥ १४ ॥

रूपाद्यभिधायिगुणशब्दव्यतिरेकेणापि 'एकगुणकालः' इत्यादिकं पर्यायविशेषसंख्या-वाचकं वचः सिध्यति न पुनर्गुणास्तिकनयप्रतिपादकत्वेन, यतः संख्यानं गणितशास्त्रधर्मः-२५ 'अयं तावद्गुण इति एतावताऽधिको न्यूनो वा भावः' इति गणितशास्त्रधर्मत्वादस्येत्यर्थः ॥ १४ ॥

[सिद्धान्तिना स्वोक्तस्यार्थस्य दृढीकरणम्]

दृष्टान्तद्वारेणामुमेवार्थं दृढीकर्तुमाह—

जह दससु दसगुणम्मि य एगम्मि दसत्तणं समं चेव ।
अहियम्मि वि गुणसद्दे तहेय एयं पि दट्ठव्वं ॥ १५ ॥ ३०

---

१ जीवाजीवाभि० प्रतिप० ३ सू० ७८ पृ० ९८ प्र० । जम्बूद्वीपप्र० वक्ष० २ सू० ३६ पृ० १६४ द्वि० ।
२ भगवतीसू० पृ० ६४० प्र० ।
३ मलयगिरीयायां धर्मसंग्रहणिटीकायां शाकटायनसम्मतं पर्यायलक्षणमित्थमुपन्यस्तं वर्तते—
"यदाह शाकटायनः-क्रमेण पदार्थानां क्रियाभिसंबन्धः पर्याय इति"—पृ० १४८ प्र० पं० १२ ।
४ भगवतीसू० पृ० २३५ प्र० । ५ "संखाणे × × × सुपरिनिट्ठिए" । "संखाणे त्ति गणितस्कन्धे सुपरिनिष्ठित इति योगः"—[भगवतीसू० श० २ उ० १ सू० ९० पृ० ११२ द्वि० तथा पृ० ११४ प्र०] इत्येवं गणितार्थवाचकः 'संख्यान'-शब्दः भगवतीप्रभृतिसूत्रेषु विद्यते । ६ शब्दस्य व्य-भां० मां० ।

यथा दशसु द्रव्येषु एकस्मिन् वा द्रव्ये दशगुणिते दशशब्दातिरेकेऽपि **दशत्वं सममेव तथैव एतदपि** न भिद्यते-'परमाणुरेकगुणकृष्णादिः' इति। **एकादिशब्दाधिक्ये** गुण-पर्यायशब्दयोर्भेदः वस्तु पुनस्तयोस्तुल्यमिति भावः। न च गुणानां पर्यायत्वे वाचकमुख्यसूत्रम्—"गुण-पर्यायवद् द्रव्यम्" [तत्त्वार्थ० अ० ५, सू० ३७] इति विरुध्यते, युगपदयुगपद्भावि-
५ पर्यायविशेषप्रतिपादनार्थत्वात् तस्य। न चैवमपि मतुप्प्रयोगाद् द्रव्यविभिन्नपर्यायसिद्धिः, नित्ययोगेऽत्र मतुब्विधानात् द्रव्य-पर्याययोस्तादात्म्यात् सदाऽविनिर्भागवर्तित्वात् अन्यथा प्रमाणबाधोपपत्तेः। संज्ञा-संख्या-स्वलक्षणाऽर्थक्रियाभेदाद् वा कथंचित् तयोरभेदेऽपि भेदसिद्धेर्न मतुबनुपपत्तिः॥ १५॥

[भेदस्य निरासेनाभेदस्य फलितत्वेऽप्येकान्तिना तस्य दार्ढ्याय सोपनयमुदाहरणम्]

१० एवं द्रव्य-पर्याययोर्भेदैकान्तप्रतिषेधे अभेदैकान्तवाद्याह—

एयंतपक्खवाओ जो उण दव्व-गुण-जाइभेयम्मि।
अह पुव्वपडिकुट्ठो उआहरणमित्तमेयं तु॥ १६॥
पिउ-पुत्त-णत्तु-भव्वय-भाऊणं एगपुरिससंबंधो।
ण य सो एगस्स पिय त्ति सेसयाणं पिया होइ॥ १७॥
१५ **जह संबन्धविसिट्ठो सो पुरिसो पुरिसभावणिरइसओ।**
तह दव्वमिंदियगयं रूवाइविसेसणं लहइ॥ १८॥

एकान्तव्यतिरिक्ताभ्युपगम**वादो यः** पुनर्द्रव्य-गुण-क्रियाभेदेषु स यद्यपि **पूर्वमेव प्रतिक्षिप्तः** भेदैकान्तग्राहकप्रमाणाभावात् अभेदग्राहकस्य च 'सर्वमेकं सदविशेषात् विशेषे वा वियत्कुसुमवदसत्त्वप्रसङ्गात्' इति प्रदर्शितत्वात्।

२० तथापि तत्स्वरूपे दार्ढ्योत्पादनार्थ**मुदाहरणमात्रमभिधीयते**—

पितृ-पुत्र-नप्तृ-भागिनेय-भ्रातृभिर्य एकस्य पुरुषस्य संबन्धस्तेनासावेक एव पित्रादिव्यपदेशमासादयति। न चासावेकस्य पिता-पुत्रसंबन्धतः—इति शेषाणामपि पिता भवति।

यथा प्रदर्शित**संबन्धविशिष्टः** पित्रादिव्यपदेशमाश्रित्या**सौ पुरुष**रूपतया **निरतिशयोऽपि सन् तथा द्रव्यमपि** घ्राण-रसन-चक्षुस्-त्वक्-श्रोत्रसंबन्धमवाप्य **रूप-रस-गन्ध-स्पर्श-**
२५ **शब्दव्यपदेशमात्रं लभते** द्रव्यस्वरूपेणाविशिष्टमपि नहि शक्रेन्द्रादिशब्दभेदाद् **गीर्वाणनाथस्येव** रूपादिशब्दभेदाद् वस्तुभेदो युक्तस्तदा द्रव्याद्वैतैकान्तस्थितेः कथञ्चिद् भेदाभेदवादो द्रव्य-गुणयोर्मिथ्यावाद इति॥ १६॥ १७॥ १८॥

[कथंचिद् भेदाभेदं मिथ्या वदतोऽभेदैकान्तपक्षस्य निराकरणम्]

अस्य निराकरणायाह—

३० **होज्जाहि दुगुणमहुरं अणंतगुणकालयं तु जं दव्वं।**
ण उ डहरओ महल्लो वा होइ संबंधओ पुरिसो॥ १९॥

---

१ "ववदेसा संठाणा संखा विसया य होंति ते बहुगा। ते तेसिमणण्णत्ते अण्णत्ते चावि विज्जंते"॥ ४६॥—पञ्चास्ति०।
२ "भव्वो बहिणीतणए" "भव्वो भागिनेयः"—देशीना० व० ६ गा० १००। तत्रैव च "भब्बो" इति पाठान्तरम्।
३ पृ० २७२ पं० १७। ४ भगिनीवद् भमीशब्दोऽपि विद्यते ततो भम्या अपत्यं भामेयः—वाच०।

यदि नाम आम्रादिद्रव्यमेव रसनसंबन्धाद् 'रसः' इति व्यपदेशमात्रमासादयेत् द्विगुणमधुरं रसतः कुतो भवेत् तथा नयनसंबन्धाद् यदि नाम 'कृष्णम्' इति भवेत् अनन्तगुणकृष्णं तत् कुतः स्यात् वैषम्यभेदावगतेर्नयनादिसंबन्धमात्रादसंभवात् । तथा, पुत्रादिसंबन्धद्वारेण पित्रादिरेव पुरुषो भवेत् न त्वल्पो महान् वेति युक्तः । विशेषप्रतिपत्तेरुपचरितत्वे मिथ्यात्वे वा सामान्यप्रतिपत्तावपि तथाप्रसक्तेरिति भावः ॥ १९ ॥ ५

[अभेदैकान्तवादिन आशङ्का]

अत्राहाभेदैकान्तवादी[1]—

भण्णइ संबंधवसा जइ संबंधित्तणं अणुमयं ते ।
णणु संबंधविसेसे संबंधिविसेसणं सिद्धं ॥ २० ॥

संबन्धसामान्यवशाद् यदि संबन्धित्वसामान्यम् अनुमतं तव, ननु संबन्धविशेषद्वारेण तथैव संबन्धिविशेषोऽपि किं नाभ्युपगम्यते? ॥ २० ॥ १०

[सिद्धान्तवादिनाऽऽशङ्कानिरसनम्]

सिद्धान्तवाद्याह—

जुज्जइ संबंधवसा संबंधिविसेसणं ण उण एयं ।
णयणाइविसेसगओ रूवाइविसेसपरिणामो ॥ २१ ॥ १५

संबन्धविशेषवशाद् युज्यते संबन्धिविशेषः यथा दण्डादिसंबन्धिविशेषजनितसंबन्धविशेषसमासादितसंबन्धिविशेषोऽवगतः । द्रव्याद्वैतवादिनस्तु न संबन्धिविशेषः नापि संबन्धविशेषः संगच्छत इति कुतो रसनादिविशेषसंबन्धजनितो रसादिविशेषपरिणामः? ॥ २१ ॥

[अनेकान्तवादे अनन्त-द्विगुणादिवैषम्यपरिणतिः कथं घटते इत्याशङ्का तन्निरासश्च]

नन्वनेकान्तवादिनोऽपि रूप-रसादेरनन्त-द्विगुणादिवैषम्यपरिणतिः कथमुपपन्ना? इत्याह— २०

भण्णइ विसमपरिणयं कह एयं होहिइ त्ति उवणीयं ।
तं होइ परणिमित्तं ण व त्ति एत्थऽत्थि एगंतो ॥ २२ ॥

शीतोष्णस्पर्शवदेकत्रैकदा विरोधाद् भण्यते 'एकत्र आम्रफलादौ विषमपरिणतिः कथं भवति' इति परेण प्रेरिते उपनीतं प्रदर्शितमातेन-तद् भवति परनिमित्तम्—द्रव्य-क्षेत्र-काल-भावानां सहकारिणां वैचित्र्यात् कार्यमपि वैचित्र्यमासादयति—तद् आम्रादि वस्तु २५ विषमरूपतया परनिमित्तं भवति, न[2] वा 'परनिमित्तमेव' इत्यत्राप्येकान्तोऽस्ति, स्वरूपस्यापि कथंचिन्निमित्तत्वात् । तन्न द्रव्याद्वैतैकान्तः संभवी ॥ २२ ॥

[प्रागुक्तस्य लक्षणस्य बाधाद् भेदैकान्तवादिना द्रव्य-गुणयोर्लक्षणान्तराभिधानम् अभेदैकान्तवादिना च विकल्प्य तद्दूषणम्]

द्रव्य-गुणयोर्भेदैकान्तवादिना प्राक् प्रदर्शिततल्लक्षणस्यैकत्वप्रतिपत्त्यध्यक्षबाधितत्वाद् लक्षणान्तरं वक्तव्यम् तदाह— ३०

दव्वस्स ठिई जम्म-विगमा य गुणलक्खणं ति वत्तव्वं[3] ।
एवं सइ केवलिणो जुज्जइ तं णो उ दवियस्स ॥ २३ ॥

---

१ अत्राह भेदै-वा० बा० भां० मां० । २ न चाप-वा० बा० भां० मां० । ३ वत्तव्वं छ दव्वस्स इ० आ० हा० वि० ।

द्रव्यस्य लक्षणं स्थितिः जन्म-विगमौ लक्षणं गुणानाम्, एवं सति केवलिनो युज्यत एतल्लक्षणम्-तत्र किल केवलात्मना स्थिते एव चेतनाचेतनरूपा अन्ये अर्था ज्ञेयभावेनोत्पद्यन्ते, अज्ञेयरूपतया च नश्यन्ति । न तु द्रव्यस्याण्वादेर्लक्षणमिदं युज्यते, न हि अणौ रूपादयो जायन्ते अत्यन्तभिन्नत्वात् गव्यश्वादिवत् । अथवा केवलिनोऽपि सकलज्ञेयग्राहिणो नैतल्लक्षणं युज्यते । न चापि द्रव्यस्य अचेतनस्य गुण-गुणिनोरत्यन्तभेदे असत्त्वापत्तेः—असतोश्च खरविषाणादेरिव लक्षणासंभवादिति ॥ २३ ॥

दव्वत्थंतरभूया मुत्ताऽमुत्ता य ते गुणा होज्ज ।
जइ मुत्ता परमाणू णत्थि अमुत्तेसु अग्गहणं ॥ २४ ॥

द्रव्यार्थान्तरभूतगुणवादिनः द्रव्यादर्थान्तरभूतगुणा मूर्ताः, अमूर्ता वा भवेयुः ? यदि मूर्ताः परमाणवो न तर्हि परमाणवो भवन्ति, मूर्तिमद्रूपाद्याधारत्वात् अनेकप्रदेशिकस्कन्धद्रव्यवत् । अथामूर्ताः, अग्रहणं तेषाम् अमूर्तत्वात् आकाशवत् । ततो द्रव्य-गुणयोः कथंचिद् भेदाभेदावभ्युपगमनीयौ अन्यथोक्तदोषप्रसक्तेः । तथाहि—द्रव्य-गुणयोः कथंचिद् भेदः यथाक्रममेकानेकप्रत्ययावसेयत्वात्, कथंचिदभेदोऽपि रूपाद्यात्मना द्रव्यस्वरूपस्य रूपादीनां च द्रव्यात्मकतया प्रतीतेः; अन्यथा तदभावापत्तेः ॥ २४ ॥

[प्रस्तुतप्रपञ्चस्य शिष्यबुद्धिवैशद्यमात्रप्रयोजनकत्वकथनम्]

ततः

सीसमईविप्फारणमेत्तत्थोऽयं कओ समुल्लावो ।
इहरा कहामुहं चेव णत्थि एवं ससमयम्मि ॥ २५ ॥

शिष्यबुद्धिविकाशनमात्रार्थोऽयं कृतः प्रबन्धः; इतरथा कथैवैषा नास्ति स्वसिद्धान्ते 'किमेते गुणा गुणिनो भिन्नाः, आहोस्विद् अभिन्नाः' इति, अनेकान्तात्मकत्वात् सकलवस्तुनः ॥ २५ ॥

[वस्तुत्वे कथंचिद् भेदाभेदात्मके व्यवस्थितेऽपि तदन्यथावादिनां मिथ्यादृष्टित्वकथनम्]

एवंरूपे च वस्तुतत्त्वे अन्यथारूपं तत् प्रतिपादयन्तो मिथ्यावादिनो भवन्तीत्याह—

ण वि अत्थि अण्णवादो ण वि तव्वाओ जिणोवएसम्मि ।
तं चेव य मण्णंता अवमण्णंता ण याणंति ॥ २६ ॥

नैवास्ति अन्यवादो गुण-गुणिनोः, नाप्यनन्यवादो जिनोपदेशे द्वादशाङ्गे प्रवचने सर्वत्र कथंचिदित्याश्रयणात् । तदेव अन्यदेवेति वा मन्यमानाः मननीयमेव अवमन्यमाना वादिनोऽभ्युपगतविषयावज्ञाविधायित्वाद् अज्ञा भवन्ति अभ्युपगमनीयवस्त्वस्तित्वप्रतिपादकोपायनिमित्तापरिज्ञानाद् मृषावादिवदिति तात्पर्यार्थः । ततोऽनेकान्तवाद एव व्यवस्थितः ॥ २६ ॥

[अनेकान्तस्य व्यापकतां प्रदर्शयितुमनेकान्तेऽप्यनेकान्ताभ्युपगमनम्]

ननु 'सर्वत्रानेकान्तः' इति नियमे अनेकान्तेऽप्यनेकान्ताद् एकान्तप्रसक्तिः । अथ नानेकान्ते अनेकान्तवादस्तर्हि अव्यापकोऽनेकान्तवाद इत्यत्राह—

भयणा वि हु भइयव्वा जइ भयणा भयइ सव्वदव्वाइं ।
एवं भयणा णियमो वि होइ समयाविरोहेण ॥ २७ ॥

यथा भजना अनेकान्तो भजते सर्ववस्तूनि तदतत्स्वभावतया ज्ञापयति तथा भजनाऽपि अनेकान्तोऽपि भजनीयः—अनेकान्तोऽप्यनेकान्त इत्यर्थः—नय-प्रमाणापेक्षया 'एकान्त-

श्चाऽनेकान्तश्च' इत्येवं ज्ञापनीयः । एवं च भजनाऽनेकान्तः संभवति, नियमश्च एकान्तश्च सिद्धान्तस्य "रयणप्पभा सिआ सासया सियाऽसासया" [जीवाजीवाभि० प्रतिप० ३ उ० १ सू० ७८] इत्येवमनेकान्तप्रतिपादकस्य "दव्वट्ठयाए सासया, पज्जवट्ठयाए असासया" [ ] इत्येवं चैकान्ताभिधायकाविरोधेन ।

न चैवमव्यापकोऽनेकान्तवादः, 'स्यात्'पदसंसूचितानेकान्तगर्भस्यैकान्तस्य तत्त्वात् अनेकान्त-५ स्यापि 'स्यात्'कारलाञ्छनैकान्तगर्भस्य अनेकान्तस्वभावत्वात् । न चानवस्था, अन्यनिरपेक्षस्वस्वरूपत एव तथात्वोपपत्तेः यद्वा स्वरूपत एवानेकान्तस्यैकान्तप्रतिषेधेनानेकान्तरूपत्वात् 'स्यादेकान्तः' 'स्यादनेकान्तः' इति कथं नानेकान्तेऽनेकान्तोऽपि । अनेकान्तात्मकवस्तुव्यवस्थापकस्य तद्व्यवस्थापकत्वं स्वयमनेकान्तात्मकत्वमन्तरेणाऽनेकान्तस्याऽनुपपन्नमिति न तत्राऽव्यापकत्वादिदोष इत्यसकृदावेदितमेव ॥ २७ ॥ १०

[षड् जीवनिकायास्तद्घाते च धर्म इत्यत्राप्यनेकान्तव्यवस्थापनम्]

नन्वनेकान्तस्य व्यापकत्वे 'षड् जीवनिकायाः' 'तद्घाते वा धर्मः' इत्यत्राप्यनेकान्त एव स्यादित्याशङ्क्याऽऽह—

णियमेण सद्दहंतो छक्काए भावओ न सद्दहइ ।
हंदी अपज्जवेसु वि सद्दहणा होइ अविभत्ता ॥ २८ ॥ १५

नियमेनाऽवधारणेन 'षडेवैते जीवाः कायाश्च' इत्येवं **श्रद्दधानः षट्कायान् भावतः** परमार्थतो **न श्रद्धत्ते** जीवराश्यपेक्षया तेषामेकत्वात् कायानामपि पुद्गलतयैकत्वात् जीव-पुद्गलप्रदेशानां परस्पराविनिर्भागवृत्तित्वाच्च जीवप्रदेशानां स्याद् अजीवत्वम् प्रत्येकं प्राधान्यविवक्षया स्याद् अनिकायत्वम् सूत्रविहितन्यायेन प्रवृत्तस्याऽप्रमत्तस्य 'हिंसाऽप्यहिंसा' इति 'तद्घाते स्यादधर्मः' इति । न भावसम्यग्दृष्टिरसौ स्यात्, द्रव्यसम्यग्दृष्टिस्तु स्यात् 'भगवतैवमुक्तम्' इति जिनवचनरुचि-२०

---

१ "इमा णं भंते! रयणप्पभा पुढवी किं सासया ? असासया ?
गोयमा! सिय सासता सिय असासया ।
से केणट्ठेणं भंते! एवं वुच्चइ-सिय सासया सिय असासया ?
गोयमा! दव्वट्ठयाए सासता, वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासता से तेणट्ठेणं गोयमा! एवं वुच्चति-तं चेव जाव सिय असासता । एवं जाव अधेसत्तमा"—जीवाजीवाभि० पृ० ९८ प्र० पं० ११—१४ ।

२ "अनेकान्तोऽप्यनेकान्तः प्रमाण-नयसाधनः । अनेकान्तः प्रमाणात् ते तदेकान्तोऽर्पितान्नयात्" ॥ —सनातन० प्र० गु० स्वयंभूस्तो० अर० श्लो० १८ ।

"अनेकान्ते तदभावादव्याप्तिरिति चेत्, न; तत्रापि तदुपपत्तेः । ६ । स्यादेतत् अनेकान्ते सा विधि-प्रतिषेधविकल्पना नास्ति । यदि स्याद् यदाऽनेकान्तो न भवति तदैकान्तदोषानुषङ्गो भवेत् अनवस्थाप्रसङ्गश्च । ततस्तत्रानेकान्तत्वमेव इति सा सप्तभङ्गी व्याप्तिमती न भवतीति, तन्न; किं कारणम्? तत्रापि तदुपपत्तेः 'स्याद् एकान्तः' 'स्याद् अनेकान्तः' 'स्याद् उभयः' 'स्याद् अवक्तव्यः' 'स्याद् एकान्तश्च अवक्तव्यश्च' 'स्याद् अनेकान्तश्च अवक्तव्यश्च' 'स्याद् एकान्तश्च अनेकान्तश्च अवक्तव्यश्च' इति । तत् कथमिति चेत्? उच्यते—प्रमाण-नयार्पणाभेदादेकान्तो द्विविधः—सम्यगेकान्तः मिथ्यैकान्त इति । अनेकान्तो द्विविधः सम्यगनेकान्तः मिथ्यानेकान्त इति । तत्र सम्यगेकान्तो हेतुविशेषसामर्थ्यापेक्षः प्रमाणप्ररूपितार्थैकदेशादेशः, एकात्मावधारणेन अन्याशेषनिराकरणप्रवणप्रणिधिर्मिथ्यैकान्तः । एकत्र सप्रतिपक्षानेकधर्मस्वरूपनिरूपणो युक्त्यागमाभ्यामविरुद्धः सम्यगनेकान्तः, तदतत्स्वभाववस्तुशून्यं परिकल्पितानेकात्मकं केवलं वाग्विज्ञानं मिथ्यानेकान्तः । तत्र सम्यगेकान्तो नय उच्यते, सम्यगनेकान्तः प्रमाणम् । नयार्पणादेकान्तो भवत्येकनिश्चयप्रवणत्वात् । प्रमाणार्पणादनेकान्तो भवति अनेकनिश्चयाधिकरणत्वात् । यद् यदि अनेकान्तोऽनेकान्त एव स्यात् नैकान्तो भवेत् एकान्ताभावात् तत्समूहात्मकस्य तस्याप्यभावः स्यात् शाखाद्यभावे वृक्षाद्यभाववत् तदविनाभाविविशेषनिराकरणादात्मलोपे सर्वलोपः स्यात् । एवमुत्तरे च भङ्गा योजयितव्याः"—तत्त्वार्थराजवा० १-६-६ पृ० २५-२६ । शास्त्रवा० स्याद्वादक० पृ० २२३ द्वि० पं० १—१० ।

३ "अनेकान्ततो"-बृ० टि० । ४ "एकान्तोऽपीति"-बृ० टि० । ५ "वस्तु-" बृ० टि० । ६-कायित्व-बृ० ।

स्वभावत्वात्। ततोऽपर्यायेष्वपि न विद्यन्ते अर्चि–र्मुर्मुरादयो विवक्षितपर्याया येषु पुद्गलेषु तेष्वपि **अविभक्तश्रद्धानं** यत् तदपि भावत एव **भवेत्**–'अर्चिष्मानयं भावो भूतो भावी वा' इति। तत्राऽव्यापकोऽनेकान्तवादः ॥ २८ ॥

[गतिमत्यपि द्रव्ये अपेक्षाविशेषेण गत्यगती प्रदर्श्यानेकान्तस्य व्यापकत्वोपपादनम्]

५ नन्वनेकान्तस्य व्यापकत्वे 'गच्छति तिष्ठति' इत्यत्राऽप्यनेकान्तः स्यात्, तथाभ्युपगमे च तयोरभावप्रसक्तिरित्येतदेवाऽऽह–

गइपरिगयं गई चेव केइ णियमेण दवियमिच्छंति।
तं पि य उड्ढगईयं तहा गई अन्नहा अगई ॥ २९ ॥

'गतिक्रियापरिणामवद् द्रव्यं गतिमदेव' इति केचिद् मन्यन्ते, तदपि गति-
१० क्रियापरिणतं जीवद्रव्यं सर्वतो गमनाऽयोगाद् **ऊर्ध्वा**दिप्रतिनियतदिग्गतिकं तैर्वादिभिरभ्युपगन्तव्यम्; एवं च तत् **तथा** प्रतिनियतदिग्गमनेनैव **गति**मत्; **अन्यथा**ऽपि गतिमत् स्यात् तदाऽभिप्रेतदेशप्राप्तिवद् अनभिप्रेतदेशप्राप्तिरपि तस्य भवेदित्यनुपलभ्यमानयुगपद्विरुद्धोभयदेशप्राप्तिप्रसक्तेरत्राप्यनेकान्तो नाऽव्यापकः। अभिप्रेतगतिरेव तत्राऽनभिप्रेताऽगतिरिति चेत्, न; अनभिप्रेतगत्यभावाभावे प्रतिनियतगतिभाव एव न भवेत् तत्सद्भावे वा तदवस्थोऽनेकान्तः ॥ २९ ॥

१५ [दहनादावपेक्षाविशेषेणादहनत्वादिकं निरूप्यानेकान्तस्य व्यापकत्वसमर्थनम्]

स्यादेतत् 'दहनाद् दहनः, पवनात् पवनः' इत्यत्राप्यनेकान्ते दहनादावदहनादेर्विरुद्धरूपस्य संभवात् स्वरूपाभावः स्यादित्यत्राह–

गुणणिव्वत्तियसण्णा एवं दहणादओ वि दट्ठव्वा।
जं तु जहा पडिसिद्धं दव्वमदव्वं तहा होइ ॥ ३० ॥

२० **गुणेन** दहनादिना **निर्वर्तितो**त्पादिता **संज्ञा**ऽभिधानं येषां तेऽपि **दहन–पवनादय एव**मेवाऽनेकान्तात्मका **द्रष्टव्याः**। तथाहि–दाह्यपरिणामयोग्यं तृणादिकं दहतीति दहनः तदपरिणतिस्वभावं स्वात्माकाशाऽप्राप्त-वज्राऽण्वादिकं न दहतीति। तेन **यद् द्रव्यं यथा** दहनरूपतया **प्रतिषिद्धं** तद् **अद्रव्य**मदहनादिरूपम् **तथा** भजनाप्रकारेण स्याद् दहनः स्यान्नेति **भवति** ततो नाऽव्यापी अनेकान्तः।

२५ तथा, 'अदहनः' इत्यत्राप्यनेकान्तः। तथाहि–यद् उदकद्रव्यं यथा दहनरूपेण प्रतिषिद्धं–दहनो न भवतीति 'अदहनः' इति तदपि न सर्वथा अदहनद्रव्यं भवति, पृथिव्यादेरदहनरूपाद् व्यावृत्तत्वात् अन्यथा दहनव्यतिरिक्तभूतैकत्वप्रसङ्ग इत्यनेकान्त एव अदहनव्यावृत्तस्य तद्द्रव्यत्वात् ॥ ३० ॥

[सर्वस्यापि वस्तुनः प्रतिनियतस्वरूपान्यथानुपपत्त्या स्वरूपास्तित्व–पररूपनास्तित्वाभ्युपगमेनानेकान्तात्मकत्वप्रदर्शनम्]

३० नन्वेवं तदतद्द्रव्यत्वाद् जीवद्रव्यमजीवद्रव्यम् अजीवद्रव्यं च जीवद्रव्यं स्यादित्याशङ्क्याऽऽह–

कुंभो ण जीवदवियं जीवो वि ण होइ कुंभदवियं ति।
तम्हा दो वि अदवियं अण्णोण्णविसेसिया होंति ॥ ३१ ॥

कुम्भो जीवद्रव्यं न भवतीति जीवोऽपि न भवति घटद्रव्यम्। तस्माद् द्वावपि अद्रव्यमन्योन्यविशेषितौ परस्पराभावात्मकौ।

१–दयोऽवि–आ० हा० वि० विना। २–नस्य त–बृ०। ३ "दहनद्रव्यत्वात् ततोऽनेकान्तो दहनादहनयोः"–बृ० टि०।

यतोऽयमभिप्रायः—जीवद्रव्यं कुम्भादेरजीवद्रव्याद् व्यावृत्तम् अव्यावृत्तं वा? प्रथमपक्षे स्वरूपापेक्षया जीवो जीवद्रव्यम्, कुम्भाद्यजीवद्रव्यापेक्षया तु न जीवद्रव्यमित्युभयरूपत्वादनेकान्त एव। द्वितीयविकल्पे तु सर्वस्य सर्वात्मकतापत्तेः प्रतिनियतरूपाभावतस्तयोरभावः खरविषाणवत्। ततः सर्वमनेकान्तात्मकम्–अन्यथा प्रतिनियतरूपताऽनुपपत्तेः—इति व्यवस्थितम् ॥ ३१ ॥

[उत्पादपर्यायस्य प्रयोग–विस्रसाजन्यत्वेन द्वैविध्यकथनम्] ५

अत्र प्रागुक्तम्—'प्रत्युत्पन्नं पर्यायं विगतभविष्यद्भ्यां यत् समानयति वचनं तत् प्रतीत्यवचनम्' इति, तत्र वचनादिकोऽपि पर्यायः, स चाऽप्रयत्नानन्तरीयको वचनविशेषलक्षणः घटादिकस्तु प्रयत्नानन्तरीयक इति केचित् संप्रतिपन्नास्तन्निराकरणाय 'यद् यतोऽन्वय–व्यतिरेकाभ्यां प्रतीयते तत् तत एवाऽभ्युपगन्तव्यम् अन्यथा कार्यकारणभावाभावप्रसक्तिः' इत्याह—

उप्पाओ दुवियप्पो पओगजणिओ य वीससा चेव । १०

तत्थ उ पओगजणिओ समुदयवायो अपरिसुद्धो ॥ ३२ ॥

द्विभेद उत्पादः–पुरुषेतरकारकव्यापारजन्यतया अध्यक्षाऽनुमानाभ्यां तथा तस्य प्रतीतेः। पुरुषव्यापारान्वयव्यतिरेकानुविधायित्वेऽपि शब्दविशेषस्य तदजन्यत्वे घटादेरपि तदजन्यताप्रसक्तेः विशेषाभावात् प्रत्यभिज्ञानादेश्च विशेषस्य प्रागेव निरस्तत्वात् तत्र प्रयोगेण यो जनित उत्पादः—मूर्तिमद्द्रव्यारब्धावयवकृतत्वात्—स समुदायवादः, तथाभूताऽऽरब्धस्य समुदायात्म- १५ कत्वात्। तत एवाऽसावपरिशुद्धः, सावयवात्मकस्य तच्छब्दवाच्यत्वेन अभिप्रेतत्वात् ॥ ३२ ॥

[विस्रसाजन्यस्याप्युत्पादस्य द्वैविध्यवर्णनम्]

विस्रसाजनितोऽप्युत्पादो द्विविध इत्याह—

साभाविओ वि समुदयकओ व्व एगंतिओ (एगत्तिओ) व्व होज्जाहि ।

आगासाईआणं तिण्हं परपच्चओऽणियमा ॥ ३३ ॥ २०

स्वाभाविकश्च द्विविध उत्पादः—एकः समुदयकृतः प्राक्प्रतिपादितावयवारब्धो घटादिवत्। अपरश्चैकत्विकोऽनुत्पादिताऽमूर्तिमद्द्रव्यावयवारब्ध आकाशादिवत्। आकाशादीनां च त्रयाणां द्रव्याणामवगाहकादिघटादिपरद्रव्यनिमित्तोऽवगाहनादिक्रियोत्पादोऽनियमाद् अनेकान्ताद् भवेत्—अवगाहक–गन्तृ–स्थातृद्रव्यसन्निधानतोऽम्बर–धर्मा–ऽधर्मेष्ववगाहन–गति–स्थितिक्रियोत्पत्तिनिमित्तभावोत्पत्तिरित्यभिप्रायः। २५

[आकाशादिद्रव्यत्रयस्य कथंचित् सावयवत्वसाधनम् सामयिकीनामाकाशादिसंज्ञानामुपपादनं च]

नन्वनारब्धाऽमूर्तिमद्द्रव्यावयवत्वे गगनादीनां निरवयवत्वप्रसक्तेरनेकान्तात्मकत्वव्याघातः, न, मूर्तिमद्द्रव्याऽनारब्धानामपि तेषां सावयवत्वात्। न च सावयवत्वमसिद्धम् प्रदेशव्यवहारस्याऽऽकाशे दर्शनात्। न च 'आकाशस्य प्रदेशाः' इति व्यवहारो मिथ्या, मिथ्यात्वनिमित्ताभावात्। न च ३० संयोगस्याऽव्याप्यवृत्तित्वनिमित्तः सावयवत्वाध्यारोपो मिथ्यात्वकारणम् निरवयवेऽव्याप्यवृत्तिसंयोगाधारत्वस्याऽध्यारोपनिमित्तस्यैवाऽनुपपत्तेः। यदि च सावयवं नभो न भवेत् तदा श्रोत्राकाशसमवेतस्येव शब्दस्य ब्रह्मभाषितस्याऽप्युपलम्भोऽस्मदादि(दे)र्भवेत् निरवयवैकाकाशश्रोत्रसमवेतत्वात्। अथ धर्माधर्माभिसंस्कृतकर्णशष्कुल्यवरुद्धाकाशदेश एव श्रोत्रं तत्र च ब्रह्मभाषितस्याऽसमवायान्नास्मदादिभिः श्रवणम्। नन्वेवं सैव सावयवत्वप्रसक्तिः श्रोत्राकाशप्रदेशाद् ब्रह्मशब्दाधारा- ३५ काशदेशस्यान्यत्वात्। यदि च सावयवमाकाशं न भवेत्, शब्दस्य नित्यत्वं सर्वगतत्वं च स्यात् आकाशैकगुणत्वात् तन्महत्त्ववत्। अथ क्षणिकैकदेशवृत्तिविशेषगुणत्वस्य शब्दे प्रमाणतः प्रसिद्धेर्नायं दोषः। नन्वेवमेकदेशवृत्तिविशेषगुणत्वाभ्युपगमे कथं न शब्दाधारस्याऽऽकाशस्य सावयवत्व-

---

१ पृ० ६२८ गा० ३। २ प्र० पृ० गा० ३२। ३–शप्रदेश–भां० मां०। ४ प्रस्तुतचर्चागतः कश्चित् कश्चिदंशः प्रायेण शब्दशः प्रमेयकमलमार्तण्डे वर्तते–पृ० १६८ प्र० पं० १०—। ५–तः सि–भां० मां०।

प्रसिद्धिः ? न हि निरवयवत्वे 'तस्यैकदेशे एव शब्दो वर्तते न सर्वत्र' इति व्यपदेशः संगच्छते । न च संयोगस्याऽव्याप्यवृत्तित्वनिबन्धनोऽयम् यत आकाशं व्याप्य संयोगो न वर्तते इति तदेकदेशे वर्तते इत्यभ्युपगमप्रसक्तिः व्याप्यवृत्तित्वं हि सामस्त्यवृत्तित्वम्, तत्प्रतिषेधश्च पर्युदासपक्षे एकदेशवृत्तित्वमेव, प्रसज्यपक्षे तु वृत्तिप्रतिषेध एव; न चासौ युक्तः संयोगस्य गुणत्वेन द्रव्याश्रितत्वात्
५ तदभावे च तदभावात् । न च निरवयवत्वे आकाशस्य संतानवृत्त्या आगतस्य शब्दस्य श्रोत्रेणाप्युपलब्धिः संभवति अन्यान्याकाशदेशोत्पत्तिद्वारेण तस्य श्रोत्रसमवेतत्वानुपपत्तेः । जलतरङ्गन्यायेनापरापराकाशदेशादावपरापरशब्दोत्पत्तिप्रकल्पनायां कथं नाकाशस्य सावयवत्वम् ?

किञ्च, आकाशं शब्दोत्पत्तौ समवायिकारणमभ्युपगम्यते, यच्च समवायिकारणं तत् सावयवम्, यथा तन्त्वादि, समवायिकारणं च परेण शब्दोत्पत्तावाकाशमभ्युपगतम् । न च परमाण्वाऽऽत्मा-
१० दिना व्यभिचारः तस्यापि सावयवत्वात्; अन्यथा द्व्यणुक-बुद्ध्यादेस्तत्कार्यस्य सावयवत्वं न स्यात् । न च बुद्ध्यादेः सावयवत्वमसिद्धम् आत्मनः सावयवत्वेन साधितत्वात् तद्विशेषगुणत्वेन बुद्ध्यादेः कथंचित् तादात्म्यसिद्धितः सावयवत्वोपपत्तेः । न च यत एव प्रमाणादणवः सिद्धास्तेषां निरवयवत्वमपि तत एव सिद्धमिति तद्ग्राहकप्रमाणबाधितत्वात् सावयवत्वानुमानस्याऽप्रामाण्यम् प्रमाणतः परमाणूनामसिद्धावाश्रयासिद्धितः सावयवत्वानुमानस्याऽप्रवृत्तिरिति वाच्यम्, यतः सावयवकार्यस्य
१५ सावयवकारणपूर्वकत्वे साध्ये न पूर्वोक्तदोषावकाशः । न च कार्यकारणयोरात्यन्तिको भेदः, समवायनिषेधे हि हिमवद्—विन्ध्ययोरिव भेदे विशिष्टकार्यकारणरूपतानुपपत्तेः । ततो द्व्यणुकादेः परमाणुकार्यस्य सावयवत्वात् तदात्मभूताः परमाणवः कथं न सावयवाः इति न परमाण्वादिभिर्व्यभिचारः । अपि च, सावयवमाकाशं तद्विनाशान्यथानुपपत्तेः । न चाऽऽकाशस्य विनाशित्वमसिद्धम् । तथाहि—अनित्यमाकाशम्, तद्विशेषगुणाभिमतशब्दविनाशान्यथानुपपत्तेः । यतो न तावदाश्रय-
२० विनाशाच्छब्दविनाशोऽभ्युपगतस्तन्नित्यत्वाभ्युपगमविरोधात्; न विरोधिगुणप्रादुर्भावात्, तन्महत्त्वादेरेकार्थसमवायित्वेन रूप-रसयोरिव विरोधिताऽसिद्धेः । विरोधित्वे वा श्रवणसमयेऽपि तदभावप्रसङ्गः तदाऽपि तन्महत्त्वस्य सद्भावात् । नापि संयोगादिर्विरोधिगुणः तस्य तत्कारणत्वात् । नापि संस्कारः तस्य गुणत्वेन शब्देऽसंभवात् संभवे वा शब्दस्य द्रव्यत्वप्रसक्तिः । आकाशस्य द्रव्यत्वेन तत्संभवेऽपि तस्याभावे आकाशस्याऽप्यभावप्रसक्तिः तस्य तदव्यतिरेकात् । व्यतिरेके वा
२५ 'तस्य' इति संबन्धाऽयोगात् । नापि शब्दोपलब्धिप्रापकधर्माद्यभावात् तदभावः तस्य विभिन्नाश्रयस्यानेन विनाशयितुमशक्यत्वात् । शक्यत्वे वा तदाधारस्यापि विनाशप्रसङ्गः तस्य तदव्यतिरेकात् । ततोऽम्बरविशेषगुणत्वे शब्दस्य तद्विनाशान्यथानुपपत्त्या तस्यापि विनाशित्वम्, ततोऽपि सावयवत्वम् । न च बुद्ध्यादिभिर्व्यभिचारः उक्तोत्तरत्वात् । किंच, आश्रितविनाशे आश्रयत्वस्यापि विनाशः आश्रितत्वनिबन्धनत्वात् तस्य धर्मस्य च धर्मिणः कथंचिदव्यतिरेकात् तथाऽऽकाशस्य विनाशित्वात्
३० सावयवत्वं घटादेरिवोपपन्नम् । किंच, सावयवमाकाशम्, हिमवद्—विन्ध्यावरुद्धविभिन्नदेशत्वात्, तदवष्टब्धदेशभूभागवत्; अन्यथा तयो रूप-रसयोरिवैकदेशाकाशस्थितिप्रसक्तिः, न चैतद् दृष्टमिति सर्वं वस्तूत्पाद-विनाश-स्थित्यात्मकत्वात् कथंचित् सावयवं सिद्धम् । ततः प्रयोग-विस्रसात्मकमूर्तिमद्द्रव्यानारब्धत्वेनाऽऽकाशादेरुत्पाद ऐकत्विकोऽभिधीयते न पुनर्निरवयवकृतत्वादैकत्विकः । अयमपि स्यादैकत्विकः स्यादनैकत्विकः; न त्वैकत्विक एव । एवं मूर्तिमदमूर्तिमदवयवद्रव्यद्वयो-
३५ त्पाद्याऽवगाह-गति-स्थितीनां यथोक्तप्रकारेण तत्रोत्पत्तेः अवगाह-गति-स्थितिस्वभावस्य च विशिष्टकार्यत्वाद् विशिष्टकारणपूर्वकत्वसिद्धेस्तत्कारणे आकाशादिसंज्ञाः समयनिबन्धनाः सिद्धाः ॥ ३३ ॥

[उत्पादवद् विगमस्यापि द्वैविध्यवर्णनम्]

उत्पादवद् विगमोऽपि तथाविध एवेत्याह—

विगमस्स वि एस विही समुदयजणियम्मि सो उ दुवियप्पो ।
४० समुदयविभागमेत्तं अत्थंतरभावगमणं च ॥ ३४ ॥

---

१ पृ० १४९ पं० १९—। २ प्रमेयक० पृ० १६८ प्र० पं० १३। ३ प्र० पृ० पं० ११। ४ प्रमेयक० पृ० १६८ प्र० पं० १२—।

विगमस्याप्येष एव द्विरूपो भेदः—स्वाभाविकः प्रयोगजनितश्चेति तद्द्वयातिरिक्तस्य वस्तुनोऽभावात् पूर्वावस्थाविगमव्यतिरेकेणोत्तरावस्थोत्पत्त्यनुपपत्तेः न हि बीजादीनामविनाशेऽङ्कुरादिकार्यप्रादुर्भावो दृष्टः । न चाऽवगाह-गति-स्थित्याधारत्वं तदनाधारत्वस्वभावप्राक्तनावस्थाध्वंसमन्तरेण संभवति तत्र **समुदयजनिते** यो विनाशः **स** उभयत्रापि **द्विविधः**-एकः **समुदयविभागमात्रप्रकारो** विनाशः यथा पटादेः कार्यस्य तत्कारणपृथक्करणे तन्तुविभागमात्रम्, द्वितीयप्रकार- ५ **स्त्वर्थान्तरभावगमनं** विनाशः यथा मृत्पिण्डस्य घटार्थान्तरभावेनोत्पादो विनाशः । न चार्थान्तररूपविनाशाविनाशे मृत्पिण्डप्रादुर्भावप्रसक्तिरिति वक्तव्यम्, पूर्वोत्तरकालावस्थयोरसंकीर्णत्वात्—अतीततरत्वेन प्राक्तनावस्थाया उत्पत्तेः अतीतस्य च वर्तमानताऽयोगात्—तयोः स्वस्वभावापरित्यागतस्तथानियतत्वात् तुच्छरूपस्य ह्यभावस्याऽभावः स्यादपि तदभावरूपः, न तु वस्त्वन्तरादुपजायमानं वस्त्वन्तरमतीततरावस्थारूपं भवितुमर्हति तर-तमप्रत्ययार्थव्यवहाराभावप्रसक्तेः । प्रति- १० पादितं च कस्यचिद् रूपस्य निवृत्त्या रूपान्तरगमनं वस्तुनः प्रागिति न पुनरभिधीयते ॥ ३४ ॥

[उत्पाद–विनाश–ध्रौव्याणां भिन्नाभिन्नकालत्वस्यार्थान्तरानर्थान्तरत्वस्य चाभिधानम्]

न चोत्पाद-विनाशयोरैकान्तिकतद्रूपताऽभ्युपगमे अनेकान्तवादव्याघातः, कथंचित् तयोस्तद्रूपताऽभ्युपगमात् । तदाह—

तिण्णि वि उप्पायाई अभिण्णकाला य भिण्णकाला य । १५
अत्थंतरं अणत्थंतरं च दवियाहि णायव्वा ॥ ३५ ॥

त्रयोऽप्युत्पाद्–विगम-स्थितिस्वभावाः परस्परतो**ऽन्यकालाः** यतो न पटादेरुत्पादसमय एव विनाशः तस्यानुत्पत्तिप्रसक्तेः । नाऽपि तद्विनाशसमये तस्यैवोत्पत्तिः अविनाशापत्तेः । न च तत्प्रादुर्भावसमय एव तत्स्थितिः तद्रूपेणैवावस्थितस्यानवस्थाप्रसक्तितः प्रादुर्भावाऽयोगात् । न च घटरूपमृत्स्थितिकाले तस्या विनाशः तद्रूपेणावस्थितस्य विनाशानुपपत्तेः । न च घटविनाशविशिष्ट- २० मृत्काले तस्या एवोत्पादो दृष्टः । नाऽपि तदुत्पादविशिष्टमृत्समये तस्या एव ध्वंसोऽनुत्पत्तिप्रसङ्गत एव युक्तः । ततस्त्रयाणामपि भिन्नकालत्वात् तद् द्रव्यमर्थान्तरं नानास्वभावम् न ह्यन्योन्यव्यतिरिक्तकालोत्पाद-विगम-ध्रौव्याऽव्यतिरिक्तमेकस्वरूपं द्रव्यमुपपद्यते तस्य तेभ्यो भेदप्रसक्तेः । न च तद् भिन्नमेवास्तु तत्त्रितयविकलस्य तस्य तथाऽनुपलब्धितोऽसत्त्वात् । न चैकस्य द्रव्यस्याभावादनेकान्ताभावप्रसक्तिः यतो**ऽभिन्नकालाश्चो**त्पादादयः । नहि कुशूलविनाशघटोत्पादयोर्भिन्नकालता; अन्यथा २५ विनाशात् कार्योत्पत्तिः स्यात् घटाद्युत्तरपर्यायानुत्पत्तावपि प्राक्तनपर्यायध्वंसप्रसक्तिश्च स्यात् । पूर्वोत्तरपर्यायविनाशोत्पादक्रियाया निराधाराया अयोगात् तदाधारभूतद्रव्यस्थितिरपि तदाऽभ्युपगन्तव्या । न च क्रियाफलमेव क्रियाधारः तस्य प्रागसत्त्वात्; सत्त्वे वा क्रियावैफल्यात् । ततस्त्रयाणामभिन्नकालत्वात् तदव्यतिरिक्तं द्रव्यमभिन्नं न नाना । न च घटोत्पाद-विनाशापेक्षया भिन्नकालतयाऽर्थान्तरत्वम् कुसूल-घटविनाशोत्पादापेक्षया अभिन्नकालत्वेनानर्थान्तरत्वादेकान्त इति ३० वक्तव्यम्, द्रव्यस्य पूर्वावस्थायां भिन्नाऽभिन्नतया प्रतीयमानस्योत्तरावस्थायामपि भिन्नाऽभिन्नतया तस्यैव प्रतीतेरनेकान्ताऽव्याहतेः । न चाऽबाधिताऽध्यक्षादिप्रतिपत्तिविषयस्य तस्य विरोधाद्युद्भावनं युक्तिसंगतम् सर्वप्रमाण—प्रमेयव्यवहारविलोपप्रसङ्गात् । अत एव **अर्थान्तरमनर्थान्तरं चोत्पादादयो द्रव्यात्**, तद्वा तेभ्यस्तथेति प्रतिज्ञेयम् **द्रव्यात्** तथाभूततद्ग्राहकज्ञानपरिणतादात्मलक्षणात् प्रमाणादित्यपि व्याख्येयम् नहि तथाभूतप्रमाणप्रवृत्तिस्तथाभूतार्थमन्तरेणोपपन्ना धूम इव ३५ धूमध्वजमन्तरेण, संवेद्यते च तथाभूतग्राह्य-ग्राहकरूपतया अनेकान्तात्मकं स्वसंवेदनतः प्रमाणमिति न तदपलापः कर्तुं शक्यः; अन्यथाऽतिप्रसङ्गात् ।

१ "तुच्छस्य हि अभावस्याभावे मृत्पिण्डोत्पादो भवेत् न तु"—बृ० टि० । २ "मृत्पिण्डरूपम्"—बृ० टि० । ३ "यस्मिन्नेव समये उत्पादस्तस्मिन्नेव यदा विनाशस्तस्य तदा कमु(कथमु)-त्पत्तिः?"—बृ० टि० । ४ -नाशोत्पत्तेः बृ० विना । ५ "मृदः"–बृ० टि० । ६ न चैक(चैव)मेकस्य बृ० । ७ "घटादि"–बृ० टि० ।

यद्वा देशादिविप्रकृष्टा उत्पत्ति-विनाश-स्थितिस्वभावा भिन्नाभिन्नकाला अर्थान्तरानर्थान्तररूपाः, द्रव्यत्वात्–द्रव्याव्यतिरिक्तत्वादित्यर्थः—अन्यथोत्पादादीनामभावप्रसक्तेः । तेभ्यो वा *द्रव्यमर्थान्तरानर्थान्तरम्, द्रव्यत्वात् । प्रतिज्ञार्थैकदेशता च हेतोर्नाशङ्कनीया द्रव्यविशेषे साध्ये* द्रव्यसामान्यस्य हेतुत्वेनोपन्यासात् ॥ ३५ ॥

५ **[उक्तस्यार्थस्य प्रत्यक्षसिद्धेनोदाहरणेनोपोद्बलनम्]**

अत्रैवार्थे प्रत्यक्षप्रतीतमुदाहरणमाह—

जो आउंचणकालो सो चेव पसारियस्स वि ण जुत्तो ।

तेसिं पुण पडिवत्ती–विगमे[1] कालंतरं णत्थि ॥ ३६ ॥

य आकुञ्चनकालोऽङ्गुल्यादेर्द्रव्यस्य **स एव** तत्**प्रसारणस्य न युक्तः** भिन्नकालतया १० आकुञ्चन-प्रसारणयोः प्रतीतेस्तयोर्भेदः, अन्यथा तयोः स्वरूपाभावापत्तेरित्युक्तम् तत्तत्पर्यायाभिन्नस्याङ्गुल्यादिद्रव्यस्यापि तथाविधत्वात् तदपि भिन्नमभ्युपगन्तव्यम् अन्यथा तदनुपलम्भात् अभिन्नं च तदवस्थयोस्तस्यैव प्रत्यभिज्ञायमानत्वात् । **तयोः पुन**रुत्पाद-विनाशयोः—प्रतिपत्तिश्च प्रादुर्भावः, विगमश्च विपत्तिः—**प्रतिपत्ति–विगमं** तत्र **कालान्तरं** भिन्नकालत्वमङ्गुलिद्रव्यस्य च **नास्ति ।** पूर्वपर्यायविनाशोत्तरपर्यायोत्पत्त्यङ्गुलिद्रव्यावस्थितीनामभिन्नकालता अभिन्नरूपता च प्रतीयते एक- १५ स्यैव द्रव्यस्य तथाविवर्तात्मकस्याध्यक्षतः प्रतीतेः ।

अथवा '**कालान्तरं नास्ति**' इत्यत्र 'अ'कारप्रश्लेषाद् नञश्चोपादानात् प्रतिषेधद्वयेन प्रकृतार्थगतेः कालान्तरं कालभेद उत्पादादेर्द्रव्यस्य चास्तीति कथंचिद् भेद इत्यर्थः—कथंचिद् भेदेनाऽपि प्रतिपत्तेः । तेनोत्पत्ति-विनाश-स्थितीनां परस्पररूपपरित्यागाऽपरित्यागप्रवृत्त[2]प्रत्येकत्र्यात्मकैकरूपत्वेऽपि न वर्तमानपर्यायात्मकस्यैवाऽतीताऽनागतकालयोः सत्त्वम् वस्तुनस्त्र्यात्मकत्वा- २० भ्युपगमात् । अतीताऽनागतकालयोरपि तद्रूपेण सत्त्वे उत्पादविनाशयोरभावेन कथं त्र्यात्मकत्वं तस्य भवेत् द्रव्यस्योत्पत्ति-विनाशनिमित्तत्वादतीतादितायाः अन्यथा वर्तमानवत् तदभावात् ? न च तत्पर्यायस्याऽतीताऽनागतकालयोरभावे कथं नित्यत्वमिति वाच्यम्, कथंचित् तस्याभ्युपगमात् परित्यक्तोपादित्स्यमानपूर्वोत्तरपर्यायस्यान्यान्यवेषपरित्यागोपादानैकनटपुरुषवद् द्रव्यस्य विवर्तात्मकत्वात् । सर्वथा नित्यत्वे पूर्वोत्तरव्यपदेशाभावप्रसक्तेः । सर्वथाऽनित्यत्वेऽप्युभयत्रैकप्रतिभासव्यपदेशादिव्य- २५ वहाराभावश्च स्यात् । न चैकानेकत्वप्रतिभासो मिथ्या । ततो यदेव विनष्टं शिवकरूपतया तदेवोत्पन्नं मृद्द्रव्यं घटादिरूपतया अवस्थितं च मृत्त्वेनेति त्र्यात्मकं तत् सर्वदा द्रव्यमिति व्यवस्थितम् ॥ ३६ ॥

---

१ अर्थानुसारेण–**गमेऽकालंतरं** इत्यपि पाठः । २–**रूपपरित्यागप्रवृ**–वा० बा० आ० ।

३ "न सामान्यात्मनोदेति न व्येति व्यक्तमन्वयात् । व्येत्युदेति विशेषात् ते सहैकत्रोदयादि सत् ॥
कार्योत्पादः क्षयो हेतोर्नियमाल्लक्षणात् पृथक् । न तौ जात्याद्यवस्थानादनपेक्षाः खपुष्पवत् ॥
घट-मौलि-सुवर्णार्थी नाशोत्पादस्थितिष्वयम् । शोक-प्रमोद-माध्यस्थ्यं जनो याति सहेतुकम् ॥
पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः । अगोरसव्रतो नोभे तस्मात् तत्त्वं त्रयात्मकम्" ॥
—आप्तमी० श्लो० ५७—६० ।

अत्रत्या अष्टशती अष्टसहस्री च विलोकनीया । शास्त्रवा० स्त० ७ श्लो० १–३ । तथा,
"तयाहुर्मुकुटोत्पादो न घटनाशधर्मकः । स्वर्णान्न चान्य एवेति न विरुद्धं मिथस्त्रयम् ॥
न चोत्पाद–व्ययौ न स्तो ध्रौव्यवत् तद्धिया गतेः । नास्तित्वे तु तयोर्ध्रौव्यं तत्त्वतोऽस्तीति न प्रमा ॥
न नास्ति ध्रौव्यमप्येवमविगानेन तद्गतेः । अस्याश्च भ्रान्ततायां न जगत्यभ्रान्तता गतिः ॥
उत्पादोऽभूतभवनं स्वहेत्वन्तरधर्मकम् । तथाप्रतीतियोगेन विनाशस्तद्विपर्ययः ॥
तथैतदुभयाधारस्वभावं ध्रौव्यमित्यपि । अन्यथा त्रितयाभाव एकदैकत्र किं न तत् ॥
एकत्रैवैकदैवैतदित्थं त्रयमपि स्थितम् । न्याय्यं भिन्ननिमित्तत्वात् तदभेदे न युज्यते" ॥
—शास्त्रवा० स्त० ७ श्लो० ९–१४ ।

जैनवत् सांख्य–मीमांसकाभ्यामपि वस्तुनस्त्र्यात्मकता स्वीक्रियते—पातञ्जलद० पा० ३ सू० १३—। श्लो० वा० वनवा० श्लो० २०–२३ ।

स्याद्वादं परीक्षमाणेन शान्तरक्षितेन एषा त्र्यात्मकता विप्र(मीमांसक)–निर्ग्रन्थ(जैन)–कापिल(सांख्य)संमतत्वेन परीक्षिता—तत्त्वसं० का० १७७६–७९ पृ० ५०१–५०२ ।

[उत्पादादित्रयं प्रत्येकं त्र्यात्मकवत् त्रैकालिकमप्यस्ति इति वदत एव यथार्थवक्तृत्वाभिधानम्]

यथोत्पाद-व्यय-स्थितीनां प्रत्येकमेकैकं रूपं त्र्यात्मकं तथा भूत-वर्तमान-भविष्यद्भिरप्येकैकं रूपं त्रिकालतामासादयतीत्येतदेवाह—

उप्पज्जमाणकालं उप्पण्णं ति विगयं विगच्छंतं ।
दवियं पण्णवयंतो तिकालविसयं विसेसेइ ॥ ३७ ॥ ५

उत्पद्यमानसमये एव किञ्चित् पटद्रव्यं तावदुत्पन्नम्—यद्येकतन्तुप्रवेशक्रियासमये तद् द्रव्यं तेन रूपेण नोत्पन्नं तर्ह्युत्तरत्रापि तन्नोत्पन्नमित्यत्यन्तानुत्पत्तिप्रसक्तिस्तस्य स्यात्। न चोत्पन्नांशेन तेनैव पुनस्तदुत्पद्यते तावन्मात्रपटादिद्रव्योत्पत्तिप्रसक्तेरुत्तरोत्तरक्रियाक्षणस्य तावन्मात्रफलोत्पादने एव प्रक्षयाद् अपरस्य फलान्तरस्याऽनुत्पत्तिप्रसक्तेः । यदि च विद्यमाना एकतन्तुप्रवेशक्रिया न फलोत्पादिका, विनष्टा सुतरां न भवेत् असत्त्वात् अनुत्पत्त्यवस्थावत् न ह्यनुत्पन्नविनष्टयोरसत्त्वे १० कश्चिद् विशेषः । ततः प्रथमक्रियाक्षणः केनचिद् रूपेण द्रव्यमुत्पादयति, द्वितीयस्त्वसौ तदेव अंशान्तरेणोत्पादयति अन्यथा क्रियाक्षणान्तरस्य वैफल्यप्रसक्तेः। एकेनांशेनोत्पन्नं सद् उत्तरक्रियाक्षणफलांशेन यद्यपूर्वमपूर्वं तद् उत्पद्येत तदोत्पन्नं भवेद् नान्यथेति प्रथमतन्तुप्रवेशादारभ्यान्त्यतन्तुसंयोगावधि यावद् उत्पद्यमानं प्रबन्धेन तद्रूपतयोत्पन्नम्, अभिप्रेतनिष्ठारूपतया चोत्पत्स्यत इत्युत्पद्यमानम् उत्पन्नमुत्पत्स्यमानं च भवति, एवमुत्पन्नमपि उत्पद्यमानमुत्पत्स्यमानं च भवति, तथोत्पत्स्य- १५ मानमपि उत्पद्यमानमुत्पन्नं चेत्येकैकमुत्पन्नादिकालत्रयेण यथा त्रैकाल्यं प्रतिपद्यते तथा विगच्छदादिकालत्रयेणाप्युत्पादादिरेकैकः त्रैकाल्यं प्रतिपद्यते । तथाहि—यथा यद् यदैवोत्पद्यते तत् तदैवोत्पन्नम् उत्पत्स्यते च। यद् यदैवोत्पन्नं तत् तदैव उत्पद्यते उत्पत्स्यते च । यद् यदैवोत्पत्स्यते तत् तदैवोत्पद्यते उत्पन्नं च । तथा, तदेव तदैव यदुत्पद्यते तत् तदेव विगतं विगच्छद् विगमिष्यच्च । तथा, यदेव यदैवोत्पन्नं तदेव तदैव विगतं विगच्छद् विगमिष्यच्च । तथा, यदेव २० यदैवोत्पत्स्यते तदेव तदैव विगतं विगच्छद् विगमिष्यच्च । एवं विगमोऽपि त्रिकाल उत्पादादिना दर्शनीयः, तथा स्थित्याऽपि त्रिकाल एव सप्रपञ्चः प्रदर्शनीयः। एवं स्थितिरपि उत्पाद-विनाशाभ्यां सप्रपञ्चाभ्यामेकैकाभ्यां त्रिकाला प्रदर्शनीयेति द्रव्यमन्योन्यात्मकतथाभूतकालत्रयात्मकोत्पाद-विनाश-स्थित्यात्मकं प्रज्ञापयंस्त्रिकालविषयप्रादुर्भवद्धर्माधारतया तद् विशिनष्टि। अनेन प्रकारेण त्रिकालविषयं द्रव्यस्वरूपं प्रतिपादितं भवति; अन्यथा द्रव्यस्याभावात् तद्वचनस्य २५ मिथ्यात्वप्रसक्तिरिति भावः ॥ ३७ ॥

१-प्रसक्तिरुत्तरो-भां० विना। २-णान्तरत्वे—बृ०।

३ "ण भवो भंगविहीणो भंगो वा णत्थि संभवविहीणो। उप्पादो वि य भंगो ण विणा धोव्वेण अत्थेण" ॥ ८ ॥

—प्रवचनसा० पृ० १३६।

"एतेन कालत्रयापेक्षयाऽपि त्रिलक्षणमुपदर्शितम् तस्य अन्वितेन रूपेण कालत्रयव्यापित्वात् अन्यथा त्र्यवृत्तैकान्ते सर्वथाऽर्थक्रियाविरोधात् कूटस्थैकान्तवत् । ततो द्रव्यपर्यायात्मकं जीवादि वस्तु क्रमयौगपद्याभ्यामर्थक्रियान्यथानुपपत्तेरिति प्रमाणोपपन्नम्। तथा च स्थितिरेव स्थास्यति उत्पत्स्यते विनङ्क्ष्यति सामर्थ्यात् स्थिता उत्पन्ना विनष्टेति गम्यते। विनाश एव स्थास्यति उत्पत्स्यते विनङ्क्ष्यति स्थित उत्पन्नो विनष्ट इति च गम्यते । उत्पत्तिरेव उत्पत्स्यते विनङ्क्ष्यति स्थास्यतीति न कुतश्चिद् उपरमति सोत्पन्ना विनष्टा स्थितेति गम्यते । स्थित्याद्याश्रयस्य वस्तुनो अनाद्यनन्तत्वाद् अनुपरमसिद्धेः स्थित्यादिपर्यायाणां कालत्रयापेक्षिणामनुपरमसिद्धिः अन्यथा तस्यातल्लक्षणत्वप्रसङ्गात् सत्त्वविरोधात्। एनेन जीवादि वस्तु तिष्ठति स्थितम् स्थास्यति, विनश्यति विनष्टम् विनङ्क्ष्यति, उत्पद्यते उत्पन्नम् उत्पत्स्यते चेति प्रदर्शितम् कथंचित् तदभिन्नस्थित्यादीनामन्यथा स्थास्यत्यादिव्यवस्थानुपपत्तेः"—अष्टस० पृ० ११३ पं० २-१०।

४ अत्र 'तथा यदैव यदुत्पद्यते तत् तदैव' इति पाठः सम्यग् भाति ।' "यदैवोत्पद्यमानं तदैव विगतं विगच्छद् विगमिष्यच्च"—नयोप० पृ० ४३ द्वि० पं० ८। ५-मन्यान्यात्म—बृ० आ० हा० वि०।

[विभागजन्यमुत्पादमनिच्छतां केषांचिद् उत्पादार्थानभिज्ञत्वख्यापनम्]

नन्वर्थान्तरगमनलक्षणस्य विनाशस्यासंभवात् विभागजस्य चोत्पादस्य; तद्द्वयाभावे स्थितेरप्यभावात् नत् त्रैकाल्यं दूरोत्सारितमेवेति मन्यमानान् वादिनः प्रति तदभ्युपगमप्रदर्शनपूर्वकमाह—

दव्वंतरसंजोगाहि केचि दवियस्स बेंति उप्पायं।
उप्पायत्थाऽकुसला विभागजायं ण इच्छंति ॥ ३८ ॥

समानजातीयद्रव्यान्तरादेव समवायिकारणात् तत्संयोगासमवायिकारण-निमित्तकारणादिसव्यपेक्षाद् अवयवि कार्यद्रव्यं भिन्नं कारणद्रव्येभ्य उत्पद्यत इति **द्रव्यस्योत्पादं केचन ब्रुवते । ते चोत्पादार्थानभिज्ञा विभागजातं नेच्छन्ति** ॥ ३८ ॥

[प्रतिवादिसंमतोत्पादप्रक्रियाकथनपूर्वकं सिद्धान्तसंमतस्य विभागजन्योत्पादस्य समर्थनम्]

१० कुतः पुनर्विभागजोत्पादानभ्युपगमवादिन उत्पादार्थानभिज्ञाः ? यतः—

अणु दुअणुएहिं दव्वे आरद्धे 'तिअणुयं' ति ववएसो।
तत्तो य पुण विभत्तो अणु त्ति जाओ अणू होइ ॥ ३९ ॥

द्वाभ्यां परमाणुभ्यां कार्यद्रव्ये **आरब्धे** 'अणुः' इति **व्यपदेशः** परमाणुद्वयारब्धस्य द्व्यणुकस्याणुपरिमाणत्वात् । त्रिभिर्द्व्यणुकैश्चतुर्भिर्वाऽऽरब्धे **'त्र्यणुकम्' इति व्यपदेशः**;
१५ अन्यथोत्पन्नावुपलब्धिनिमित्तस्य महत्त्वस्याभावप्रसक्तेः ।

अत्र किल त्रिभिश्चतुर्भिर्वा प्रत्येकं परमाणुभिरारब्धमणुपरिमाणमेव कार्यमिति त्र्यादिपरमाणूनामारम्भकत्वे आरम्भवैयर्थ्यप्रसक्तिरिति द्वाभ्यां परमाणुभ्यां द्व्यणुकमारभ्यते । त्र्यणुकमपि न द्वाभ्यामणुभ्यामारभ्यते कारणविशेषपरिमाणतोऽनुपभोग्यत्वप्रसक्तेः यतो महत्त्वपरिमाणयुक्तं तद्

---

१ अणुअत्तएहिं आरद्धदव्वे तियणुयं ति निद्देसो । तत्तो य पुण विभत्ते अणु त्ति जाओ अणू होइ ॥
गु० मु० मू० ।

व्याख्याकारकृतार्थानुसारेण 'दुअणुएहिं' इति पदं 'दोहिं अणुएहिं' 'बहुएहिं दुअणुएहिं' चेत्यर्थद्वयबोधकं श्लिष्टं प्रतिभाति । अतो मूलगाथाया अन्वयद्वयमेवं विधातव्यम्—दु-अणुएहिं दव्वे आरद्धे अणु त्ति ववएसो अर्थात् द्वाभ्यां परमाणुभ्यां कार्यद्रव्ये आरब्धे 'अणुः' इति व्यपदेशः । पुनश्च दुअणुएहिं दव्वे आरद्धे तिअणुयं ति ववएसो अर्थात् द्व्यणुकैः—त्रिभिर्द्व्यणुकैः चतुर्भिर्वा कार्यद्रव्ये आरब्धे 'त्र्यणुकम्' इति व्यपदेशः ।

२-एहिं आरद्धदव्वे ति- मु० मू० । ३ अणुं होइ वृ० भां० मां० ।

४ "यद्यपि द्वे द्वे द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुकसमवायिनां शुक्लादीनामारम्भकत्वम् × × × × × यदापि बहवः परमाणवो बहूनि वा द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्यमारभते × × ×—२-२-११. ब्रह्मसू० शां० पृ० ५०५-५०६ ।

"द्व्यणुकैर्बहुभिरारभ्यते इत्यपि नियमः न द्वाभ्याम् तस्याणुपरिमाणोत्पत्तौ कारणसद्भावेनाणुत्वोत्पत्तावारम्भवैयर्थ्यात् बहुषु त्वनियमः । कदाचित् त्रिभिरारभ्यते इति त्र्यणुकमित्युच्यते कदाचिच्चतुर्भिरारभ्यते कदाचित् पञ्चभिरिति यथेष्टं कल्पना"-प्रशस्त० कं० पृ० ३२-पं० ६-९ ।

"तेभ्यस्तेषां परमाणूनां परस्परसंयोगाः ततश्च द्वाभ्यां द्व्यणुकम् त्रिभिर्द्व्यणुकैस्त्र्यणुकमित्यनेन क्रमेण कार्यद्रव्यं घटादिकमुत्पद्यते इति"-प्रशस्त० कं० पृ० १०८ पं० १५ ।

"द्व्यणुकस्य अणुपरिमाणं तु परमाणावणुत्वापेक्षया नोत्कृष्टम् त्रसरेणुपरिमाणं तु न सजातीयम् अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्य असमवायिकारणमित्यर्थः"—कारिका० सिद्धान्तमु० गुणनिरू० का० १११-११२ पृ० ४२९—४३० ।

उपलब्धियोग्यं स्यात् तथा चोपभोग्यं कारणबहुत्वमहत्त्वप्रचयजन्यं च महत्त्वम् । न च द्वि-त्रिपर-
माण्वारब्धे कार्ये महत्त्वम्, तत्र महत्परिमाणाभावात् तेषामणुपरिमाणत्वात्; प्रचयोऽप्यवयवा-
भावान्न संभवति तेषाम्। नापि द्वाभ्यामणुभ्याम् कारणबहुत्वाभावात् न प्रचयोऽपि प्रशिथिलाव-
यवसंयोगाभावात्। उपलभ्यते च समानपरिमाणैस्त्रिभिः पिण्डैरारब्धे कार्ये महत्त्वम् न द्वाभ्यामिति
महत्परिमाणाभ्यां ताभ्यामेवारब्धे महत्त्वम् न त्रिभिरल्पपरिमाणैरारब्ध इति समानसंख्या-तुला- ५
परिमाणाभ्यां तन्तुपिण्डाभ्यामारब्धे पटादिकार्ये प्रशिथिलावयवतन्तुसंयोगकृतं महत्त्वमुपलभ्यते न
तद् इतरत्रेति।

नन्वेवं यदि कार्यारम्भस्तदा 'द्रव्याणि द्रव्यान्तरमारभन्ते द्वे बहूनि वा समानजातीयानि' इत्य-
भ्युपगमः परित्यज्यताम् यतो न परमाणु-द्व्यणुकादीनामपरित्यक्ताजनकावस्थानामनङ्गीकृतस्वकार्य-
जननस्वभावानां च द्व्यणुक-त्र्यणुकादिकार्यनिर्वर्तकत्वम्; अन्यथा प्रागपि तत्कार्यप्रसङ्गात्। १०

अथ न तेषामजनकावस्थात्यागतो जनकस्वभावान्तरोत्पत्तौ कार्यजनकत्वं किन्तु पूर्वस्वभाव-
व्यवस्थितानामेव संयोगलक्षणसहकारिशक्तिसद्भावात् तदा कार्यनिर्वर्तकत्वम् प्राक् तु तदभावान्न
कार्योत्पत्तिः कारणानामविचलितस्वरूपत्वेऽपि न च संयोगेन तेषामनतिशयो व्यावर्त्यते अतिशयो
वा कश्चिदुत्पाद्यते अभिन्नो भिन्नो वा संयोगस्यैवाऽतिशयत्वात्। न च कथमन्यः संयोगस्तेषामतिशय
इति वाच्यम् अनन्यस्याप्यतिशयत्वायोगात् न हि स एव तस्यातिशय इत्युपलब्धम् तस्मात् तत्संयोगे १५
सति कार्यमुपलभ्यते तदभावे तु नोपलभ्यत इति संयोग एव कार्योत्पादने तेषामतिशय इति न
तदुत्पत्तौ तेषां स्वभावान्तरोत्पत्तिः संयोगातिशयस्य तेभ्यो भिन्नत्वादिति, असदेतत्; यतः कार्यो-
त्पत्तौ तेषां संयोगोऽतिशयो भवतु संयोगोत्पत्तौ तु तेषां कोऽतिशय इति वाच्यम्, न तावत् स एव
संयोगः तस्याद्याप्यनुत्पत्तेः, नापि संयोगान्तरम् तस्यानभ्युपगमात्; अभ्युपगमेऽपि तदुत्पत्तावप्य-
परसंयोगातिशयप्रकल्पनायामनवस्थाप्रसक्तेः । न च क्रिया अतिशयः तदुत्पत्तावपि पूर्वोक्तदोष- २०
प्रसङ्गात्। किञ्च, अदृष्टापेक्षादात्माऽणुसंयोगात् परमाणुषु क्रियोत्पद्यत इत्यभ्युपगमादात्म-परमाणु-
संयोगोत्पत्तावप्यपरोऽतिशयो वाच्यः तत्र च तदेव दूषणम्। किञ्चासौ संयोगो द्व्यणुकादिनिर्वर्तकः
किं परमाण्वाद्याश्रितः उत तदन्याश्रितः, आहोस्विद् अनाश्रित इति? यद्याद्यः पक्षस्तदा तदुत्पत्तावा-
श्रय उत्पद्यते नवेति? यद्युत्पद्यते तदा परमाणूनामपि कार्यत्वप्रसक्तिस्तत्संयोगवत्। अथ नोत्पद्यते
तदा संयोगस्तदाश्रितो न स्यात्, समवायस्याभावात्, तेषां च तं प्रत्यकारकत्वात् तदकारकत्वं तु २५
तत्र तस्य प्रागभावानिवृत्तेस्तदन्यगुणान्तरवत् । ततस्तेषां कार्यरूपतया परिणतिरभ्युपगन्तव्या;
अन्यथा तदाश्रितत्वं संयोगस्य न स्यात्। अन्याश्रितत्वेऽपि पूर्वोक्तदोषप्रसङ्गः । अनाश्रितत्वपक्षे तु
निर्हेतुकोत्पत्तिप्रसक्तिः। अथ संयोगो नोत्पद्यत इत्यभ्युपगमस्तदा वक्तव्यम्-किमसौ सन्, उताऽसन्?
यदि संस्तदा तन्नित्यत्वप्रसक्तिः—"सदकारणवन्नित्यम्" [वैशेषिकद० ४-१-१] इति भवतोऽभ्यु-
पगमात् तथा चासौ गुणो न भवेत्-नित्यत्वेनाऽनाश्रितत्वाद् अनाश्रितस्य च पारतन्त्र्यायोगाद् ३०
अपरतन्त्रस्य चाऽगुणत्वात्। अथाऽसन्निति पक्षस्तदा कार्यानुत्पत्तिप्रसङ्गः तदभावे प्राग्वद् विशि
ष्टपरिमाणोपेतकार्यद्रव्योत्पत्त्यभावात्, तथा च जगतोऽदृश्यताप्रसक्तिरिति संयोगैकत्वसंख्या-
परिमाण-महत्त्व-परत्वाद्यनेकगुणानां तत्रोत्पत्तिरभ्युपेया कारणगुणपूर्वप्रक्रमेण कार्योत्पत्त्यभ्यु-
पगमात् । इष्टमेवैतदिति चेत्, ननु तेषां क आश्रय इति वक्तव्यम्, न तावत् कार्यम् तदुत्पत्तेः
प्राक् तस्याऽसत्त्वात्; सत्त्वे चोत्पत्तिविरोधात् न च प्रथमक्षणे निर्गुणमेव कार्यं गुणोत्पत्तेः प्रागस्तीति ३५

---

१ न च प्र—भां० मां०।

२ *किञ्च असौ संयोगो द्व्यणुकादिनिर्वर्तकः किं परमाण्वाद्याश्रितः तदन्याश्रितः अनाश्रितो वा? प्रथमपक्षे तदुत्पत्तावा-
श्रय उत्पद्यते नवा? यद्युत्पद्यते तदाणूनामपि कार्यतानुषङ्गः। अथ नोत्पद्यते तर्हि संयोगस्तदाश्रितो न स्यात् समवायप्रतिषे-
धात् तेषां च तं प्रत्यकारकत्वात्। तदकारकत्वं चानतिशयत्वात्। अनतिशयानामपि कार्यजनकत्वे सर्वदा कार्यजनकत्वप्रसङ्गोऽ-
विशेषात् । अतिशयान्तरकल्पने चानवस्था—तदुत्पत्तावप्यपरातिशयान्तरपरिकल्पनात् । ततस्तेषामसंयोगरूपतापरित्यागेन
संयोगरूपतया परिणतिरभ्युपगन्तव्या इति सिद्धं तेषां कथंचिदनित्यत्वम्। अन्याश्रितत्वेऽपि पूर्वोक्तदोषप्रसङ्गः। अनाश्रितत्वे
तु निर्हेतुकोत्पत्तिप्रसक्तेः सदा सत्त्वप्रसङ्गतः कार्यस्यापि सर्वदा भावानुषङ्गः"*—प्रमेयक० पृ० १६० प्र० पं० ६-११।

३-पूर्वक्रमे—मू० आ० हा० बि०।

वक्तव्यम् गुणसंबन्धवत् सत्तासंबन्धस्याप्याद्यक्षणे अभावतस्तत्सत्त्वासंभवात् । न चोत्पत्ति-सत्ता-संबन्धयोरेककालतयाऽऽद्यक्षण एव सत्त्वम् तदा रूपादिगुणसमवायाभावतोऽनुपलम्भे ततस्तत्सत्ता-संबन्धव्यवस्थापनाऽसंभवात् । न हि 'सत्' इत्युपलम्भमन्तरेण तदा तस्य सत्तासंबन्धः सत्त्वं वा व्यवस्थापयितुं शक्यम् । न च महत्त्वादेर्गुणस्य द्रव्येण सहोत्पादे तद्द्रव्याधेयता तद्द्रव्यस्य वा तदा-
५ धारता अकारणस्याश्रयत्वायोगात् । न चैककालयोः कार्यकारणभावः सव्येतरगोविषाणयोरिव भवत्पक्षे युक्तः । तन्न कार्यं तदाश्रयः । अथाऽणवस्तदाश्रयस्तर्हि कार्यद्रव्यस्यापि त एवाश्रयः इत्येका-श्रयौ कार्य-गुणौ प्राप्तौ । तथाऽभ्युपगमेपि न तावद् युतसिद्धयोस्तयोः कुण्ड-बदरवद् आश्रयाऽऽ-श्रयिभावः अकार्यकारणप्रसङ्गात् । नाऽयुतसिद्धयोः, अयुतसिद्ध्याऽऽश्रयाश्रयिभावविरोधात् । तथाहि—'अपृथक्सिद्धः' इत्यनेन भेदनिषेधः प्रतिपाद्यते समवायाभावे अन्यस्यार्थस्यात्रासंभवात्,
१० 'आधाराधेयभावः' इत्यनेन चैकत्वनिषेधः क्रियते इति कथमनयोरेकत्र सद्भावः? अथ नात्राधारा-धेयभावस्तर्हि तेषां सत्त्वम्, उत असत्त्वमिति वक्तव्यम् । यद्याद्यः पक्षस्तदा 'संयोगादिगुणात्मकाः परमाणव एव तथाभूतं कार्यम्' इति जैनपक्ष एव समाश्रितः स्यात् । द्वितीयपक्षे तु सर्वानुप-लब्धिप्रसक्तिः ।

यदि च परमाणवः स्वरूपापरित्यागतः कार्यद्रव्यमारभन्ते स्वात्मनोऽव्यतिरिक्तं तदा कार्य-
१५ द्रव्यानुत्पत्तिप्रसक्तिः । न हि कार्यद्रव्ये परमाणुस्वरूपापरित्यागे स्थूलत्वस्य सद्भावः तस्य तदभावा-त्मकत्वात् । तस्मात् परमाणुरूपतापरित्यागेन मृद्द्रव्यं स्थूलकार्यस्वरूपमासादयतीति तद्रूपतापरि-त्यागेन च पुनरपि परमाणुरूपतामनुभवतीति वलयवत् पुद्गलद्रव्यपरिणतेरादिरन्तो वा न विद्यते इति न कार्यद्रव्यं कारणेभ्यो भिन्नम् । न चार्थान्तरभावगमनं विनाशोऽयुक्त इति तद्रूपपरित्यागो-पादानात्मकस्थितिस्वभावस्य द्रव्यस्य त्रैकाल्यं नानुपपन्नम् । यथा च एकसंख्या-संयोग-महत्त्वाऽपर-
२० त्वादिपर्यायैः परमाणूनामुत्पत्तेः कार्यरूपाः परमाणवस्तथा बहुत्वसंख्या-विभागाऽल्पपरिमाण-परत्वात्मकत्वेन प्रादुर्भावात् परमाणवः कार्यद्रव्यवत् तथोत्पन्नाश्चाभ्युपगन्तव्याः, कारणान्वय-व्यतिरेकानुविधानोपलम्भस्य कार्यताव्यवस्थानिबन्धनस्यात्रापि सद्भावादिति अयमर्थः **'तत्तो य'** इत्यादिना गाथापश्चार्धेन प्रदर्शितः । **तस्माद् एकपरिमाणाद् द्रव्याद् विभक्तः** विभागात्म-कत्वेनोत्पन्नः **अणुरिति अणुर्जातो भवति** एतदवस्थायाः प्राक् तदसत्त्वात्; सत्त्वे वा इदानी-
२५ मिव प्रागपि स्थूलरूपकार्याभावप्रसङ्गात् इदानीं वा तद्रूपता तद्रूपाविशेषात् प्राक्तनावस्थायामिव स्यात् । एवं चतुर्विधकार्यद्रव्याभ्युपगमोऽसंगतः । न च य एव कार्यद्रव्यारम्भकाः परमाणवस्त एव तद्द्रव्यविनाशोत्तरकालं स्वरूपेण व्यवस्थिताः कार्यद्रव्यप्रागभाव-प्रध्वंसाभावयोरेकत्वविरोधात् घट-द्रव्यप्रागभाव-प्रध्वंसाभावमृत्पिण्ड-कपालवत् । न च प्रागभाव-प्रध्वंसाभावयोस्तुच्छरूपतया मृत्पिण्ड-कपालरूपत्वमसिद्धम् तुच्छरूपस्याभावस्य प्रमाणाजनकत्वेन तदविषयत्वतो व्यवस्थापयितु-
३० मशक्यत्वादिति प्रतिपादनात् । न च कपालसंयोगाद् घटद्रव्यमुपजायते तद्विभागाच्च विनश्यतीति मृत्पिण्डस्य घटद्रव्यं प्रति समवायिकारणत्वमयुक्तमिति वक्तव्यम् अध्यक्षत एव मृत्पिण्डोपादानत्वेन तस्य प्रतीतेः अत एव घटस्य कपालसमवायिकारणत्वानुमानमध्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्त-त्वेन कालात्ययापदिष्टम् । न चाल्पपरिमाणतन्तुप्रभवं महत्परिमाणं पटकार्यमुपलब्धमिति घटादिक-मपि तदल्पपरिमाणानेककारणप्रभवं कल्पयितुं युक्तम् विपर्ययेणापि कल्पनायाः प्रवृत्तिप्रसङ्गात्,
३५ अध्यक्षबाधस्तु तदितरत्रापि समानः । किञ्च, परमाणूनां सर्वदैकं रूपमभ्युपगच्छन्नभावमेव तेषाम-भ्युपगच्छेत् अकारकत्वप्रसङ्गात्-तच्च प्रागभाव-प्रध्वंसाभावविकलत्वेनानाधेयातिशयत्वाद् वियत्कु-सुमवत् । तदसत्त्वे च कार्यद्रव्यस्याप्यभावः अहेतोस्तस्यासत्त्वात् । तदभावे च परापरत्वादिप्रत्यया-देरयोगात् कालादेरप्यमूर्तद्रव्यस्याभाव इति सर्वाभावप्रसक्तिः ।

यदपि 'अर्थान्तरगमनलक्षणो विनाशोऽसंभवी परमाणुपर्यन्तत्वात् सर्वविनाशानाम्' इत्य-
४० भिधानम्, तदप्यसंगतम्; तथाभूतविनाशे प्रमाणाभावात् । तथाहि-न तावदध्यक्षं तत्प्रतिपादने

१-च्चा अभ्यु-भां० मां० । २ तद्वि-वा० बा० । ३ "तेषामापरमाण्वन्तो विनाशः" । "तेषां शरीरेन्द्रियाणां द्व्यणुकादिविनाशक्रमेण तावद् विनाशो यावत् परमाणुरिति"-प्रशस्त० कं० पृ० ५१ पं० १२-१३ ।

ध्याम्रियते कपालपर्यन्तघटविनाशोपलम्भे तस्य व्यापारोपलब्धेः । नानुमानमपि, प्रत्यक्षाप्रवृत्तौ तत्र तस्याप्यप्रवृत्तेः—अध्यक्षपूर्वकत्वेन तस्य व्यावर्णनात् । आगमस्य चात्रार्थे अनुपयोगात् । परमाणुपर्यन्ते च विनाशे घटादिध्वंसे न किंचिदप्युपलभ्येत परमाणूनामदृश्यत्वेनाभ्युपगमात् । छिद्रघटेनापाकनिक्षिप्तेन वा तेनानेकान्त इति चेत्, न; सर्वस्य पक्षीकृतत्वात् अवयविनि च छिद्रस्योत्पन्नत्वात् तस्य च निरवयवत्वान्नावयवे तदुत्पत्तिः परमाणुषु तदसंभवात् । पाकान्यथानुपपत्त्या परमाणु- ५ पर्यन्तो विनाशः परिकल्प्यत इति चेत्, न; विशिष्टसामग्रीवशाद् विशिष्टवर्णस्य घटादेर्द्रव्यस्य कथंचिदविनाशेऽप्युत्पत्तिसंभवात् । परमाणुपर्यन्तविनाशाभ्युपगमे च तद्देशत्व-तत्संख्यात्व-तत्परिमाणत्वोपर्यवस्थापितकर्परा[1]द्यपातप्रत्यक्षोपलभ्यत्वादीनि पच्यमाने घटे न स्युः । शूल्यप्रविद्धघटेनानेकान्तश्च परिहृत एव । न च कपालार्थी घटं भिन्द्यादापरमाण्वन्ते विनाशे । ततः प्रतीतिविरुद्धत्वान्नासावभ्युपगन्तव्य इति ॥ ३९ ॥ १०

[प्रतिवादिमतमाक्षिप्य प्रतिबन्दीतया स्वेष्टस्य विभागजन्योत्पादस्य समर्थनम्]

प्रस्तुतमेवाक्षेपद्वारेणोपसंहरत्याचार्यः—

बहुयाण एगसद्दे जइ संजोगाहि होइ उप्पाओ ।
णणु एगविभागम्मि वि जुज्जइ बहुयाण उप्पाओ ॥ ४० ॥

द्व्यणुकादीनां सति **संयोगे** यद्येकस्य त्र्यणुकादेः कार्यद्रव्यस्यो**त्पादो भवति**—अन्यथैका- १५ भिधानप्रत्ययव्यवहारायोगात् नहि बहुषु 'एको घट उत्पन्नः' इत्यादिव्यवहारो युक्तः—'**ननु**' इत्यक्षमायाम् । एकस्य कार्यद्रव्यस्य **विनाशेऽपि युज्यत एव बहूनां** समानजातीयानां तत्कार्यद्रव्यविनाशात्मकानां प्रभूततया विभक्तात्मनामुत्पाद इति । तथाहि-घटविनाशाद् बहूनि कपालानि उत्पन्नानीत्यनेकाभिधानप्रत्ययव्यवहारो युक्तः; अन्यथा तदसंभवात् । ततः प्रत्येकं त्र्यात्मकास्त्रिकालाश्चोत्पादादयो व्यवस्थिता इत्यनन्तपर्यायात्मकमेकं द्रव्यम् ॥ ४० ॥ २०

[एकस्मिन्नपि समये प्रत्येकं द्रव्यमनन्तपर्यायात्मकं प्रागुक्तरीत्या सिध्यति इत्यभिधानम्]

नन्वनन्ते काले भवत्वनन्तपर्यायात्मकमेकं द्रव्यम्, एकसमये तु कथं तत् तदात्मकमवसीयते ? प्रदर्शितदिशा तदात्मकं तदवसीयत इत्याह—

एगसमयम्मि एगदवियस्स बहुया वि होंति उप्पाया ।
उप्पायसमा विगमा ठिईउ उस्सग्गओ णियमा ॥ ४१ ॥ २५

एकस्मिन् समये एकद्रव्यस्य बहव उत्पादा भवन्ति, उत्पादसमानसंख्या **विगमा** अपि तस्यैव तदैवोत्पद्यन्ते विनाशमन्तरेणोत्पादस्यासंभवात् नहि पूर्वपर्यायाविनाशे उत्तरपर्यायः प्रादुर्भवितुमर्हति; प्रादुर्भावे वा सर्वस्य सर्वकार्यताप्रसक्तिः, तदकार्यत्वं वा कार्यान्तरस्येव स्यात् । **स्थिति**रपि **सामान्य**रूपतया तथैव **नियता** स्थितिरहितस्योत्पादस्याभावात् भावे वा शशशृङ्गादेरप्युत्पत्तिप्रसङ्गात् ॥ ४१ ॥ ३०

[एकस्मिन् द्रव्ये एकसमयेऽनन्तधर्मात्मकत्वस्य दृष्टान्तेन साधनम्]

एतदेव दृष्टान्तद्वारेण समर्थयन्नाह—

काय-मण-वयण-किरिया-रूवाइ-गईविसेसओ वावि ।
संजोयभेयओ जाणणा य दवियस्स उप्पाओ ॥ ४२ ॥

यदैवानन्तानन्तप्रदेशिकाहारभावपरिणतपुद्गलोपयोगोपजातरस-रुधिरादिपरिणतवशाविर्भूत- ३५

१-राद्यापात-भां॰ मां॰ आ॰ । २-रस्य च स्या-भां॰ मां॰ आ॰ ।

शिरोऽङ्गुल्याद्यङ्गोपाङ्गभावपरिणतस्थूरसूक्ष्मसूक्ष्मतरादिभेदभिन्नावयवात्मकस्य **कायस्योत्पत्तिस्तदै-** वानन्तानन्तपरमाणूपचितमनोवर्गणापरिणतिप्रतिलभ्य**मन** उत्पादोऽपि, तदैवं **वचन**स्यापि कायो-त्कृष्टतरवर्गणोत्पत्तिप्रतिलब्धवृत्तिरुत्पादः, तदैव च कायाऽऽत्मनोरन्योन्यानुप्रवेशाद् विषमीकृताऽ-संख्यातात्मप्रदेशे काय**क्रियो**त्पत्तिः, तदैव च **रूपादी**नामपि प्रतिक्षणोत्पत्तिविनश्वराणामुत्पत्तिः, ५ तदैव च मिथ्यात्वाऽविरति-प्रमाद-कषायादिपरिणतिसमुत्पादितकर्मबन्धनिमित्ताऽऽगामि**गति-विशेषा**णामप्युत्पत्तिः, तदैव चोत्सृज्यमानोपादीयमानानन्तानन्तपरमाण्वापादिततत्प्रमाण**संयो-ग-विभागा**नामुत्पत्तिः।

यद्वा यदैव शरीरादेर्द्रव्यस्योत्पत्तिस्तदैव त्रैलोक्यान्तर्गतसमस्तद्रव्यैः सह साक्षात् पारंपर्येण वा संबन्धानामुत्पत्तिः सर्वद्रव्यव्याप्तिव्यवस्थिताकाश-धर्माधर्मादिद्रव्यसंबन्धात्, तदैव च भावि-१० स्वपर्याय-पर**ज्ञान**विषयत्वादीनां चोत्पादनशक्तीनामप्युत्पादः शिरो-ग्रीवा-चञ्चु-नेत्र-पिच्छोदर-चरणाद्यनेकावयवान्तर्भावकमयूराण्डकरसशक्तीनामिव; अन्यथा तत्र तेषामुत्तरकालमप्यनुत्पत्ति-प्रसङ्गात्। उत्पाद-विनाश-स्थित्यात्मकाश्च प्रतिक्षणं भावाः शीतोष्णसंपर्कादिवशादवान्तरसूक्ष्म-तर-तमादिभेदेन तथैव स्व-परापेक्षया युगपत् क्रमेण चोपलब्धेः। न च तर-तमादिभेदेन नव-पुराणतया क्रमेणोपलब्धिः प्रतिक्षणं तथोत्पत्तिमन्तरेण संभवति। न चासदाद्यध्यक्षं निरवशेष-१५ धर्मात्मकवस्तुग्राहकं येनानन्तधर्माणामेकदा वस्तुन्यप्रतिपत्तेरभाव इत्युच्येत अनुमानतः प्रतिक्षण-मनन्तधर्मात्मकस्य तस्य प्रदर्शितन्यायेन प्रतिपत्तेः। सकलत्रैलोक्यव्यावृत्तस्य च वस्तुनोऽध्यक्षेण ग्रहणे—तद्व्यावृत्तीनां पारमार्थिकतद्धर्मरूपतया अन्यथा तस्य तद्व्यावृत्तताऽयोगात्—कथं नानन्त-धर्माणां वस्तुन्यध्यक्षेण ग्रहणम्? ॥ ४२ ॥

[आगमस्य हेतुवादाहेतुवादाभ्यां द्वैविध्येन विभजनम्]

२० इदानीं विदितनयत्वाद् विशिष्टप्रज्ञः शिष्यो विगृह्य कथनयोग्यैः संपन्न इति तस्य विग्रहकथनो-पदेशमाह—

दुविहो इत्यादि।

अथवा प्रत्यक्ष-परोक्षरूपः संक्षेपतो द्विविध उपयोग आत्मनः। तत्र प्रत्यक्षोपयोगस्त्रिविधः अवधि-मनःपर्याय-केवलभेदेन। तत्र केवलोपयोगः सकलविषयः प्राक् प्रतिपादितः। अवधि-मनः-२५ पर्यायोपयोगस्त्वसकलविषयोऽस्मदादिभिरागमगम्यः। परोक्षोपयोगस्तु मति-श्रुतरूपो द्विविधः। तत्राक्ष-लिङ्गप्रभवमत्युपयोगस्य स्वरूपमावेदितम्। श्रुतोपयोगस्य त्वाचार्यस्तद्धेतुभूतहेत्वहेतुवाद-भेदभिन्नागमप्रतिपादनद्वारेण स्वरूपमाह—

दुविहो धम्मावाओ अहेउवाओ य हेउवाओ य।
तत्थ उ अहेउवाओ भवियाऽभवियादओ भावा ॥ ४३ ॥

३० वस्तुध**र्मा**णामस्तित्वादीना**मा**समन्ताद् **वाद**स्तत्प्रतिपादक आगमः **अहेतु-हेतुवाद-**भेदेन **द्वैविध्यं** प्रतिपद्यते। प्रमाणान्तरानवगतवस्तुप्रतिपादक आगमोऽहेतुवादः। तद्विपरीतस्त्वसौ हेतुवादः-हिनोति गमयत्यर्थमिति हेतुस्तत्परिच्छिन्नोऽर्थोऽपि हेतुः, तं वदति य आगमः स हेतुवादः। यस्तु वस्तुस्वरूपप्रतिपादकत्वेऽपि तद्विपरीतोऽसावहेतुवादो दृष्टिवादात् प्रायेणान्यः। **तत्र त्वहेतुवादो भव्याभव्य**स्वरूपप्रतिपादक आगमः तद्विभागप्रतिपादनेऽध्यक्षादेः प्रमाणा-३५ न्तरस्याप्रवृत्तेः-नहि 'अयं भव्यः, अयं त्वभव्यः' इत्यत्रागममन्तरेण प्रमाणान्तरप्रवृत्तिसंभवोऽस्मदाद्य-पेक्षया।

१-व च व-वृ०। २-मानानन्तपर-वा० बा० भां० मां०। ३-ग्यसं-भां० मां० विना। ४ पृ० ५३ पं २३। ५ गा० ३० द्वितीयकां० पृ० ६२०।

ननु 'तद्विभागप्रतिपादकं वचो यथार्थम् अर्हद्वचनत्वात् अनेकान्तात्मकवस्तुप्रतिपादकवचोवत्' इत्यनुमानात् तद्विभागप्रतिपत्तौ कथं न तस्यानुमानविषयता ? न; एवमप्यागमादेव तद्विभागप्रतिपत्तेः—तद्व्यतिरेकेण प्रमाणान्तरस्य तत्प्रतिपत्तिनिबन्धनस्याभावात् । अर्हदागमस्य च प्रधानार्थसंवादनिबन्धनतत्प्रणीतत्वनिश्चयेऽनुमानतोऽतीन्द्रियार्थविषये प्रामाण्यं निश्चीयत इत्यभ्युपगम्यत एव । आगमनिरपेक्षस्य तु प्रमाणान्तरस्यासदादेस्तत्र प्रवृत्तिर्न विद्यत इत्येतावताऽहेतुवादत्वमेत-५ द्विषयागमस्योच्यत इति ॥ ४३ ॥

[आगमोक्तस्य वस्तुनो हेतुद्वारा वास्तविकत्वसाधनमेव हेतुवादस्य लक्षणमिति सूचनम्]

वचनव्यापारं केवलमपेक्ष्यायं क्रमः । यदा तु ज्ञान-दर्शन-चारित्रत्रितये यथावदनुष्ठानप्रवणः तद्विकलश्च पुरुषः प्रतीयते तदा अनुमानगम्योऽपि तद्विभागो भवति, यथा-भव्यः अभव्यो वाऽयं पुरुषः, सम्यग्ज्ञानादिपरिपूर्णाऽपरिपूर्णत्वाभ्याम्, लोकप्रसिद्धभव्याऽभव्यपुरुषवत् । अहेतुवादागमा-१० वगते वा धर्मिणि भव्याऽभव्यस्वरूपे तद्वि(तदवि)परीतनिर्णयफलो हेतुवादः प्रवर्तते । योऽयमागमे भव्यादिरभिहितः स तथैव, यथोक्तहेतुसद्भावात् इत्याह—

भविओ सम्मद्दंसण-णाण-चरित्तपडिवत्तिसंपन्नो ।
णियमा दुक्खंतकडो त्ति लक्खणं हेउवायस्स ॥ ४४ ॥

भव्योऽयम्, सम्यग्दर्शन-ज्ञान-चारित्रप्रतिपत्तिसंपूर्णत्वात् उक्तपुरुषवत् । तत्परि-१५ पूर्णत्वादेव नियमात् संसारदुःखान्तं करिष्यति कर्मव्याधेरात्यन्तिकं विनाशमनुभविष्यति, तन्निबन्धनमिथ्यात्वादिप्रतिपक्षाभ्याससात्मीभावात्, व्याधिनिदानप्रतिकूलाचरणप्रवृत्ततथाविधातुरवत् । यः पुनर्न तत्प्रतिपक्षाभ्याससात्म्यवान् नासौ दुःखान्तकृद् भविष्यति तन्निदानानुष्ठानप्रवृत्ततथाविधातुरवत् इति हेतुवादस्य लक्षणम् । हेतुवादश्च प्रायो दृष्टिवादः तस्य द्रव्यानुयोगत्वात्, "सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः" [तत्त्वार्थसू० १-१] इत्यादेरनुमानादिगम्यस्यार्थस्य तत्र २० प्रतिपादनात् । यथा चात्रानुमानादिगम्यता तथा गन्धहस्तिप्रभृतिभिर्विक्रान्तमिति नेह प्रदर्श्यते ग्रन्थविस्तरभयात् ॥ ४४ ॥

[जीवादितत्त्वं कथं प्रतिपादयन् सिद्धान्तस्य आराधकः कथं वा प्रतिपादयन् तस्य विराधक इत्यभिधानम्]

"जीवाऽजीवाऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षास्तत्त्वम्" [तत्त्वार्थसू० १-४] इत्युभयवादा-२५ गमप्रतिपाद्यान् भावांस्तथैवाऽसंकीर्णरूपान् प्रतिपादयन् सैद्धान्तिकः पुरुषः इतरस्तु तद्विराधक इत्याह—

जो हेउवायपक्खम्मि हेउओ आगमे य आगमिओ ।
सो ससमयपण्णवओ सिद्धंतविराहओ अन्नो ॥ ४५ ॥

यो हेतुवादागमविषयमर्थं हेतुवादागमेन, तद्विपरीतागमविषयं चार्थमागममात्रेण प्रदर्श-३० यति वक्ता स स्वसिद्धान्तस्य द्वादशाङ्गस्य प्रतिपादनकुशलः, अन्यथा प्रतिपाद्यंश्च-तदर्थस्य प्रतिपादयितुमशक्यत्वात् तत्प्रतिपादके वचस्यनास्थादिदोषमुत्पादयन्-सिद्धान्तविराधको भवति सर्वज्ञप्रणीतागमस्य निस्सारताप्रदर्शनात् तत्प्रत्यनीको भवतीति यावत् ।

तथाहि-पृथिव्यादेर्मनुष्यपर्यन्तस्य षड्विधजीवनिकायस्य जीवत्वमागमेन अनुमानादिना च प्रमाणेन सिद्धं तथैव प्रतिपादयन् स्वसमयप्रज्ञापकः, अन्यथा तद्विराधकः । यतः प्रव्यक्तचेतने त्रसनि-३५ काये चैतन्यलक्षणं जीवत्वं स्वसंवेदनाध्यक्षतः स्वात्मनि प्रतीयते, परत्र त्वपरेणानुमानतः ।

---

१ तत्तद्विपरीत-वा० बा० विना ।

वनस्पतिपर्यन्तेषु पृथिव्यादिषु स्थावरेषु अनुमानतश्चैतन्यप्रतिपत्तिः । तथाहि—वनस्पतयश्चेतनाः,

---

१ "साम्प्रतं वनस्पतिजीवास्तित्वे लिङ्गमाह—से बेमि—इमं पि जाइधम्मयं एयं पि जाइधम्मयं; इमं पि वुड्ढिधम्मयं एयं पि वुड्ढिधम्मयं; इमं पि चित्तमंतयं एयं पि चित्तमन्तयं; इमं पि छिण्णं मिलाइ; एयं पि छिण्णं मिलाइ; इमं पि आहारगं एयं पि आहारगं; इमं पि अणिच्चयं एयं पि अणिच्चयं; इमं पि असासयं एयं पि असासयं; इमं पि चओवचइयं एयं पि चओवचइयं; इमं पि विपरिणामधम्मयं एयं पि विपरिणामधम्मयं"—आचारा० सू० अ० १ उ० ५ सू० ४६ पृ० ६५ ।

महाभारत–मनुस्मृत्योरपि वनस्पत्यादीनां सचेतनत्वमित्थं समर्थितं दृश्यते—

"भरद्वाज उवाच—

पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावर–जङ्गमाः । स्थावराणां न दृश्यन्ते शरीरे पञ्च धातवः ॥

अनूष्मणामचेष्टानां घनानां चैव तत्त्वतः । वृक्षाणां नोपलभ्यन्ते शरीरे पञ्च धातवः ॥

न शृण्वन्ति न पश्यन्ति न गन्ध–रसवेदिनः । न च स्पर्शं विजानन्ति ते कथं पाञ्चभौतिकाः? ॥

अद्रवत्वादनग्नित्वादभूमित्वादवायुतः । आकाशस्याप्रमेयत्वाद् वृक्षाणां नास्ति भौतिकम् ॥

भृगुरुवाच—

घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः । तेषां पुष्प–फलव्यक्तिर्नित्यं समुपपद्यते ॥

ऊष्मतो म्लायते वर्णं त्वक् फलं पुष्पमेव च । म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते ॥

वाय्वग्न्यशनिनिष्पेषैः फलं पुष्पं विशीर्यते । श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः ॥

वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति । न ह्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः ॥

पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि । अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः ॥

पादैः सलिलपानाच्च व्याधीनां चापि दर्शनात् । व्याधिप्रतिक्रियत्वाच्च विद्यते रसनं द्रुमे ॥

वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत् । तथा पवनसंयुक्तः पादैः पिबति पादपः ॥

सुख–दुःखयोश्च ग्रहणात् छिन्नस्य च विरोहणात् । जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते ॥

तेन तज्जलमादत्तं जरयत्यग्निमारुतौ । आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते" ॥—

महाभा० शान्ति० मो० प० अ० १८२ श्लो० ६–१८ पृ० २९१ ।

"उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः । ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ॥

अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः । पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥

गुच्छगुल्मं तु विविधं तथैव तृणजातयः । बीजकाण्डरुहाण्येव प्रताना वल्य एव च ॥

तमसा बहुरूपेण वेष्टिताः कर्महेतुना । अन्तःसंज्ञा भवन्त्येते सुख–दुःखसमन्विताः" ॥—

मनु० अ० १ श्लो० ४६–४९ पृ० १४–१५ ।

'भक्षयति बलीवर्दान् यवान्' 'भक्षयति बलीवर्दान् सस्यम्' वा इत्यत्र भक्षेर्हिंसार्थं मन्यमानाः पतञ्जलि—चन्द्रगोमि–देवनन्दि–कैयट–हेमचन्द्र–नागेश–ज्ञानेन्द्रसरस्वतीप्रमुखवैयाकरणा अपि वनस्पतेः सचेतनत्वं प्रतिपन्नाः । यथाक्रमं तद्यथा—

"अहिंसार्थस्येति किमर्थम्? भक्षयन्ति यवान् बलीवर्दाः भक्षयति बलीवर्दान् यवान्"१–४–५२ इत्यस्य सूत्रस्य "भक्षेरहिंसार्थस्य" इति वार्तिके—महाभाष्ये पृ० २७५ ।

"अहिंसायामिति किम्? भक्षयति बलीवर्दान् सस्यम्"—२–१–४९—चान्द्रे ।

"अहिंसार्थस्येति किम्? भक्षयति बलीवर्दो यवम् भक्षयति बलीवर्दं यवम्–अत्र हिंसाऽस्ति वनस्पतिकायानां प्राणित्वात्"—१–२–१२१–पृ० १०१ जैनेन्द्रे ।

"भक्षयन्ति यवानिति । क्षेत्रस्थानां प्ररोहाद्यवस्थायां यवानां भक्षणाद् हिंसा भवति, तदवस्थायां कैश्चिच्चैतन्यस्याभ्युपगमात् । परकीययवभक्षणे वा परो हिंसितो भवति । हिंसाङ्गे भक्षणेऽत्र भक्षिर्वर्तते"—१–४–५२ इति सूत्रस्य वार्तिकं स्पष्टयन् प्रदीपः ।

"वनस्पतीनां प्रसव–प्ररोह–वृद्ध्यादिमत्त्वेन चेतनत्वाद् तद्विशेषस्य सस्यस्य प्राणवियोगस्तद्भक्षणात् स्वाम्युपघातो वाऽत्र हिंसेति भक्षेर्हिंसार्थता"—२–२–६ हैमशब्दा० ।

"पिण्ड्या अप्राणित्वाद् उदाहरणे भक्षेरहिंसार्थत्वम् । ननु यवानामपि अचेतनत्वात् तद्विषयस्यापि कथं हिंसार्थत्वम्? अत आह–क्षेत्रस्थानामिति । इदमुपलक्षणम् बीजावस्थानामपि भक्षणे हिंसासत्त्वात् । हिंसाङ्गे इति । इदमुभयसाधारणम् तत्र आद्ये यवान् हिंसन् भक्षयतीत्यर्थः द्वितीये तु 'परान्' इत्यध्याहार्यम्–परान् हिंसन् यवान् भक्षयतीत्यर्थः । अत्र आद्यमेव युक्तं भाष्यस्वरसादित्याहुः"—१–४–५२ इति पाणिनीयसूत्रस्य उपर्युक्तमेव वार्तिकं समुद्द्योतयन् उद्द्योतः ।

"अहिंसार्थस्य किम्? भक्षयति बलीवर्दान् सस्यम् । ××× बलीवर्दाः सस्यं भक्षयन्ति तान् भक्षयतीत्यर्थः । क्षेत्रस्थानां यवानां भक्ष्यमाणानां हिंसा ज्ञेया तस्यामवस्थायां तेषां चेतनत्वात्"—१–४–५२ सिद्धान्तकौ० तत्त्वबोधि० ।

वृक्षायुर्वेदाभिहितप्रतिनियतकालायुष्कविशिष्टौषधप्रयोगसंपादितवृद्धि-हानि-क्षत-भग्नसंरोहण-प्रतिनियतवृद्धिषड्भावविकारोत्पादनाशावस्थानियतविशिष्टशरीरस्निग्धत्व-रूक्षत्व-विशिष्टदौहृद-बाल-कुमार-वृद्धावस्था-प्रतिनियतविशिष्टरसवीर्यविपाक-प्रतिनियतप्रदेशाहारग्रहणादिमत्त्वान्यथानुपपत्तेः, विशिष्टस्त्रीशरीरवत् इत्याद्यनुमानं भाष्यकृत्प्रभृतिभिर्विस्तरतः प्रतिपादितं तच्चैतन्यप्रसाधक-

---

१ वराहमिहिराचार्यप्रणीतायां बृहत् (वाराही) संहितायां वृक्षायुर्वेदविषय इत्थं वर्णितो वर्तते—

"अथ तेषां रोगज्ञानमाह—

शीतवातातपै रोगो जायते पाण्डुपत्रता। अवृद्धिश्च प्रवालानां शाखाशोषो रसस्रुतिः॥ १४॥

चिकित्सितमथैतेषां शस्त्रेणादौ विशोधनम्। विडङ्गघृतपङ्काक्तान् सेचयेत् क्षीरवारिणा॥ १५॥

तथा च काश्यपः—

शाखाविटपपत्रैश्च छायया विहिताश्च ये। येऽपि पर्ण-फलैर्हीना रूक्षाः पत्रैश्च पाण्डुरैः॥

शीतोष्णवर्षवातार्यैर्मूलैर्व्योमिश्रितैरपि। शाखिनां तु भवेद् रोगो द्विपानां लेखनेन च॥

चिकित्सैतेषु कर्तव्या ये च भूयः पुनर्नवाः। शोधयेत् प्रथमं शस्त्रैः प्रलेपं दापयेत् ततः॥

कर्दमेन विडङ्गैश्च घृतमिश्रैश्च लेपयेत्। क्षीरतोयेन सेकः स्याद् रोहणं सर्वशाखिनाम्॥

अथ फलनाशचिकित्सितमाह—

फलनाशे कुलत्थैश्च माषैर्मुद्गैस्तिलैर्यवैः। शृतशीतपयःसेकः फलपुष्पसमृद्धये॥ १६॥

अथ वृद्ध्यर्थप्रयोगमाह—

"अविकाजशकृच्चूर्णस्याढके द्वे तिलाढकम्। सक्तुप्रस्थो जलद्रोणो गोमांसतुलया सह॥ १७॥

सप्तरात्रोषितैरेतैः सेकः कार्यो वनस्पतेः। वल्लीगुल्मलतानां च फलपुष्पाय सर्वदा"॥ १८॥

—बृहत्सं० वृक्षायुर्वेदाध्या० ५४ पृ० ७४६-७४७।

२ षड्भावविकारा इत्थमवगन्तव्याः—

"षड्भावविकारा भवन्तीति वार्ष्यायणिः—जायते अस्ति विपरिणमते वर्धते अपक्षीयते विनश्यतीति"—यास्कनि० पृ० ४४ पं० १३। एतदेव विकारषट्कपरिगणनं महाभाष्ये "भूवादयो धातवः" १-३-१ इति सूत्रे, वाक्यपदीये तृतीयकाण्डे प्रथमजातिसमुद्देशीयषट्त्रिंशश्लोकव्याख्यायाम् (तृ० कां० पृ० ३१) हेमचन्द्रशब्दानुशासने "क्रियार्थो धातुः" ३-३-३ इति सूत्रे च विद्यते।

३ भाष्यकृता श्रीजिनभद्रगणिक्षमाश्रमणेन वनस्पतिपर्यन्तेषु पृथिव्यादिषु स्थावरेषु अनुमानतश्चैतन्यमित्थं साधितं वर्तते—

"जम्म-जरा-जीवण-मरण-रोहणा-ऽऽहार-दोहला-ऽऽमयओ। रोग-तिगिच्छाईहि य नारि व्व सचेयणा तरवो॥

सचेतनास्तरवः इति प्रतिज्ञा, जन्म-जरा-जीवन-मरण-क्षतसंरोहणा-ऽऽहार-दौहृदा-ऽऽमय-तच्चिकित्सादिसद्भावात् इति हेतुः, नारीवत् इति दृष्टान्तः। × × × × ×

छिक्कपरोइया छिक्कमेत्तसंकोयओ कुलिंगो व्व। आसयसंचाराओ वियत्त! वल्लीवियाणाइं॥

सम्मादयो य साव-प्पबोह-संकोयणाइओऽभिमया। बउलादओ य सद्दाइविसयकालोवलंभाओ॥

सचेतनाः स्पृष्टप्ररोदिकादयो वनस्पतयः स्पृष्टमात्रसंकोचात् कुलिङ्गः-कीटादिः-तद्वत्। तथा, सचेतना वल्ल्यादयः स्वरक्षार्थं वृति-वृक्ष-वरण्डकाद्याश्रयं प्रति संचरणात्। तथा, शम्यादयश्चेतनत्वेन अभिमताः स्वाप-प्रबोध-संकोचादिमत्त्वात् देवदत्तवत्। तथा, सचेतना बकुला-ऽशोक-कुरुबक-विरहक-चम्पक-तिलकादयः शब्दादिविषयकालोपलम्भात्—शब्द-रूप-गन्ध-रस-स्पर्शविषयाणां काले प्रस्तावे उपभोगस्य यथासंख्यमुपलम्भादित्यर्थः यज्ञदत्तवदिति। एवं पूर्वमपि दौहृदादिलिङ्गेषु कूष्माण्डी-बीजपूरकादयो वनस्पतिविशेषाः पक्षीकर्तव्या इति।

अथ सामान्येन तरूणाम् पृथ्वीविशेषाणां च विद्रुमादीनां सचेतनत्वसाधनायाह—

मंसंकुरो व्व समाणजाइरूवंकुरोवलंभाओ। तरुगण-विद्दुम-लवणो-वलादओ सासयावत्था॥

तरुगणः तथा विद्रुम-लवणो-पलादयश्च स्वाश्रयावस्थाः स्वजन्मस्थानगताः सन्तश्चेतनाः छिन्नानामप्यमीषां पुनस्तत्स्थान एव समानजातीयाङ्कुरोत्थानात् अर्शोमांसाङ्कुरवत्। × × ×

अथोदकस्य सचेतनत्वं साधयितुमाह—

भूमिक्खयसाभावियसंभवओ दद्दुरो व्व जलमुत्तं। अहवा मच्छो व सभाववोमसंभूयपायाओ॥

मित्यनुमानतस्तेषां चैतन्यमात्रं सिध्यति । साधारण-प्रत्येकशरीरत्वादिकस्तु भेदः—

"गूढसिर-संधि-पव्वं समभंगमहीरगं च छिण्णरुहं । साहारणं सरीरं तव्विवरीयं च पत्तेयं ॥"

[जीवविचा० गा० १२]

इत्याद्यागमप्रतिपाद्य एव ।

५ जीवलक्षणव्यतिरिक्तलक्षणास्त्वजीवा धर्माऽधर्माऽऽकाश-काल-पुद्गलभेदेन पञ्चविधाः । तत्र पुद्गलास्तिकायव्यतिरिक्तानां स्वतो मूर्तिमद्द्रव्यसम्बन्धमन्तरेणात्मद्रव्यवदमूर्तत्वाद् अनुमानप्रत्ययाव-सेयता । तथाहि—[3]गति-स्थित्यवगाहलक्षणं पुद्गलास्तिकायादिकार्यं विशिष्टकारणप्रभवम्, विशिष्टका-

---

भौममम्भः सचेतनमुक्तम् क्षतभूमिसजातीयस्वाभाविकस्य तस्य संभवात् दर्दुरवत् । अथवा, सचेतनमन्तरिक्षमम्भः अभ्रादिविकारस्वभावसंभूतपातात् मत्स्यवदिति ।

तेजोऽनिलावधिकृत्याह—

अपरप्पेरियतिरियानियमियदिग्गमणओऽणिलो गो व्व । अनलो आहाराओ विद्धि-विगारोवलम्भाओ ॥

सात्मको वायुः अपरप्रेरिततिर्यगनियमितदिग्गमनात् गोवत् । तथा, सात्मकं तेजः आहारोपादानात् तद्वृद्धौ विकारवि-शेषोपलम्भाच्च नरवत्"—विशेषा० भा० गा० १७५३-१७५८ पृ० ७४४-७४६ ।

तथा, पृथिव्यादिवनस्पत्यन्तानां स्थावराणां स्पष्टतया श्रोत्रादीन्द्रियरहितत्वेऽपि श्रोत्रादीन्द्रियजोऽनुभवो विलोक्यत एव अत एव वनस्पत्यन्तानां तेषां सचेतनत्वं साधितं पुरातनैः । स्थूलतया इन्द्रियरहितत्वेऽपि वनस्पतिषु केषां केषां वृक्षा-णामस्मदादिवत् कीदृशः कीदृशोऽनुभवो जायते तदेतत् सर्वं सविस्तरं तेनैव भाष्यकृता भाष्यटीकाकृता चेत्थमुपवर्णितम्—

"जह सुहुमं भाविंदियनाणं दव्विंदियावरोहे वि । तह दव्वसुयाभावे भावसुयं पत्थिवाईणं ॥

इह केवलिनो विहाय शेषसंसारिजीवानां सर्वेषामप्यतिस्तोक-बहु-बहुतर-बहुतमादितारतम्यभावेन द्रव्येन्द्रियेष्वसत्स्वपि लब्धीन्द्रियपञ्चकावरणक्षयोपशमः समस्त्येवेति परममुनिवचनम् । ततश्च यथा येन प्रकारेण पृथिव्यादीनामेकेन्द्रियाणां श्रोत्र-चक्षु-घ्राण-रसनलक्षणानां प्रत्येकं निर्वृत्त्युपकरणरूपाणां द्रव्येन्द्रियाणां तत्प्रतिबन्धककर्मावृतत्वादवरोधेऽप्यभावेऽपि सूक्ष्ममव्यक्तं लब्ध्युपयोगरूपं श्रोत्रादिभावेन्द्रियज्ञानं भवति लब्धीन्द्रियावरणक्षयोपशमसंभूताऽणीयसी ज्ञानशक्तिर्भवतीत्यर्थः । तथा तेनैव प्रकारेण द्रव्यश्रुतस्य द्रव्येन्द्रियस्थानीयस्याभावेऽपि भावश्रुतं भावेन्द्रियज्ञानकल्पं पृथिव्यादीनां भवतीति प्रतिपत्त-व्यमेव । इदमुक्तं भवति—एकेन्द्रियाणां तावत् श्रोत्रादिद्रव्येन्द्रियाभावेऽपि भावेन्द्रियज्ञानं किञ्चिद् दृश्यत एव वनस्पत्यादिषु स्पष्टतल्लिङ्गोपलम्भात् । तथाहि—कलकण्ठोद्गीर्णमधुरपञ्चमोद्गारश्रवणात् सद्यः कुसुम-पल्लवादिप्रसरो विरहकवृक्षादिषु श्रवणे-न्द्रियज्ञानस्य व्यक्तं लिङ्गमवलोक्यते । तिलकादितरुषु पुनः कमनीयकामिनीकमलदलदीर्घशरदिन्दुधवललोचनकटाक्षविक्षेपात् कुसुमाद्याविर्भावश्चक्षुरिन्द्रियज्ञानस्य । चम्पकाद्यंह्रिपेषु तु विविधसुगन्धिगन्धवस्तुनिकुरम्बोन्मिश्रविमलशीतलसलिलसेकात् तत्प्रकटनं घ्राणेन्द्रियज्ञानस्य । बकुलादिभूरुहेषु तु रम्भातिशायिप्रवररूपवरतरुणभामिनीमुखप्रदत्तस्वच्छसुस्वादुसुरभिवारुणी-गण्डूषास्वादनात् तदाविष्करणं रसनेन्द्रियज्ञानस्य । कुरबकादिविटपिषु अशोकादिद्रुमेषु च घनपीनोन्नतकठिनकुचकुम्भविभ्र-मापभ्राजितकुम्भीनकुम्भरणन्मणिवलयक्वणत्कङ्कणाभरणभूषितभव्यभामिनीभुजलताऽवगूहनसुखाद् निष्पिष्टपद्मरागचूर्णशोणतल-तत्पादकमलपार्ष्णिप्रहाराच्च झगिति प्रसून-पल्लवादिप्रभवः स्पर्शनेन्द्रियज्ञानस्य स्पष्टं लिङ्गमभिवीक्ष्यते । ततश्च यथैतेषु द्रव्ये-न्द्रियासत्त्वेऽप्येतद् भावेन्द्रियजन्यं ज्ञानं सकलजनप्रसिद्धमस्ति तथा द्रव्यश्रुताभावे भावश्रुतमपि भविष्यति । दृश्यते हि जलाद्याहारोपजीवनाद् वनस्पत्यादीनामाहारसंज्ञा, संकोचनवल्ल्यादीनां तु हस्तस्पर्शादिभीत्या अवयवसंकोचनादिभ्यो भयसंज्ञा, विरहक-तिलक-चम्पक-केशराऽशोकादीनां तु मैथुनसंज्ञा दर्शितैव, बिल्व-पलाशादीनां तु निधानीकृतद्रविणोपरिपादमोचना-दिभ्यः परिग्रहसंज्ञा । न चैताः संज्ञा भावश्रुतमन्तरेणोपपद्यन्ते । तस्माद् भावेन्द्रियपञ्चकावरणक्षयोपशमाद् भावेन्द्रियपञ्चक-ज्ञानवद् भावश्रुतावरणक्षयोपशमसद्भावाद् द्रव्यश्रुताभावेऽपि यच्च यावच्च भावश्रुतमस्त्येव एकेन्द्रियाणामित्यलं विस्तरेण"—विशेषा० भा० गा० १०३ पृ० ६८-६९ ।

१ साधारण-प्रत्येकशरीरधारिणां वनस्पतीनां सलक्षणं सविस्तरं विवेचनं प्रज्ञापना(पन्नवणा)सूत्रतोऽवबोद्धव्यम्—प० १ सू० २२-२६ पृ० ३०-३९ ।

२ "अजीवकाया धर्माधर्माकाशपुद्गलाः । १ । कालश्चेत्येके" ।३८।—तत्त्वार्थ० अ० ५ ।

३ "गति-स्थित्युपग्रहो धर्माधर्मयोरुपकारः । १७ । आकाशस्यावगाहः" । १८ ।—तत्त्वार्थ० अ० ५ ।

र्थत्वात्, शाल्यङ्कुरादिकार्यवत्, यश्चासौ कारणविशेषः स धर्माऽधर्माऽऽकाशलक्षणो यथासंख्यमवसेयः । काल[1]स्तु विशिष्टपरापरप्रत्ययादिलिङ्गानुमेयः । पुद्ग[2]लास्तिकायस्तु प्रत्यक्षाऽनुमानलक्षणप्रमाणद्वयगम्यः । यस्तेषां धर्मादीनामसंख्येयप्रदेशात्मकत्वादिको विशेषः[3] तत्प्रदेशानां च सूक्ष्म-सूक्ष्मतरत्वादिको विभागः स "कालो य होइ सुहुमो" [ ] इत्याद्यागमप्रतिपाद्य एव, नागमनिरपेक्षयुक्त्यवसेयः । एवमाश्रवादिष्वपि तत्त्वेषु युक्त्याऽऽगमगम्येषु युक्तिगम्यमंशं युक्तित ५ एव, आगमगम्यं तु केवलागमत एव प्रतिपादयन् स्वसमयप्रज्ञापकः, इतरस्तु तद्विराधक इति प्रज्ञापकलक्षणमवगन्तव्यम् ॥ ४५ ॥

[हेतुसाध्यमर्थं हेतोरेव इतरं चागमत एव साधयतो नयवादः शुद्धो नान्यस्य इति कथनम्]

यो हेतुसाध्यमर्थं हेतुना साधयति आगमसिद्धं च आगमेन, तस्य नयवादः परिशुद्धः नान्यस्येत्येतदेवाऽऽह—'परिसुद्ध'—इत्यादि । १०

यद्वा वस्तुधर्मप्रतिपादकोऽहेतु-हेतुवादप्रभेद आगमो वाक्य-नयरूपः परिशुद्धेतरभेदेन द्विरूपतां प्रतिपद्यते इत्याह—

परिसुद्धो नयवाओ आगममेत्तत्थसाहओ होइ ।
सो चेव दुण्णिगिण्णो दोण्णि वि पक्खे [4]विधम्मेइ ॥ ४६ ॥

परि समन्तात् **शुद्धो नयवादः** यदा विवक्षिताऽविवक्षितानन्तरूपात्मकवस्तुप्रतिपादकं १५ नयवाक्यं प्रवर्तते 'स्यान्नित्यम्' इत्यादिकं तदा **भवति**, प्रमाणपरिशुद्धा**गमार्थमात्रस्य** न्यूनाधिकव्यवच्छेदेन प्रतिपादनात् अधिकस्याऽसंभवेन न्यूनस्य च नयानामसर्वार्थत्वप्रसङ्गतोऽर्थस्य परिशुद्धागमविषयत्वायोगात् । **स एव** नयवादः इतररूपनिरपेक्षैकरूपप्रतिपादकत्वेन यदा **दुर्निक्षिप्तः** प्रमाणविरुद्धार्थप्रतिपादकत्वेनाऽवतारितस्तदा द्वितीयधर्मनिरपेक्षस्य प्रतिपाद्यधर्मस्याऽप्यभावतोऽप्रतिपादनाद् अपरिशुद्धो भवति, प्रमाणविरुद्धस्य तथातदर्थस्य व्यवस्थापयितुमशक्यत्वात् ॥ ४६ ॥ २०

[अपरिशुद्धनयवादरूपपरसमयानां संख्यानम्]

अपरिशुद्धश्च नयवादः परसमयः स कियद्भेदो भवति ? इत्याह—

जावइया वयणवहा तावइया चेव होंति णयवाया ।
जावइया णयवाया तावइया चेव परसमया ॥ ४७ ॥

अनेकान्तात्मकस्य वस्तुन एकदेशस्य यद् अन्यनिरपेक्षस्याऽवधारणम् अपरिशुद्धो नयः, तावन्मात्रार्थस्य **वाचकानां** शब्दानां **यावन्तो मार्गाः**—हेतवो नयाः—**तावन्त एव भवन्ति नयवादा**स्तत्प्रतिपादकाः शब्दाः । **यावन्तो नयवादास्तावन्त एव परसमया** भवन्ति स्वेच्छाप्रकल्पितविकल्पनिबन्धनत्वात् परसमयानां परिमितिर्न विद्यते । ननु यद्यपरिमिताः परसमयाः कथं तन्निबन्धनभूतानां नयानां संख्यानियमः "नैगम-संग्रह-व्यवहारर्जुसूत्र-शब्द-समभिरूढैवंभूता नयाः" २५

---

१ "वर्तना परिणामः क्रिया परत्वापरत्वे च कालस्य" । २२ ।—तत्त्वार्थ० अ० ५ ।

२–द्गलादिका–बृ० आ० हा० वि० ।

"रूपिणः पुद्गलाः । ४ । शरीरवाङ्मनःप्राणापानाः पुद्गलानाम् । १९ । सुख-दुःख-जीवित-मरणोपग्रहाश्च" । २० ।
—तत्त्वार्थ० अ० ५ ।

३ "नित्यावस्थितानि अरूपाणि । ३ । आऽऽकाशादेकद्रव्याणि । ५ । निष्क्रियाणि च । ६ । असंख्येयाः प्रदेशा धर्माधर्मयोः । ७ । जीवस्य च । ८ । आकाशस्याऽनन्ताः । ९ । संख्येयासंख्येयाश्च पुद्गलानाम् । १० । लोकाकाशेऽवगाहः । १२ । धर्माधर्मयोः कृत्स्ने । १३ । एकप्रदेशादिषु भाज्यः पुद्गलानाम् । १४ । असंख्येयभागादिषु जीवानाम्" । १५ ।
—तत्त्वार्थ० अ० ५ ।

४ विहम्मेवि गु० मू० मु० मू० ।

[तत्त्वार्थसू० १-३३] इति श्रूयते ? न; स्थूलतस्तच्छ्रुतेः, अवान्तरभेदेन तु तेषामपरिमितत्वमेव स्वकल्पनाशिल्पिघटितविकल्पानामनियतत्वात् तदुत्थप्रवादानामपि तत्संख्यापरिमाणत्वात् ॥ ४७ ॥

[कं कं नयमाश्रित्य कस्कः समयः प्रस्थित इति प्रश्नस्य व्याकरणम्]

ननु कं नयमाश्रित्य कः परसमयः प्रवृत्तः ? को वा कस्य विषयः ? इत्याह—

५ **जं काविलं दरिसणं एयं दव्वट्ठियस्स वत्तव्वं ।**
सुद्धोअणतणअस्स उ परिसुद्धो पज्जवविअप्पो ॥ ४८ ॥

यत् कापिलं दर्शनं सांख्यमतम् **एतद् द्रव्यास्तिकनयस्य वक्तव्यम्**—तद्विषयविषयम् तदुत्थापितं चेति भावः-**शौद्धोदनेस्तु परिशुद्धः पर्यायविशेष** एव वक्तव्यः-परिशुद्धपर्यायास्तिकनयविशेषविषयं तदुत्थापितं च सौगतमतमित्यभिप्रायः । मिथ्यास्वरूपनयप्रभवत्वाद् अनयो-
१० र्मिथ्यात्वं प्राक् प्रदर्शितमेव ॥ ४८ ॥

[द्रव्यास्तिक-पर्यायास्तिकोभयाश्रितस्यापि वैशेषिकसमयस्य कथं मिथ्यात्वमिति प्रश्नस्य प्रतिवचनम्]

ननु भवतु परस्परनिरपेक्षैकैकनयावलम्बिनोः साङ्ख्य-सौगतमतयोर्मिथ्यात्वम्, कणभुग्मतस्य तु द्रव्यार्थिक-पर्यायार्थिकनयद्वयावलम्बिनः कथं मिथ्यात्वम् ? इत्यत्राह—

१५ **दोहि[2] वि णएहि णीअं सत्थमुलूएण तह वि मिच्छत्तं ।**
जं सविसअप्पहाणत्तणेण अण्णोण्णनिरवेक्खा ॥ ४९ ॥

द्वाभ्यामपि द्रव्यार्थिक-पर्यायार्थिक**नयाभ्यां प्रणीतं शास्त्रम् उलूकेन**[3] वैशेषिकशास्त्रप्रणेत्रा, *द्रव्य-गुणादेः पदार्थषट्कस्य नित्यानित्यैकान्तरूपस्य तत्र प्रतिपादनात्* ।

[कणादोक्तषट्पदार्थीव्यवस्थाया उपन्यासः]

२० तथाहि—द्रव्य[4]-गुण-कर्म-सामान्य-विशेष-समवायाख्याः षडेव पदार्थाः, न्यूनाऽधिकप्रतिपादकप्रमाणाभावे परस्परविविक्तस्वरूपषट्पदार्थव्यवस्थापकप्रमाणविषयत्वात्, उभयाभिमतघटादिषट्पदार्थवत् । तत्र पृथिव्यप्-तेजो-वाय्वाकाश-काल-दिगात्म-मनांसि नवैव द्रव्याणि । 'पृथिवी आपः तेजो वायुः' इत्येतत् चतुःसंख्यं नित्याऽनित्यभेदाद् द्विप्रकारं द्रव्यम्; तत्र परमाणुरूपं नित्यम् "सदकारणवन्नित्यम्" [वैशेषिकद० ४-१-१] इति वचनात्, तदारब्धं तु द्व्यणुकादि कार्यद्रव्य-
२५ मनित्यम् । आकाशादिकं तु नित्यमेव, अनुत्पत्तिमत्त्वात् । एषां च द्रव्यत्वाभिसंबन्धाद् द्रव्यरूपता, द्रव्यत्वाभिसंबन्धश्च द्रव्यत्वसामान्योपलक्षितसमवायः, तत्समवेतं वा सामान्यम्, एतच्चेतरव्यवच्छेदकमेषां लक्षणम् । तथाहि—पृथिव्यादीनि मनःपर्यन्तानि इतरेभ्यो भिद्यन्ते 'द्रव्याणि' इति वा व्यवहर्तव्यानि द्रव्यत्वाभिसंबन्धात्, यानि तु नैवम् न च तानि द्रव्यत्वाभिसंबन्धवन्ति, यथा गुणादिवस्तूनि, इति केवलव्यतिरेकिहेतुबलात् पृथिव्यादीनि द्रव्याणि गुणादिभ्यो व्यावृत्तरूपाणि
३० सिद्धानि । पृथिव्यादीनामपि भेदवतां पृथिवीत्वाभिसंबन्धादिकं लक्षणमितरेभ्यो भेदव्यवहारे तच्छब्दवाच्यत्वे वा साध्ये केवलव्यतिरेकिरूपं द्रष्टव्यम् । अभेदवतां त्वाकाश-काल-दिग्द्रव्याणामनादिसिद्धतच्छब्दवाच्यता द्रष्टव्या । नवैव चैतानि द्रव्याणि, न्यूनाधिकत्वप्रतिपादकप्रमाणाभावे

---

१ पृ० २९६ पं० ८ तथा पृ० ३८७ पं० १८ । २ **दोहिँ वि णएहिँ** गु० मू० ।

३ कणादापरनाम्न उलूकमहर्षेर्वृत्तान्तावबोधाय वायुपुराणमिहानुसंधेयम्—अ० २३ श्लो० २०३ ।

४ मूलग्रन्थकृता दिवाकरेण वैशेषिकशास्त्रनिःष्यन्दभूता वैशेषिकद्वात्रिंशिकाऽपि रचिताऽस्ति सा च तद्रचितासु द्वात्रिंशति द्वात्रिंशिकासु चतुर्दशी वर्तते एषाऽपि प्रस्तुतविषयसादृश्यावबोधाय बुभुत्सुभिरत्रावगन्तव्या भवेत्—द्वात्रिंशद्द्वात्रिंशिका पृ० १८-१९ ।

अत्र द्रव्यादिपदार्थस्वरूपं सविस्तरमवबोद्धुकामेन समग्रं वैशेषिकदर्शनं सभाष्यं सकन्दलिकं चानुसंधेयम् ।

परस्परव्यावृत्तनवलक्षणयोगित्वात्, उभयाभिमतनवघटादिवत् । एवं रूपादयश्चतुर्विंशतिर्गुणाः । उत्क्षेपणादीनि पञ्च कर्माणि । पराऽपरभेदभिन्नं द्विविधं सामान्यमनुगतज्ञानकारणम् । नित्यद्रव्यवृत्तयोऽन्त्या विशेषा अत्यन्तव्यावृत्तबुद्धिहेतवः । अयुतसिद्धानामाधार्याऽऽधारभूतानाम् 'इह' इतिप्रत्ययहेतुर्यः संबन्धः स समवाय एको व्यापकश्च । अत्र च पदार्थषट्के द्रव्याणि गुणाश्च केचिन्नित्या एव, केचित् त्वनित्या एव । कर्म अनित्यमेव । सामान्य-विशेष-समवायास्तु नित्या ५ एवेति पदार्थव्यवस्था । ततश्चैतत् शास्त्रं तथापि मिथ्यात्वम्, तत्प्रदर्शितपदार्थषट्कस्य प्रमाणबाधितत्वात् ।

[कणादोक्तां तत्त्वव्यवस्थां निरसितुं पूर्वं द्रव्यपदार्थस्य खण्डनम्]

यतश्चतुःसंख्यं पृथिव्यादिद्रव्यं परमाणुरूपं यन्नित्यमुपवर्णितम्[2], तदसंगतम्[3]; एकान्ताऽक्षणिकत्वे क्रम-यौगपद्याभ्यामर्थक्रियाविरोधात् तल्लक्षणं सत्त्वं ततो व्यावर्तते, ततश्च असत्त्वमेव तस्य[4] । १० यदि[5] च स्थूलकार्यद्रव्यकारणभूतानामणूनां तज्जनकैकस्वभावता तदा तत्कार्याणां सकृदेव सर्वेषामुत्पत्तिप्रसक्तिः अविकलकारणत्वात् । तथा च प्रयोगः—येऽविकलकारणास्ते सकृदेवोत्पद्यन्ते, यथा समानोत्पादा बहवोऽङ्कुराः, अविकलकारणाश्च परमाणुकार्यत्वेनाऽभिमता भावा इति स्वभावहेतुः । अविकलकारणस्याप्यनुत्पादे सर्वदाऽनुत्पत्तिप्रसक्तिः विशेषाभावात् इति विपर्यये बाधकं[6] प्रमाणम् । स्यादेतत्, समवाय्यसमवायि[7]-निमित्तभेदात् त्रिविधं कारणम्, यत्र हि कार्यं समवैति तत् समवा- १५ यिकारणम् यथा-द्व्यणुकस्य अणुद्वयम् । यच्च[8] कार्यैकार्थसमवेतम् कार्यकारणैकार्थसमवेतं वा कार्यमुत्पादयति तद् असमवायि कारणम् यथा-पटावयविद्रव्यारम्भे तन्तुसंयोगः, पटसमवेतरूपाद्यारम्भे पटोत्पादकतन्तुरूपादि च । शेषं[9] तु उत्पादकं निमित्तकारणम् यथा—अदृष्टाऽऽकाशादि । तत्र संयोगादेरपेक्षणीयस्य असंनिधेरविकलकारणत्वमसिद्धम्, असदेतत्; संयोगादिनाऽनाधेयातिशयत्वात्

१-शातिगु-बृ० विना । २ पृ० ६५६ पं० २३ ।

३ प्रस्तूयमानैषा सपूर्वपक्षा समग्राऽपि वैशेषिकाभिमतद्रव्य-गुणादितत्त्वपरीक्षणचर्चाऽविकलतया तत्त्वसंग्रहपञ्जिकायां विद्यते-पृ० १८५ का० ५४७—पृ० २७४ का० ८६६ ।

सैव च क्वचित् क्वचित् शब्दसाम्येन क्वचिच्चान्ययाऽपि भङ्ग्या अर्थसाम्यमजहती न्यायकुमुदचन्द्रोदये, प्रमेयकमलमार्तण्डे स्याद्वादरत्नाकरे च विद्यते-लि० पृ० ११६ द्वि० पं० ३-पृ० १७४ द्वि० पं० १० । पृ० १५६ प्र० पं० ८-पृ० १८८ द्वि० पं० १३ । पृ० ८३७ पं० २०-पृ० ९७० पं० १५ ।

४ "तत्र नित्याणुरूपाणामसत्त्वमुपपादितम् । निःशेषवस्तुविषयक्षणभङ्गप्रसाधनात्" ॥

—तत्त्वसं० का० ५५१ पृ० १८६ ।

५ "नित्यत्वे सकलाः स्थूला जायेरन् सकृदेव हि । संयोगादि न चापेक्ष्यं तेषामस्त्यविशेषतः" ॥

—तत्त्वसं० का० ५५२ पृ० १८६ ।

६ बाधक प्र-बृ० आ० हा० वि० । "समग्रकारणस्याप्यनुत्पादे सर्वदैवानुत्पादप्रसङ्गो विशेषाभावादिति बाधकं प्रमाणम्"—तत्त्वसं० पञ्जि० पृ० १८६ पं० २० ।

७ "ननु समवायि-असमवायि-निमित्तभेदात् त्रिविधं कारणं कार्यजन्मनि व्याप्रियते । यत्र हि कार्यं समवैति तत् समवायि कारणम् यथा द्व्यणुकस्य अणुद्वयम् । यच्च कार्यैकार्थसमवेतं कार्यकारणैकार्थसमवेतं वा कार्यं समुत्पादयति तद् असमवायि कारणम् यथा पटारम्भे तन्तुसंयोगः पटसमवेतरूपाद्यारम्भे पटोत्पादकतन्तुरूपादि च शेषं तु उत्पादकं निमित्तकारणम् यथा अदृष्टाकाशादि" इत्यादि—न्यायकुमुद० लि० पृ० ११८ प्र० पं० १२-द्वि० पं० १-२ । प्रमेयक० पृ० १५९ द्वि० पं० १५-।

८ "असमवेतं तु यद् यस्य कारणभावं प्रतिपद्यते तद् असमवायिकारणम् यथा अवयविद्रव्यारम्भेऽवयवसंयोगः"

—तत्त्वसं० पञ्जि० पृ० १८६ पं० २२ ।

९ "परिशेषं तु कारणं निमित्तकारणम् तद्यथा धर्मादय इत्ययमेषां विभागः"—तत्त्वसं० पञ्जि० पृ० १८६ पं० २४ ।

नित्यतया अणूनां तदपेक्षत्वायोगात्। न च तंनुं-करणादीनां कार्याणां सकृत् प्रादुर्भाव उपलभ्यते तस्माद् विपर्ययः। तथा च प्रयोगः—ये क्रमवत्कार्यहेतवस्तेऽनित्याः, यथा-क्रमवदङ्कुरादिनिर्वर्तका बीजादयः, तथा च परमाणव इति स्वभावहेतुः। यदपि अविद्धकर्णोक्तमणूनां नित्यत्वसाधकं प्रमाणम्—"परमाणूत्पादकाभिमतं कारणं सद्धर्मोपेतं न भवति, सत्त्वप्रतिपादकप्रमाणाविषयत्वात्,
५ शशशृङ्गवत्" [ ] इति। तत्र कुविन्दादेरणूत्पादककारणस्य सत्त्वप्रतिपादकप्रमाण-विषयत्वाद् असिद्धो हेतुः। यथा च पटादयः परमाण्वात्मकाः कुविन्दोत्पाद्यास्तथा प्रदर्शयिष्यामः। देश-काल-स्वभावविप्रकृष्टानां च भावानां सदुपलम्भकप्रमाणनिवृत्तावपि सत्त्वाविरोधाद् अनैकान्तिकश्च हेतुः। ततो न अण्वनित्यत्वप्रसाधकानुमा..प्रतिज्ञाया अनुमानबाधा। न च 'यत एव प्रमाणात् परमाणवः प्रसिद्धाः तत एव नित्यत्वधर्मोपेता अपि ते' इति तद्ग्राहकप्रमाणबाधितत्वात् तदनित्यत्व-
१० प्रसाधकानुमानस्याऽनुत्थानम् प्रमाणतोऽप्रसिद्धौ चाणूनामाश्रयाऽसिद्धतया तत् इति वाच्यम्, सर्वस्य प्रमाणविषयस्य अनित्यत्वधर्मोपेतस्यैव तद्विषयत्वात् अन्यथाभूतस्य तदजनकत्वे तद्विषयत्वा-नुपपत्तेः "नाऽकारणं विषयः" [ ] इति प्रसाधितत्वात्। नित्यस्य चाऽकारणत्वात्। तन्न चतुःसंख्यं परमाण्वात्मकं नित्यद्रव्यं संभवति।

नापि तदारब्धमवयवि द्रव्यं संभवति, गुणावयवव्यतिरिक्तस्य तस्याऽनुपलम्भात् न हि शुक्ला-
१५ दिगुणेभ्यः तन्त्वाद्यवयवेभ्यश्च अर्थान्तरभूतं पटादि द्रव्यं चक्षुरादिज्ञानेऽवभासते। न च अवयविनो द्व्यणुकादेरनुपलम्भे परमाणूनां विविक्तस्वरूपाणामुपलम्भाऽविषयत्वात् प्रतिभासाऽभावप्रसक्तेः आश्रयाऽसिद्धतया अवयव्यादिनिषेधकप्रसङ्गसाधनप्रयोगानुपपत्तिः इति वक्तव्यम्, परमाणूनामेव विशिष्टाकारतयोत्पन्नानां प्रतिभासविषयतया आश्रयासिद्धताद्यनुपपत्तेर्न प्रयोगानुपपत्तिः। एवं च यद् उपलब्धिलक्षणप्राप्तं सद् यत्र नोपलभ्यते तत् तत्र नास्ति, यथा-क्वचित् प्रदेशविशेषे घटादिरनु-
२० पलम्भविषयः, गुणाऽवयवार्थान्तरभूतो गुण्यवयवी च दृश्यत्वेनाऽभिमतः नोपलभ्यते च तत्रैव देशे इति स्वभावानुपलब्धिः। न च हेतोर्विशेषणमसिद्धम्, "महति अनेकद्रव्यवत्त्वात् रूपाच्चोपलब्धिः" [वैशेषिकद० ४-१-६] इति वचनात् तयोर्दृश्यत्वेनाऽभ्युपगमात्।

ननुं गुणव्यतिरिक्तो गुणी उपलभ्यत एव तद्रूपादिगुणाग्रहणेऽपि तस्य ग्रहणात्। तथाहि—मन्दमन्दप्रकाशे तद्गतसितादिरूपानुपलम्भेऽपि उपलभ्यते बलाकादिः, स्वगतशुक्लगुणाग्रहणेऽपि च
२५ सन्निहितोपधानावस्थायां गृह्यते स्फटिकोपलः, तथाऽऽप्रपदीनकञ्चुकावच्छन्नशरीरः पुमांस्तद्गतश्या-

---

१ "न च सकृदेव स्थूलानां तनुभवनादीनामुदयोऽस्ति क्रमेण तन्वादीनामुत्पत्तिदर्शनात् तस्माद् विपर्ययः"—तत्त्वसं॰ पञ्जि॰ पृ॰ १८७ पं॰ १।

२ तन्तुक-भां॰ मां॰। ३-नुकार-भां॰ मां॰ विना।

४ "अविद्धकर्णस्त्वणूनां नित्यत्वप्रसाधनाय प्रमाणमाह—परमाणूनामुत्पादकाभिमतं सद्धर्मोपगतं न भवति सत्त्वप्रतिपादकप्रमाणाविषयत्वात् खरविषाणवदिति"—तत्त्वसं॰ पञ्जि॰ पृ॰ १८७ पं॰ ४।

५ "सद्धर्मोपगतं नो चेदणूत्पादकमिष्यते। विद्यमानोपलम्भार्थप्रमाणाविषयत्वतः" ॥
—तत्त्वसं॰ का॰ ५५३ पृ॰ १८७।

६ "नासिद्धेर्दृश्यते येन कुविन्दाद्यणुकारणम्। परमाण्वात्मका एव येन सर्वे पटादयः" ॥
—तत्त्वसं॰ का॰ ५५४ पृ॰ १८७।

७ "सद्ग्राहकप्रमाभावान्न वा सत्ता प्रसिध्यति। प्रमाणविनिवृत्तौ हि नार्थाभावेऽस्ति निश्चयः" ॥
—तत्त्वसं॰ का॰ ५५५ पृ॰ १८७।

८ "तदारब्धस्त्ववयवी गुणावयवभेदवान्। नैवोपलभ्यते तेन न सिध्यत्यप्रमाणकः" ॥
—तत्त्वसं॰ का॰ ५५६ पृ॰ १८७।

९ "नन्वित्यादिना उद्द्योतकर-भाविविक्तादयो हेतोरसिद्धतामुद्भावयन्ति—
ननूपधानसंपर्के दृश्यते स्फटिकोपलः। तद्रूपाग्रहणेऽप्येवं बलाकादिश्च दृश्यते ॥
कञ्चुकान्तरिते पुंसि तद्रूपाद्यगतावपि। पुरुषप्रत्ययो दृष्टो रक्ते वाससि वस्त्रधीः" ॥
—तत्त्वसं॰ का॰ ५५७-५५८ पृ॰ १८८।

मादिरूपाप्रतिभासेऽपि 'पुमान्' इति प्रत्ययोत्पत्तेः प्रतिभात्येव, कुङ्कुमादिरक्तं च वस्त्रं तद्रूपस्य संसर्गिरूपेणाऽभिभूतस्य अप्रकाशेऽपि प्रकाशत एव 'वस्त्रम्' इति प्रत्ययोत्पत्तेः अध्यक्षत एव गुण-गुणिनोर्भेदः सिद्धः। तथा, अनुमानतोऽपि तयोर्भेदः। तथाहि—यद् यद्व्यवच्छेद्यत्वेन प्रतीयते तत् ततो भिन्नम्, यथा देवदत्ताद् अश्वः, गुणिव्यवच्छेद्यत्वेन प्रतीयते च नीलोत्पलस्य रूपादय इति। तथा, पृथिव्यप्-तेजो-वायवो द्रव्याणि रूप-रस-गन्ध-स्पर्शेभ्यो भिन्नानि, एकवचन-बहुवचनविषयत्वात्, ५ यथा 'चन्द्रः' 'नक्षत्राणि' इति, तथा च 'पृथिवी' इति एकवचनम् 'रूप-रस-गन्ध-स्पर्शाः' बहुवचनमुपलभ्यते इति तयोर्भेदः। अवयवाऽवयविनोरप्यनुमानतः सिद्धो भेदः। तथाहि—विवादाधिकरणेभ्यस्तन्तुभ्यो भिन्नः पटः भिन्नकर्तृकत्वात् घटादिवत्, भिन्नशक्तिकत्वाद् वा विषाऽगदवत्, पूर्वोत्तरकालभावित्वाद् वा पितापुत्रवत्, विभिन्नपरिमाणत्वाद् वा कुवल-बिल्ववत् इति। विरुद्धधर्माध्यासनिबन्धनो ह्यन्यत्रापि भावानां भेदः; स च अत्राप्यस्ति इति कथं न भेदः? यदि चावयवी १० अवयवेभ्यो भिन्नो न भवेत् स्थूलप्रतिभासो न स्यात्, परमाणूनां सूक्ष्मत्वात्। न च अन्यादृग्भूतः प्रतिभासः अन्यादृगर्थव्यवस्थापकः अतिप्रसङ्गात्। न च स्थूलाभावे 'परमाणुः' इति व्यपदेशोऽपि संभवी, स्थूलापेक्षित्वाद् अणुत्वस्य" [ ] इति उद्योतकरादयः।

अत्र प्रतिविधीयते—यदुक्तम् 'स्वगतगुणाऽनुपलम्भेऽपि बलाका-स्फटिकादय उपलभ्यन्ते' इति, तदसंगतम्; तज्ज्ञानस्य अयथार्थत्वेन भ्रान्ततया निर्विषयत्वात्। तथाहि—बलाकादयः शुक्लाः १५ सन्तः श्यामादिरूपतया उपलभ्यन्ते, न च तेषां तद्रूपं तात्त्विकमस्ति, 'तद्रूपाग्रहणेऽपि तेषां ग्रहणम्' इत्यभ्युपगमक्षतिप्रसक्तेः। न च तदा श्यामादिरूपाद् व्यतिरिक्तोऽपरः स्फटिकादिस्वभाव उपलभ्यते, श्यामादिरूपस्यैवोपलम्भात्। न च अतद्रूपा अपि बलाकादयः श्यामादिरूपेणोपलभ्यन्ते, यत आकारवशेन प्रतिनियतार्थता ज्ञानस्य व्यवस्थाप्यते, अन्याकारस्यापि तस्य अन्यार्थतायां रूपज्ञानस्यापि

---

१ पुमानिति तत्प्र-भां० मां०। "तथाऽऽप्रपदीनकञ्चुकावच्छन्नशरीरे पुंसि तदा श्यामादिरूपाग्रहणेऽपि पुमान् पुमान् इति प्रत्ययः प्रसूयत एव"—तत्त्वसं० पञ्जि० पृ० १८८ पं० १८।

२ "रूपादीन्दीवरादिभ्य एकान्तेन विभिद्यते। तेन तस्य व्यवच्छेदाच्चैत्रादेश्च तुरङ्गमः॥
क्षित्यादिरूपगन्धादेरत्यन्तं वा विभिद्यते। एकानेकवचोभेदाच्चन्द्र-नक्षत्रभेदवत्"॥
—तत्त्वसं० का० ५५९-५६० पृ० १८८।

३-वच्छेदकत्वेन वा० बा० भां० मां०।
"इन्दीवरादिभ्यो गुणो भिन्न इन्दीवरस्य रूपादय इत्येवं तेन इन्दीवरादिना तस्य रूपादेर्व्यवच्छेदात् यथा चैत्रस्य तुरङ्गम इति चैत्रेण स्वाम्यन्तरेभ्यो व्यवच्छिद्यमानस्तुरङ्गमस्ततो भिद्यते"—तत्त्वसं० पञ्जि० पृ० १८८ पं० २७।

४-वच्छेदकत्वेन वा० बा० भां० मां०। ५-यन्ते च वा० बा० भां० मां०।

६ "विभिन्नकर्तृशक्त्यादेर्भिन्नौ तन्तुपटौ तथा। विरुद्धधर्मयोगेन स्तम्भ-कुम्भादिभेदवत्॥"
—तत्त्वसं० का० ५६१ पृ० १८९।

७ "स्थूलार्थासंभवे तु स्यान्नैव वृक्षादिदर्शनम्। अतीन्द्रियतयाऽणूनां न चाणुवचनं भवेत्॥
स्थूलवस्तुव्यपेक्षो हि सुसूक्ष्मोऽर्थस्तथोच्यते। स्थूलैकवस्त्वभावे तु किमपेक्षाऽस्य सूक्ष्मता"॥
—तत्त्वसं० का० ५६२-५६३ पृ० १८९।

८ गोतम-वात्स्यायन-उद्योतकर-श्रीधर-वाचस्पतिमिश्र-जयन्तभट्टैः अवयवादवयविनः पृथग्भावसिद्धिः सविस्तरं साधिता। तद्यथा-२-१ ३३-३६ न्यायद०। २-१-३३-३६ न्यायद० वात्स्याभा० पृ० १३३-१४०। न्यायवा० पृ० २१६-२५१। प्रशस्त० कं० पृ० ४१ पं० १२-पृ० ८३। न्यायवा० ता० टी० पृ० ३८८ पं० २-पृ० ४०२ पं० ६। न्यायमञ्ज० आ० ९ पृ० ५४९ पं० ३-पृ० ५५१ पं० २१।

९ पृ० ६९८ पं० २३।

१० "ननु रक्तादिरूपेण गृह्यन्ते स्फटिकादयः। न च तद्रूपता तेषां स्वपक्षक्षयसंगतेः"॥
—तत्त्वसं० का० ५६४ पृ० १८९।

११ "तद्रूपव्यतिरिक्तश्च नापरात्मोपलभ्यते। न चान्याकारधीवेद्या युक्तास्तेऽतिप्रसङ्गतः॥
—तत्त्वसं० का० ५६५ पृ० १९०।

रसविषयताप्रसक्तेः अविशेषात्। न च अन्याकारस्य अन्यविषयव्यवस्थापकत्वेऽपि तस्य परस्येष्टसिद्धिः, यतः शुक्लादय एव श्यामादिरूपेण प्रतिभान्ति तज्ज्ञानस्य भ्रान्तत्वात् न पुनस्तद्व्यतिरिक्तस्य गुणिनस्ततः सिद्धिर्भवेत्। यच्च[1] 'कञ्चुकावच्छन्ने पुंसि 'पुमान्' इति ज्ञानमध्यक्षम् अवयविव्यवस्थापकम्' उक्तम्[2], तद् अध्यक्षमेव न भवति; शब्दानुविद्धत्वात् अस्पष्टाकारत्वाच्च अपि तु रूपादिसंहतिमात्र-

५ लक्षणपुरुषविषयमनुमानमेतत् इति नातोऽवयविसिद्धिः। तथाहि—रूपादि[3]प्रचयात्मकपुरुषहेतुकः कञ्चुकसंनिवेश उपलभ्यमानः स्वकारणमनुमापयति धूम इवाग्निम्। यच्च 'कुङ्कुमादिरक्ते वस्त्रे तद्रूपाप्रतिपत्तावपि 'वस्त्रम्' इति ज्ञानम्' तदपि प्राक्तन[4]शुक्लरूपविनाशे सामग्र्यन्तरोपजातरूपान्तरस्य अध्यक्षेण ग्रहणे सति उत्तरकालं तत्पृष्ठभाविसमयवशात् 'वस्त्रम्' इति समुदायविषयं सांवृतं परमार्थतो निर्विषयमेव प्रत्यवमर्शज्ञानम् इत्यसिद्धमस्य प्रत्यक्षत्वम्। न चैतद् अनुमानम् पूर्वाध्यक्षगृहीतवि-

१० षयत्वात् अलि[5](लै)ङ्गिकत्वाच्च। तन्नात्र अभिभूतं किञ्चिद् रूपं विद्यते। न चाभिभूतवस्त्ररूपस्य तदवस्थायामभावे धौतवस्त्रावस्थायां पुनः शुक्लरूपानुपलब्धिः स्यादिति वक्तव्यम्, यतः अग्न्यादिसामग्रीप्रादुर्भूतभास्वररूपस्य लोहादेः पुनः श्यामादिरूपान्तरोत्पत्तिवत् तत्रापि सामग्र्यन्तरात् शुक्लरूपोत्पत्तेरविरोधात्। न च 'प्राक्तनमेव[6] रूपमभिभूतत्वात् तदानुपलब्धम् पश्चाद् अभिभवाभावाद् उपलभ्यते' इत्यस्य प्रतिषेधेन 'रूपान्तरमेव प्राक्तनरूपविनाशेनोपजातमत्रोपलभ्यते' इति भवतोऽपि

१५ किं प्रमाणमिति वक्तव्यम्, अनुमानस्य सद्भावात्। तथाहि—यद् अपरित्यक्ताऽनभिभूतस्वभावं तस्य न परेणाऽभिभवः, यथा पूर्वावस्थायां तस्यैव अपरित्यक्ताऽनभिभूतस्वभावं चाभिभवावस्थायां रूपमिति व्यापकविरुद्धोपलब्धिः। परित्यक्ताऽनभिभूतस्वभावत्वाभ्युपगमेऽपि सिद्धमस्याऽन्यत्वम् स्वभावभेदस्य भावभेदलक्षणत्वात् अन्यथाऽतिप्रसङ्गात्।

न[10] च स्वतन्त्रेच्छामात्रभाविनः षष्ठीवचनभेदादेर्बाह्यवस्तुगतभेदाऽव्यभिचारित्वम् येन ततो

२० गुण-गुणिनोर्भेदसिद्धिः स्यात्। तेन 'यद् यद्व्यवच्छिन्नम्' इत्यादिप्रयोगानुपपत्तिः[12]। यदि तु वस्तुगतभेदमन्तरेण षष्ठ्यादिवृत्तिर्न भवेत् 'स्वस्य भावः' 'षण्णां पदार्थानामस्तित्वम्', 'दाराः' 'सिकताः' इत्यादौ षष्ठ्यादेर्वृत्तिर्न स्यात् भावादेरत्र व्यतिरिक्तस्य तन्निबन्धनस्याभावात्। अथ[13] सदुपलम्भकप्रमाणविषयत्वं धर्मान्तरं षण्णामस्तित्वमिष्यत इति न हेतोर्व्यभिचारः, नः सप्तमपदार्थप्रसक्तेः षट्पदा-

---

१ "शुक्लादयस्तथा वेद्या इत्येवं चापि संभवेत्। तस्माद् भ्रान्तमिदं ज्ञानं कम्बुपीनादिबुद्धिवत्" ॥
—तत्त्वसं० का० ५६६ पृ० १९०।

२ पृ० ६५८ पं० २५।

३ "कञ्चुकान्तर्गते पुंसि न ज्ञानं त्वानुमानिकम्। तद्धेतुसंनिवेशस्य कञ्चुकस्योपलम्भनात्" ॥
—तत्त्वसं० का० ५६७ पृ० १९०।

४ "कषायकुङ्कुमादिभ्यो वस्त्रे रूपान्तरोदयः। पूर्वरूपविनाशे हि वाससः क्षणिकत्वतः" ॥
—तत्त्वसं० का० ५६८ पृ० १९१।

५ "नाप्येतदनुमानं पूर्वप्रत्यक्षगृहीतविषयत्वादलैङ्गिकत्वाच"—तत्त्वसं० पञ्जि० पृ० १९१ पं० १०।

६ "पुनर्जलादिसापेक्षात् तस्मादेवोपजायते। रूपाद् रूपान्तरं शुक्लं लोहादेः श्यामतादिवत्" ॥
—तत्त्वसं० का० ५६९ पृ० १९१।

७ "तादवस्थ्ये तु रूपस्य नान्येनाभिभवो भवेत्। प्राक्तनानभिभूतस्य स्वरूपस्यानुवर्तनात्" ॥
—तत्त्वसं० का० ५७० पृ० १९१।

८–**श्चादनभिभवादुप**-भां० मां०। "स्यादेतत् कथमिदमवगम्यते रूपान्तरमेवोपजायते न पुनः प्राक्तनं रूपमभिभूतत्वात् प्रागनुपलब्धं सत् पश्चादभिभवाभावादुपलभ्यत इत्याह"—तत्त्वसं० पञ्जि० पृ० १९१ पं० १८।

९–**स्थायास्त**-वृ०। "यथा तस्यैव प्राक्तनावस्थायाम्"—तत्त्वसं० पञ्जि० पृ० १९१ पं० २२।

१० "षष्ठीवचनभेदादि विवक्षामात्रसंभवि। ततो न युक्ता वस्तूनां तत्स्वरूपव्यवस्थितिः ॥
तथाहि भिन्नं नैवान्यैः षण्णामस्तित्वमिष्यते। तेषां वर्गश्च नैवैकः कश्चिदर्थोऽभ्युपेयते" ॥
तत्त्वसं० का० ५७१–५७२ पृ० १९१–१९२।

११ पृ० ६५९ पं० ५। १२ पृ० ६५९ पं० ३।

१३ "संज्ञापकप्रमाणस्य विषये तत्त्वमिष्यते। षण्णामस्तित्वमिति चेत् षड्भ्योऽन्यस्तैः प्रसज्यते" ॥
—तत्त्वसं० का० ५७३ पृ० १९२।

र्थाभ्युपगमो[2] हीयेत । अथ षट्पदार्थव्यतिरिक्तानामपि धर्माणामभ्युपगमान्नायं दोषः । तथा च पदार्थप्रवेशके ग्रन्थे—"एवं[3] धर्मैर्विना धर्मिणामुद्देशः कृतः" [प्रशस्तपादभा० पृ० २६ पं० १] इति, असदेतत्; तैस्तेषां[4] संबन्धानुपपत्तेः तमन्तरेण च धर्म-धर्मिभावायोगात् अन्यथाऽतिप्रसङ्गात् । न च संयोगलक्षणोऽत्र संबन्धः, संयोगस्य गुणत्वेन द्रव्येष्वेव भावात् । नापि समवायस्वरूपः, सत्तावत् तस्य सर्वत्रैकत्वाभ्युपगमात्, समवायेन च सह समवायसंबन्धे द्वितीयसमवायाभ्युपगमः स्यात् तत्र चानवस्था । न च षड्भिः पदार्थैर्धर्माणामुत्पादनात् 'तेषां ते' इति व्यपदेशः, तथाभ्युपगमे बदराद्योऽपि कुण्डादिसंबन्धिनस्तथैव स्युः इति संयोगसमवायाख्यसंबन्धान्तरकल्पनावैयर्थ्यप्रसक्तिः । भवतु[5] वा षण्णामस्तित्वं धर्मान्तरम् तथापि व्यभिचार एव, तदस्तित्वे अपरास्तित्वाद्यभावेऽपि 'तदस्तित्वस्य अस्तित्व-प्रमेयत्व-अभिधेयत्वानि' इति षष्ठ्यादिप्रवृत्तेः । अथ तत्रापि अपरास्तित्वाभ्युपगमस्तदाऽनवस्थाप्रसक्तिः । न चेष्टत्वाद्[6] अदोषः, सर्वेषामपि उत्तरोत्तरधर्माधारत्वाद् धर्मित्वप्रसक्तेः "षडेव[7] धर्मिणः प्रोक्ताः" [ ] इत्येतस्याऽनुपपत्तिः षट्पदार्थव्यतिरिक्तानामन्येषामपि वा धर्मिणामस्तित्वादीनां विशिष्टधर्माधाराणां संभवात् । न च धर्मिरूपा एव ये ते एव षट्केन अवधारिता इति वक्तव्यम्, गुणादीनामनिर्देशप्रसङ्गात् न हि गुणादीनां धर्मिरूपतैव किन्तु द्रव्याश्रितत्वात् धर्मरूपत्वमपि । यस्त्वाह[8]—"सदुपलम्भकप्रमाणगम्यत्वं षण्णामस्तित्वमभिधीयते, तच्च षट्पदार्थविषयं ज्ञानम् तस्मिन् सति 'सत्' इति व्यवहारप्रवृत्तेः । एवं 'ज्ञानजनितं[10] ज्ञानज्ञेयत्वम्' 'अभिधानजनितम् अभिधेयत्वम्' इत्यत्र व्यतिरेकनिबन्धना षष्ठी सिद्धा, न चाऽनवस्था, न च षट्पदार्थव्यतिरिक्तपदार्थान्तरप्रसक्तिः ज्ञानस्य गुणपदार्थेऽन्तर्भावात्" [[9]] सोऽप्ययुक्तवादी; एवमपि अस्तित्वादेः षट्पदार्थाव्यतिरेके व्यभिचारस्य तदवस्थत्वात्, व्यतिरेके सप्तमपदार्थप्रसक्तेर्न्याय-

---

१ "षडेते धर्मिणः प्रोक्ता धर्मास्तेभ्योऽतिरेकिणः । इष्टा एवेति चेत् कोऽयं संबन्धस्तस्य तैर्मतः ॥
द्रव्येषु नियमाद् युक्ता न संयोगो न चापरः । समवायोऽस्ति नान्यश्च संबन्धोऽङ्गीकृतः परैः" ॥
—तत्त्वसं० का० ५७४–५७५ पृ० १९२ ।

२ 'पदार्थधर्मसंग्रह' नामको ग्रन्थः प्रशस्तपादापरनाम्ना प्रशस्तदेवेन रचितो विद्यते । तथाहि—
"प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः । पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः"—प्रशस्त० कं० पृ० १ ।
अस्मिन्नेव ग्रन्थे च 'एवं धर्मैर्विना' इत्यादि उपरि निर्दिष्टं वाक्यं विद्यते । पञ्जिकाकृता कमलशीलेन टीकाकृता चाभयदेवेन स संग्रह एव पदार्थप्रवेशक इति नाम्नाऽत्र निर्दिष्टः प्रतिभाति । स च संग्रहः 'प्रशस्तपादभाष्यम्' इत्यपि प्रख्यातिं गतः ।

३ एव ध–आ० विना । तथाहि पदार्थप्रवेशके ग्रन्थः(न्थे) "एवं धर्मैर्विना धर्मिणामेष निर्देशः कृत इति"
—तत्त्वसं० पञ्जि० पृ० १९२ पं० २६ ।
"तथा च पदार्थप्रवेशकग्रन्थः एवं धर्मैर्विना धर्मिणामेव निर्देशः कृतः"—प्रमेयक० पृ० १५७ द्वि० पं० ८ । "तथा च पदार्थप्रवेशकग्रन्थः–एवं धर्मैर्विना धर्मिणामुद्देशः कृतः"—स्याद्वादर० पृ० ८७८ पं० १० ।

४ "संबन्धानुपपत्तौ च तेषां धर्मो भवेत् कथम् ? । तदुत्पादनमात्राचेदन्येऽपि स्युस्तथाविधाः" ॥
—तत्त्वसं० का० ५७६ पृ० १९३ ।

५ "तस्याप्यस्तित्वमित्येवं वर्तते व्यतिरेकिणी । विभक्तिस्तस्य चान्यस्य भावेऽनिष्टा प्रसज्यते" ॥
—तत्त्वसं० का० ५७७ पृ० १९३ ।

६ "अन्यधर्मसमावेशे प्राप्ता तत्र च धर्मिता । द्रव्यादेरपि धर्मित्वमस्मादेव च संमतम्" ॥
—तत्त्वसं० का० ५७८ पृ० १९३ ।

७ "ततश्च षडेते धर्मिण एव प्रोक्ता इत्येतन्नोपपद्यते"—तत्त्वसं० पञ्जि० पृ० १९३ पं० २२ । पृ० ६६० टि० १३ ।

८ "षण्णामपि पदार्थानामस्तित्वाऽभिधेयत्वज्ञेयत्वानि" इत्यादि—प्रशस्त० कं० पृ० १६ पं० १ ।

९ "अन्यः पुनराह—षण्णामस्तित्वं हि सदुपलम्भकप्रमाणगम्यत्वम् । गम्यत्वं च षट्पदार्थविषयं विज्ञानम् तस्मिन् सति सद्व्यवहारप्रवर्तनात् । तथा ज्ञानजनितं ज्ञेयत्वम् अभिधानजनितमभिधेयत्वमिति । अतो व्यतिरेकनिबन्धना षष्ठी भवत्येव । न चाप्यनवस्था, नापि षट्पदार्थान्तरप्रसङ्ग इति । तस्यापीदं कल्पनामात्रमेव"—तत्त्वसं० पञ्जि० पृ० १९३ पं० २७–पृ० १९४ पं० ३ ।

१० ज्ञानजनितं ज्ञानं ज्ञेयत्वम् पू० ।

प्राप्तत्वात्। किंच, यदि षण्णां पदार्थानामर्थक्रियासमर्थपदार्थस्वरूपं स्वतत्त्वं न स्यात् तदा शशशृङ्गरूपता तेषां भवेत् अर्थक्रियाऽसामर्थ्यात्, ततश्च कथं सदुपलम्भकप्रमाणगम्यता तेषाम् । अथ अर्थक्रियासमर्थं रूपं तेषां विद्यते तदा ते तद्रूपा एव, भेदान्तरप्रतिक्षेपमात्रजिज्ञासायां 'तेषामस्तित्वम्' इत्येवं यदि व्यपदेशं व्यतिरेकविभक्त्या समासादयन्ति तदा न कश्चिद् विरोधः। न हि तदव्यतिरिक्त-
५ मपि स्वरूपं बुद्ध्याऽपकृष्य ततो व्यतिरिक्तमिव अभिधीयमानं विरोधभाग् भवति, इच्छामात्रानुविधायित्वाद् वाच उत्पाद्यकथाश्रयातिसुन्दरपदार्थवचनवत्।

भिन्नकर्तृकत्वाद्यनुमानमपि असंगतम्, यतो यदि अप्राप्तपटव्यपदेशेभ्यस्तन्तुभ्यः प्राक्तनावस्थेभ्यो भेदः पटस्यात्र साध्यते तदा सिद्धसाध्यताप्रसक्तिः सर्वभावानां क्षणिकत्वेन तद्विलक्षणपटाख्यपदार्थानुत्पादेऽपि प्रतिक्षणं भिन्नत्वात्। अथ पटावस्थायां ये तन्तवस्तेभ्यः पटस्य भेदः साध्यस्तदा हेतू-
१० नामसिद्धता न हि तदवस्थाभावितन्तुभ्यः पटस्य भेदाप्रसिद्धौ भिन्नकर्तृकत्वादयो धर्माः सिद्धिमासादयन्ति। न च तत्सिद्धिः इदानीमेव तत्सिद्धये साधनस्योपन्यासात्। न च 'तन्तवः' 'पटः' इति च संज्ञामात्रात् पदार्थानां भेदसिद्धिः, संज्ञान्तरस्य प्रयोजनान्तरवशेनापि संकेतनात्। तथाहि–योषित्कर्तृकास्तन्तवः शीतापनोदाद्यर्थाऽसमर्थाः तन्तुशब्दसमावेशभाजः, कुविन्दकर्तृका विशिष्टावस्थाप्राप्ताः प्रावरणाद्यर्थक्रियासमर्थाः पटव्यपदेशसमावेशिनस्तदर्थक्रियाप्रतिपादनाय व्यवहारि-
१५ भिस्तथा तत्र संकेतकरणात् अन्यथा गौरवाऽशक्ति-वैफल्यदोषप्रसङ्गात्। तथाहि–यदि यावन्तो भावा विवक्षितैककार्यनिर्वर्तनसमर्थास्तेषु तावन्तः शब्दा निवेश्यन्ते तदा गौरवदोषः, न चैषामसाधारणं रूपं निर्देष्टुं शक्यमिति अशक्तिदोषः, उत्प्रेक्षितसामान्याकारेण निर्देशे वरं 'पटः' इत्येकयैव श्रुत्या प्रतिपादनं कृतम् न च किञ्चिन् फलमस्य प्रत्येकं पृथगभिधानप्रयासस्य पश्याम इति वैफल्यदोषः। सामस्त्येन त्वभिधाने सति व्यवहारलाघवादिर्गुण इत्येकार्थक्रियाकारिषु अनेकेषु एकशब्द-
२० संकेत उपपन्नः सकलवस्तुविवक्षायां 'जगत्' 'त्रिभुवन' 'विश्व' आदिशब्दवत्। एवम् एकवचनादिकं सांकेतिकं व्यवहारलाघवार्थमुपादीयमानं न वास्तवं तयोर्भेदं प्रसाधयति। विशिष्टावस्थाप्राप्तानां चाणूनामिन्द्रियग्राह्यत्वाद् अतीन्द्रियत्वमसिद्धमिति न अवयव्यभावे प्रतिभासविरतिप्रसक्तिर्दूषणम् न हि सर्वदैव इन्द्रियातिक्रान्तस्वरूपाः परमाणवः क्षणिकवादिभिरभ्युपगम्यन्ते तेषां सर्वदैक-

१ पृ० ६५९ पं० ७।

२ "प्रथमेभ्यश्च तन्तुभ्यः पटस्य यदि साध्यते। भेदः साधनवैफल्यं दुर्निवारं तदा भवेत्॥
प्राप्तावस्थाविशेषा हि ये जातास्तन्तवोऽपरे। विशिष्टार्थक्रियासक्ताः प्रथमेभ्योऽविलक्षणाः"॥
—तत्त्वसं० का० ५७९–५८० पृ० १९४।

३-ध्यते तत् सि-भां० मां०। "यदि प्रथमावस्थाभाविभ्योऽसमधिगतपटाख्यानेभ्यस्तन्तुभ्यः पटस्य भेदः साध्यते तदा सिद्धं साध्यते"—तत्त्वसं० पञ्जि० पृ० १९४ पं० १४।

४ "एककार्योपयोगित्वज्ञापनाय पृथक्श्रुतौ। गौरवाऽशक्तिवैफल्यदोषत्यागाभिवाञ्छया॥
साकल्येनाभिधानेन व्यवहारस्य लाघवम्। मन्यमानैः कृता येषु वागेका व्यवहर्तृभिः॥
तेभ्यः समानकालस्तु पटो नैव प्रसिध्यति। विभिन्नकर्तृसामर्थ्यपरिमाणादिधर्मवान्"॥
—तत्त्वसं० का० ५८१–५८३ पृ० १९४।

५ "यावता स एवायं तन्तुव्यतिरेकी पटो न सिद्धः तद्भेदस्यैव प्रसाधयितुं प्रस्तुतत्वात्"
—तत्त्वसं० पञ्जि० पृ० १९४ पं० २७।

६ "न च 'पटः' 'तन्तवः' इति संज्ञामात्राद् वस्तूनां भेदः"—तत्त्वसं० पञ्जि० पृ० १९५ पं० १।

७ "तथाहि—तत्र यावन्तः पदार्था विवक्षितैककार्यसाधनयोग्यास्तावन्त एव शब्दाः प्रयोक्तव्या इति गौरवदोषः। न चाप्येषामसाधारणं रूपं शक्यं निर्देष्टुमित्यशक्तिदोषः। उत्प्रेक्षितसामान्याकारेण च निर्देशे वरमेकयैव श्रुत्या प्रतिपादनम् न चास्य पृथक्पृथक्प्रतिपादनप्रयासस्य किंचित् फलमुपलभ्यते इति वैफल्यदोषः"—तत्त्वसं० पञ्जि० पृ० १९५ पं० ७–१०।

८ "सामस्त्येन त्वभिधाने कृते सति व्यवहारलाघवं गुणः"—तत्त्वसं० पञ्जि० पृ० १९५ पं० ११।

९ पृ० ६५९ पं० १२ टि० ७।

१० "अन्योन्याभिसराश्चैवं ये जाताः परमाणवः। नैवातीन्द्रियता तेषामन्यानां(मन्येषां) गोचरत्वतः॥
नीलादिः परमाणूनामाकारः कल्पितो निजः। नीलादिप्रतिभासा च वेद्यते चक्षुरादिधीः"॥
—तत्त्वसं० का० ५८४–५८५ पृ० १९५।

स्वभावताविरहात् । ततः परस्पराविनिर्भोगवर्तिनया सहकारिवशादुत्पन्नाः परमाणव एव[1] अध्यक्ष-विषयतामुपयान्तीत्यभ्युपगन्तव्यम् अन्यथा विजातीयानां द्रव्याऽनारम्भकत्वात् पावक[2]तप्तोपल-हेम-सूतादेरुपलम्भो न स्यात् । न च तत्र संयोगस्योपलभ्यता, अदृष्टाश्रयस्य तस्यापि उपलम्भाविषय-त्वात् वाय्वाकाशसंयोगवत् । ननु पौर्वापर्यादिदिग्भेदेन परमाणवो व्यवस्थिताः न च ते तद्रूपेण उपलभ्यन्त इति कथमध्यक्षतैषाम् ? नः सर्वाकारानुभवेऽपि यत्रै[3]वांशे अभ्यासादिकारणसद्भावान्नि- ५ श्चयस्तत्रैवाध्यक्षविषयताव्यवस्थापनात् अन्यत्र तु गृहीतस्यापि व्यवहारायोग्यत्वेन निश्चयानुत्पत्तेर-गृहीतकल्पत्वात् । ननु[4] अवयव्यभावे बहुषु परमाणुषु अक्षव्यापारेण 'एकः पटः' इति कथं प्रत्ययः ? न; अनेकसूक्ष्मतरपदार्थसंवेदनतः 'एकः' इति विभ्रमोत्पत्तेः प्रदीपादौ नैरन्तर्योत्पन्नसदृशापरापर-ज्वालादिपदार्थसंवेदनेऽपि एकत्वविभ्रमवत् । ननु[5] भेदेन अनुपलक्ष्यमाणाः परमाणवः कथमध्यक्षाः ? न; विवेकेन अनवधार्यमाणस्य अनध्यक्षत्वे प्रदीपादौ पूर्वापरविभागेन अनुपलक्ष्यमाणे अनध्यक्षता- १० प्रसक्तेः अवयवविवेकेन वाऽगृह्यमाणोऽपि अवयवी कथं तथाप्रत्यक्षत्वेनेष्टः ?

यदि[6] च नीलादिनिर्भासे नाऽणवः प्रतिभान्ति तदा बाह्यार्थवादिना नीलादिज्ञानं निर्विषयं वाऽभ्युपगम्येत, सविषयं वा ? न तावन्निर्विषयम्, विज्ञानमात्रताप्रसक्तेः । सविषयत्वेऽपि नात्म-मात्रविषयम्, विज्ञानवादप्रसक्तेरेव । बाह्यविषयत्वेऽपि नीलादिर्विषयः स्थूलरूपतया प्रतिभासमान एकः, अनेको वा ? एकोऽपि अवयवैरारब्धः, अनारब्धो वा ? तत्र न तावत् अयमुभयरूपोऽपि एको १५ युक्तः, स्थूलस्य एकस्वभावत्वविरोधात् । तथाहि[7]-यदि स्थूलमेकं स्यात् तदा एकदेशरागे सर्वस्य रागः प्रसज्येत, एकदेशाऽऽवरणे च सर्वस्य आवरणं भवेत् रक्ताऽरक्तयोः आवृताऽनावृतयोश्च भवदभ्युपगमेन एकत्वात् । न च परस्परविरुद्धधर्माध्यासेऽपि एकत्वं युक्तम् अतिप्रसङ्गात्, तथाऽ-भ्युपगमे वा विश्वमेकं द्रव्यं स्यात् ततश्च सहोत्पत्त्यादिप्रसङ्गः । न चैकदेशावरणे सर्वमावृतमुप-लभ्यते इत्यध्यक्षविरोधः । अनुमानविरोधोऽपि । तथाहि-यद् विरुद्धधर्माध्यासितं न तद् एकम्, २० यथा अश्व-महिषादिकमुपलभ्यमानाऽनुपलभ्यमानस्वरूपम्, आवृताऽनावृतस्वरूपेण च विरुद्ध-धर्माध्यासितं स्थूलमिति व्यापकविरुद्धोपलब्धिः । सर्वस्य एकत्वप्रसङ्गो विपर्यये बाधकं प्रमाणम् । "एकस्मिन् भेदाभावात् सर्वशब्दप्रयोगानुपपत्तिः" [ ] इति उद्द्यो-

---

१ "पौर्वापर्यविवेकेन यद्यप्येषामलक्षणम् । तथाऽप्यध्यक्षताऽबाधा पानकादाविव स्थिता" ॥

—तत्त्वसं० का० ५८६ पृ० १९५ ।

२ "तथाहि—पानके तप्तोपले सूतहेमादौ च मिश्रे परमाणव एव तथोपलभ्यन्ते"—तत्त्वसं० पञ्जि० पृ० १९६ पं० २ ।

३ "सर्वेषामेव वस्तूनां सर्वव्यावृत्तिरूपिणाम् । दृष्टावपि तथैवेति न सर्वाकारनिश्चयः ॥

अकल्पनाक्षगम्येऽपि निरंशेऽर्थस्य लक्षणे । यद्भेदव्यवसायेऽस्ति कारणं स प्रतीयते" ॥

—तत्त्वसं० का० ५८७-५८८ पृ० १९६ ।

४ "समानज्वालासंभूतेर्यथा दीपेन विभ्रमः । नैरन्तर्यस्थितानेकसूक्ष्मवित्तौ तथैकधा" ॥

—तत्त्वसं० का० ५८९ पृ० १९७ ।

५ "विवेकालक्षणात् तेषां नो चेत् प्रत्यक्षतेष्यते । दीपादौ सा कथं दृष्टा किं वेष्टोऽवयवी तथा" ॥

—तत्त्वसं० का० ५९० पृ० १९७ ।

६ "एतावत्तु भवेदत्र कथमेषां न निश्चये । नीलादिपरमाणूनामाकार इति गम्यते ॥

तदप्यकारणं यस्मान्नैव ज्ञानमगोचरम् । न चैकस्थूलविषयं स्थौल्यैकत्वविरोधतः" ॥

—तत्त्वसं० का० ५९१-५९२ पृ० १९७ ।

७ "स्थूलस्यैकस्वभावत्वे मक्षिकापदमात्रतः । पिधाने पिहितं सर्वमासज्येताऽविभागतः ॥

रक्ते च भाग एकस्मिन् सर्वं रज्येत रक्तवत् । विरुद्धधर्मभावे वा नानात्वमनुपज्यते" ॥

—तत्त्वसं० का० ५९३-५९४ पृ० १९८ ।

तेकरः। तथाहि-सर्वशब्दोऽनेकार्थविषयः, न च अवयवी नानात्मा[3] इति कथं तत्र सर्वशब्दप्रयोगः येन एकदेशावरणे सर्वावरणप्रसक्तिरित्युच्येत? असदेतत्; यतो य एव वस्त्रादयो भावा लोके प्रसिद्धास्त एव भवद्भिरपि अवयवित्वेन कल्पिताः, [4]तत्र च 'सर्वं वस्त्रं रक्तम्' इत्यादिको लोके सर्वैकशब्दप्रयोगः प्रसिद्ध एवेति कथं तत्र तत्प्रयोगानुपपत्तिः? यदर्थविवक्षायां रक्तादिशब्दप्रयोगो लोके तस्यामेव
५ अस्माभिरपि तत्प्रतीतिमनुसृत्य भवतां विरोधप्रतिपादनाय 'सर्व'आदिशब्दप्रयोगः क्रियते इति कथमस्यानुपपत्तिः? किञ्च[5], स्थूलस्य एकत्वमभ्युपगच्छतो भवत एव अयं दोषः नास्माकम् तदनभ्युपगमात्। न च पटकारणेषु तन्तुषु उपचारतः पटाभिधानप्रवृत्तेः 'सर्व'आदिशब्दप्रयोगानुपपत्तिर्दोषः परस्यापि न भविष्यतीति वक्तव्यम्, [6]एवं सर्वदैव बहुवचनप्रयोगापत्तेः। न हि भवदभ्युपगमेन बहुषु एकवचनमुपपत्तिमत्। न च अवयविगतां संख्यामादाय पटादिशब्दस्तदवयवेषु
१० तन्त्वादिषु अपरित्यक्तात्माभिधेयगतलिङ्गादिर्वर्तत इति वाच्यम्, अस्य व्यपदेशस्य गौणत्वे स्खलद्वृत्तितयाऽगौणाद् भेदप्रसक्तेः न चासावस्ति। तथाहि—'रक्तं सर्वं वस्त्रम्' इत्यत्र नैवं बुद्धिः-'न वस्त्रं रक्तम्, किन्तु तत्कारणभूतास्तन्तवः' इति। किञ्च, भेदेनोपलब्धयोर्गो-वाहीकयोर्मुख्योपचरितशब्दविषयता संभवति। न च अवयवाऽवयविनोः कदाचिद् भेदेनोपलब्धिरिति नात्रोपचरितशब्दप्रयोगो युक्तः।
१५ शंकरस्वामी[7] अत्राह—"'वस्त्रस्य रागः' कुङ्कुमादिद्रव्येण संयोग उच्यते, स च अव्याप्यवृत्तिः तत एकत्र रक्ते न सर्वस्य रागः न च शरीरादेरेकदेशावरणे सर्वस्य आवरणं युक्तम्" [ ] इति, असदेतत्; यतो[8] यदि [9]पटादिर्निरंशमेकं द्रव्यम् तदा किं कुङ्कुमादिना तत्र अव्याप्तम् येन

---

१ एतदुद्द्योतकरमतं वार्तिके शब्दान्तरेणेत्थं प्रतिभाति—"यत् पुनरेतद् अवयवी अवयवेषु वर्तमान एकदेशेन वर्तते कृत्स्नो वा वर्तत इति? तत्र एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ११ ॥

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः। कृत्स्नमिति च एकदेश इति च भेदविषयावेतौ शब्दौ, न चैतावेकस्मिन्नुपपन्नौ—अनेकस्याशेषता कृत्स्नशब्दस्यार्थः अशेषस्य कस्यचिदभिधानमेकदेशशब्दस्य। न चैतद् इहोपपद्यते इति। तस्मान्नावयविनि कृत्स्नशब्दो नाप्येकदेशशब्द इति"—४-२-११ न्यायवा० पृ० ५०५ पं० ४-१२।

"एकस्मिन् कृत्स्नैकदेशशब्दासंभवादप्रश्नः" इत्याद्यपि अवयवसाधनवार्तिकमत्रावगन्तव्यम्—न्यायवा० पृ० २१४ पं० १३—।

"उद्द्योतकरस्त्वाह—एकस्मिन् भेदाभावात् सर्वशब्दप्रयोगानुपपत्तिरिति"—तत्त्वसं० पञ्जि० पृ० १९८ पं० १४।

२ "ननु चैकस्वभावत्वात् सर्वशब्दोऽत्र किंकृतः। स ह्यनेकार्थविषयो नानात्मावयवी न च" ॥
—तत्त्वसं० का० ५९५ पृ० १९८।

३ "ननु ये लोकतः सिद्धा वासो-देह-नगादयः। त एवावयवित्वेन भवद्भिरुपवर्णिताः ॥
रक्तं वासोऽखिलं सर्वं निःशेषं निखिलं तथा। तत्रेच्छामात्रसंभूतमिति सर्वे प्रयुञ्जते ॥
तथाविधविवक्षायामस्माभिरपि वर्ण्यते। सर्वं स्याद् रक्तमित्यादि निर्निबन्धा हि वाचकाः" ॥
—तत्त्वसं० का० ५९६-५९८ पृ० १९८।

४ "तत्र च लोके सर्वैकदेशशब्दयोः प्रवृत्तिः प्रसिद्धैव। तथा च वक्तारो भवन्ति—सर्वं वासो रक्तमित्यादेः"
—तत्त्वसं० पञ्जि० पृ० १९९ पं० १।

५ "अपि च भवत एवायं स्थूलस्यैकत्वमभ्युपगच्छतो दोषः नास्माकम् न हि अस्माभिः स्थूलस्यैकत्वमिष्यते"
—तत्त्वसं० पञ्जि० पृ० १९९ पं० ४-५।

६ "भाक्तं तदभिधानं चेद् वचोभेदः प्रसज्यते। न च बुद्धेर्विभेदोस्ति गौण-मुख्यतयेष्टयोः" ॥
—तत्त्वसं० का० ५९९– पृ० १९९।

७ "ननु चेत्यादिना शंकरस्वामिनः परिहारमाशङ्कते—
"ननु चाव्याप्यवृत्तित्वात् संयोगस्य न रक्तता। सर्वस्यासज्यते नापि सर्वमावृतमीक्ष्यते" ॥
—तत्त्वसं० का० ६०० पृ० १९९।

८ "ननु चानंशके द्रव्ये किमव्याप्तं व्यवस्थितम्। स्वरूपं तदवस्थाने भेदः सिद्धोऽत एव वा ॥
बहुदेशस्थितिस्तेन नैवैकस्मिन् कृतास्पदा। ततः सिद्धा पटादीनामणुभ्योऽनेकरूपता" ॥
—तत्त्वसं० का० ६०१-२ पृ० १९९-२००।

९ पटादि नि-वा० बा०। "यदि हि पटादिरेकमेव द्रव्यम्"—तत्त्वसं० पञ्जि० पृ० २०० पं० ३।

संयोगोऽव्याप्यवृत्तिर्भवेत्? अथ अव्याप्तमपि किञ्चिद् रूपं तत्रावस्थितं तदा तयोर्भेदः व्याप्ताऽव्याप्तयोर्विरुद्धधर्माध्यासत एकस्वभावत्वायोगात् । न च पृथुतरदेशावस्थानमेकस्य युक्तम् निरंशत्वात्, अन्यथा सर्वत्र स्थूलसूक्ष्मादिभेदो न स्यात् एकत्वेन अविशेषात् । न चाल्पबह्वयवारम्भादिकृतोऽसौ विशेषोऽवयवानाम् तथाभेदेऽपि अवयविनां निरंशतया परस्परं विशेषाभावात्, अवयवाल्पबहुत्वग्रहणकृते च स्थूलादिव्यवहारे अवयवमात्रमेव अभ्युपगतं दृश्यत्वेन स्यात्[1] ५ स्थूलादिव्यतिरेकेण अन्यस्य अदृश्यमानत्वात्। किञ्च, अवयवाल्पबहुत्वकृते तथाभेदे अवयवा एव तथा तथा उत्पद्यमाना अल्पबहुतराः स्थूलसूक्ष्मादिव्यवस्थानिबन्धनं भविष्यन्ति किं तदारब्धावयविकल्पनया तस्य कदाचिदपि अदृष्टसामर्थ्यत्वात्? किञ्च, अव्याप्यवृत्तिः संयोग इति यदि 'सर्वं द्रव्यं न व्याप्नोति' इत्ययमर्थस्तदा द्रव्यस्य 'सर्व'शब्दाविषयत्वाभ्युपगमाद् अयुक्तः । अथ तदेकदेशवृत्तिः, तदसंगतम्; तस्य एकदेशासंभवात्। न च 'तदारम्भके अवयवे वर्तते' इत्यर्थप्रकल्पना, १० अवयवानामेव रक्तत्वात् तदवयविरूपस्य अरक्तत्वप्रसक्तेर्युगपद् रक्ताऽरक्तरूपद्वयोपलब्धिः प्रसज्येत। किञ्च, तदारम्भकोऽपि अवयवो यदि अवयविरूपस्तदा संयोगस्य अव्याप्यवृत्तितया तत्रापि एकदेशवृत्तित्वमिति तुल्यः पर्यनुयोगः । अथ अणुरूपस्तदा अणूनामतीन्द्रियत्वात् तदाश्रितः संयोगोऽप्यतीन्द्रिय एवेति न रक्तोपलम्भो भवेत् । न च यथा अङ्गुलिरूपस्य आश्रयोपलब्धावेवोपलब्धिव्याप्तिस्तथा संयोगस्य आश्रयोपलब्धावेवोपलब्धिर्न विद्यते इति अव्याप्यवृत्तिरसावुच्यते इति १५ वक्तव्यम्, संयोगस्यापि आश्रयानुपलब्धावनुपलब्धेः अन्यथा घट-पिशाचसंयोगस्यापि उपलब्धिः स्यात्। एवं च अङ्गुलिरूपवद् रागस्यापि अदृष्टाश्रयस्य अनुपलब्धेराश्रयोपलब्धावेवोपलब्धिरिति व्याप्यवृत्तिरसावपि स्यात्। अथ अरक्तेष्ववयवेषु समवेतस्य द्रव्यस्योपलब्धावपि न रागस्य संयोगस्वभावस्योपलब्धिरित्याश्रयोपलब्धौ नास्योपलब्धिरित्यव्याप्यवृत्तित्वम्, न; रक्तारक्तावयवसमवेतस्य अवयविन एकत्वात् रक्तेऽप्यवयवे रागस्य तद्द्वारेण अनुपलब्धिप्रसङ्गात् आश्रयोपलम्भेऽपि तस्या- २० ऽनुपलम्भात्। न चान्यः संयोगग्रहणोपायः आश्रयोपलम्भात् समस्ति ततो नैकरूपो विषयो युक्तः। अनेकरूपोऽपि अणुसंचयात्मक एव सामर्थ्यात् सिद्धः विद्यमानावयवस्य एकत्वायोगात् । ततः पटादीनां परमाणुरूपत्वाद् नीलादिः परमाणूनामाकारः सिद्धः स्थूलरूपस्यैकस्य अपरस्य विषयस्यासंभवात्। न च 'परमाणुः' इति व्यपदेशः स्थूलस्यैकस्याऽभावे अयुक्तः, कल्पितस्थूलापेक्षयाऽपि तद्व्यपदेशस्य संभवात्। ननो न स्थूलमेकं द्रव्यमवयवाऽनारब्धमपि घटते तदारब्धं तु सुतराम- २५ संभवि। तथा च-यद् अनेकम् न तद् एकद्रव्यानुगतम्, यथा घट-कुड्यादयः, अनेके च तन्त्वादयः इति व्यापकविरुद्धोपलब्धिः। यद्वा-यद् एकम् न तद् अनेकद्रव्याश्रितम्, यथा एकपरमाणुः, एकं च अवयविसंज्ञितं द्रव्यमिति व्यापकविरुद्धोपलब्धिप्रयोगः प्रसङ्गसाधनरूपः। प्रयोगद्वयेऽपि अवयविनोऽवयवेषु वृत्त्यनुपपत्तिर्विपर्यये बाधकं प्रमाणम् । सा च एकावयवक्रोडीकृतेन वा स्वभावेन

---

१ "तेषामवयवाल्पबहुत्वग्रहणकृते विशेषेऽवयवमात्रमेवाभ्युपगतं स्यात् तत्रैव स्थूलादिव्यवहारात् ततश्चाणुमात्रमेव दृश्यत्वेनाभ्युपेतं स्यात्। स्थूलसूक्ष्मा(क्ष्म?)व्यतिरेकेणान्यस्य(स्या?)दृश्यमानत्वात्"—तत्त्वसं० पञ्जि० पृ० २०० पं० ११–१३।

२-लब्धिव्या-वा० बा० आ०। "स्यान्मतं यथा व्याप्तिरङ्गुलिरूपस्याश्रयोपलब्धावेवोपलब्धिरुच्यते"

—तत्त्वसं० पञ्जि० पृ० २०० पं० १९–२०।

३ पृ० ६५९ पं० १२ टि० ७।

४ "अविज्ञातार्थतत्त्वस्तु पिण्डमेकं च मन्यते। लोकस्तत्कल्पितापेक्षः परमाणुरिहोच्यते ॥
निमित्तनिरपेक्षा वा संज्ञेयं तादृशि स्थिता। सङ्केतान्वयिनी यद्वन्निर्विर्तेऽपीश्वरश्रुतिः" ॥

—तत्त्वसं० का० ६०३–६०४ पृ० २०१।

५ "एकावयव्यनुगता नैव तन्तु-करादयः। अनेकत्वाद् यथा सिद्धाः कट-कुड्य-कुटादयः ॥
यदि वाभिमतं द्रव्यं नानेकावयवाश्रितम्। एकत्वादणुवद् वृत्तेरयुक्तिर्बाधिका प्रमा" ॥

—तत्त्वसं० का० ६०५–६०६ पृ० २०१।

६ "तद्ध्येकवृत्तिभाजैव रूपेणावयवान्तरे। वर्तेत यदि वाऽन्येन न प्रकारान्तरं यतः ॥
तत्र तेनैव नान्यत्र वृत्तिरस्यावकल्पते। तेन क्रोडीकृतत्वेन नान्यथा तत्र वृत्तिमत्" ॥

—तत्त्वसं० का० ६०७–६०८ पृ० २०१–२०२।

अवयवी अवयवान्तरे वर्तते, उत स्वभावान्तरेण प्रकारान्तरासंभवात्? यदि तेनैव इति पक्षः, स न युक्तः; तस्य तेनैव अवयवेन क्रोडीकृतत्वात् अन्यत्र वर्तितुमशक्तेः, शक्तौ वा तत्राऽवयवे तस्य सर्वात्मना वृत्त्यनुपपत्तिः अपरस्वभावाभावान्न तस्य अपरावयववृत्तिस्वभावः, तद्भावे वा एकत्व-हानिप्रसक्तेः। तथाहि–यत् एकक्रोडीकृतम् न तत् तदैव अन्यत्र प्रवर्तते, यथा एकभाजनक्रोडी-५कृतमाम्रादि न तदैव भाजनान्तरमध्यमध्यास्ते, एकावयवक्रोडीकृतं च अवयविस्वरूपम् इति व्यापकविरुद्धोपलब्धिः। एकावयवसंबद्धस्वभावस्य अतद्देशावयवान्तरसंबद्धस्वभावताऽभ्युपगमे तदवयवानामेकदेशताप्रसक्तिर्विपर्यये बाधकं प्रमाणम्। एकदेशतायां च ऐकात्म्यम् अविभक्त-रूपत्वात्, विभक्तरूपावस्थितौ च एकदेशत्वं न स्यात्। अथ स्वभावान्तरेण अवयवान्तरे वृत्तिस्तदा एकोऽनेकवृत्तिर्न स्यात् स्वभावभेदात्मकत्वाद् वस्तुभेदस्य अन्यथा तदयोगात्।

१० "'अवयवी अवयवेषु वर्तते' इति समवायरूपा प्राप्तिरुच्यते" [ ] इति उद्द्योतकराऽभ्युपगमेऽपि 'किमेकावयवसमवेतेनैव स्वभावेन अवयवान्तरेषु वर्तते, अथ अन्येन' इति विचारः समान एवेति कृत्स्नैकदेशशब्दानुच्चारणेऽपि वृत्त्यनुपपत्तिर्युक्ता, तदुच्चारणेऽपि सा युक्तैव। तथाहि–यदि सर्वात्मना प्रत्येकमवयवेषु अवयवी वर्तेत तदा यावन्तोऽवयवास्तावन्त एव

---

१ "नैव धात्र्यन्तरक्रोडमध्यास्ते हि यथा शिशुः। एकक्रोडीकृतं द्रव्यं नाश्रयेत तथाऽपरम्" ॥
—तत्त्वसं० का० ६०९ पृ० २०२।

२ "तत्संबद्धस्वभावस्य ह्यतद्देशेऽपि वृत्तितः। प्राप्तं तदेकदेशत्वमैकात्म्यं चाविभागतः ॥
अन्येनैवात्मना वृत्तौ नैकोऽनेकव्यवस्थितः। सिध्येत् स्वभावभेदस्य वस्तुभेदात्मकत्वतः" ॥
—तत्त्वसं० का० ६१०–६११ पृ० २०२।

३ "तस्माद् आश्रयाश्रितधर्मनिर्देशमात्रमवयव्यवयवेषु वर्तत इति। का पुनरियं वृत्तिः? एकस्यानेकत्राश्रयाश्रितभा-वलक्षणा प्राप्तिः"—न्यायवा० पृ० २१४ पं० २२—तथा पृ० ५०५ पं० २०।

"उद्द्योतकरस्त्वाह—आश्रयाश्रितधर्मनिर्देशमात्रमेतत् अवयव्यवयवेषु प्रवर्तत इति। आश्रितभावलक्षणा हि समवा-यरूपा प्राप्तिरुच्यत इति।"—तत्त्वसं० पञ्जि० पृ० २०२ पं० २६—।

४ "समवायात्मिका वृत्तिस्तस्य तेष्विति चेन्ननु। तस्यामपि विचारोऽयं कोपेनैव प्रधावति" ॥
—तत्त्वसं० का० ६१२ पृ० २०३।

५ "यद्वा सर्वात्मना वृत्तावनेकत्वं प्रसज्यते। एकदेशेन चानिष्टा नैको वा न क्वचिच्च सः" ॥
—तत्त्वसं० का० ६१३ पृ० २०३।

"अपि चैकोऽनेकत्र वर्तत इति प्रतिजानानो नानुयोक्तव्यः कस्मात्? उभयेन व्याघातात्–एकमनेकत्र वर्तते इति ब्रुवाणः किमेकदेशेन वर्तते उत सर्वात्मना इति नानुयोक्तव्यः। कस्मात्? उभयेन व्याघातात् यदि एकमनेकत्र वर्तमानं प्रत्यवयवं सर्वात्मना वर्तते नैकमनेकत्र वर्तते अनेकमनेकत्र वर्तत इत्यापन्नम्। एवं चानुयोगेऽधिकरणव्याघातः। अथैकम-नेकत्र वर्तमानं प्रत्यवयवमेकदेशेन वर्तते तथापि नैकमनेकत्र वर्तत इति प्राप्तम् अनेकमनेकत्र वर्तत इत्यापन्नम्। ये च त(त्र) एकदेशाः प्रत्येकमवयवेषु वर्तन्ते तेऽवयविन इति प्राप्तम्। एतस्मिन् पक्षे नैकमनेकत्र वर्तते किं तर्हि? अनेकमनेकत्रेति। अथ प्रत्येकं परिसमाप्त्या वर्तत इति अयमर्थोऽनेकमनेकत्र वर्तत इति" इत्यादि—न्यायवा० पृ० २१५ पं० ३–१३। तथा

"कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥ ७ ॥

अवयवा अवयविनि वर्तमानाः कृत्स्नेन वर्तन्ते एकदेशेन वा? तत्र तावदवयवा अवयविनि कृत्स्ने न वर्तन्ते अवयवा-वयविनोः परिमाणभेदात्। अल्पपरिमाणोऽवयवो महापरिमाणश्चावयवीति अल्पपरिमाणेन महापरिमाणस्याव्याप्तिः एकद्रव्यश्च अवयवः प्राप्नोति एकावयविवृत्तित्वात्। न चैकद्रव्यं द्रव्यमविनश्यदाधारमस्ति। नापि अवयव्येकदेशेन वर्तते न हि अस्यान्ये अवयवा एकदेशभूताः सन्ति। तस्मिन्नपि चैकदेशेन वर्तमानोऽवयवः किमेकदेशेन वर्तते कृत्स्नेन वेति पूर्ववत् प्रसङ्गः" इत्यादि
—न्यायवा० पृ० ५०३ पं० ९–१९।

अवयविनः प्रत्यवयवमेकदेशेन वृत्तिः कार्त्स्न्येन वा प्रकारान्तराभावात्? न तावदेकदेशेन वृत्तिः अवयवव्यतिरेकेणा-स्यैकदेशाभावात्। कार्त्स्न्येन वृत्तौ वा अवयवान्तरे वृत्त्यभावः एकावयवसंसर्गावच्छिन्ने स्वरूपे अवयवान्तराणामनवकाशात् तत्स्वरूपव्यतिरेकेण चास्य स्वरूपान्तराभावात्" इत्यादि—प्रशस्त० कं० पृ० ४२ पं० १७–२०।

अवयविनः स्युः स्वभावभेदमन्तरेण प्रत्यवयवं तस्य सर्वात्मना वृत्त्यनुपपत्तेः । एवं च युगपदनेककुण्डादिव्यवस्थितबिल्वादिवद् अनेकावयव्युपलब्धिप्रसक्तिः । अथ एकदेशेन असौ तेषु वर्तते इति पक्षस्तदा अनवस्थाप्रसक्तिः तेषु अपि अवयवेषु वृत्तौ अपरैकदेशवृत्तिकल्पनया । अथ यैरेकदेशैरवयवी अवयवेषु वर्तते ते तस्य स्वात्मभूता इति नानवस्था तर्हि तद्वत् पाण्यादयोऽपि अवयवास्तस्य स्वात्मभूताः किं नाऽभ्युपगम्यन्ते? तथाऽभ्युपगमे[1] चापरावयवप्रकल्पना न स्यात् अवयवप्रचयात्मकत्वात् तस्य ।

नन्विदं प्रसङ्गसाधनम्, स्वतन्त्रसाधनं वा? स्वतन्त्रसाधने अवयविनोऽप्रसिद्धेराश्रयासिद्धत्वादि[3]दोषः । न च वृत्त्या परस्य सत्त्वं व्याप्तम् येन तन्निवृत्तौ तत्सत्त्वव्यावृत्तिर्भवेत् वृत्त्यभावेऽपि रूपादेः परेण सत्त्वाभ्युपगमात् । एकदेशेन सर्वात्मना वा अवयविनो वृत्तिप्रतिषेधे विशेषप्रतिषेधस्य शेषाभ्यनुज्ञानलक्षणत्वात् प्रकारान्तरेण वृत्तिरभ्युपगता स्यात् । यथा च वृत्तिद्वयमुपलम्भादभ्युपगम्यते तथा अवयविनि वृत्तेरुपलम्भात् प्रकारान्तरेण असौ किं नाभ्युपगम्यते? वृत्तिश्च समवायः तस्य सर्वत्रैकत्वात् निरवयवत्वाच्च कृत्स्नैकदेशशब्दाविषयत्वम् । अथ प्रसङ्गसाधनम् तदपि अवयविनः वृत्तेश्च अनुपलम्भेऽयुक्तम् । न च परस्य भवतो वा कार्त्स्न्यैकदेशाभ्यामनेकस्मिन् एकस्य वृत्तिरुपलब्धिगोचरः यस्या असंभवाद् अवयविद्रव्यमसत् स्यात् । अथ एवंभूता वृत्तिः क्वचिद् उपलब्धा तदा अवयविन्यपि सा भविष्यतीति न तत्प्रतिषेधो युक्तः, वृत्तिमात्रस्य चानुपलम्भे 'एकदेशेन सर्वात्मना वा' इति विशेषप्रतिषेधोऽनुपपन्नः सिद्धे धर्मिणि तस्योपपत्तेः धर्म्यसिद्धौ च तस्यैव प्रतिषेधो विधेयः तेनैतावदेव वक्तव्यम् 'वृत्तिरेव नास्ति' इति, न चैतदपि युक्तम्; अध्यक्षत एव अवयवेषु अवयविनो वृत्तिसिद्धेः । तथाहि—इन्द्रियव्यापारे सति 'इह तन्तुषु पटः' इति बुद्धिरबाधितरूपोपजायत एव । न च अबाधितरूपाया अस्या अप्रत्यक्षत्वं युक्तम् रूपादिस्वलक्षणग्राहिणोऽप्यध्यक्षस्य अनध्यक्षताप्रसक्तेः—अविशेषात्, असदेतत्; यतो नेदम्[4]स्माभिः स्वतन्त्रसाधनमभिधीयते किन्तु प्रसङ्गसाधनम्, तस्य च 'व्याप्यव्यापकभावसिद्धौ व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयकः व्यापकनिवृत्तिर्वा व्याप्यनिवृत्त्यविनाभाविनी' इत्येतत्प्रदर्शनफलस्य प्रवृत्तिर्युक्तैव । व्याप्यव्यापकभावसिद्धिश्चात्र लोकप्रसिद्धैव भवताऽभ्युपगमनीया । लोकश्च कस्यचित् सर्वात्मना वृत्तिं कुत्रचिदभ्युपगच्छति, यथा-श्रीफलस्य कुण्डादौ, क्वचिच्च कस्यचिद् एकदेशेन, यथा--अनेकपीठाधिशायितस्य चैत्रादेः । यत्र च प्रकारद्वयं[5] वृत्तेर्व्यावृत्तं तत्र वृत्तेरभाव एव कथं न व्याप्तिसिद्धिर्येनात्र प्रसङ्गसाधनस्यावकाशो न स्यात्? निरस्ता च प्रागेव अनेकस्मिन् एकस्य वृत्तिः न पुनः प्रतिपाद्यते । [6]यच्च अध्यक्षत एव वृत्तिः सिद्धा 'इह इदम्' इति अक्षानुसारिबुद्ध्युत्पत्तेः, तदप्यसंगतम्; यतो न 'इह तन्तुषु पटः' इतिविकल्पिकाऽपि लोके बुद्धिः प्रवर्तते किं तर्हि? 'पटे तन्तवः' इति । न चाऽध्यक्षे तन्तुसमवेतं व्यतिरिक्तं पटादिद्रव्यमवभासते । न च विवेकेन अप्रतिभासमानस्य 'इह

१-मे वाप-वा० बा० । "एवं हि सति एकोऽवयवी न स्याद् अवयवप्रचयमात्ररूपत्वात् तस्य तथा च सति दृष्टपाण्यादिसमुदायमात्रात्मक एवास्तां वस्तु किमपरैस्तस्य स्वात्मभूतैरवयवैः परिकल्पितैः"—तत्त्वसं० पञ्जि० पृ० २०३ पं० १८-।

२ " 'स्वातन्त्र्येण' इत्यादिना शङ्करस्वामिनः परिहारमाशङ्कते—

स्वातन्त्र्येण प्रसङ्गेन साधनं यत् प्रवर्तते । स्वयं तदुपलब्धौ हि सत्यां संगच्छते न तु ॥
न च कार्त्स्न्यैकदेशाभ्यां वृत्तिः क्वचन लक्षिता । यस्या असंभवाद् द्रव्यमसत् स्यादपरोऽपि च ॥
दृष्टौ वा क्वचिदेतस्या द्रव्यादावनिवारणम् । अथ तस्मिन्नदृष्टौ तु भेदे प्रश्नो न युज्यते ॥
एतावत् तु भवेद् वाच्यं वृत्तिर्नास्तीति तच्च न । युक्तं प्रत्यक्षतः सिद्धेरिहेदमिति बुद्धितः ॥
प्रत्यक्षं न तदिष्टं चेद् बाधकं किञ्चिदुच्यताम् । रूपादिचेतसोऽपि स्यान्नैव प्रत्यक्षताऽन्यथा" ॥

—तत्त्वसं० का० ६१४-६१८ पृ० २०३-२०४ ।

३-दिदोषः बृ० आ० । "स ह्याह—स्वातन्त्र्येण प्रसङ्गमुखेन वा यत् साधनं क्रियते तत् स्वयमुपलब्धौ सत्यां संगच्छते अन्यथा ह्यसिद्धता दोषः स्यात्"—तत्त्वसं० पञ्जि० पृ० २०४ पं० ७-८ ।

४ "तदत्र वृत्तिर्नास्तीति प्रागभेदेन साधितम् । इहेत्यस्ति न च ज्ञानं तद्रूपाप्रतिभासनात्" ॥

—तत्त्वसं० का० ६१९ पृ० २०४ ।

५ पृ० ६६६ पं० १३ । ६ प्र० पृ० पं० १८ ।

इदं वर्तते' इति बुद्धिविषयता न हि विवेकेन अप्रतिभासमाने कुण्डादौ बदरादिके 'इह कुण्डे बदराणि' इति प्रत्ययः प्रादुर्भवति। यदपि[1] 'कार्त्स्न्यैकदेशाभ्यां वृत्तिर्न क्वचिदुपलक्षिता' इति, तदप्यसंगतम्; बदरादेः[2] कुण्डादौ सर्वात्मना, वंशादेरेकदेशेन स्तम्भादौ वृत्तेरुपलक्षणात्। यदपि[3] उक्तमुद्द्योतकरेण—"एकस्मिन् अवयविनि कृत्स्नैकदेशशब्दप्रवृत्त्यसंभवात् अयुक्तोऽयं प्रश्नः—'किमेकदेशेन वर्तते, अथ कृत्स्नो वर्तते' इति। 'कृत्स्नम्' इति हि खल्वेकस्य अशेषाभिधानम्, 'एकदेशः' इति च अनेकत्वे सति कस्यचिदभिधानम्, ताविमौ कृत्स्नैकदेशशब्दौ एकस्मिन्नवयविनि अनुपपन्नौ" [२-१-३२ न्यायवा०] इति, तदपि प्रत्युक्तं प्राक्तनन्यायेनैव। तथा च 'कृत्स्नः पटः कुण्डे वर्तते, एकदेशेन वा' इत्येवं पटादिषु कृत्स्नैकदेशशब्दप्रवृत्तिर्दृश्यत एव। न चेयमुपचरिता, अस्खलद्वृत्तित्वात्। न च शब्दप्रवृत्त्यनुपपत्तिमात्रप्रेरणया वस्त्वर्थस्य प्रतिषेधः शक्यते विधातुम्, तत्र तच्छब्दाप्रवृत्तावपि व्याप्त्यव्याप्तिशब्दयोः प्रवृत्त्युपपत्तेः। तथाहि-'अवयवी अवयवेषु वर्तमानः प्रत्यवयवं किं व्याप्त्या वर्तते, उत अव्याप्त्या' इत्येवं विवक्षितार्थाभिधाने न कंचिद् दोषमुत्पश्यामः। तन्न नित्यानित्यरूपपृथिव्यादिचतुःसंख्यं[4] द्रव्यमुपपत्तिमत्।

आकाशाख्यैकनित्यद्रव्यप्रसिद्धये[5] शब्दं गुणत्वाल्लिङ्गत्वेन प्रतिपादयन्ति। तथा च परेषां प्रयोगः—ये विनाशित्वोत्पत्तिमत्त्वादिधर्माध्यासिताः ते क्वचिद् आश्रिताः, यथा घटादयः, तथा च शब्दाः, तस्मादेभिराश्रितैः क्वचिद् भवितव्यम्, यश्चैषामाश्रयः स पारिशेष्याद् आकाशः। तथाहि-नायं शब्दः पृथिव्यादीनां वायुपर्यन्तानां गुणः, अध्यक्षग्राह्यत्वे सति अकारणगुणपूर्वकत्वात्, ये तु पृथिव्यादीनां चतुर्णां गुणास्ते बाह्येन्द्रियाध्यक्षत्वे सति अकारणगुणपूर्वका न भवन्ति, यथा रूपादयः, न च तथा शब्दः। एवम् 'अयावद्द्रव्यभावित्वात्' 'आश्रयाद् मेर्यादेरन्यत्रोपलब्धेश्च' इत्यादयो हेतवो द्रष्टव्याः। स्पर्शवतां यथोक्तविपरीता गुणा उपलब्धाः। 'प्रत्यक्षत्वे सति' इति च विशेषणं परमाणुगतैः पाकजैः अनैकान्तिकत्वं मा भूत् इत्युपात्तम्। न च आत्मगुणः अहंकारेण विभक्तग्रहणात् बाह्येन्द्रियाध्यक्षत्वात् आत्मान्तरग्राह्यत्वाच्च, बुद्ध्यादीनामात्मगुणानां तद्वैपरीत्योपलब्धेः। न दिक्-काल-मनसाम् श्रोत्रग्राह्यत्वात्। अतः पारिशेष्याद् गुणो भूत्वा आकाशस्य लिङ्गम्। आकाशं च शब्दलिङ्गाविशेषात् विशेषलिङ्गाभावाच्च एकम् विभु च सर्वत्रोपलभ्यमानगुणत्वात् समवायित्वे सति अनाश्रितत्वाच्च द्रव्यम्, अकृतकत्वान्नित्यम्।

पराऽपरव्यतिकर-यौगपद्याऽयौगपद्य-चिर-क्षिप्रप्रत्ययलिङ्गः[6] कालो द्रव्यान्तरम्। तथाहि—

---

१ पृ० ६६७ पं० १३ तथा पं० ९ टि० २।

२ "कृत्स्नैकदेशशब्दाभ्यामयं चार्थः प्रकाश्यते। नैरंश्येनास्य किं वृत्तिः किं वा तस्यान्यथैव सा॥
यथा पात्रादिसंस्थस्य श्रीफलादेर्यथाऽथवा। अनेकासनसंस्थस्य चैत्रादेरुपलक्षिता"॥
—तत्त्वसं० का० ६२०-६२१-पृ० २०५।

३ "एकस्मिन् कृत्स्नैकदेशशब्दासंभवादप्रश्नः-किमवयव्येकदेशेन वर्तते अथ कृत्स्नेनैव वर्तत इति न युक्तः प्रश्नः-नावयवी कृत्स्नो नैकदेशः। कृत्स्नमिति खलु अनेकस्याशेषस्याभिधानम्। एकदेश इति चानेकत्वे सति कस्यचिदभिधानम्। ताविमौ कृत्स्नैकदेशशब्दावेकस्मिन्ननुपपन्नौ" इत्यादि—न्यायवा० पृ० २१४ पं० १३—। तथा पृ० ५०५ पं० ६-१२।

"वृत्त्यनुपपत्तेश्च नैकत्रावयवे कार्त्स्न्येनावयवी वर्तते। तेष्वपि कथं वर्तते? अन्यैरेकदेशैः तेष्वपि अन्यैरिति नास्त्यन्त्यः" इत्यादि—न्यायमञ्ज० आ० ९ पृ० ५४९ पं० १२-१३।

४ "एवं वायुपर्यन्तं चतुर्विधं द्रव्यमपास्तम् आत्माख्यं तु प्रागेवात्मपरीक्षायां निरस्तम्। इदानीमाकाश-काल-दिग्-मनसां प्रतिषेधार्थमाह—" तत्त्वसं० पञ्जि० पृ० २०५ पं० २०।

५ "समाश्रिताः क्वचिच्छब्दा विनाशित्वादिहेतुतः। घट-दीपादिवत् तच्च किल व्योम भविष्यति"॥
—तत्त्वसं० का० ६२२ पृ० २०५।

६ "आदित्यादिक्रियाद्रव्यव्यतिरेकनिबन्धनम्। परापरादिविज्ञानं घटादिप्रत्ययो यथा॥
वलीपलितकार्कश्यगत्यादिप्रत्ययादिदम्। यतो विलक्षणं हेतुः स च कालः किलेष्यते"॥
—तत्त्वसं० का० ६२३-६२४ पृ० २०६।

७ "द्रव्यशब्देन वलीपलितादयो ग्रहीतव्याः। परः पिता अपरः पुत्रः युगपत् चिरम् क्षिप्रम् क्रियते कृतं करिष्यते चेति यदेतत् परापराविज्ञानम्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २०६ पं० १४-१५।

'परः पिता' 'अपरः पुत्रः' 'युगपत्' 'अयुगपत्' वा तथा, 'चिरम्' 'क्षिप्रम्' वा 'कृतम्' 'करिष्यते' वा इति यत् पराऽपरादिज्ञानम् तत् आदित्यादिक्रिया-द्रव्यव्यतिरिक्तपदार्थनिबन्धनम्, तत्प्रत्ययविलक्षणत्वात्, घटादिप्रत्ययवत्। योऽस्य हेतुः स पारिशेष्यात् कालः। यतः न तावत् पराऽपरादिप्रत्ययः दिग्देशकृतोऽयम्, स्थविरे अपरदिग्भागावस्थितेऽपि 'परोऽयम्' इति प्रत्ययोत्पत्तेः। तथा, यूनि परदिग्भागावस्थितेऽपि 'अपरोऽयम्' इति ज्ञानप्रादुर्भावात्। न च वली-पलितादिकृतोऽयं प्रत्ययः, तत्कृतप्रत्ययवैलक्षण्येन उत्पत्तेः। नापि क्रियानिर्वर्तितः, तत्प्रतिभावितज्ञानवैलक्षण्येन संवेदनात्। तथा च सूत्रम्—"[1]अपरस्मिन् परं युगपद् अयुगपत् चिरं क्षिप्रमिति काललिङ्गानि" [वैशेषिकद० २-२-६] इति। आकाशवदेव अस्यापि विभुत्व-नित्यत्वैकत्वादयो धर्मा अवगन्तव्याः।

दि[2]गपि एकादिधर्मोपेतं द्रव्यं प्रमाणतः सिद्धम्। तथाहि-मूर्तेष्वेव द्रव्येषु मूर्तं द्रव्यमवधिं कृत्वा 'इदमस्मात् पूर्वेण दक्षिणेन पश्चिमेन उत्तरेण पूर्वदक्षिणेन दक्षिणापरेण अपरोत्तरेण उत्तरपूर्वेण अधस्तात् उपरिष्टात्' अमी दश प्रत्यया यतो भवन्ति सा दिग् इति। तथा च सूत्रम्—"[3]'अत इदम्' इति यतस्तद् दिशो लिङ्गम्" [वैशेषिकद० २-२-१०] इति। एते हि विशेषप्रत्यया न आकस्मिकाः संभवन्ति। न च परस्परापेक्षमूर्तद्रव्यनिमित्ताः, इतरेतराश्रयत्वेन उभयप्रत्ययाभावप्रसक्तेः। ततोऽन्यनिमित्तोत्पाद्यत्वासंभवाद् एते दिशो लिङ्गभूताः। दिशश्च विभुत्वैकत्व-नित्यत्वादयो धर्माः कालवद् अवगन्तव्याः। एतस्याश्च एकत्वेऽपि प्राच्यादिभेदेन नानात्वं कार्यविशेषाद् व्यवस्थितम्। प्रयोगश्चात्र-यदेतत् पूर्वाऽपरादिज्ञानम् तद् मूर्तद्रव्यव्यतिरिक्तपदार्थनिबन्धनम्, तत्प्रत्ययविलक्षणत्वात्, सुखादिज्ञानवत् इति।

आत्मद्रव्यस्य च विभुत्वादिधर्मोपेतस्य पराऽभ्युपगतस्य प्रागेव प्रतिषेधः कृ[4]तः इति न तत्पूर्वपक्षः पुनः प्रदर्श्यते।

मनोद्र[5]व्यस्य तु युगपज्ज्ञानानुत्पत्तिर्लिङ्गम्। तथा च सूत्रम्—"युगपज्ज्ञानानुत्पत्तिर्मनसो[6] लिङ्गम्" [न्यायद० १-१-१६] इति। अनेकेन्द्रियार्थसन्निधाने सत्यपि एकदा क्रमेण ज्ञानोत्पत्त्युप-

---

१ अपरं परं आ० हा० वि०। अपरमपरं वा० बा०।

"तथा च सूत्रम्—अपरं परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि"—तत्त्वसं० पञ्जि० पृ० २०६ पं० २०।

"तथा सूत्रम्—अपरस्मिन् परं युगपच्चिरं क्षिप्रमिति काललिङ्गानि"—न्यायकु० लि० पृ० १३९ द्वि० पं० १२।

"तथा च सूत्रम्—अपरस्मिन् परं युगपद् अयुगपत् चिरं क्षिप्रमिति काललिङ्गानि"—प्रमेयक० पृ० १६९ प्र० पं० ७।

गूजरातीप्रेस-बनारससंस्कृतसिरीझसत्कयोर्वैशेषिकदर्शनसंस्करणयोः चोखम्बासंस्कृतसिरीझगते च वैशेषिकसूत्रपाठे समान एव पाठो मुद्रितो दृश्यते। यथा—"अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि"-२-२-६। गूजरातीप्रेसप्रकाशितानि तदुपस्कार-विवृति-भाष्याण्यपि तमेव पाठमनुसरन्ति। तत्र च पाठान्तरसूचिका टिप्पणी इत्थं दृश्यते—"बॉम्बेरायलआशिआटिकसोसाइटीसंज्ञकग्रन्थसंग्रहालयस्थलिखितप्राचीनपुस्तके तु 'अपरस्मिन् परम्' इति पाठः सूत्र उपलभ्यते। उपस्कारे च 'अपरस्मिन् परम्' इत्यनेन 'परस्मिन् परम्' इत्यपि द्रष्टव्यमिति"—गू० वै० पृ० ९८।

२ "पूर्वापरादिबुद्धिभ्यो दिगेवमनुमीयते।"—तत्त्वसं० का० ६२५ पृ० २०६।

३ "तथा च सूत्रम्—इत इदमिति यतस्तद् दिशो लिङ्गम्-इति"—तत्त्वसं० पञ्जि० पृ० २०७ पं० ३।

"तथा च सूत्रम्—अत इदमिति यतस्तद् दिशो लिङ्गम्"—न्यायकु० लि० पृ० १४३ प्र० पं० १३। प्रमेयक० पृ० १७० प्र० पं० १३।

गूजरातीप्रेस-बनारससंस्कृतसिरीझ-चोखम्बासिरीझसत्केषु संस्करणेषु तु "इत इदमिति यतस्तद् दिश्यं लिङ्गम्" इति मुद्रितं दृश्यते।

४ पृ० १३४ पं० ३१।

५ "क्रमेण ज्ञानजात्या च मनसोऽनुमितिर्मता॥

चक्षुरादिविभिन्नं च कारणं समपेक्षते। क्रमेण जाता रूपादिप्रतिपत्ती रथादिवत्"॥

—तत्त्वसं० का० ६२५-६२६ पृ० २०६।

६ "तथा च सूत्रम्—युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्-इति—तत्त्वसं० पञ्जि० पृ० २०७ पं० १२।

एतस्य न्यायदर्शनीयसूत्रस्य भाष्यम्, वार्तिकम् न्यायवार्तिकतात्पर्यटीका चात्रानुसंधानीया।

मनोनिरूपणपरं प्रशस्तपादभाष्यम् तत्कन्दल्यपि चात्रावबोद्धव्या—प्रशस्त० कं० पृ० ८९-९४।

लम्भाद् अनुमीयते इन्द्रियार्थव्यतिरिक्तं हेत्वन्तरमस्ति इति यत्सन्निधानाऽसन्निधानाभ्यां ज्ञानस्य उत्पत्त्यनुत्पत्ती भवतः । तथा च प्रयोगः—रूपाद्युपलब्धिः आत्मबाह्येन्द्रियार्थव्यतिरिक्तहेत्वन्तरा- पेक्षा, क्रमेण उपजायमानत्वात्, रथादिवत् ।

अत्र प्रतिविधीयते-यदि[1] सामान्येन आश्रितत्वमात्रं शब्दानां साध्यते तदा सिद्धसाध्यता तेषां ५ भूतकार्यतया तदाश्रितत्वात् कार्यस्य कारणप्रतिबद्धात्मलाभतया तदाश्रितत्वाभ्युपगमात् । अथ[2] एक-नित्याऽमूर्त-विभुद्रव्यसमवेतत्वेन एषामाश्रितत्वं साध्यते तदा तथाभूतसाध्यान्वितत्वस्य दृष्टान्ते हेतोरभावात् अनैकान्तिकता हेतोः, प्रतिज्ञायाश्च अनुमानविरोधित्वम् । तथाहि-यदि नित्यैकव्यापिनभोद्रव्यसमवेताः शब्दा भवेयुस्तदा एकदोत्पन्नानेकशब्दवद् अन्यकाला अपि ते तदैव स्युः अविकलकारणत्वात् एकाश्रयत्वाच्च । न च सहकार्यपेक्षा नित्यस्य संभवति इति प्रतिपादितम् । १० नापि समवायित्वमनुपकारिणो युक्तम् अतिप्रसङ्गात् । ततोऽक्रमभावित्वप्रसङ्गो व्यवस्थितः । तत्कारणस्य नित्यत्वे व्यापित्वे च शब्दानां सर्वपुरुषैर्ग्रहणप्रसङ्गः । तथाहि-आकाशात्मकं श्रोत्रम् आकाशं च एकमेव इति तत्प्राप्तानां सर्वेषामपि श्रवणं स्यात् । न च निरवयवाकाशे अयं विभागः- 'इदमात्मीयं श्रोत्रम्' 'इदं च परकीयम्' इति । अथ यदीयधर्माऽधर्माभिसंस्कृतकर्णशष्कुल्यवरुद्धं नभः तत् तस्य श्रोत्रमिति विभागः, अत एव नासिकादिरन्ध्रान्तरेण न शब्दोपलम्भः संजायते, १५ तत्कर्णशष्कुलीविघाताद् बाधिर्यादिकं च व्यवस्थाप्यते इति, असदेतत्; अनंशस्य नभस एवंविध- विभागानुपपत्तेः । न च पारमार्थिकविभागनिष्पाद्यं फलं परिकल्पितावयवविभागो निर्वर्तयितुं क्षमः अतिप्रसङ्गात् अन्यथा मलयजरसादिकमपि पावकप्रकल्पनया प्लोषादिकार्यं विदध्यात् । न च कल्पिततदवयववशादपि प्रतिनियतशब्दोपलम्भदर्शनान्नायं दोषः, शब्दोपलम्भकार्यस्य अन्यथा सिद्धत्वात् । न च 'संयोगस्य अव्याप्यवृत्तित्वकृता आकाशस्य देशाः' इति व्यपदेशः, प्रागेव अस्य २० प्रतिषिद्धत्वात् । अपि च, अनल-कर्णशष्कुल्यादयोऽपि समानदेशाः स्युः अभिन्नैकनभः-संसर्गि- त्वात् । तथाहि-येन एको वियत्स्वभावेन संयुक्तस्तेनैव अपरोऽपीति तद्देशभावी सोऽपि स्यात् तत्संयुक्तस्वभाववियत्संसर्गित्वात् तद्देशावस्थिताऽनलवत् । शब्दानामपि अत एव एकदेशत्वात् एकोपलम्भे सर्वोपलब्धिश्च स्यात् । दूरासन्नाद्यवस्थायिता तु भावानां प्रतीतिगोचरा विरोधिनी च भवेत् ।

२५ दिक्-कालसाधनप्रयोगेष्वपि एते दोषाः-सामान्येन[3] साधने सिद्धसाध्यता । विशेषसाधने हेतोरन्वयाद्यसिद्धिः अनुमानबाधितत्वं च प्रतिज्ञायाः इति-समानाः[4] । तथाहि[5]-पूर्वापरोत्पन्नपदार्थ- विषयपूर्वापरशब्दसंकेतवशोद्भूतसंस्कारनिबन्धनत्वात् प्रकृतप्रत्ययस्य कारणमात्रे साध्ये कथं न सिद्धसाध्यता ? विशेषे च कथं नान्वयासिद्धिः ? अनुमानबाधा च प्रतिज्ञायाः पूर्ववद् भावनीया । अत एव नेतरेतराश्रयदोषोऽपि पूर्वपक्षोदितो[6] विशिष्टपदार्थसंकेतप्रभवत्वेऽस्य प्रत्ययस्य । किञ्च, ३० निरंशैकदिक्-कालाख्यपदार्थनिमित्तत्वं परा[7]ऽपरादिप्रत्ययस्य प्रसाधयितुमभ्युपगतम्, तच्चायुक्तम्;

---

१ "उपात्तादिमहाभूतहेतुत्वाङ्गीकृतेर्ध्वनेः । सिद्धा एवाश्रिताः शब्दास्तेष्वित्याद्यमसाधनम्" ॥

—तत्त्वसं० का० ६२७ पृ० २०७ ।

२ "एकव्यापिध्रुवव्योमसमवायस्तु सिध्यति । नैषामन्वयवैकल्यादक्रमायासितस्तथा" ॥

—तत्त्वसं० का० ६२८ पृ० २०७ ।

३ "काल-दिक्साधनयोरपि सामान्येन सिद्धसाध्यता विशेषेणान्वयासिद्धिर्हेतोः प्रतिज्ञायाश्च अनुमानबाधेति"

—तत्त्वसं० पञ्जि० पृ० २०८ पं० २१ ।

४ प्र० पृ० पं० ४-।

५ "विशिष्टसमयोद्भूतमनस्कारनिबन्धनम् । परापरादिविज्ञानं न कालाच्च दिशश्च तत् ॥
निरंशैकस्वभावत्वात् पौर्वापर्याद्यसंभवः । तयोः संबन्धिभेदाच्चेदेवं तौ निष्फलौ ननु" ॥

—तत्त्वसं० का० ६२९-६३० पृ० २०८ ।

६ पृ० ६६९ पं० १३ ।

७ परादिप्र-भां० मां० आ० । "परापरादिज्ञानस्य निरंशैकदिक्कालाख्यपदार्थनिबन्धनत्वं साधयितुमिष्टम्"

—तत्त्वसं० पञ्जि० पृ० २०९ पं० ४-५ ।

स्वाकारानुकारिप्रत्ययजनकस्य तद्विषयत्वात् निरंशस्य च पौर्वापर्यादिविभागाभावतस्तथाभूतप्रत्ययोत्पादकत्वासंभवात्। तथाभूतप्रत्ययाद् विपरीतार्थसिद्धेः इष्टविपर्ययसाधनात् विरुद्धश्चैवं हेतुः स्यात्। अथ बाह्याऽऽध्यात्मिकभावपौर्वापर्यनिबन्धनस्य दिक्-कालयोः पौर्वापर्यव्यपदेशस्य भावान्न हेतोर्विरुद्धता । नन्वेवं दिक्-कालपरिकल्पना व्यर्था तत्साध्याभिमतस्य कार्यस्य बाह्याऽऽध्यात्मिकैः संबन्धिभिरेव निर्वर्तितत्वात्। तथाहि–दिक् पूर्वापरादिव्यवस्थाहेतुरिष्यते कालश्च पूर्वापरक्षण-लव- ५ निमेष-कला-मुहूर्त-प्रहर-दिवस-अहोरात्र-पक्ष-मास-ऋतु-अयन-संवत्सरादिप्रत्ययप्रसवनिमित्तोऽभ्युपगतः, अयं च स्वरूपभेदः स्वात्मनि तयोः समस्तोऽप्यसंभवी तत्संबन्धिषु पुनर्भावेषु विद्यमानस्तत्र प्रत्ययहेतुरिति व्यर्था तत्प्रकल्पना । अथ तत्संबन्धिष्वपि अयं भेदः अपरक्रियादिभेदनिमित्तस्तर्हि तत्रापि एवम् इति अनवस्थाप्रसक्तिः । अथ पदार्थेषु पूर्वापरभेदः कालनिमित्तः ननु कालोऽप्यसौ न स्वतः इति अपरकालनिमित्तो यद्यभ्युपगम्यते तदा अनवस्था । अथ पदार्थभेद- १० निमित्तस्तदा इतरेतराश्रयत्वप्रसङ्गः । अथ तत्र स्वत एव अयं भेदः पदार्थेष्वपि स्वत एव अयं किं नाभ्युपगम्यते ? ततश्च पुलरपि दिक्-कालप्रकल्पनं व्यर्थम् ।

मनःसाधनेऽपि हेतौ कारणमात्रे साध्ये सिद्धसाध्यता मनस्कारादेश्चक्षुरादिव्यतिरिक्तस्य कारणमात्रस्येष्टेः । विशेषेणे तु नित्यैकमनःसाधने अनन्वयदोषः प्रतिज्ञायाश्च अनुमानबाधा इष्टविपर्ययसाधनाद् विरुद्धश्च हेतुः इति दोषाः पूर्ववद् वाच्याः । चक्षुरादिव्यतिरिक्ताऽनित्यकारण- १५ सापेक्षत्वस्य साधनाद् विरुद्धता प्रकटैव अन्यथा हि अत्रापि नित्यकारणत्वे चेतसामविकलकारणत्वात् क्रमोत्पत्तिर्विरुद्धैव भवेत् । तन्न पृथिव्यादेर्मनःपर्यन्तस्य द्रव्यनवकस्य प्रमाणतः सिद्धिः । ततः 'पृथिव्यादीनि द्रव्याणि इतरेभ्यो भिद्यन्ते, द्रव्यत्वाभिसंबन्धात्' इत्यादिहेतूपन्यासोऽयुक्त एव, तत्स्वरूपासिद्धौ हेतोराश्रयासिद्धत्वदोषात्, स्वरूपासिद्धश्च अयं हेतुः द्रव्यत्वाभिसंबन्धस्य समवायलक्षणस्य असिद्धेः, विशेषणासिद्धश्च द्रव्यत्वसामान्यस्य निषिद्धत्वात् निषेत्स्यमानत्वाच्च । न चात्र २० अन्वयः सिद्धः, साधर्म्यदृष्टान्तस्य अभावात् । न च सपक्षाभावे केवलव्यतिरेकी हेतुर्गमकः, प्रतिबन्धप्रसाधकप्रमाणविषयसाधर्म्यदृष्टान्ताभावे सर्वत्र साध्याभावात् साधनस्य व्यावृत्त्यसिद्धेः । "'साध्यसद्भावे एव सर्वत्र साधनसद्भावः' इत्येवंभूतान्वयाऽप्रसिद्धौ 'साध्याभावे सर्वत्र साधनस्य अभावः' इति सकलाक्षेपेण व्यतिरेकस्यासंभवात्" [ ] इत्यादेर्न्यायस्य असकृत् प्रतिपादितत्वात्। यदपि 'नवैव द्रव्याणि' इत्यादिप्रयोगप्रतिपादनम्, तदप्यसंगतमेव; तत्स्वरूपा- २५ सिद्धौ तत्संख्यासिद्धेर्दूरापास्तत्वात्। न च लक्षणयोगित्वमपि तेषाम् असिद्धपृथिवीत्वाभिसंबन्धादेर्लक्षणस्य अनुपपत्तेः । अत एव अन्योन्यव्यावृत्तादेर्विशेषणस्यानुपपत्तिः विशेष्याभावे विशेषणस्याप्यसंभवात् । 'न्यूनाधिक-' इत्याद्यपि तद्विशेषणमसंगतम्, प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां नैयायिकाभ्युपगतपदार्थानां षट्पदार्थाधिकानाम् तमश्छायादीनां च नवद्रव्याधिकानां सद्भावात्। न च ३०

---

१ "तथाहि–कालः पूर्वापरक्षणलवनिमेषकाष्ठाकलामुहूर्ताहोरात्राऽर्धमासादिप्रत्ययप्रसवहेतुः दिक् च पूर्वोत्तरादिव्यवस्थाहेतुरिष्यते"—तत्त्वसं० पञ्जि० पृ० २०९ पं० १३ ।

२ "चक्षुराद्यतिरिक्तं तु मनोऽस्माभिरपीष्यते । षण्णामनन्तरोद्भूतप्रत्ययो यो हि तन्मनः" ॥
—तत्त्वसं० का० ६३१ पृ० २०९ ।

३ "नित्ये तु मनसि प्राप्ताः प्रत्यया यौगपद्यतः । तेन हेतुरिह प्रोक्तो भवतीष्टविघातकृत् ॥
सौगतापरनिर्दिष्टमनःसंसिद्ध्यसिद्धये । साकारमन्यथाऽऽवृत्तं मन्ये सूत्रमिदं कृतम्" ॥
—तत्त्वसं० का० ६३२–६३३ पृ० २०९–२१० ।

४ पृ० ६५६ पं० २७ । ५ पृ० ६५६ पं० ३२ । ६ न्यायद० १–१–१ । ७ पृ० ५४३ टि० १३ ।

"से णूणं भंते ! दिया उज्जोए रातिं अंधयारे ?
हंता, गोयमा ! जाव–अंधयारे ।
से केणट्ठेणं ?
गोयमा ! दिया सुभा पोग्गला सुभे पोग्गलपरिणामे, रातिं असुभा पोग्गला असुभे पोग्गलपरिणामे । से तेणट्ठेणं०" ।
—भगव० श० ५ उ० ९ सू० २२४ पृ० २४६ ।

"सद्दंधयारउज्जोओ पहा छायाऽऽतवे इ वा । वण्ण–रस–गंध–फासा पुग्गलाणं तु लक्खणं" ॥
—उत्तरा० अ० २८ गा० १२ । नवत० गा० ९ ।

पदार्थषोडशकस्य षट्स्वेव अन्तर्भावात् तमश्छायादीनां च तेजोऽभावरूपत्वात् न तदधिकपदार्थसद्भाव इति वक्तव्यम्, द्रव्यादीनामपि षण्णां प्रमाणप्रमेयरूपपदार्थद्वयेऽन्तर्भावात् पदार्थषट्कस्याऽपि अनुपपत्तेः । अथ तदन्तर्भावेऽपि अवान्तरविभिन्नलक्षणवशात् प्रयोजनवशाद् वा द्रव्यादिषड्व्यवस्था तर्हि तत एव प्रमाणादिषोडशकव्यवस्था तमश्छायादिद्रव्यान्तरव्यवस्थाऽपि भवि-
५ष्यति इति 'न्यूनाधिक'-इत्यादिविशेषणानुपपत्तिरेव । न च तमश्छायादेर्बहलत्वादितरतमविशेषयोगिनः विशिष्टार्थक्रियानिर्वर्तनसमर्थस्य च भासामभावरूपतेति वक्तव्यम्, भासामप्येवं तमश्छायाऽभावरूपताप्रसक्तेः । न च आवारकद्रव्यसन्निधानापेक्षतेजोऽभावरूपता तयोः, स्वसामग्रीतो विशिष्टपदार्थोत्पत्तौ प्रतियोग्यभावरूपत्वे भासामपि तथात्वोपपत्तेः । यदपि मधुर-शीतद्रव्योपयोगाद् ये गुणाः समुपजायन्ते छायादिसेवनादपि ते प्रादुर्भवन्तीत्युपचारात् 'छाया मधुर-शीतला'
१० इत्युच्यते तत् तेजस्यपि समानम् । यथा च छाया-तमसोः पुद्गलद्रव्यात्मकत्वं तथा प्राक् प्रतिपादितमिति न पुनरुच्यते । तदेवं 'पृथिव्यादीनि नव द्रव्याणि' इत्यनुपपन्नम् तत्सद्भावप्रतिपादकप्रमाणाभावात् बाधकस्य च प्रदर्शितत्वात् ।

द्रव्याभावाच्च गुणादयो विशेषपर्यन्ताः असन्त एव, तेषां तदाश्रितत्वाभ्युपगमात् आश्रयाभावे च तदाश्रितानां तत्परतन्त्रतयाऽवस्थानासंभवात् । गुण-कर्मणां च साक्षाद्द्रव्याश्रितत्वं परैरभ्युप-
१५ गतम् । तथा च सूत्रम्—"द्रव्याश्रयी अगुणवान् संयोग-विभागेष्वकारणम् अनपेक्ष इति गुणलक्षणम्" । [वैशेषिकद० १-१-१६] "एकद्रव्यम् अगुणम् संयोग-विभागेष्वनपेक्षम् कारणम् इति कर्मलक्षणम्" । [वैशेषिकद० १-१-१७] एकमेव एकस्मिन्नेव च द्रव्ये आश्रितमेकद्रव्यं कर्म । गुणास्तु केचिद् अनेकस्मिन् वर्तन्ते संख्या-संयोगादयः, अनेके वा एकदा एकत्र वर्तन्ते रूपरसादयः । सामान्यविशेषाश्च केचिद् द्रव्यत्व-पृथिवीत्वादयो द्रव्यवृत्तय एव गुणत्व-कर्मत्वादयस्तु
२० द्रव्यसंबन्ध(बद्ध)गुण-कर्माश्रिताः । सत्तासामान्यं तु द्रव्य-गुण-कर्मवृत्ति । विशेषास्तु नित्यद्रव्येष्वेव वर्तन्त इति द्रव्यप्रतिषेधे गुणादिप्रतिषेधः प्रसिद्ध एव । समवायस्तु पञ्चपदार्थवृत्तिरूपः पञ्चपदार्थनिषेधे निषिद्ध एव, सर्वाश्रयाश्रिताभावे तस्याऽभावात् । ततो द्रव्यनिषेधादेव अशेषपदार्थनिषेधसिद्धावपि विशेषतो गुणादिप्रतिषेधः प्रदर्श्यते परदर्शनस्य सर्वथाऽयुक्तताप्रदर्शनात् ।

[क्रमशो रूपादिगुणानां प्रक्रियामुपन्यस्य तेषां खण्डनम्]

२५ तत्र "रूप-रस-गन्ध-स्पर्शाः संख्याः परिमाणानि पृथक्त्वम् संयोग-विभागौ परत्वाऽपरत्वे बुद्धयः सुखदुःखे इच्छा-द्वेषौ प्रयत्नश्च गुणाः" । [वैशेषिकद० १-१-६] इति सूत्रसंगृहीताः सप्तदश, 'च'शब्दसमुच्चिताः—गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्माऽधर्म-शब्दाश्च सप्त गृह्यन्ते इति चतुर्विंशतिर्गुणाः । तत्र चक्षुर्ग्राह्यं रूपं पृथिव्युदकज्वलनवृत्ति । रसो रसनेन्द्रियग्राह्यः पृथिव्युदकवृत्तिः । गन्धो

---

१ पृ० ५४३ पं० १४- टि० १३ ।

२ "द्रव्याणां प्रतिषेधेन सर्वे एव तदाश्रिताः । गुण-कर्मादयोऽपास्ता भवन्त्येव तथा मताः" ॥
—तत्त्वसं० का० ६३४ पृ० २१० ।

३ "गुणत्व-कर्मत्वादयश्च द्रव्यसंबद्धगुण-कर्मपदार्थवृत्तयः"—तत्त्वसं० पञ्जि० पृ० २१० पं० २३ ।

४ "क्व कस्य समवायश्च संबन्धिन्यपहस्तिते । विशेषप्रतिषेधोऽयं तथापि पुनरुच्यते" ॥
—तत्त्वसं० का० ६३५ पृ० २११ ।

५ "तत्र 'रूप-रस-गन्ध-स्पर्शाः सङ्ख्या-परिमाणानि पृथक्त्वम् संयोग-विभागौ परत्वापरत्वे बुद्धयः सुख-दुःखे इच्छा-द्वेषौ प्रयत्नश्च गुणाः' इति सूत्रम् । चशब्दाद् गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्माधर्म-शब्दाश्च परिगृह्यन्ते"—तत्त्वसं० पञ्जि० पृ० २११ पं० ६–।

"गुणाश्च रूप-रस-गन्ध-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वाऽपरत्व-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्नाश्चेति कण्ठोक्ताः सप्तदश । चशब्दसमुच्चिताश्च गुरुत्व-द्रवत्व-स्नेह-संस्काराऽदृष्टशब्दाः सप्तैव इत्येवं चतुर्विंशतिर्गुणाः" —प्रशस्त० कं० पृ० १० पं० ११–।

६ तत्त्वसं० पञ्जि० पृ० २११ पं० ८–।

"तत्र रूपं चक्षुर्ग्राह्यम् पृथिव्युदकज्वलनवृत्ति ××× । रसो रसनग्राह्यः पृथिव्युदकवृत्तिः ××× । गन्धो घ्राणग्राह्यः पृथिवीवृत्तिः"—इत्यादि गुणग्रन्थगतं समग्रं गुणनिरूपणमत्रावगन्तव्यं सविस्तरं विज्ञातुकामेन—प्रशस्त० कं० पृ० १०४-२८९ ।

[illegible]ग्राह्यः पृथिवीवृत्तिः। स्पर्शस्त्वगिन्द्रियग्राह्यः पृथिव्युदकज्वलनपवनवृत्तिः। रूपादेश्च गुणत्वे [illegible] चक्षुर्ग्राह्यत्वादिकं लक्षणमितरव्यवच्छेदकम्। एषां च मध्ये रूपस्य महत्त्वाद्युपेतद्रव्यसमवेतस्य शुक्लादेर्निरवयवस्य यदि ग्रहणमिष्यते तदा कुञ्चिकादिविवरवर्तिसूक्ष्मप्रदीपाद्यालोकोद्द्योतिताऽपवरकादिव्यवस्थितपृथुतरघटादिद्रव्यसमवेतशुक्लादिरूपाभिव्यक्तौ सकलस्यैव यावद्द्रव्यवर्तिन उपलब्धिः स्यात् निरवयवत्वात् न हि एकस्य तस्य अवयवा विद्यन्ते येन एकदेशाभिव्यक्तिर्भवेत्। एवं ५ गन्ध-रस-स्पर्शानामपि तदाधारैकदेशस्थानामभिव्यक्तौ यावद्द्रव्यभाविनामुपलब्धिप्रसङ्गः। अथ भवत्येव सकलस्य नीलादेरुपलब्धिः नैनु तेन आलोकादिना नीलादेरणुशो भेदाभ्युपगमे पृथिव्यादिपरमाणुद्रव्यवद् अणुपरिमाणयोगित्वेन गुणवत्त्वाद् द्रव्यताप्रसक्तिर्भवेत्। न चैवमपि गुणसंज्ञाकरणे कश्चिद् गुणः अविवादप्रसक्तेः। न च अणुत्वेऽपि आश्रितत्वाद् गुणत्वमुपपन्नम् सदसतोराश्रयानुपपत्तेः, अतिप्रसङ्गाच्च-अवयविद्रव्यस्यापि अवयवद्रव्याश्रितत्वाद् गुणत्वापत्तेः। १०

संख्यां तु एकादिव्यवहारहेतुः एकत्वादिलक्षणा परैरभ्युपगता। सा पुनः एकद्रव्या च अनेकाद्रव्या च। तत्र एकसंख्या एकद्रव्या, अनेकद्रव्या तु द्वित्वादिसंख्या। तत्र एकद्रव्यायाः सलिलादिपरमाण्वादिगतरूपादीनामिव नित्यानित्यत्वनिष्पत्तयः अनेकद्रव्यायास्तु एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिः अपेक्षाबुद्धिविनाशाद् विनाशः क्वचिद् आश्रयविनाशादिति। इयं च द्विविधाऽपि संख्या प्रत्यक्षत एव सिद्धा, विशेषबुद्धेश्च निमित्तान्तरापेक्षत्वाद् अनुमानतोऽपि सिद्धिः इति परे १५ मन्यन्ते। अत्र समुदायव्यावृत्तैकत्वादिसंज्ञाविषयपदार्थव्यतिरेकेण उपलब्धिलक्षणप्राप्तायाः संख्याय अनुपलब्धेरसत्त्वं शशविषाणवत्। न च विशेषणमसिद्धम् तस्या दृश्यत्वेन इष्टेः। तथा च सूत्रम्-[6]"संख्या-परिमाणानि पृथक्त्वम् संयोग-विभागौ परत्वाऽपरत्वे कर्म च रूपिसमवायाच्चाक्षुषाणि" [वैशेषिकद० ४-१-११] न च विशेषबुद्धितोऽनुमानतोऽपि संख्यासिद्धिः यतो यथा 'एको गुणः' 'बहवो गुणाः' इत्यादौ संख्यामन्तरेणापि एकादिबुद्धिस्तथा घटादिष्वपि असहायादिषु स्वेच्छाविर- २० चितैकत्वादिसंकेताहितमनस्कारप्रभवमेकादिज्ञानं भविष्यतीति किमेकादिसंख्यया? न च गुणेषु

---

१ "द्रव्ये महति नीलादिरेक एव यदीष्यते। रन्ध्रालोकेन तद्व्यक्तौ व्यक्तिर्दृष्टिश्च नास्य किम्?" ॥
—तत्त्वसं० का० ६३६ पृ० २११।

२ "तत्र च द्रव्ये यद्येकमेवानवयवं नीलादि चतुर्विधमिष्यते तदा सूक्ष्मेणापि कुञ्चिकादिविवरवर्तिना प्रदीपाद्यालोकेन त्वपवरकादिस्थितपृथुतरघटादिद्रव्यसमवेतस्य नीलादिरूपस्याभिव्यक्तौ सत्यां सकलस्यैव यावद्द्रव्यवर्तिनो रूपादेरभिव्यक्तिरुपलब्धिश्च प्राप्नोति निरवयवत्वात्"—तत्त्वसं० पञ्जि० पृ० २११ पं० १५-।

३ "न च देशविभागेन स्थितो नीलादिरिष्यते। व्यज्यते यस्तदा तेन तस्य भेदोऽणुशस्ततः" ॥
—तत्त्वसं० का० ६३७ पृ० २११।

४ "तत्र एकादिव्यवहारहेतुरेकत्वादिलक्षणा सङ्ख्या सा पुनरेकद्रव्या चानेकद्रव्या च" इत्यादि—तत्त्वसं० पञ्जि० पृ० २१२ पं० ४-।

"एकादिव्यवहारहेतुः संख्या। सा पुनरेकद्रव्या चानेकद्रव्या च। तत्रैकद्रव्यायाः सलिलादिपरमाणु-रूपादीनामिव नित्यानित्यत्वनिष्पत्तयः। अनेकद्रव्या तु द्वित्वादिका परार्धान्ता। तस्याः खलु एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिः अपेक्षाबुद्धिविनाशाद् विनाश इति"—प्रशस्त० कं० पृ० १११ पं० ३—।

५ "विशेषबुद्धेश्च निमित्तान्तरापेक्षत्वादनुमानतोऽपीति परो मन्यते"—तत्त्वसं० पञ्जि० पृ० २१२ पं० ८—।

६ संख्याः मु० वै० द० मू०। गू० वै० द०। " 'संख्याः' इति बहुवचनमेकत्वादिकाः सर्वा एव संख्याः संगृह्णाति" इति–गू० वै० द० पृ० १८२ पं० १३ उपस्कारवचनाद् मूलसूत्रस्थं बहुवचनमेवोचितं भाति"। पञ्जिकायां तु "संख्या-परिमाणानि" इत्यादिपाठः—पृ० २१२ पं० १५।

"अतद्रूपपरावृत्तगजादिव्यतिरेकिणी। न सङ्ख्या भासते ज्ञाने दृश्येष्टा नैव सास्ति तत्" ॥—तत्त्वसं० का० ६३८ पृ० २१२।

७ "इच्छारचितसंकेतमनस्कारान्वयं त्विदम्। घटेष्वेकादिविज्ञानं ज्ञानादाविव वर्तते ॥
अद्रव्यत्वान्न संख्यास्ति तेषु काचिद् विभेदिनी। तज्ज्ञानं नैव युक्तं तु भाक्तमस्खलितत्वतः" ॥
—तत्त्वसं० का० ६३९-६४० पृ० २१२।

संख्या संभवति अद्रव्यत्वात् तेषाम् संख्यायाश्च गुणत्वेन द्रव्याश्रितत्वात्। न च गुणेषु उपचरित-मेकत्वादि ज्ञानम् अस्खलद्वृत्तित्वात्। न च गुणेषु संख्यासद्भावे अनवस्थादिबाधकप्रमाणोपपत्ते-रुपचरितमेकत्वादिज्ञानम् घटादिष्वपि वृत्ति-विकल्पादेर्द्वित्वादिसंख्यायां बाधकस्य सद्भावात् तद्वि-ज्ञानस्य तथात्वप्रसक्तेः। न च वृत्ति-विकल्पादेर्बाधकस्य अबाधकत्वम् तस्य निरस्तत्वात्। न च
५ क्वचिद् मुख्यसंख्याभावे गौणप्रत्ययस्य तद्विषयस्याऽभाव इति घटादौ मुख्यसंख्यायोगोऽभ्युपगन्तव्य इति वाच्यम्, मुख्यपूर्वकत्वेन गौणप्रत्ययस्य एवंविधे विषये बौद्धं प्रति क्वचिदपि असिद्धेः न हि गवादिष्वपि 'गौः' इति ज्ञानं पारमार्थिकगोत्वनिबन्धनतया मुख्यं सिद्धम् नापि वाहीके तद् ज्ञानं वस्तुभूतगोत्वाध्यारोपाद् उपचरितम्। किञ्च, यथा वाहीके गौरिव अयम् न तु गौरेव साम्नाद्य-भावात् स्खलति प्रत्ययः इति गौणः न एवम् एक इव एको गुणः न तु एक एव इति प्रत्ययः किन्तु
१० यादृशी घटादिषु अस्खलिता बुद्धिर्भवति तादृशी गुणादिष्वपि। अथ न सादृश्यापेक्षमेतद् ज्ञानम् किन्तु यत् तदाश्रयभूतं द्रव्यं तद्गतैकत्वादिसंख्यातः गुणादीनां तदेकार्थसमवायात्, नन्वेवम् 'एक-स्मिन् द्रव्ये रूपादयो बहवो गुणाः' इति ज्ञानोत्पत्तिर्न स्यात् तदाश्रयद्रव्ये बहुत्वसंख्याया अभावात्। 'षट् पदार्थाः' 'सुख-दुःखे' 'इच्छा-द्वेषौ' 'पञ्चविधं कर्म' 'परमपरं च द्विविधं सामान्यम्' 'एको भावः' 'एकः समवायः' इति व्यपदेशेषु च किं निमित्तमिति वक्तव्यम्, न ह्यत्र एकार्थसमवायिनी
१५ संख्या विद्यते इति अव्यापिनी इयमपि कल्पना न युक्तिसंगता। भवतु वा एकार्थसमवायाद् अन्यतो वा स्वप्रकल्पिताद् हेतोरयं प्रत्ययस्तथापि गुणादिगतमुख्यसंख्याऽभावतः स्खलद्वृत्तिः स्यात् माणवके सिंहप्रत्ययवत्, न चैवमुपलभ्यते इति संकेतमात्रनिबन्धन एव सर्वत्र अभ्युपगन्तव्यः। यदपि 'गज-तुरग-स्यन्दनादिव्यतिरिक्तनिमित्तप्रभवः सेनाप्रत्ययः, गजादिप्रत्ययविलक्षणत्वात्, वस्त्र-चर्म-कम्बलेषु नीलप्रत्ययवत्' इति संख्यासिद्धये यद् अविद्धकर्णोक्तं प्रमाणम्, तदप्ययुक्तम्; गजादि-
२० व्यतिरिक्तसंकेतादिप्रभवत्वेन इष्टत्वात् सिद्धसाध्यतादोषाघ्रातत्वात्। अथ विशिष्टसंख्यानिमित्त-प्रभवत्वमस्य साध्यत्वेन अभिप्रेतम् तदा अनैकान्तिको हेतुः बुद्ध्यादौ 'एका बुद्धिः' इत्यादिविशिष्ट-प्रत्ययस्य संख्यामन्तरेणापि भावात्। 'अनेकद्रव्या च द्वित्वादिसंख्या, एकत्वेभ्योऽनेकविषयैकबुद्धि-सहितेभ्य उत्पद्यते' इत्यभ्युपगमश्च अनुपपन्नः, संकेताभोगमात्रेण संख्येयेषु 'द्वे' 'त्रीणि द्रव्याणि'

१–संख्यायाः वा–वा० बा०।

२ मुख्यसंख्याऽभावे गौणप्रत्ययस्य तद्विषयस्य भाव इति–भां० मां०। मुख्यपूर्वकत्वेन संख्याभावे गौणप्रत्ययस्य तद्विषयस्याभाव इति–आ० हा० वि०।

३ "न हि यथा वाहीको गौरिति स्खलति प्रत्ययः गौरिव गौर्नतु गौरेव साम्नाद्यभावादिति न तथायं स्खलति एकमिवैकं ज्ञानादि न त्वेकमेवेति किं तर्हि यादृशी घटादिष्वस्खलिता बुद्धिर्भवति तादृशी ज्ञानादिष्वपि"—तत्त्वसं० पञ्जि० पृ० २१२ पं० २७—।

४ मुख्यसि–बृ० विना।

५ "तद्द्रव्यसमवेताच्चेदेकत्वात् परिकल्प्यते। गुणादिष्वेकविज्ञानमेकार्थसमवायतः"॥

—तत्त्वसं० का० ६४१ पृ० २१३।

६ "अस्तु नामैवमेकत्र ज्ञाने व्याप्ति(त्र्यादि)मतिस्तु कम्। एतेष्वपेक्षते हेतुं षट्पदार्थादिकेषु वा॥
एकार्थसमवायादेर्गौणोऽयं प्रत्ययो भवन्। तथा च स्खलितो यस्मान्माणवेऽनलबुद्धिवत्"॥

—तत्त्वसं० का० ६४२–६४३ पृ० २१३।

७ "गजादीत्यादिना अविद्धकर्णोक्तं संख्यासिद्धये प्रमाणमाशङ्कते—
गजादिप्रत्ययेभ्यश्च वैलक्षण्यात् प्रसाध्यते। संख्याबुद्धिस्तदन्योत्था नीलवस्त्रादिबुद्धिवत्"—

—तत्त्वसं० का० ६४४ पृ० २१३।

८ "इच्छारचितसंकेतमनस्कारादुपायतः। तत्रेष्टसिद्धिर्बुद्ध्यादौ संख्यैतेनैव वा भवेत्"॥

—तत्त्वसं० का० ६४५ पृ० २१४।

९ "बुद्ध्यपेक्षा च संख्याया निष्पत्तिर्यदि वर्ण्यते। संकेताभोगमात्रेण तद्बुद्धिः किं न संमता"॥

—तत्त्वसं० का० ६४६ पृ० २१४।

द्वित्वादिबुद्धेरुपपत्तेः तथापि अदृष्टसामर्थ्यस्य अन्यस्य तद्धेतुत्वकल्पने हेत्वनवस्थाप्रसक्तिः । किञ्च, अपेक्षाबुद्ध्यन्वय-व्यतिरेकानुविधायित्वे द्वित्वादिप्रत्ययस्य द्व्यादिसंख्याप्रभवत्वाभ्युपगमे तद्धेतुभूतसंख्याया एकस्या अनेकवृत्तित्वमभ्युपगतं भवति, तच्च प्रमाणबाधितमिति असकृद् आवेदितम् । अतोऽपेक्षाबुद्धिरेव द्व्यादिबुद्धिनिमित्तभूता वरमभ्युपगन्तव्येति स्थितम् ।

"परि[2]माणव्यवहारकारणं परिमाणं महद् अणु दीर्घम् ह्रस्वमिति चतुर्विधम्" [ ] इति परैरभ्युपगतम् । "तत्र महद् द्विविधम्-नित्यम् अनित्यं च । नित्यम् आकाश-काल-दिगात्मसु परममहत्त्वम्, अनित्यम् त्र्यणुकादिषु द्रव्येषु । अणु अपि नित्याऽनित्यभेदात् द्विविधम्-परमाणुमनस्सु पारिमाण्डल्यलक्षणं नित्यम्, अनित्यं द्व्यणुक एव । कुवलाऽऽ-मलक-बिल्वादिषु तु महत्स्वपि तत्प्रकर्षाभावमपेक्ष्य भाक्तोऽणुव्यवहारः । तथाहि-यादृशं बिल्वे महत् परिमाणम् तादृशं न आमलके यादृशं च तत् तत्र न तादृशं कुवल इति । ननु महद्-दीर्घयोस्त्र्यणुकादिषु वर्तमानयोः द्व्यणुके च अणुत्व-ह्रस्वत्वयोः को विशेषः? महत्सु 'दीर्घमानीयताम्' दीर्घेषु 'महद् आनीयताम्' इति व्यवहारभेदप्रतीतेरस्ति तयोः परस्परतो भेदः । अणुत्व-ह्रस्वत्वयोस्तु विशेषो योगिनां तद्दर्शिनामध्यक्ष एव" [ ] महदादि च परिमाणं रूपादिभ्योऽर्थान्तरम्, तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वात्, सुखादिवत् । अत्र यदि 'रूपादिविषयेन्द्रियबुद्धिविलक्षणबुद्धिग्राह्यत्वात्' इति हेत्वर्थस्तदा हेतुरसिद्धः तथाव्यवस्थितरूपादिव्यतिरेकेण महदादिपरिमाणस्य अध्यक्षप्रत्ययग्राह्यत्वेन असंवेदनात् । अथ ''अणु' 'महत्' इत्याकारतत्प्रत्ययविलक्षणकल्पनाबुद्धिग्राह्यत्वात्' इति हेतुस्तदा विपर्यये बाधकप्रमाणाभावाद् अनैकान्तिकः । न ह्यस्याः किञ्चिदपि परमार्थतो ग्राह्यमस्ति कल्पनाबुद्धित्वात् । एकदिग्मुखादिप्रवृत्तेषु विशिष्टरूपादिषु उपलब्धेषु तद्विलक्षणरूपादिभेदप्रकाशनाय समयवशात् 'महत्' इत्यादि अध्यवस्यन्ती बुद्धिः प्रवर्तते इति नातो वस्तुव्यवस्था । न च रूपादिव्यतिरिक्तं ग्राह्यमप्यस्या अस्तीति असिद्धता हेतोः । प्रत्यक्षबाधा च प्रतिज्ञायाः अध्यक्षत्वेन अभ्युपगतस्य महदादे रूपादिव्यतिरेकेण अनुपलब्धेः । ततो दृष्टे स्पृष्टे वा एकदिङ्मुखप्रवृत्ते रूपादौ भूयसि अतद्रूपपरावृत्ते 'दीर्घम्' इति व्यवहारः प्रवर्तते परिमाणाभावेऽपि तदपेक्षया चाल्पीयसि रूपादौ समुत्पन्ने 'ह्रस्वम्' इति व्यवहारः । एवं महदादौ अपि योज्यम् । एकाऽनेकविकल्पाभ्यां रूपादिवद् महदाद्यनुपपत्तेश्च अभावः । अविद्यमानेऽपि महदादौ भवत्प्रकल्पिते प्रासादमालादिषु महदादिप्रत्ययप्रादुर्भूतेरनुभवाद्

---

१ "एवं ह्यदृष्टसामर्थ्यस्य हेतुत्वं न कल्पितं स्यादन्यथा हि हेतूनामनवस्था भवेत्"—तत्त्वसं० पञ्जि० पृ० २१४ पं० १६ ।

२ "महद्दीर्घादिभेदेन परिमाणं यदुच्यते । तदप्यर्थे तथारूपभेदादेव न किं मतम्?" ॥—तत्त्वसं० का० ६४७ पृ० २१४ ।

"परिमाणं मानव्यवहारकारणम् । तच्चतुर्विधम् अणु महद् दीर्घं ह्रस्वं चेति । तत्र महद् द्विविधम् नित्यमनित्यं च । नित्यमाकाशकालदिगात्मसु परममहत्त्वम् अनित्यं त्र्यणुकादावेव । तथा चाण्वपि द्विविधम् नित्यमनित्यं च । नित्यं परमाणुमनस्सु तत् पारिमाण्डल्यम् । अनित्यं द्व्यणुक एव"—प्रशस्त० कं० पृ० १३० पं० २०— ।

३ "कुवलयामलकबिल्वादिषु महत्स्वपि तत्प्रकर्षभावाभावमपेक्ष्य भाक्तोऽणुत्वव्यवहारः"—प्रशस्त० कं० पृ० १३० पं० २५ ।

"कुवलामलबिल्वादिषु च महत्स्वपि तत्प्रकर्षाभावमपेक्ष्य भाक्तोऽयं व्यवहारः"—तत्त्वसं० पञ्जि० पृ० २१५ पं० १ ।

"अनित्यमणुपरिमाणं द्व्यणुक एवेत्ययुक्तम् कुवलयामलकबिल्वादिषु परस्परापेक्षयाणुव्यवहारदर्शनादत आह–कुवलयामलकबिल्वादिष्विति । बिल्वे यः प्रकर्षभावो महत्परिमाणातिशययोगित्वं तस्यामलकेऽभावमपेक्ष्याणुव्यवहारो भाक्तः । उभाभ्यां भज्यते इति भक्तिः सादृश्यं तस्यायमिति भाक्तः सादृश्यमात्रनिबन्धनो गौण इत्यर्थः एवमामलकपरिमाणातिशयाभावं कुवलयेऽपेक्ष्याणुव्यवहारः । यत्र हि मुख्यमणुत्वं द्व्यणुके तत्र महत्परिमाणस्याभावो दृष्टः आमलकेऽपि यादृशं बिल्वे महत्परिमाणं तादृशं नास्तीत्येतावता साधर्म्येणोपचारप्रवृत्तिः"—प्रशस्त० कं० पृ० १३४ पं० १— ।

४ "दीर्घा प्रासादमालेति महती वेद्यते यथा । न हि तत्र यथारूपं परिमाणं प्रकल्पितम् ॥
एकार्थसमवायेन तथा चेद् व्यपदिश्यते । न महत्त्वं न दैर्घ्यं च धामस्वस्ति विवक्षितम्" ॥—तत्त्वसं० का० ६४८–६४९ पृ० २१५ ।

अनैकान्तिकश्च हेतुः । न च यत्रैव प्रासादादौ समवेतो मालाख्यो गुणः तत्रैव महत्त्वादिकमपीत्येकार्थसमवायवशात् 'महती प्रासादमाला' इति प्रत्ययोत्पत्तेर्न अनैकान्तिकत्वम्, स्वसमयविरोधात् । तथाहि—न[1] प्रासादो भवद्भिरवयविद्रव्यमभ्युपगम्यते विजातीयानां[2] द्रव्यानारम्भात् किं तर्हि? संयोगात्मको[3] गुणः । न च गुणः परिमाणवान् "निर्गुणा गुणाः[4]" [ ] इति वचनात् ।
५ ततो मालाख्यस्य गुणस्य प्रासादादिष्वभावात् 'प्रासादमाला' इत्ययमेव प्रत्ययस्तावद् अयुक्तः—दूरत एव 'सा महती ह्रस्वा वा' इत्यादिप्रत्ययव्यपदेशासंभवो मालायाः संख्यात्वेन प्रासादादीनां च संयोगत्वेन महत्त्वादेश्च परिमाणत्वेन परैरभ्युपगमात् त्रयाणामपि गुणत्वाद् गुणेषु च गुणासंभवात् 'महती प्रासादमाला' इति नैकार्थसमवायात् प्रत्ययोत्पत्तिः । अथापि अवयविस्वभावा माला इष्यते तथापि द्रव्यस्य द्रव्याश्रयत्वान्न मालायाः संयोगस्वरूपप्रासादाश्रयत्वं युक्तम् । अथ[5] माला जाति-
१० स्वभावा अभ्युपगम्यते तथापि जातेः प्रत्याश्रयं परिसमाप्तत्वात् एकस्मिन्नपि प्रासादे 'माला' इति प्रत्ययोत्पत्तिर्भवेत् । 'एका प्रासादमाला महती दीर्घा ह्रस्वा वा' इत्यादिप्रत्ययानुपपत्तिस्तदवस्थैव स्यात् मालायाम् तदाश्रये च प्रासादादौ एकत्वादेर्गुणस्य असंभवात् काष्ठादिषु च प्रासादाश्रयेषु विवक्षितदीर्घाद्ययोगात् बह्वीषु[6] च प्रासादमालासु 'माला' 'माला' इति अनुगतप्रत्ययोत्पत्तिर्न स्यात् जातावपरजातेरनुपपत्तेः । न च तदाश्रयजातिनिबन्धन औपचारिकोऽयं प्रत्ययोऽस्खलद्वृत्तित्वात् ।
१५ न हि मुख्यप्रत्ययाऽविशिष्टो[7] गौणो युक्तोऽतिप्रसङ्गात् । अत एव मालादिषु महत्त्वादिप्रत्ययोऽपि नौपचारिकः । उक्तं च—

"मालादौ च महत्त्वादिरिष्टो यश्चौपचारिकः ।
मुख्याऽविशिष्टविज्ञानग्राह्यत्वान्नौपचारिकः" ॥ [ ] इति ।

तन्न परिमाणं रूपादिषु पृथग् गुण इति स्थितम् ।

२० संयुक्तमपि[8] द्रव्यं यद्वशात् 'अत्रेदं पृथक्' इत्यपोद्ध्रियते तदपोद्धारव्यवहारकारणं पृथक्त्वं नाम गुणः इति काणादाः 'घटादिभ्योऽर्थान्तरम्, तत्प्रत्ययविलक्षणज्ञानग्राह्यत्वात्, सुखादिवत्' इति

---

१ "प्रासादश्चेष्यते योगो गुणः सोऽपरिमाणवान् । न तस्मात्त्वपरा माला नोपचारस्य चाश्रयः" ॥—तत्त्वसं० का० ६५० पृ० २१६ ।

२ "विजातीयद्रव्यानारम्भात्"—तत्त्वसं० पञ्जि० पृ० २१६ पं० ९ । "विजातीयानां द्रव्यानारम्भकत्वात्"—प्रमेयक० पृ० १७८ प्र० पं० १४ ।

३ "स च गुणः परिमाणवान्न भवति "निर्गुणा गुणाः" इति समयात्"—तत्त्वसं० पञ्जि० पृ० २१६ पं० १० ।
"न च गुणः परिमाणवान् निर्गुणा गुणा इत्यभिधानात्"—प्रमेयक० पृ० १७८ प्र० पं० १४ ।

४ "द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्"—वैशेषिकद० १-१-१६ ।
"रूपादीनां गुणानां सर्वेषां गुणत्वाभिसंबन्धो द्रव्याश्रितत्वं निर्गुणत्वम् निष्क्रियत्वम्"—प्रशस्त० कं० पृ० ९४ पं० ६ ।
"अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः"—न्यायसि० मु० का० ८६ ।
"द्रव्याश्रया निर्गुणा गुणाः"—तत्त्वार्थसू० ५-४० ।

५ "अथ जातिस्वभावा मालाऽङ्गीक्रियते एवमपि जातेस्सर्वात्मना प्रत्याश्रयपरिसमाप्तत्वादेकोऽपि प्रासादो मालेत्युच्येत वृक्षवत् । यथोक्तम्—गेहो यद्यपि संयोगस्तन्माला किन्नु तद् भवेत् । जातिश्चेद् गेह एकोऽपि मालेत्युच्येत वृक्षवत्" ॥—तत्त्वसं० पञ्जि० पृ० २१६ पं० १४— ।

६ "बह्वीषु च प्रासादमालासु माला माला इत्यनुगामी व्यपदेशो न स्यात् जातेरजातितः । यदाह—मालाबहुले तच्छब्दः कथं जातेरजातितः"—तत्त्वसं० पञ्जि० पृ० २१६ पं० १९— ।

७ "नहि मुख्यप्रत्ययाविशिष्टो गौणो युक्तोऽतिप्रसङ्गात् यदाह—
मालादौ च महत्त्वादिरिष्टो यश्चौपचारिकः । मुख्याविशिष्टविज्ञानग्राह्यत्वान्नौपचारिकः" ॥
—तत्त्वसं० पञ्जि० पृ० २१६ पं० २३— ।

८ "तत्र इदमस्मात् पृथगिति यद्वशात् संयुक्तमपि द्रव्यमपोद्ध्रियते तदपोद्धारकारणं पृथक्त्वं नाम, तच्च घटादिभ्योऽर्थान्तरं तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वादिति पूर्ववत् परस्याभिप्रायः"—तत्त्वसं० पञ्जि० पृ० २१६ पं० २६— ।

अवस्थिताः । अत्र तावद् हेतोरसिद्धता, परस्परस्वरूपव्यावृत्तरूपादिव्यतिरेकेण अर्थान्तरभूतस्य पृथक्त्वगुणस्य अध्यक्षे अप्रतिभासनेन घटादिविलक्षणज्ञानग्राह्यत्वस्यासिद्धेः । अत एव उपलब्धिलक्षणप्राप्तत्वेन अभ्युपगतस्य तस्य अनुपलम्भाद् असत्त्वम् । न च 'पृथक्' इति विकल्पप्रत्ययावसेयत्वेन तस्य सत्त्वम् सजातीय-विजातीयव्यावृत्तरूपाद्यनुभवनिबन्धनत्वात् तत्प्रत्ययस्य । व्यावृत्तता च भावानां स्वस्वभावव्यवस्थितेः अन्यथा स्वत एव अव्यावृत्तरूपाणां पृथक्त्वादिवशात् तेषां पृथग्रूपता॰सिद्धेः पृथक्त्वादेर्भिन्नाऽभिन्नपृथग्रूपभावकरणे अकिञ्चित्करत्वात्-भेदपक्षे संबन्धासिद्धेः, अभेदपक्षे तु पृथग्रूपस्य भावस्यैव उत्पत्तेरर्थान्तरभूतपृथक्त्वगुणकल्पनावैयर्थ्यात् तत एव 'पृथक्' व्यवहारसिद्धेर्हेतोरनैकान्तिकत्वम् । किञ्च, [1]यथा परस्परव्यावृत्तात्मतया सुख-दुःखादिगुणेषु 'पृथक्' इति प्रत्ययविषयता पृथक्त्वगुणाभावेऽपि-गुणेषु गुणासंभवात्-तथा घटादिष्वपि भविष्यतीति हेतोरनैकान्तिकता परिस्फुटैव । न च गुणेषु 'पृथक्' इति प्रत्ययो भाक्तः मुख्य- १० प्रत्ययाऽविशिष्टत्वात् । 'पृथक्' इत्यपोद्धारव्यवहारस्य स्वरूपविभिन्नपदार्थनिबन्धनत्वात् परोपन्यस्तानुमाने प्रतिज्ञाया अनुमानबाधा । तथा च प्रयोगः—ये परस्परव्यावृत्तात्मानः ते स्वव्यतिरिक्तपृथक्त्वानाधाराः, यथा सुखादयः, परस्परव्यावृत्तात्मानश्च घटादयः इति स्वभावहेतुः । एकस्य अनेकवृत्त्यनुपपत्तिः संबन्धाभावश्च समवायस्य प्रतिषेत्स्यमानत्वात् सुखादिषु तद्व्यवहाराभावप्रसक्तिश्च विपर्यये बाधकं प्रमाणम् । तन्न पृथक्त्वं गुणः तत्साधकप्रमाणाभावाद् बाधकोपपत्तेश्चेति १५ व्यवस्थितम् ।

[3]अप्राप्तिपूर्विका प्राप्तिः संयोगः प्राप्तिपूर्विका च अप्राप्तिर्विभागः । एतौ च द्रव्येषु यथाक्रमं 'संयुक्त'-'विभक्त'-प्रत्ययहेतू अन्यतरोभयकर्मजौ संयोग-विभागजौ च यथाक्रमम् । न च संयोग-विभागयोः सत्त्वप्रतिपादकप्रमाणाविषयत्वात् सद्व्यवहाराविषयता शशविषाणवत् इति वाच्यम्, [4]"संयोगस्य द्रव्ययोर्विशेषणत्वेन अध्यक्षतः प्रतीयमानत्वात् । तथाहि-कश्चित् केनचित् 'संयुक्ते द्रव्ये २० आहर' इत्युक्तो ययोरेव द्रव्ययोः संयोगमुपलभ्य(भ)ते ते एव आहरति न द्रव्यमात्रम् अन्यथा हि यत्

---

१ "अपोद्धारव्यवहृतिः पृथक्त्वाद् या तु कल्प्यते । कारणात् सा विभिन्नात्मभावनिष्ठा न किंमता" ? ॥
—तत्त्वसं० का० ६५१ पृ० २१७ ।

२ "परस्परविभिन्ना हि यथा बुद्धि-सुखादयः । पृथग्वाच्यास्तदङ्गं च विनाऽन्येन तथाऽपरे" ॥—तत्त्वसं० का० ६५२ पृ० २१७ ।

३ "यौ संयोगविभागौ च द्रव्येषु नियतौ परैः । संयुक्तादिधियो हेतू कल्पितौ तावनर्थकौ" ॥—तत्त्वसं० का० ६५३ पृ० २१८ ।

४ "संयुक्ते आहरेत्युक्ते संयोगं प्रेक्षते ययोः । तदन्यपरिहारेण ते एवाहरति ध्रुवम्" ॥—तत्त्वसं० का० ६५७ पृ० २१८ ।

५ "तथाहि—कश्चित् केनचित् संयुक्ते द्रव्ये आहरेत्युक्ते ययोरेव द्रव्ययोः संयोगमुपलभते ते एव आहरति न द्रव्यमात्रम्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २१८ पं० २३—।

संयोगसमर्थनपरमेतद् उद्द्योतकरमतं न्यायवार्तिके इत्थमुपलभ्यते—

"विशेषणभावाच्चार्थान्तरं संयोगः—संयुक्ते द्रव्ये आहरेत्युक्ते ययोर्द्रव्ययोः संयोगं पश्यति ते इतरेभ्यो विशिष्य संयुक्ते आहरति । × × × यदि चार्थान्तरं संयोगो न स्यात् क्षेत्रोदकबीजात्मीन्धनादीनि सर्वत्रावस्थितानि सर्वत्राङ्कुरपाकादिकार्यं कुर्युः तान्येव तानीति । तस्माद् यस्तैरपेक्ष्यते सोऽर्थोऽन्यस्तस्मिन् संयोग इति संज्ञेति । क्षेत्रोदकबीजात्मीन्धनानि अङ्कुरपाकादिकार्योत्पत्तौ सापेक्षाणि सर्वदा तत्कार्यानारम्भाद् दण्डादिवत्-यथा दण्डाद्यनेकं कारणं संयोगादिनिमित्तान्तरापेक्षं सर्वदा न घट-पटादिकार्यं करोति तथा बीजाद्यपि तस्मात् तदपि सापेक्षम् । × × × सान्तरनिरन्तरबुद्ध्योश्च निमित्तं वक्तव्यम् । यदि संयोगं विभागं निमित्तान्तरं न प्रतिपद्यसे सान्तरमितिबुद्धेर्निरन्तरमिति च बुद्धेर्भेदहेतुर्वक्तव्यः । न हि निमित्तभेदमन्तरेण बुद्धीनां भेदो दृष्टो रूपादिवदिति-या चेयमचलति चलतीति बुद्धिर्या असंयुक्ते संयुक्तमिति अविभक्ते विभक्तमिति च सा च प्रधानमन्तरेण न भवति । सर्वा एता मिथ्याबुद्धयः प्रधानानुकारेण भवन्तीति प्रधानं वक्तव्यम् । न हि निष्प्रधानं भाक्तं दृष्टम् स्थाणु-पुरुषवदिति । यथा स्थाणौ सति पुरुषे स्थाणुरिति बुद्धिः पुरुषे वाऽसति स्थाणौ पुरुषबुद्धिरिति । यदि चार्थान्तरं संयोगो न स्यात् कुण्डलीत्यस्या बुद्धेः किञ्चिन्निमित्तमवश्यं विधीयमानं प्रतिषिध्यमानं वा निमित्तान्तर-

किञ्चिद् आहरेत्। एतद् विभागसाधनेऽपि विपर्ययेण सर्वं समानम् । किञ्च, यदि अर्थान्तरभूतौ संयोग-विभागौ वस्तुनो न स्याताम् तदा वस्तुमात्रनिबन्धनौ 'सान्तरमिदम्' 'निरन्तरम्' इति च प्रत्ययौ नोत्पद्येयाताम् न हि विशेषप्रत्ययौ वस्तुविशेषमन्तरेण संभविनौ सर्वदा सर्वत्र भावप्रसङ्गात्। अपि[2] च, दूरदेशवर्तिनः प्रमातुः सान्तरावस्थितेऽपि धव-खदिरादौ निरन्तरावसायिनी बुद्धिर्योत्पद्यते ५ यां च शाखिशिखरावसक्ते बलाकादौ सान्तरत्वाध्यवसायिनी समुपजायते; द्विविधाऽपि इयम् 'अतस्मिंस्तत्' इति प्रवृत्तेर्मिथ्याबुद्धिः। न च असौ मुख्यपदार्थानुभवमन्तरेण क्वचिद् उपजायमाना संलक्ष्यते न हि अननुभूतरजतस्य शुक्तिकायाम् 'रजतम्' इति विभ्रमः इति कश्चित् मुख्यो भावो विभ्रमधियो निमित्तमभ्युपगन्तव्यः; तदभ्युपगमे च संयोग-विभागसिद्धिः तद्व्यतिरेकेण अन्यस्य एतद्बुद्धेर्निबन्धनस्य असंभवात्। तथा, 'कुण्डली देवदत्तः' इति मतिः किंनिबन्धना उपजायते इति १० वक्तव्यम् । न पुरुष-कुण्डलमात्रनिबन्धना, सर्वदा तयोस्तस्या उत्पत्तिप्रसङ्गात् । अपि च, यदेव क्वचित् केनचित् उपलब्धं सत्त्वेन; तस्यैव अन्यत्र विधिः प्रतिषेधो वा दृष्टः । यदि च संयोगो न कदाचिद् उपलब्धः कथं विभागेन अस्य 'चैत्रोऽकुण्डलः कुण्डली वा' इत्येवं प्रतिषेधः विधिश्च

मुपादेयम् । न तावत् कुण्डलनिमित्ता नापि देवदत्तनिमित्ता । न च भवता निमित्तान्तरं प्रतिपाद्यते, निमित्तान्तरं चान्तरेण यथा कथंचिद् व्यवस्थिताभ्यां देवदत्त-कुण्डलाभ्यां कुण्डलीति बुद्धया भवितव्यम् । तस्मादवश्यं विधीयमानं प्रतिषिध्यमानं वा निमित्तान्तरमभ्युपगन्तव्यम् । यदि प्रतिषिध्यमानं यदन्यत्र भवति तदन्यत्र प्रतिषिध्यत इति प्रतिषिध्यमानस्य विषयो वक्तव्यः। तस्मान्न कथञ्चन संयोगः प्रतिषेद्धुं शक्यते । इहबुद्धिनिमित्तत्वाच्च–इयमिहबुद्धिः प्रवर्तमाना नर्ते संबन्धात् प्रवर्तते–यथेह कुण्डे बदराणीति–नेयं बदरमात्रनिमित्ता न कुण्डमात्रनिमित्तेति । यदस्या निमित्तं स संयोग इति । × × × तस्माद् उपपन्नमर्थान्तरं संयोग इति"—पृ० २१९ पं० १–पृ० २२५ पं० १ ।

प्रमेयकमलमार्तण्डे तु तत् तन्मतमित्थं वर्तते—

"ननु संयोगो नामार्थान्तरं न स्यात् तदा क्षेत्रे बीजादयो निर्विशिष्टत्वात् सर्वदैवाङ्कुरादिकार्यं कुर्युः न चैवम् तस्मात् सर्वदा कार्यानारम्भात् तेऽङ्कुरादिकार्योत्पत्तौ कारणान्तरसापेक्षा यथा मृत्पिण्डदण्डादयो घटकरणे कुम्भकारादिसापेक्षाः योऽसावपेक्ष्यः स संयोग इति । किञ्च, द्रव्ययोर्विशेषणभावेनाध्यक्षत एवासौ प्रतीयते । तथाहि—कश्चित् केनचित् संयुक्ते द्रव्ये आहरेत्युक्ते ययोरेव द्रव्ययोः संयोगमुपलभते ते एवाहरति न द्रव्यमात्रम् । किञ्च, कुण्डली देवदत्त इत्यादि मतिरुपजायमाना किंनिबन्धनेति अभिधातव्यम् ? न तावत् पुरुषकुण्डलमात्रनिबन्धना सर्वदा तस्याः सद्भावप्रसङ्गात् । किञ्च, यदेव केनचित् क्वचिदुपलब्धसत्त्वं तस्यैवान्यत्र विधिप्रतिषेधमुखेन लोके व्यवहारप्रवृत्तिर्दृष्टा । यदि तु संयोगो न कदाचिदुपलब्धस्तत् कथमस्य चैत्रोऽकुण्डली कुण्डली नेत्येवं विभागेन व्यवहारो भवेत्। चैत्रोऽकुण्डलीत्यत्र हि न कुण्डलं चैत्रो वा प्रतिषिध्यते देशादिभेदेनानयोः सतोः प्रतिषेधायोगात् । तस्माच्चैत्रस्य कुण्डलसंयोगः प्रतिषिध्यते । तथा चैत्रः कुण्डलीत्यनेनापि विधिवाक्येन चैत्र-कुण्डलयोर्नान्यतरस्य विधानं तयोः सिद्धत्वात् । पारिशेष्यात् संयोगस्यैव विधिर्ज्ञायते इत्यप्युद्योतकरस्य मनोरथमात्रम्"—पृ० १८५ द्वि० पं० १०—पृ० १८६ प्र० पं० २ ।

तत्त्वसंग्रहे त्वेतदुद्द्योतकरमतं समग्रं वर्तते परंतु न प्रस्तुतटीकाक्रमेण अत एव यत्र यत्र तत्त्वसंग्रहानुसारिणी टीका समायाता तत्र तत्र तास्ताः कारिकाः क्रमव्यत्यासेनापि उद्धृताः ।

१ निरन्तरमिदं वस्तु सान्तरं चेदमित्ययम् । बुद्धिभेदश्च केनैष विद्यते तौ च चेदिह" ॥—तत्त्वसं० का० ६५८ पृ० २१८ ।

२ "या चेयं सान्तरे बुद्धिर्नैरन्तर्यावसायिनी । निरन्तरेऽपि या चान्या मिथ्याबुद्धिरियं द्विधा ॥
मिथ्याबुद्धिश्च सर्वैव प्रधानार्थानुकारिणी । प्रधानं चेह वक्तव्यं तदुक्तौ तौ च सिद्धयतः" ॥—तत्त्वसं० का० ६५९–६६० पृ० २१९ ।

३ "या चेयमीषत्तरुशिखरावलग्ने बलाकादौ निरन्तरेऽपि सान्तरत्वमिवावस्यन्ती जायतेऽन्या"—तत्त्वसं० पञ्जि० पृ० २१९ पं० ९– ।

४ "कुण्डलीति मतिश्चेयं किंनिमित्तोपजायते । नरकुण्डलभावान्नो सर्वदा तत्प्रसङ्गतः ॥
अन्यत्र दृष्टभावस्य निषेधोऽन्यत्र युज्यते । संयोगश्च भवेद् दृष्टः स कथं प्रतिषिध्यते ? ॥
चैत्रोऽकुण्डल इत्येवं तस्मादस्त्येव वास्तवः । यन्निषेधविधानादि विभागेन प्रवर्तते" ॥—तत्त्वसं० का० ६६१–६६३ पृ० २१९ ।

भवेत् ? यतः 'अकुण्डलश्चैत्रः' इति न कुण्डलं प्रतिषिध्यते तस्य अन्यदेशादौ विद्यमानस्य प्रतिषेद्धुमशक्यत्वात्, अत एव न चैत्रः ततश्चैत्रस्य कुण्डलसंयोगः प्रतिषिध्यते । एवं 'कुण्डली चैत्रः' इत्यत्रापि चैत्र-कुण्डलयोर्नान्यतरस्य विधिः तयोः सिद्धत्वात् । ततः पारिशेष्याद् अप्रतीतस्य तत्-संयोगस्यैव विधिरिति संयोगादिर्वास्तवः समस्त्येव यद्वशाद् विभक्तविधि-प्रतिषेधप्रवृत्तिः 'चैत्रः कुण्डली' इत्यादिप्रयोगेषु । किञ्च, यदि संयोगः अर्थान्तरं न भवेत् तदा बीजादयः—अविशिष्टत्वात्[५] —सर्वदैव स्वकार्यमङ्कुरादिकं विदध्युः न चैवम् सर्वदा तेषां कार्यानारम्भात्; अतो बीजादयः स्वकार्य-निर्वर्तने कारणान्तरसव्यपेक्षाः मृत्पिण्ड-दण्ड-चक्र-सूत्रादय इव घटादिकरणे; योऽसौ अपेक्ष्यः स संयोगः" [ ] इति उद्द्योतकरः ।

अत्र प्रतिविधीयते-यत् तावदुक्तम् 'पदार्थविशेषणभावेन संयोगोऽध्यक्षतः प्रतीयते' इति, तदयुक्तम्; यतः न संयुक्तपदार्थार्थान्तरभूतः संयोगः कदाचित् प्रतिपत्तुर्दर्शनपथमवतरति, न १० तद्दर्शनाद् विशिष्टे द्रव्येऽसावाहरति किं तर्हि ? प्राग्भाविसान्तरावस्थानो विशिष्टे निरन्तरावस्थे ये समुत्पन्ने वस्तुनी; ते एव 'संयुक्त'प्रत्ययविषये तच्छब्दवाच्ये, अवस्थाविशेषे संकेतितत्वात् 'संयुक्त'-शब्दस्य । ततो यत्र तथाविधे वस्तुनी 'संयोग'शब्दविषयतामुपगते निश्चिनोति तत्र ते एव आहरति नान्ये न हि प्रेक्षावान् शब्दात् तदप्रेरिते अर्थे प्रवृत्तिमारचयति । वस्त्वन्तरमेव च तथा तथोत्पद्यमानं 'निरन्तरमिदं वस्तु' 'सान्तरमिदम्' इति च बुद्धिभेदनिबन्धनं भविष्यति संयोग-विभागयोर्द्रव्यार्था- १५ न्तरभूतयोरभावेऽपि इति अनैकान्तिको 'विशेषप्रत्ययत्वात्' इति हेतुः । तथाहि-विच्छिन्नं यदुत्पन्नं वस्तु तत् सान्तरबुद्धेर्निमित्तभावमुपयात्येव हिमवत्-विन्ध्याद्रिवत्, अविच्छिन्नोत्पत्तिकं च निरन्तर-बुद्धिविषयः निरन्तरोपरचितदेवदत्त-यज्ञदत्तगृहवत् न हि गृहयोः परेणापि संयोगगुणाश्रयत्वमभ्युपगम्यते निर्गुणत्वाद् गुणानाम् तयोश्च संयोगात्मकत्वेन गुणत्वात् । नापि हिमवत्-विन्ध्ययोर्विभागाश्रयत्वम् प्राप्तिपूर्विकाया अप्राप्तेर्विभागलक्षणायास्तयोरभावात् । न च सर्वा मिथ्याबुद्धिः २०

---

१ "पारिशेष्यात् संयोगस्यैवाप्रतीतस्य विधेर्ज्ञायते तस्मादस्त्येव संयोगादिर्वास्तवः यद्वशाच्चैत्रः कुण्डली न भवतीत्यादिनिषेधविधानादि प्रविभक्तमेव प्रतीयते । आदिशब्देन विशेषणत्वेनोपादानमित्यादिपूर्वोक्तपरिग्रहः"—तत्त्वसं० पञ्जि० पृ० २२० पं० ३—।

२ "बीजोदकेत्यादिना उद्द्योतकरमतोपदर्शनाद् हेतोरसिद्धतामाशङ्कते—

बीजोदकपृथिव्यादि सर्वदा कार्यकारकम् । प्रसक्तं निर्विशेषत्वात् संयोगासंभवेन तु ॥

क्षेत्र-बीज-जलादीनि सापेक्षाणीति गम्यते । स्वकार्यकरणान्नित्यं दण्डचक्रोदकादिवत् ॥

यस्तैरपेक्ष्यते भावः स संयोगो भविष्यति । सविशेषणभावाच्च भिन्न एवेति गम्यते" ॥—तत्त्वसं० का० ६५४–६५६ पृ० २१८ ।

३ पृ० ६७७ पं० २० ।

४ "प्राप्तावस्थाविशेषे हि नैरन्तर्येण जातितः । ये पश्यत्याहरत्येष वस्तुनी ते तथाविधे" ॥—तत्त्वसं० का० ६६६ पृ० २२१ ।

५ अत्र द्वितीयाद्विवचनस्य समुचितत्वेन प्रकृतिभावस्य साधुत्वात् 'द्रव्ये असा'-इत्येव पाठः सुचारुः । "नहि संयुक्तपदार्थान्तरभूतः संयोगः प्रतिपत्तुर्दर्शनपथमवतरति येन तद्दर्शना(त्त)द्विशिष्टे द्रव्ये आहरति"—तत्त्वसं० पञ्जि० पृ० २२१ पं० १५ ।

६ विच्छिन्नमन्यथा चैव जातमेति निमित्तताम् । सान्तरानन्तरज्ञाने गेह-विन्ध्य-हिमाद्रिवत्" ॥—तत्त्वसं० का० ६६७ पृ० २२१ ।

७ "गेह-विन्ध्य-हिमाद्रिवत् इति । अनयोरेव यथायोगमुदाहरणम् । न हि अविच्छेदेनोत्पन्नयोः स्वयं संयोगात्मनोर्गेहयोरपरः संयोगो निरन्तरबुद्धेर्निबन्धनमस्ति परमतेऽपि, नापि विच्छेदेनोत्पन्नयोस्तयोरेव विभागः सान्तरप्रत्ययनिमित्तमस्ति निर्गुणत्वाद् गुणानामित्युक्तमेतत् । न हि हिम-विन्ध्ययोरपि विभागः सान्तरबुद्धेर्हेतुरस्ति प्राप्तिपूर्विका ह्यप्राप्तिर्विभाग इति समयात्"—तत्त्वसं० पञ्जि० पृ० २२१ पं० २५—।

८ "मिथ्याबुद्धिर्न सर्वैव प्रधानार्थानुसारिणी । साधर्म्यनिरपेक्षाऽपि काचिदन्तरुपप्लवात् ॥

अन्यत्र गतचित्तस्य द्विचन्द्रादिमतिर्यथा । अविच्छिन्नादिजातं वा प्रधानमिह विद्यते" ॥—तत्त्वसं० का० ६६८–६६९ पृ० २२२ ।

साधर्म्यग्रहणादुत्पद्यते कस्याश्चित् तदन्तरेणापि इन्द्रियवैगुण्यमात्रादेव उत्पत्त्युपलब्धेः अन्यगतचेतसस्तैमिरिकस्य द्विचन्द्राद्यविकल्पबुद्धिवत् । न च प्रधानार्थानुसारित्वेऽपि मिथ्याबुद्धेः परस्य इष्टसिद्धिः विच्छिन्नाऽविच्छिन्नरूपतया उपजातस्य वस्तुनः प्रधानभूतस्य तद्बुद्धिनिबन्धनस्य सिद्धावपि तदर्थान्तरभूतसंयोग-विभागलक्षणगुणाप्रसिद्धेः, यथा[1] च चैत्र-कुण्डलयोर्विशिष्टावस्थाप्राप्तौ
५ संयोगः प्रादुर्भवति न सर्वदा तथा 'चैत्रः[2] कुण्डली' इति मतिरपि तदवस्थाविशेषनिबन्धना कदाचिदेव भविष्यति न सर्वदा इति किमर्थान्तरभूतसंयोगकल्पनया? यदपि[3] 'यदेव क्वचिद् उपलब्धम्' इत्याद्यभिधानम्, तदपि असंगतम्; वि[4]शिष्टावस्थायाः प्रदर्शित[5]मितिनिबन्धनाया उपलभ्यस्वभावायाः अन्यत्रानुपलम्भतः प्रतिषेधोपपत्तेः परपरिकल्पितस्य च संयोगस्य संयोगिपदार्थविवेकेन क्वचिदपि प्रत्यये अप्रतिभासनात् कुतः प्रतिषेधः विधिर्वा संभवी? यदि[6] च देवदत्त कुण्डलयोर्देशान्तरादौ
१० सत्त्वान्न निषेधः असत्त्वेऽपि तदानर्थक्यम् तदा नञर्थाभाव एव स्यात् । संयोगप्रतिषेधेऽपि चैतद् दूषणं समानम् तस्यापि विद्यमानत्वे प्रतिषेधानुपपत्तेः अविद्यमानत्वे तदानर्थक्यात् । यदपि[7] 'बीजादयोऽविशिष्टत्वात् सर्वदैव कार्यं विदध्युः' इत्याद्युक्तम् तत्र[8] बीजादीनामविशिष्टत्वमसिद्धम् सर्वभावानां प्रतिक्षणविशरारुतया विशिष्टावस्थाप्राप्तौ जनकत्वात् बीजादीनां स्वकार्यजनने सापेक्षत्वमात्रसाधने च सिद्धसाध्यता अव्यवधानाद्यवस्थान्तरसापेक्षाणां बीजादीनामङ्कुरादिस्वकार्यनिर्वर्तनस्य
१५ अस्माभिरभ्युपगमात् । अथ संयोगाख्यपदार्थान्तरसापेक्षत्वं तेषां साध्यते तदा तथाविधेन धर्मेण हेतोरन्वयासिद्धेरनैकान्तिकता दृष्टान्तस्य च साध्यविकलताप्रसक्तिः । अथ अवस्थान्तरविशेषापेक्षा बीजादयः स्वकार्योत्पत्तिहेतवः न पुनरर्थान्तरभूतसंयोगापेक्षा[9] इति कुतः सिद्धं येन सापेक्षत्वमात्रे साध्ये सामान्येन सिद्धसाध्यतादोष उद्भाव्यते? यदि हि संयोगमात्रसापेक्षा एव ते तदारम्भकास्तदा प्रथमोपनिपात एव अङ्कुरादिकार्यप्रसवो बीजादिभ्यो भवेत् पश्चाद्वद् अविकलकारणत्वात् । अथ
२० प्रथमोपनिपाते न तदुदयः पश्चादपि न स्यात् पूर्ववद् विकलकारणत्वाविशिष्टत्वात् । न च बीजादेः संयोगे अनुपकारिणि अपेक्षा युक्ता अतिप्रसङ्गात् । न च तत्कारणानां क्षिति-बीजादीनामेकस्वभावतया नित्यसन्निहितत्वात् संयोगानां कादाचित्कत्वं युक्तम् । अथ क्षित्यादीनां संयोगेऽपि जन्ये कर्मादिसापेक्षत्वात् संयोगस्य कादाचित्कत्वम्, नः तत्रापि तुल्यपर्यनुयोगत्वात् । तथाहि-कर्मापि कस्मात् सर्वदा न जनयति? इति पर्यनुयोगस्य अव्यावृत्तिरेव । न च तत्कारणाभावात् इत्युत्तरं
२५ संगतम् नित्यकारणाभ्युपगमे तस्यापि नित्यभावः इति पर्यनुयोगस्य सर्वत्र तुल्यत्वात् । क्षणिकवादिनस्तु नायं दोषः पूर्वपूर्वहेतुप्रतिबद्धत्वात् तदुत्तरोत्तरकार्याणां युगपत् कारणवैकल्येन सर्वेषामसन्निधानात्, अतः[10] परेषामङ्कुरादिकार्यहेतुत्वं बीजादीनां न सर्वदा प्रसज्यत इति नार्थान्तरसंयोगसापेक्षास्ते इति व्यवस्थितम् । संयोगसद्भावबाधकं च प्रमाणं प्रत्यक्षवद् अनुमानमपि विद्यत

१ "कुण्डलीति मतिश्चेयं जातावस्थाविशेषयोः । चैत्रकुण्डलयोरेव संयोग इव जायते" ॥—तत्त्वसं० का० ६७० पृ० २२२ ।

२ पृ० ६७८ पं० ९ टि० ४ । ३ पृ० ६७८ पं० ११ ।

४ "सोऽवस्थातिशयस्तादृग् दृष्टोऽन्यत्र निषिध्यते । चैत्रे कुण्डल इत्यादौ न संयोगस्त्वदृष्टितः" ॥—तत्त्वसं० का० ६७१ पृ० २२२ ।

५-**तमतिबन्ध**-भां० मां० । "यदवस्थाविशेषनिबन्धनेयं मतिरुपवर्णिता तस्योपलब्धिलक्षणप्राप्तस्य"—तत्त्वसं० पञ्जि० पृ० २२३ पं० १ ।

६ पृ० ६७९ पं० १ । ७ पृ० ६७९ पं० ५ ।

८ "उच्यते क्षणिकत्वेन नाविशेषा जलादयः । सत्त्वेऽप्यव्यवधानादि तेऽपेक्षन्ते दशान्तरम्" ॥—तत्त्वसं० का० ६६४ पृ० २२० ।

९ "संयोगमात्रसापेक्षा यदि तु स्युर्जलादयः । योगानन्तरमेव स्यात् कार्यमेतेन वा भवेत्" ॥—तत्त्वसं० का० ६६५ पृ० २२० ।

१० "तस्माद् भवत एव दर्शनेऽङ्कुरादिकार्यप्रसवहेतुत्वं क्षित्यादीनां सर्वदा प्रसज्यत इति न संयोगार्थान्तरसापेक्षाः क्षित्यादय इति सिद्धम्"—तत्त्वसं० पञ्जि० पृ० २२१ पं० ९—।

भ्रम। तथाहि-यौ संयुक्ताकारा बुद्धिः सा भवत्परिकल्पितसंयोगानास्पदवस्तुविशेषमात्रप्रभवा,
'संयुक्तौ प्रासादौ' इति बुद्धिवत्, संयुक्ताकारा च 'चैत्रः कुण्डली' इत्यादिबुद्धिः इति स्वभावहेतुः।
यद्वा-या अनेकवस्तुसन्निपाते सति समुत्पद्यते सा भवत्परिकल्पितसंयोगविकलानेकवस्तुविशेष-
मात्रभाविनी, यथा विरलावस्थितानेकतन्तुविषया बुद्धिः, तथा च विमत्यधिकरणभावापन्ना संयुक्त-
बुद्धिः इति स्वभावहेतुः। एतदेव प्रयोगद्वयं विभागप्रतिषेधेऽपि वाच्यम्। तथाहि-मेषादिषु विभक्त- ५
बुद्धिः विभागरहितपदार्थविषयमात्रनिबन्धना, विभक्तबुद्धित्वात् अनेकपदार्थाऽसन्निधानायत्तोद्भव-
त्वाद् वा, देवदत्तयज्ञदत्तगृहविभागबुद्धिवत् हिमवत्-विन्ध्यविभागबुद्धिवद्वा। साध्यविपर्यये
हेतोर्बाधकं प्रमाणम्-एकस्यानेकवृत्त्यनुपपत्तिः इति न संयोग-विभागगुणद्वयसद्भावः।

'इदं[2] परम्' 'इदमपरम्' इति यतोऽभिधानप्रत्ययौ भवतः तद् यथाक्रमं परत्वम् अपरत्वं च
सिद्धम्। प्रयोगश्चात्र-योऽयं 'परम्' 'अपरम्' इति च प्रत्ययः स घटादिव्यतिरिक्तार्थान्तरनिबन्धनः, १०
तत्प्रत्ययविलक्षणत्वात्, सुखादिप्रत्ययवत्। तथाहि-एकस्यां दिशि स्थितयोः 'परम्' 'अपरम्' इति
च प्रत्ययोत्पत्तेर्न तावदयं दिग्निबन्धनः, एकस्मिन्नपि वर्तमानकाले वर्तमानयोर्युव-स्थविरयोर-
नियतदिग्देशसंयुक्तयोः 'परम्' 'अपरम्' इति च प्रत्ययोत्पत्तेर्नाप्ययं कालनिबन्धनः तदविशेषेऽपि
प्रत्ययविशेषात्; न चान्यद् अस्य निबन्धनमभिधातुं शक्यम् तस्माद् यन्निबन्धनोऽयं प्रत्ययः तत्
परत्वम् अपरत्वं चाभ्युपगन्तव्यम्। एतच्च द्वितयमपि दिक्कृतम् कालकृतं च। दिक्कृतस्य तावदि- १५
यमुत्पत्तिः—एकस्यां[3] दिश्यवस्थितयोः पिण्डयोरेकस्य द्रष्टुः संनिकृष्टमवधिं कृत्वा 'एतस्माद् विप्र-
कृष्टोऽयम्' इति परत्वाधारे बुद्धिरुत्पद्यते ततस्तामपेक्ष्य परेण दिक्प्रदेशेन योगात् परत्वमुत्पद्यते;
विप्रकृष्टं वाऽवधिं कृत्वा 'एतस्मात् संनिकृष्टोऽयम्' इत्यपरत्वाधारे बुद्धिरुत्पद्यते तामपेक्षा(क्ष्या)परेण
दिक्प्रदेशेन योगाद् अपरत्वस्य उत्पत्तिः। कालकृतयोस्तु अयमुत्पत्तिक्रमः। तथाहि-वर्तमानकालयोः
अनियतदिग्देशसंयुक्तयोर्युव-स्थविरयोर्मध्ये यस्य वली-पलित-रूढश्मश्रुतादिना अनुमितमादित्यो-[4] २०
दयानां भूयस्त्वम् तत्रैकस्य द्रष्टुर्युवानमवधिं कृत्वा स्थविरे विप्रकृष्टबुद्धिरुत्पद्यते तामपेक्ष्य परेण
कालप्रदेशेन योगात् परत्वस्योत्पत्तिः, स्थविरं चावधिं कृत्वा यस्य अरूढश्मश्रुतादिना अनुमितमा-
दित्योदयाऽस्तमयानामल्पत्वम् तत्र यूनि संनिकृष्टबुद्धिरुत्पद्यते तामपेक्ष्य अपरेण कालप्रदेशेन
योगात् अपरत्वस्योत्पत्तिरिति।

अत्र च परत्वसाधनमनैकान्तिकम् साध्यविपक्षेऽपि हेतोर्वृत्तेः। तथाहि-यथा[5] क्रमेण उत्पादाद् २५
नीलादिषु कालोपाधिः क्रमेण च व्यवस्थानाद् दिगुपाधिश्च 'परं नीलम् अपरं च' इति प्रत्ययोत्पत्तिः
असत्यपि परत्वापरत्वलक्षणे गुणे—गुणानां निर्गुणत्वात्—तथा पटादिष्वपि भविष्यतीति यद्यर्थान्त-
रनिमित्तत्वमात्रं परेण इह साधयितुमिष्टं तदा कथं न अनैकान्तिकता हेतोः? अथ नित्यदिक्-काल-
पदार्थहेतुकगुणविशेषनिबन्धनत्वं प्रकृतप्रत्ययस्य तदा दृष्टान्ताभावः अनुमानबाधा च प्रतिज्ञायाः।
तथाहि-यः पराऽपरादिप्रत्ययः स परपरिकल्पितगुणरहितार्थमात्रकृतक्रमोत्पादव्यवस्थानिबन्धनः, ३०
परापरप्रत्ययत्वात्, रूपादिषु परापरप्रत्ययवत्, परापरप्रत्ययश्चायं घटादिषु इति स्वभावहेतुः। न च

---

१ "न पराभिमताद् योगाज्जायते युक्तवस्तुधीः। युक्तबुद्धितया यद्वत् प्रासादादिषु युक्तधीः॥
अनेकवस्तुसद्भावे जायमानतयाऽथवा। विभक्तानेकतन्त्वादिविषया इव बुद्धयः॥
विभागेऽपि यथायोगं वाच्यमेतत् प्रमाद्वयम्। एकस्यानेकवृत्तिश्च न युक्तेति प्रबाधकम्" ॥—तत्त्वसं० का० ६७२-६७४ पृ० २२३।

२ "परापराभिधानादिनिमित्तं यच्च कल्प्यते। परत्वमपरत्वं च दिक्कालावधिकं न तत्" ॥—तत्त्वसं० का० ६७५ पृ २२३।

३ "एकस्यां दिश्यवस्थितयोः पिण्डयोरेकस्य द्रष्टुः संनिकृष्टमवधिं कृत्वा एतस्माद् विप्रकृष्टोऽयमिति परत्वाधारे बुद्धिरुत्पद्यते ततस्तामपेक्ष्य परेण दिक्प्रदेशेन संयोगात् परत्वमुपजायते। विप्रकृष्टं चावधिं कृत्वा एतस्मात् सन्निकृष्टोऽयमित्यपरत्वाधारे बुद्धिरुत्पद्यते तामपेक्ष्यापरेण दिक्प्रदेशेन संयोगादपरत्वस्योत्पत्तिः"—तत्त्वसं० पञ्जि० पृ० २२४ पं० ११—।

४ "यस्य वलीपलितरूढश्मश्रुतादिनाऽनुमितमादित्योदयास्तमयानां बहुत्वम्"—तत्त्वसं० पञ्जि० पृ० २२४ पं० १६।

५ "यथा नीलादिरूपाणि क्रमभावव्यवस्थितेः। अन्योपाधिविवेकेऽपि तथोच्यन्ते तथापरे (परापरे)" ॥
—तत्त्वसं० का० ६७६ पृ० २२३।

नीलादिकेषु एकार्थसमवायाद् उपचरितोऽयं परापरत्वादिप्रत्ययः इति अनैकान्तिकता भवत्प्रयुक्तस्यापि हेतोः पारंपर्येण च नीलादिष्वपि परत्वादेर्निमित्तभावोपगमात् साध्यविकलता च दृष्टान्तस्येति वक्तव्यम्, अस्खलद्वृत्तित्वेन अस्य उपचरितत्वाभावात् स्वाश्रयेऽपि च तयोरुपलब्ध्यभावाद् न तद्बलेन प्रत्ययो युक्त इति कुतो रूपादिषु तन्निबन्धनो भविष्यति? सुखादिषु वा पूर्वोत्तरकालभाविषु
५ किंनिबन्धनोऽयं भवेत्? न चैवं तत्रैकार्थसमवायादेस्तन्निबन्धनस्याभावात्। किञ्च, दिक्-कालयोः पूर्वमेव प्रतिषिद्धत्वात् तद्धेतुकयोः परत्वाऽपरत्वयोरभाव इति कुतस्तन्निमित्तत्वाशङ्का येन हेतोरनैकान्तिकता स्यात्? न च परमार्थतो दिक्-कालयोः प्रदेशाः सन्ति यतस्तत्संयोगादपेक्षाबुद्धिसहिताद् उत्पत्तिस्तयोर्भवेत्। दिक्-कालयोरेकात्मकत्वेन निरवयवत्वाद् न चार्थक्रियानिबन्धन उपचरितोऽवयवभेदो युक्तः अर्थक्रियाया वस्तुस्वभावप्रतिबद्धत्वात् उपचारस्य च अपारमार्थिकत्वात्।
१० तत् कुतः अनैकान्तिकता प्रकृतहेतोः? असिद्धता च परोपन्यस्तहेतोः पूर्ववद् वाच्या।

'न संख्यादयो गुणा द्रव्याद् अव्यतिरेकिणः, तेषां तद्व्यवच्छेदहेतुत्वात्, यो हि यद्व्यवच्छेदकः नासौ तदव्यतिरेकी देवदत्तव्यवच्छेदकदण्डादिवत्, तथा च संख्यादयो द्रव्यव्यवच्छेदकाः, तस्माद् न तदव्यतिरेकिणः' इत्यत्र प्रयोगे यदि द्रव्याद् अव्यतिरेकत्वनिषेधमात्रं साध्यं तदा सिद्धसाध्यता सर्वसंवृतिमतामवस्तुतया तत्त्वाऽन्यत्वव्याच्यत्वेन अनिष्टेः। अथ 'समूह-संतानादयः तत्त्वाऽन्यत्वा-
१५ भ्यामवचनीया न भवन्ति, प्रतिनियतधर्मयोगित्वात्, रूपादिवत्' अत्रापि यदि पारमार्थिकनियतधर्मत्वं हेतुत्वेनेष्टं तदा असिद्धो हेतुः, न हि संतानादीनां पारमार्थिकनियतधर्मयोगित्वं सौगतं प्रति सिद्धम्। अथ सामान्येन हेतुः तदा शशशृङ्गादावपि कल्पितनियतधर्मयोगित्वस्य अभावत्वाऽमूर्तत्वादेः सद्भावाद् अनैकान्तिकः। अथ न द्रव्यादव्यतिरेकप्रतिषेधमात्रं साध्यम् किं तर्हि? द्रव्या(व्याद्) व्यतिरेकित्वम् प्रतिषेधद्वयेन प्रकृतार्थगतेः, असदेतत्; संख्यादेर्द्रव्याद् व्यतिरेकेण अनुपलम्भाद्
२० अभावतो हेतोराश्रयासिद्धत्वप्रसक्तेः। न च द्रव्यात्मकत्वेन प्रतीयमानस्यापि संख्यादेर्भेदः साधयितुं शक्यः तदात्मनस्ततो भेदे तस्य निःस्वभावताप्रसक्तेः। तन्न संख्यादयः परत्वाऽपरत्वपर्यन्ता द्रव्याद् व्यतिरेकिणः कुतश्चित् प्रमाणादवसीयन्ते इति न तथा ते सद्व्यवहारविषयाः।

१-भाविषु तन्निबन्धनोऽयं भवेत् तत्रैकार्थसमवायादेस्तन्निबन्धनस्याभावात् वा० बा०।
"सुखादिषु वा पूर्वोत्तरकालभाविषु किं कल्प्येत, न हि तत्रैकार्थसमवायोऽस्ति"—तत्त्वसं० पञ्जि० पृ० २२५ पं० ७।

२ "सङ्ख्यायोगादयः सर्वे न द्रव्याव्यतिरेकिणः। तद्व्यवच्छेदकत्वेन दण्डादिरिव चेन्मतम्॥
तेषां संवृतिसत्त्वेन वर्णनादिष्टसाधनम्। तत्त्वान्यत्वेन निर्वाच्यं नैव संवृतिसद् यतः" ॥—तत्त्वसं० का० ६७७-६७८ पृ० २२५।

३ द्रव्या व्यति-वा० बा० भां० मां०। "तदत्र द्रव्यादव्यतिरेकित्वनिषेधमात्रे साध्ये सिद्धसाध्यता दोषः प्रतिज्ञायाः"—तत्त्वसं० पञ्जि० पृ० २२५ पं० २१।

४ "अथेत्यादिनात्राविद्धकर्णस्योत्तरमाशङ्कते—
अथानिर्वचनीयत्वं समूहादेर्निषिध्यते। यस्मान्नियतधर्मत्वं रूप-शब्द-रसादिवत्" ॥—तत्त्वसं० का० ६७९ पृ० २२५।

५ "निःस्वभावतया तस्य तत्त्वतोऽम्बरपद्मवत्। न सिद्धा नियता धर्माः कल्पनारोपितास्तु ते॥
तथैवोक्तावनेकान्तो वियत्पद्मादिभिर्यतः। अभेदो व्यतिरेकश्च वस्तुन्येव व्यवस्थितः" ॥—तत्त्वसं० का० ६८०-६८१ पृ० २२६।

६ "संख्यादेर्द्रव्यतोऽन्यत्वमेवं चेत् प्रतिपाद्यते। आश्रयासिद्धता हेतोः संख्यादीनामसिद्धितः॥
समुच्चयादिभिन्नं तु द्रव्यमेव तथोच्यते। स्वरूपादेव भेदश्च व्याहतः साधितो भवेत्" ॥—तत्त्वसं० का० ६८२-६८३ पृ० २२६।

७ "किं तर्हि द्वौ प्रतिषेधौ विधिमेव गमयत इति प्रतिषेधद्वयेन द्रव्याद् व्यतिरेकित्वमेव साध्यत इति"—तत्त्वसं० पञ्जि० पृ० २२६ पं० १७।

८ "एवं तावत् परत्वान्ता गुणाः प्रतिषिद्धाः"—तत्त्वसं० पञ्जि० पृ० २२६ पं० २७।

ये[1] च बुद्ध्यादयः प्रयत्नान्ता आत्मसमवेतत्वेन तद्गुणा अभ्युपगताः ते तथाभूतात्मनिषेधादेव प्रतिषिद्धाः। तथाहि-आत्मा एषामुत्पत्तिकारणत्वेन वा आश्रयोऽभ्युपगम्येत, स्थितिनिमित्ततया वा ? न तावद् आद्यः पक्षः, अविकलकारणतया बुद्ध्यादेः सर्वदैव सर्वस्योत्पत्तिप्रसक्तेः अनाधेयातिशयस्य सहकार्यपेक्षाऽयोगात्। न च क्रम-यौगपद्यव्याप्तकार्योत्पादनसामर्थ्यस्य नित्ये संभवः तत्र क्रम-यौगपद्याभ्यामर्थक्रियाविरोधस्य प्रतिपादितत्वात्। न च द्वितीयोऽपि पक्षो युक्तः, स्थितेः ५
स्थातुरव्यतिरेकात् तस्य तद्धेतुत्वे स्थातृहेतुत्वमेव स्यात् तच्च प्राक्तनन्यायेन असंगतम्। न च परिनिष्ठितात्मरूपत्वात् स्थातुः कश्चिद्धेतुः संभवी, तत्र तस्य अकिञ्चित्करत्वात्। व्यतिरेकेऽपि स्थितेः स्थातुर्न तेन किञ्चित् कृतं स्यात् स्थितेरर्थान्तरभूतायाः करणात्। एवं च अकिञ्चित्करः कथमाश्रयो बुद्ध्यादेरसौ भवेत् ? न च स्थितेस्तत्संबन्धितया करणात् तस्याऽसावुपकारकत्वाद् आश्रयः तस्यास्तत्संबन्धित्वासिद्धेः भिन्नायास्तदुपकाराभावे संबन्धायोगात् तत उपकारकल्पनायामनवस्थाप्रसक्तेः १०
समवायसंबन्धस्य च असिद्धेः। न च तस्य स्थितिं प्रति हेतुत्वमपि युक्तम् नित्यस्य क्वचिदपि सामर्थ्यायोगात्। किञ्च, स्थाप्यमानो बुद्ध्यादिः स्थितिस्वभावो वा तेन स्थाप्येत, अस्थितिस्वभावो वा ? यदि अस्थितिस्वभावः नासौ केनचित् स्थापयितुं शक्यः तत्स्वभावाव्यतिक्रमात्। अथ स्थितिस्वभावः तदा तत्स्वभावस्य स्वयमेव तत्स्वभावतया तस्य स्थितिसिद्धेः किमकिञ्चित्करस्थापककल्पनया ? अथ स्थातुः पाताभावं कुर्वन् स्थापकः न अकिञ्चित्करः, न; पाताभावस्य प्रसज्यप्रतिषेध- १५
रूपत्वे कारकव्यापाराविषयत्वात्, पर्युदासरूपत्वेऽपि किमसौ पात एव, उत पाताद् अन्यत् पदार्थान्तरम् ? यदि पात एव तदा 'स्थापकः स्थातुः पातं करोति' इति प्राप्तम् तथा च कथमसौ स्थापको भवेत् ? अथ पदार्थान्तरं पाताद् अन्यद् असौ करोति; नन्वेवं पदार्थान्तरकरणेऽपि स्थाता पतेदेव पदार्थान्तरोत्पादेऽपि तस्य त्राणासंभवात्। न च पदार्थान्तरेण स्थापकोत्पादितेन स्थातुः पातप्रतिबन्धः क्रियत इति वक्तव्यम्, तस्याऽपि पातादनन्यत्वे पात एव कृतः स्यात्, अन्यत्वे तेन २०
तत्संबन्धासिद्धेस्तत्करणेऽपि स्थातुस्तदवस्थ एव पातो भवेत्; तेनापि अपरपातप्रतिबन्धकरणे तद्भिन्नाऽभिन्नविकल्पद्वयानतिवृत्तिद्वारेण अनवस्थादिप्रसक्तिः। तन्न कश्चित् कस्यचित् स्थापकः। किञ्च, भवेन्नाम बदरादेर्मूर्तद्रव्यस्य अधोगमनप्रतिबन्धकत्वेन कुण्डादिराश्रयः। बुद्ध्यादेस्तु अमूर्तस्य अधोगत्यभावात् किं कुर्वाण आत्मादिराश्रयो भवेत् ? अपि[2] च, नोत्पन्नानां बुद्ध्यादीनां कश्चिद् आश्रयः, सतां निराशंसतया आश्रितत्वानुपपत्तेः। नापि अनुत्पन्नानाम् निरुपाख्यतया तेषां तत्त्वा- २५
योगात्। किञ्च, "बुद्धिः उपलब्धिः ज्ञानम् इति अनर्थान्तरम्[3]" [न्यायद० १-१-१५] इति वचनाद् बुद्धेर्ज्ञानरूपता परैरभ्युपगता। न च तस्याः स्वसंविदितत्वमभ्युपगतम् बुद्ध्यन्तरग्राह्यतयाऽभ्युपगमात्। न च तथाभूतायास्तस्या रूपादिवद् बुद्धित्वं युक्तमिति प्राक् प्रतिपादितम्। सुख-दुःखेच्छा-द्वेषादीनां च अज्ञानरूपत्वे रूपादिवन्नात्मविशेषगुणता अभ्युपगन्तुं युक्ता। ज्ञानरूपत्वे बुद्धेर्भेदेन अभिधानमसंगतमेव, कञ्चिद् विशेषमुपादाय ज्ञानात्मकानामपि ततो भेदेन अभिधाने ३०
अभिमानादीनामपि भेदेन अभिधानं कार्यमित्यलमतिजल्पितेन।

गुरुत्व[4]-द्रवत्व-स्नेहानां तु रूपादिवद् गुणरूपता प्रतिषेध्या। 'गुरुत्वं[5] हि पृथिव्युदकवृत्ति

---

१ "बुद्ध्यादयस्तु प्रयत्नान्ता आत्माश्रितत्वेन तद्गुणा इष्टाः। ते चात्मनिषेधादेव निषिद्धा द्रष्टव्याः। न चैषामात्माऽऽश्रयो युक्तः। तथाहि—उत्पत्तिहेतुतया चामीषामात्माऽऽश्रयो भवेत् स्थितिहेतुतया वा ? न तावदुत्पत्तिहेतुतया सर्वदैवाविकलकारणतया सुखादीनामुत्पत्तिप्रसङ्गात्" इत्यादि। "नापि स्थितिहेतुतया युक्तः स्थितेः स्थातुरव्यतिरिच्यमानरूपत्वात्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २२७ पं० १—।

२ "सदसतोश्च निराशंसत(या)नुपाख्यत्वेन चाश्रयणानुपपत्तिरिति"—तत्त्वसं० पञ्जि० पृ० २२७ पं० १८।

३ "यथोक्तम्—बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति"—तत्त्वसं० पञ्जि० पृ० २२७ पं० २०।

"बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः"—प्रशस्त० कं० पृ० १७१ पं० १६।

४ "गुरुत्व-द्रवत्व-स्नेहानां तु रूपादिवत् प्रतिषेधो विधेयः"—तत्त्वसं० पञ्जि० पृ० २२७ पं० २५।

५ "गुरुत्वं जल-भूम्योः पतनकर्मकारणम्। × × × द्रवत्वं स्यन्दनकर्मकारणम् त्रिद्रव्यवृत्ति। तत् तु द्विविधम् सांसिद्धिकम् नैमित्तिकं च। सांसिद्धिकमपां विशेषगुणः नैमित्तिकं पृथिवी-तेजसोः सामान्यगुणः। × × × स्नेहोऽपां विशेषगुणः संग्रह-मृजादिहेतुः"—प्रशस्त० कं० पृ० २६३ पं० २५-पृ० २६६।

पतनक्रियानिवन्धनम्, द्रवत्वं तु पृथिव्युदक-ज्वलनवृत्ति स्प(स्य)न्दनहेतुः पृथिव्यनलयोर्नैमित्तिकम् अपां सांसिद्धिकम्, स्नेहस्तु अम्भसि एव स्निग्धप्रत्ययहेतुः' इत्यादिप्रक्रिया पृथिव्यादीनामाधारत्वनिषेधात् तद्गतरूपादिनिषेधाच्च निषिद्धैव, तन्न्यायस्य अत्रापि समानत्वात्।

संस्कारस्तु त्रिविधः—वेगः भावना स्थितस्थापकश्चेति—अभ्युपगतः। तत्र वेगाख्यः पृथिव्यप्-
५ तेजो-वायु-मनस्सु मूर्तिमद्द्रव्येषु प्रयत्नाभिघातविशेषापेक्षात् कर्मणः समुत्पद्यते नियतदिक्क्रियाप्रवन्धहेतुः स्पर्शवद्द्रव्यसंयोगविरोधी च, तत्र शरीरादिप्रयत्नविशेषाविर्भूतकर्मविशेषनिमित्तः—यद्वशाद् इषोः अन्तराले अपातः—स च नियतदिक्क्रियाकार्यसंबन्धोन्नीयमानसद्भावः लोष्टाद्यभिघातोत्पन्नकर्मोत्पाद्यस्तु शाखादौ वेगाख्यः संस्कारः। भावनासंज्ञः पुनः आत्मगुणः ज्ञानजः ज्ञानहेतुश्च दृष्टाऽनुभूतश्रुतेष्वर्थेषु स्मृति-प्रत्यभिज्ञानकार्योन्नीयमानसद्भावः। मूर्तिमद्द्रव्यगुणः स्थित-
१० स्थापको घनावयवसंनिवेशविशिष्टं स्वमाश्रयं कालान्तरस्थायिनमन्यथा व्यवस्थितमपि प्रयत्नतः पूर्ववद् यथावस्थितं स्थापयतीति कृत्वा, दृश्यते च तालपत्रादेः प्रभूततरकालसंवेष्टितस्य प्रसार्यमुक्तस्य पुनस्तथैव अवस्थानं संस्कारवशात् एवं धनुः-शाखा-शृङ्ग-दन्तादिषु भुग्नापवर्तितेषु च वस्त्रादिषु तस्य कार्यं परिस्फुटमुपलभ्यत एवेति ततस्तत्सद्भावः सिद्धः। असदेतत्, क्षणभङ्गसिद्धौ वेगाख्यसंस्कारकार्यस्य कर्मप्रवन्धस्य असिद्धेः। न हि उत्पत्त्यनन्तरं भावानां नाशे नियत-
१५ दिक्क्रियाप्रवन्धस्य तद्धेतोश्च संस्कारस्य उत्पत्तिः। न च स्वोपादानदेशाऽनन्तरदेशोत्पाद एव भावानां क्रियाप्रवन्धः, हेतोरनैकान्तिकत्वप्रसक्तेः। तथाहि-ततः प्राक्तनस्वहेतव एव सिद्धिमासादयन्ति न यथोक्तः संस्कारः तेन सह क्वचिदपि अन्वयासिद्धेः। यदि च तथाविधसंस्कारवशाद् इष्वादीनामपातस्तदा च न कदाचिदपि पातः स्यात् पातप्रतिवन्धकस्य वेगस्य सर्वदा अवस्थानात्। एवं च आकाशप्रसर्पिणः शरस्य अकस्मात् पातोपलब्धिर्न स्याद् भवदभ्युपगमेन। न च मूर्तिमद्वा-
२० य्वादिसंयोगाद्युपहतशक्तित्वाद् वेगस्य पतनम् प्रथममेव पातप्रसक्तेः वाय्वादिसंयोगस्य तद्विरोधिनस्तदैव सद्भावात्। न च प्राग् वेगस्य बलीयस्त्वाद् विरोधिनमपि मूर्तद्रव्यसंयोगमपास्य स्वाधारं देशान्तरं प्रापयति, पश्चादपि तस्य बलीयस्त्वात् तथैव तत्प्रापकत्वप्रसक्तेः। न हि वेगस्य पश्चाद् अन्यथात्वम् अन्यथोत्पत्तिकारणाभावात् तत्समवायिकारणस्य इष्वादेः सर्वत्र अविशिष्टत्वात्। न च कर्माख्यं कारणं पश्चाद् विशिष्यत इति वक्तव्यम् तस्यापि तुल्यपर्यनुयोगत्वात्, अन्यत्वेऽपि च
२५ प्रतिक्षणं कर्मणः वेगस्य प्राक्तनस्यैव अवस्थानाद् विनाशकारणाभावात् शरस्य अपात एव स्यात्। न च वायुसंयोगस्तस्य विनाशकारणम् प्रथममेव तत्संयोगाद् वेगविनाशाद् इषोः पातप्रसङ्गात् सर्वत्र वायोरविशेषेण तत्संयोगस्यापि अविशेषात्। न च प्रभूताकाशदेशसंयोगोत्पादनात् संस्कारप्रक्षयाद् इषोः पातः, संस्कारस्यैकस्वभावत्वेन अवस्थितस्य प्रागिव पश्चादपि प्रक्षयानुपपत्तेः। न च आकाशदेशाः परेणाऽभ्युपगम्यन्ते येन तत्संयोगानां भूयस्त्वं संस्कारक्षयहेतुत्वं वा युक्तियुक्तं
३० भवेत्। कल्पनाशिल्पिघटितानां तु आकाशदेशानां संयोगभेदकत्वमनुपपन्नम् तदायत्तभेदानां च संयोगानां संस्कारक्षयहेतुत्वं दूरोत्सारितमेव इषोस्तु पातोऽन्यथासिद्ध इत्यलमतिप्रपञ्चेन।

स्मृत्यादिकार्यात् तु सामान्येन यदि भावनामात्रं साध्यते तदा सिद्धसाध्यता पूर्वानुभवाऽऽहितसामर्थ्यलक्षणाया ज्ञानस्यात्मभूतायास्तस्याः स्मृतिहेतुत्वेन अस्माभिरपि अभ्युपगमात्। अथ आत्मगुणस्वरूपा भावना साधयितुमभिप्रेता तदा तया तथाभूतया स्मृत्यादेः क्वचिदपि अन्वयासिद्धे-
३५ रनैकान्तिकता हेतोः, प्रतिज्ञायाश्च अनुमानवाधितत्वम् तदाधारस्य आत्मनः पूर्वमेव निराकृतत्वात्

---

१ "वेगाख्यो भावनासंज्ञः स्थितस्थापकलक्षणः। संस्कारस्त्रिविधः प्रोक्तः"—तत्त्वसं० का० ६८४ पृ० २२७।

"त्रिविधः संस्कारो वेगो भावना स्थितस्थापकश्चेति"—तत्त्वसं० पञ्जि० पृ० २२८ पं० ३। "संस्कारस्त्रिविधो वेगो भावना" स्थितिस्थापकश्च "स्थितस्थापकः-पा० पु०।"—प्रशस्त० कं० पृ० २६६ पं० २३—।

२ "नासौ संगच्छतेऽखिलः॥

क्षणिकत्वात् पदार्थानां न काचिद् विद्यते क्रिया। यत्प्रबन्धस्य हेतुः स्यात् संस्कारो वेगसंज्ञकः"॥

—तत्त्वसं० का० ६८४-६८५ पृ० २२७-२२८।

३ "भावनाख्यस्तु संस्कारश्चेतसो वासनात्मकः। युक्तो नात्मगुणश्चेदं युज्यते तन्निराकृतेः"॥—तत्त्वसं० का० ६८६ पृ० २२९।

तदभावे तस्या अपि अभावात्। तथाहि-ये यदाश्रितास्ते तस्याऽभावे अवस्थितिं न प्रतिलभन्ते, यथा कुड्याभावे चित्रादयः, आश्रिताश्च परेण आत्मनि संस्कारादयोऽभ्युपगम्यन्ते इति व्यापकविरुद्धोपलब्धिः। स्थितस्थापकस्तु संस्कारः अत्यन्तमसंगत एव। तथाहि-असौ किं स्वयमस्थिरस्वभावं भावं स्थापयति, उत स्थिरस्वभावमिति पक्षद्वयम्। यदि अस्थिरस्वभावम् तदा क्षणादूर्ध्वं तस्य स्वयमेव अभावात् कस्य असौ स्थापकः स्यात्? अथ द्वितीयः पक्षः तदा स्थिरे स्वभावेऽवस्थितानां भावानां ५
ताद्रूप्यादेव अवस्थानात् किमकिञ्चित्करस्थापकप्रकल्पनया? न च क्षणिकत्वेऽपि भावानामेकक्षणावस्थितानु(नु)त्तरकालं स्थापकस्य सामर्थ्यमङ्गीक्रियते यतः स्वरूपप्रतिलम्भलक्षणैव भावानां स्थितिरुच्यते न पुनर्लब्धात्मसत्ताकानाम् आत्मरूपसंधारणलक्षणोत्तरकालं स्वयं चलात्मन उत्तरकालमवस्थानासंभवात् संभवे वा न कदाचिदपि निवृत्तिः स्यात् पूर्ववत् पश्चादपि अविशिष्टत्वात् अतत्स्वभावत्वप्रसङ्गाच्च। न च क्षणस्थितिप्रबन्धेऽपि स्थापकस्य सामर्थ्यसिद्धिः, पूर्वपूर्वकारणसामर्थ्य- १०
कृतस्य उत्तरोत्तरकार्यप्रसवस्य संस्कारमन्तरेणापि सिद्धेः, अक्षणिकस्य तु अन्यथात्वासंभवात् स्वत एव स्थितिरिति न तत्रापि स्थापकोपयोगः। न च संस्कारस्य क्षणोत्पादनेऽपि सामर्थ्यम् प्राक्तनक्षणमन्तरेण अपरस्य तत्राऽपि सामर्थ्यानवधारणात्। तथाहि-प्रमाणाधीना प्रमेयव्यवस्था। न च प्रसिद्धकारणव्यतिरेकेण वस्त्रादिषु प्रत्यक्षाऽनुपलम्भाभ्यां चक्षुरादिवद् वा कार्यव्यतिरेकतोऽपरस्य सामर्थ्यावधारणम्। न च अदृष्टसामर्थ्यस्यापि हेतुत्वकल्पना अतिप्रसङ्गात् तदपरापरहेतुप्रकल्पनाया १५
अनिवृत्तेः। न च संस्कार उत्पादकहेतुरिष्टः परैः किन्तु उत्पन्नस्य वस्त्रादेरुत्तरकालं स्थापको गुणः, तत्र च अस्य अकिञ्चित्करत्वमेवेति प्राग् व्यवस्थापितम्।

"कर्तृफलदायी आत्मगुण आत्म-मनःसंयोगजः स्वकार्यविरोधी धर्माऽधर्मरूपतया भेदवान् अदृष्टाख्यो गुणः" [ ] इति वैशेषिकैः परोक्षाऽदृष्टस्वरूपमुपवर्णितम्। कर्तुः प्रिय-हित-मोक्षहेतुर्धर्मः अधर्मस्तु अप्रिय-प्रत्यवायहेतुः" [प्रशस्तपा० भा० पृ० २७२ पं० ८ तथा २०
पृ० २८० पं० ४] इति, एतच्च तत्समवायिकारणस्य आत्मनो मनसः आत्म-मनःसंयोगस्य च निमित्ताऽसमवायिकारणत्वेन अभ्युपगतस्य निषेधात् कारणाभावे कार्यस्यापि अभावात् सर्वमनुपपन्नम्।

शब्दस्तु आकाशगुणत्वेन अभिमतः तस्य च आकाशगुणत्वं प्राग् निषिद्धमिति न चतुर्विंशतिरपि गुणाः प्रमाणोपपत्तिकाः॥

[निरूपणपुरस्सरं कर्मपदार्थस्य खण्डनम्] २५

उत्क्षेपणादीनि पञ्च कर्माणि। तथा च सूत्रम्—"उत्क्षेपणम् अपक्षेपणम् आकुञ्चनम् प्रसारणम्

---

१ "स्थितस्थापकरूपस्तु न युक्तः क्षणभङ्गतः। स्थितार्थासंभवाद् भावे ताद्रूप्यादेव संस्थितिः"॥
—तत्त्वसं० का० ६८७ पृ० २२९।

२-तानामुत्तरका-आ० हा० वि०। "अथापि स्यात् क्षणिकत्वेऽपि सर्वभावानामेकक्षणावस्थितौ प्रबन्धेन चानुवृत्तौ तस्य सामर्थ्यमुच्यत इति"—तत्त्वसं० पञ्जि० पृ० २३० पं० १।

३ "क्षणं त्वेकमवस्थानं स्वहेतोरेव जातितः। पूर्वपूर्वप्रभावाच्च प्रबन्धेनानुवर्तनम्"॥—तत्त्वसं० का० ६८८ पृ० २३०।

४ "नान्यथोदयवानेष कस्यासौ स्थापकस्ततः। न चास्य दृष्टं हेतुत्वं संस्कारोऽन्योऽपि वा भवेत्॥
उत्पन्नस्यैव चेदिष्टोऽयं वस्त्रादेः स्थापको गुणः। गुणसंस्कारनामैवं सर्वथापि न संभवी"॥—तत्त्वसं० का० ६८९-६९० पृ० २३०।

५ "अथ अदृष्टसामर्थ्यस्यापि हेतुत्वं कल्प्यते तदा संस्कारः अन्योऽपि वा शुक-बकादिरुत्पत्तेर्हेतुर्भवेत्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २३० पं० २०।

६ "कर्तृफलदाय्यात्मगुण आत्ममनःसंयोगजः स्वकार्यविरोध्यदृष्टम्। तच्च द्विविधं धर्माऽधर्मभेदात्। तत्र धर्मः कर्तुः प्रियहितमोक्षहेतुः अधर्मस्त्वप्रियाहितप्रत्यवायहेतुरिति परोक्तादृष्टलक्षणम्"—तत्त्वसं० पञ्जि० पृ० २३१ पं० ५-।

७ "मनोयोगात्मनां पूर्वं विस्तरेण निबन्धनात्। परोक्तलक्षणोपेतं नादृष्टमुपपद्यते"॥—तत्त्वसं० का० ६९१ पृ० २३१।

८ पृ० १३६ पं० १३। ९ "उत्क्षेपणमपक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणीति सूत्रम्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २३१ पं० १४।

इति पराभ्युपगमप्रदर्शनपूर्वकः तद्विशेषप्रतिषेधप्रदर्शनमार्गः प्रदर्श्यते-तत्र सामान्यं द्विविधम्-परम् अपरं च । परं सत्ताख्यम् तच्च त्रिषु द्रव्य-गुण-कर्मसु पदार्थेषु अनुवृत्तिप्रत्ययस्यैव कारणत्वात् सामान्यमेव न विशेषः । अपरं तु द्रव्यत्व-गुणत्व-कर्मत्वादिलक्षणम् तच्च स्वाश्रयेषु द्रव्यादिषु अनुवृत्तिप्रत्ययहेतुत्वात् सामान्यमित्युच्यते, स्वाश्रयस्य च विजातीयेभ्यो व्यावृत्तप्रत्ययहेतुतया
५ विशेषणात् सामान्यमपि सद् विशेषसंज्ञां लभते । तथाहि-द्रव्यादिषु 'अगुणः' इत्यादिका या इयं व्यावृत्तबुद्धिरुत्पद्यते तां प्रति एषामेव हेतुत्वं नान्यस्य न हि अगुणत्वादिकमपरमस्ति, अपेक्षाभेदाच्च एकस्य सामान्यविशेषभावो न विरुध्यते यद्वा सामान्यरूपता मुख्यतः विशेषसंज्ञा तु उपचारतः विशेषाणामिव द्रव्यत्वादीनामपि व्यावृत्तबुद्धिनिबन्धनत्वात् । सामान्यस्य चेन्द्रियान्वयव्यतिरेकानुविधाय्यनुगताकारप्रत्ययग्राह्यत्वाद् अध्यक्षतः प्रसिद्धिः । तथा, अनुमानोच्च । तथाहि-व्यावृत्तेषु
१० खण्ड-मुण्ड-शावलेयादिषु अनुगताकारः प्रत्ययः तद्व्यतिरिक्तानुगताकारनिमित्तनिबन्धनः, व्यावृत्तेषु अनुगताकारप्रत्ययत्वात्, यो यो व्यावृत्तेषु अनुगताकारः प्रत्ययः स स तद्व्यतिरिक्तानुगतनिमित्तनिबन्धनः यथा चर्म-चीर-कम्बलेषु नीलप्रत्ययः, तथा चायं शावलेयादिषु 'गौः' 'गौः' इति प्रत्ययः, तस्मात् तद्व्यतिरिक्तानुगतनिमित्तनिबन्धन इति । तथाहि-नेदमनुस्यूताकारज्ञानं पिण्डेषु निर्हेतुकम्, कादाचित्कत्वात् । न शावलेयादिपिण्डनिबन्धनम्, तेषां व्यावृत्तरूपत्वात् अस्य च अनु-
१५ गतरूपत्वात् । यदि चेदं पिण्डमात्रप्रभवं स्यात् तदा शावलेयादिष्विव कर्कादिष्वपि 'गौः' 'गौः' इति उल्लेखेन उत्पद्येत पिण्डरूपतायास्तेष्वपि अविशेषात् । अथ वाह-दोहाद्यर्थक्रियानिबन्धनेष्वेव तेषु 'गौः' 'गौः' इतिप्रत्ययहेतुता, न; तदर्थक्रियाऽभावेऽपि वत्सादौ गोबुद्धिप्रवृत्तेः महिष्यादौ तत्सद्भावेऽपि च अप्रवृत्तेः । किञ्च, अर्थक्रियाया अपि प्रतिव्यक्तिभेदे कुतोऽनुगताकारज्ञानहेतुता? अभेदे सिद्धमनुगतनिमित्तनिबन्धनत्वमस्य ज्ञानस्य । न चास्य बाधितत्वम्, सर्वदा सर्वत्र सर्वप्रमातॄणां
२० शावलेयादिषु अनुस्यूतप्रत्ययोत्पत्तेः । न च दुष्टकारणप्रभवत्वम्, विशदनेत्राणामप्यनुस्यूताकारस्य अक्षजप्रत्यये प्रतिभासनात् । न च संशय-विपर्ययाऽनध्यवसायरूपतयाऽस्योत्पत्तिः, तद्वैपरीत्येन अस्य प्रतिभासनात् । न चैवंभूतस्याऽपि प्रत्ययस्य अप्रमाणता स्वलक्षणविषयस्यापि तस्य अप्रमाणताप्रसक्तेः । न च प्रतीयमानस्यापि अनुगतप्रत्ययस्य अपलापः शक्यते कर्तुम्, सर्वप्रत्ययापलापप्रसक्तेः । तस्माद् अनुगतप्रत्ययनिमित्तत्वात् सामान्यसद्भावः सिद्धः ।

२५ अत्र प्रतिविधीयते-यत् तावदुक्तम् 'अध्यक्षप्रत्ययादेव सामान्यं प्रतीयते' इति, तदयुक्तम्; शावलेयादिव्यतिरेकेण अपरस्य अनुगताकारस्य अक्षजप्रत्यये सामान्यस्य अप्रतिभासनात् । न हि अक्षव्यापारेण शावलेयादिषु व्यवस्थितं [७] सूत्रकण्ठे गुण इव भिन्नमनुगताकारं सामान्यं केनचिल्लक्ष्यते

---

१ "तत्रेयं द्विविधा जातिः परैरभ्युपगम्यते । सामान्यमेव सत्ताख्यं समस्तेष्वनुवृत्तितः ॥
द्रव्यत्वादि तु सामान्यं सद्विशेषोऽभिधीयते । स्वाश्रयेष्वनुवृत्तस्य चेतसो हेतुभावतः ॥
विजातिभ्यश्च सर्वेभ्यः स्वाश्रयस्य विशेषणात् । व्यावृत्तिबुद्धिहेतुत्वं तेषामेव ततः स्थितम्" ॥
—तत्त्वसं० का० ७०९-७११ पृ० २३६ ।

"प्रत्यक्षतः प्रसिद्धास्तु सत्त्व-गोत्वादिजातयः । अक्षव्यापारसद्भावे सदादिप्रत्ययोदयात् ॥"
—तत्त्वसं० का० ७१४ पृ० २३७ ।

३ "अनुमानबलेनापि सत्त्वमासां प्रतीयते । विशेषप्रत्ययो येन निमित्तान्तरभाविकः" ॥
—तत्त्वसं० का० ७१५ पृ० २३७ ।

४ अतः परं भाविविक्तोद्द्योतकरादिमतमालम्ब्य तत्त्वसंग्रहकारिकाभिः (का० ७१६-८१२ पृ० २३८-२६२) तत्पञ्जिकया च विहितया समग्रया सामान्यपदार्थपरीक्षया नैषा टीका सर्वशः साम्यं बिभर्ति तथापि अन्तराऽन्तरा साम्यं वर्तते तच्च यथास्थानं निर्देक्ष्यते, भावार्थस्तु समानो भाति । सविस्तरं विज्ञातुकामैस्तु ताः सर्वा अपि कारिका विलोकनीयाः ।

५ **कर्मादि**-भां० मां० । ६ प्र० पृ० पं० ९ ।

७-तं **भूतकण्ठे** भां० मां० विना । श्लोकवार्तिकमूलेऽपि अयं 'भूतकण्ठ'-शब्दः प्रयुक्तः । तद्यथा—
"भूतकण्ठगुणादेश्च प्रतिपिण्डं समाश्रितः" ॥—
"कण्ठगुणः कण्ठभूषणं हारादि"—श्लो० वा० वनवा० श्लो० ३५ पृ० ६२२ ।
"भूतकण्ठगुणवत् स्रक्सूत्रवद् वा"—श्लो० वा० पार्थ० व्या० पृ० ६२१ पं० २२ ।
स्याद्वादरत्नाकरे तु सामान्यविचार एव एष शब्दो बहुशः प्रयुक्तो दृश्यते । तद्यथा "भूतकण्ठे गुण इव" इत्यादि—
पृ० ९५१ पं० २०-२१-२२,२४ ।

८ "सूत्रकण्ठः खञ्जरीटे द्विजन्मनि कपोतके"—है० अनेका० ४-७० ।

'गौः' 'गौः' इति विकल्पज्ञानेनापि त एव समानाकाराः शाबलेयादयो बहिर्व्यवस्थिता अवसीयन्ते अन्तश्च शब्दोल्लेखः; न पुनस्तद्भिन्नमपरं गोत्वम् । तन्न निर्विकल्पकेन सविकल्पकेन वाऽध्यक्षेण सामान्यं व्यवस्थापयितुं शक्यम् । यदपि 'कार्यभूतानुगतप्रत्ययेन अनुमानतः सामान्यव्यवस्थापनम्, तदप्य-संगतम्; तस्य प्रत्ययहेतुत्वेन प्रमाणतोऽनिश्चयात्, तथा हि अनुगताकारज्ञानस्य निर्निमित्तस्य असंभवात् केनचिन्निमित्तेन भाव्यम् इत्येतावन्मात्रं सिध्यति । तच्च सामान्यम् अन्यद् वेति न निश्चयो ५ भवताम् । कार्यान्वय-व्यतिरेकाभ्यां च कारणत्वावधारणम्, पिण्डानां च विज्ञानजन्मनि ततः सामर्थ्यं विशेषप्रत्यये सिद्धमिति इहापि तेषामेव सामर्थ्यप्रकल्पनम्, नः सामान्यस्य तस्य क्वचिदपि सामर्थ्यानवधारणात् । तथाहि-पिण्डसद्भावे अनुगताकारं ज्ञानमुपलभ्यते तदभावे न इति वरम-ध्यक्षप्रत्ययावसेयानां तेषामेव तन्निमित्तता कल्पनीया । यदपि 'पिण्डानामविशिष्टत्वात् प्रतिनियमो न स्यात् तज्जन्मनि' इत्यभिधानम्, तदपि असंगतम्; यतो यथा पिंडादिरूपतयाऽविशेषेऽपि तन्तू-१० नामेव पटजन्मनि हेतुत्वम् न कपालादीनाम् तथा शाबलेयादीनामेव 'गौः' 'गौः' इति ज्ञानोत्पादने सामर्थ्यं भविष्यति कयाचिद् युक्त्या न कर्कादीनाम्, यथा वा गुडूच्यादेरेव ज्वरादिशमने सामर्थ्यं प्रतीयते न दध्यादेर्वस्तुरूपतयाऽविशेषेऽपि तथा प्रकृतेऽपि भविष्यतीति न पर्यनुयोगो युक्तः । किञ्च; सामान्यं परेण मूर्तमभ्युपगम्यते, अमूर्तं वा ? यदि अमूर्तम् न सामान्यं स्याद् रूपवत् । अथ मूर्तम् तथा च न सामान्यं घटादिवत् । तथा, यदि अनंशं सामान्यमभ्युपगम्यते तर्हि न सामान्यम् अनंश-१५ त्वात् परमाणुवत्, सांशत्वेऽपि न सामान्यम् घटवत् । किञ्च, यदि पिण्डेभ्यो भिन्नं सामान्यम् भेदेन एव उपलभ्येत घटादिभ्य इव पटः । न च एकान्ततो व्यक्तिभ्यः सामान्यस्य भेदे 'गोर्गोत्वम्' इति व्यपदेशोपपत्तिः संबन्धाभावात्, समवायस्य तत्संबन्धत्वेन निषेत्स्यमानत्वात् । व्यक्तिभ्यस्त-स्याऽभेदे अन्यत्राऽननुयायित्वाद् न सामान्यरूपता पिण्डस्वरूपवत् । न च भेदेन व्यक्तिभ्यस्तस्याऽ-नुपलक्षणं भिन्नप्रतिभासविषयत्वाद् असिद्धम्, बुद्धिभेदस्य व्यक्तिनिमित्तत्वेन प्रतिपादनात् । किञ्च,२० यदि सामान्यबुद्धिर्व्यक्तिभिन्नसामान्यनिबन्धना भवेत् तदा व्यक्त्यग्रहणेऽपि भवेत् अश्वबुद्धिवद् गोपिण्डाग्रहणे, न च कदाचित् तथा भवेत् । ततो न व्यक्तिव्यतिरिक्तसामान्यसद्भावः । अथ आधार-प्रतिपत्तिमन्तरेण आधेयप्रतिपत्तिर्न भवतीति तद्ग्रहे एव तद्ग्रहः नाऽभावात् अन्यथा कुण्डाद्या-धारप्रतिपत्तिमन्तरेण बदराधेयस्य अप्रतिपत्तेः तस्याप्यभाव एव स्यात्, नः बदरादेः प्रतिनियता-धारमन्तरेणापि स्वरूपेणोपलब्धेर्नाभावः गोत्वादेस्तु प्रतिनियतपिण्डोपलम्भमन्तरेण स्वरूपेण कदा-२५ चनाऽपि अनुपलब्धेरभाव एव, तेन 'तदग्रहे तद्बुद्ध्यभावात् इत्यत्र सामान्याभिव्यञ्जकपिण्डग्रहण एव तदभिव्यङ्ग्यसामान्यबुद्धिसद्भावात्-प्रकाशग्रहण एव गृह्यमाणघटादिसत्त्ववत्-सामान्यस्यापि सत्त्वम्' इति यदुक्तम् तन्निरस्तं भवति घटनिमित्तघटबुद्धिवत् सामान्यनिबन्धनत्वेन तद्बुद्धेरसिद्धेः । किञ्च, सामान्यं निराधारं वा अभ्युपगम्येत, आधारवद् वा ? यदि निराधारम् न सामान्यं स्यात् अनाधारत्वात् शशशृङ्गवत् । आधारवत्त्वेऽपि तस्य तत्र वृत्त्यनुपपत्तिः तथाहि-तस्य एकदेशेन वा ३० तत्र वृत्तिर्भवेत् सर्वात्मना वा ? सर्वात्मना वृत्तौ एकस्मिन्नेव पिण्डे सर्वात्मना परिसमाप्तत्वाद् यावन्तः पिण्डाः तावन्ति सामान्यानि स्युः, न वा सामान्यम् एकपिण्डवृत्तित्वाद् रूपादिवत् । एक-देशवृत्तावपि न सामान्यं स्यात् सामान्यस्य निरंशत्वेन एकदेशासंभवात् संभवेऽपि ते ततो भिन्ना वा स्युः, अभिन्ना वा ? यदि भिन्नास्तदा तेषु सामान्यं वर्तते, उत नेति ? यदि वर्तते तदा किं सर्वा-त्मना, उत एकदेशेन ? यदि सर्वात्मना तावत्सामान्यप्रसक्तिः प्रत्येकमेकदेशे तस्य परिसमाप्तत्वात्, ३५ न वा सामान्यम् प्रदेशवृत्तित्वाद् घटवत् । अथ एकदेशेन, एकदेशेषु वृत्तिस्तदा तेऽपि एकदेशा यदि ततो भिन्नास्तदा तेष्वपि अपरैकदेशवशाद् वृत्तिरिति अनवस्थाप्रसक्तिः । अथ अभिन्नास्तदा तेषां सामान्यरूपत्वात् तावन्ति सामान्यानि स्युः । न च सामान्यात्मकानां तेषां करणरूपता युक्ता येन तैः पिण्डेषु सामान्यं वर्तेत नहि घटत्वादिसामान्यं गोत्वस्य पिण्डवृत्तौ करणत्वेन उपलब्धम् ।

---

१ अतश्च बृ० आ० । २ पृ० ६८८ पं० १० । ३ पृ० ६८८ पं० १५-१६ । ४ यथा घटादि-भां० मां० । यथा यदि रू-बृ० आ० हा० वि० । ५ वा गडू-वा० बा० ।

६ "यद्यनेकानुवृत्ति गोत्वं तत् किं प्रतिपिण्डं परिसमाप्त्या वर्तते अथैकदेशेनेति ?" इत्यादि सामान्यविषयिणी चर्चा न्यायवार्तिकतोऽवबोद्धव्या-२-२-६५ पृ० ३१७-३१९ ।

न च सामान्यस्य अनुवृत्त्येकरूपत्वात् कार्त्स्न्यैकदेशशब्दयोस्तत्राऽप्रवृत्तिः, निरवयवैकरूपेऽपि व्याप्त्यव्याप्तिशब्दयोर्भवतैव प्रवृत्त्यभ्युपगमात् तत्र च कृत्स्नैकदेशवृत्तिपक्षोक्तदोषाणां समानत्वात् अपरस्य चात्र वक्तव्यस्य पूर्वमेव निषिद्धत्वात्। तन्न वृत्त्यनुपपत्तेः सामान्यस्य सत्त्वमभ्युपगन्तुं युक्तम्।

किञ्च, पिण्डोत्पत्तिकाले किं गवात्मकेन पिण्डेन गोत्वं संबध्यते, उत अगवात्मकेन? यदि ५ आद्यः पक्षस्तदा गोत्वसंबन्धात् प्राक् पिण्डस्य यद्यपरगोत्वसंबन्धाद् गोरूपता तदा अनवस्था-प्रसक्तिः। अथ तत्संबन्धमन्तरेणाऽपि तस्य गोरूपता तदा गोत्वसंबन्धवैयर्थ्यम् तमन्तरेणापि गोपिण्डस्य प्रागेव गोरूपत्वात्। अथ अगोरूपेण तदाऽगोरूपत्वाविशेषात् अश्वादिपिण्डैरपि गोत्व-संबन्धप्रसक्तिः इति अश्वादयोऽपि गोरूपाः स्युः। न च अगोरूपत्वाविशेषेऽपि गोत्वसंबन्धात् प्राक् शाबलेयादिभिरेव गोत्वं संबध्यते न कर्कादिभिरिति वक्तव्यम्, नियमहेतोरभावात्। अथ उप- १० लक्षणभेदो नियमहेतुः। तथाहि-यत्र ककुदादीनि उपलक्षणानि पिण्डे तत्रैव गोत्वं वर्तते न केसरा-द्युपलक्षणवति, असदेतत्; गोत्वादेरचेतनत्वेन निरभिप्रायस्य प्रदर्शितोपलक्षणप्रत्यभिज्ञानवशाद् अन्यपरिहारेण प्रतिनियताधारवृत्तित्वानुपपत्तेः। न च ककुदाद्युपलक्षणयोगिनः पिण्डादेः स्वात्मनि गोत्वाधारसामर्थ्यं प्रतिनियतं निमित्तं कल्पयितुं युक्तम्, यतो यया शक्त्या ककुदादिमन्तः पिण्ड-विशेषा गोत्वसामान्यं विजातीयपिण्डव्यवच्छेदेन स्वात्मनि व्यवस्थापयन्ति तयैव 'गौः' 'गौः' इत्यनु- १५ गताकारज्ञानहेतवोऽपि भविष्यन्तीति किमन्तर्गडुसामान्यप्रकल्पनया। न च अदृष्टं गोत्वादेः सामा-न्यस्य प्रतिनियतव्यक्तिवृत्तिनिमित्तं कल्पनीयम्, तत्रापि अस्य दूषणस्य समानत्वात्। यदपि 'अनु-गताकारं ज्ञानं सामान्यमन्तरेण असंभवि' इति, तत्रापि किं यत्रानुगतं ज्ञानं तत्र सामान्यसंभवः प्रतिपाद्यते, आहोस्वित् यत्र सामान्यसंभवस्तत्र अनुगतं ज्ञानमिति? तत्र यदि आद्यः पक्षः, स न युक्तः; यतो गोत्वादिसामान्येषु बहुषु 'सामान्यम्' 'सामान्यम्' इति अनुगताकारप्रत्ययप्रवृत्तेः अपर- २० सामान्यप्रकल्पनाप्रसक्तिः स्यात्। तथा, प्रागभावादिष्वपि अभावेषु 'अभावः' 'अभावः' इत्यनुगत-प्रत्ययप्रवृत्तिरस्ति, न च परैः अभावसामान्यमभ्युपगतमिति व्यभिचारः। न च सामान्यादिषु अनु-गतप्रत्ययस्य गौणत्वान्न व्यभिचारः, अस्खलद्वृत्तित्वेन गौणत्वस्य असिद्धेरित्युक्तत्वात्। अथ यत्र सामान्यं तत्रानुगतप्रत्ययकल्पना, न; पाचकादिषु तदभावेऽपि अनुगतप्रत्ययप्रवृत्तेः। न च तत्रापि पचनक्रियानिमित्तोऽयं प्रत्ययः तस्याः प्रतिव्यक्ति भिन्नत्वात् तत्सामान्यनिमित्तत्वे प्रागेव तत्प्रत्यय- २५ प्रसूतिर्भवेत् सामान्यस्य नित्यत्वेन तदापि तद्धेतोर्भावात्। अभिव्यञ्जकक्रियाभावात् प्राक् अनभिव्य-क्तत्वात् तत्सामान्यस्य न तत्प्रत्ययोत्पत्तिरिति चेत्, पचनक्रियानिवृत्तावपि अभिव्यञ्जकाभावेन अनभिव्यक्तात् तत्सामान्यात् तत्प्रत्ययोत्पत्तिर्न स्यात् अनुत्पन्नवद् विनष्टस्यापि अभिव्यञ्जकस्य अभि-व्यञ्जकत्वायोगात्। अथ एकदा अभिव्यक्तस्य तत्सामान्यस्य नित्यत्वेन सर्वदा अभिव्यक्तत्वाद् उत्तर-कालं तत्प्रत्ययोत्पत्तिस्तर्हि पचनक्रियायाः प्रागपि तत्सामान्यस्य एकरूपतया अभिव्यक्तत्वात् ततस्त- ३० त्प्रत्ययोत्पत्तिः स्यात्। अथ प्राग् न तस्याऽभिव्यक्तिस्तर्हि अभिव्यक्ताऽनभिव्यक्तस्वभावद्वययोगात् तस्य नैकत्वम् स्वभावभेदलक्षणत्वाद् वस्तुभेदस्य। अथ व्यक्तिप्रतिभाससमय एव सामान्यस्य प्रतिभास इति न ततः प्राक् पश्चाद् वा अभिव्यक्तैकरूपस्यापि तस्य ग्रहणं तर्हि व्यक्तिप्रतिभासकाले अपरप्रतिभा-सस्याऽसंवेदनाद् अनुगतप्रतिभासस्य च तदा व्यक्तिनिबन्धनत्वात् सामान्यस्य अभाव एवेति प्राप्तम्। तेन 'यत्र सामान्यसद्भावाद् अनुगताकारं ज्ञानं प्रवर्तते तत्र तद् मुख्यम् यत्र तु तदभावात् तत् तद् ३५ गौणम्' इत्येतदपि निरस्तम् सामान्यनिबन्धनत्वेन अनुगतज्ञानस्य क्वचिदपि असिद्धेः मुख्याभावे गौणकल्पनाया दूरापास्तत्वात्। यदपि 'किमनेन प्रसङ्ग आपाद्यते परस्य, आहोस्वित् स्वतन्त्रसाधन-मिति, न तावत् प्रसङ्गसाधनम् पराभ्युपगमेनैव तस्य वृत्तेः, न च परस्य कार्त्स्न्येन एकदेशेन वा निरंशस्य वृत्तिः सिद्धा किन्तु वृत्तिमात्रं समवायस्वरूपं सिद्धम् तच्च विद्यत एव समवायस्य प्रमाणतः सिद्धेः। तन्न प्रसङ्गसाधनमेतत्। स्वतन्त्रं तु साधनं न भवति सामान्यलक्षणस्य धर्मिणोऽसिद्धेर्हेतोरा- ४० श्रयासिद्धिप्रसङ्गात्, धर्मिसिद्धौ वा तत्प्रतिपादकप्रमाणबाधितत्वात् तदभावसाधकप्रमाणस्य अप्र-वृत्तिरेव' इत्यभिधानम्, तदप्यसंगतम्; यतो नास्माभिः किञ्चिदत्र सामान्यस्य साध्यते किन्तु येन सामान्यं व्यक्त्याश्रितमभ्युपगम्यते तेन तत्र तस्य एकदेशेन सर्वात्मना वा-अन्यथा वृत्तेरसंभवात्-

---

१-बध्यते भां० मां०। २ पृ० ६८८ पं० १३-१४। ३-चनादि-भां० मां०।

वृत्तिर्वाच्या । अथ समवायलक्षणा वृत्तिस्तत्र तस्य उक्तैव, न; तस्याः स्वरूपानिर्देशात् । अथ आश्रयाऽऽश्रयिभावस्तस्याः स्वरूपम्, न; अस्य पर्यायमात्रत्वात्-वृत्तिमात्रम् समवायः आश्रयाश्रयिभावः इति च पर्यायशब्दाः । एतेन तु कार्त्स्न्यैकदेशवृत्तिव्यतिरेकेण लोकप्रसिद्धाऽपरवृत्तिप्रदर्शनं कृतम् । या तु समवायलक्षणा स्वशास्त्रपरिभाषिता वृत्तिः सा तु तद्ग्राहकप्रमाणाभावात् सामान्यवद् असिद्धस्वरूपैव यदि च पिण्डेभ्यो व्यतिरिक्तम्-कुण्डव्यतिरिक्तबदरवत्-सामान्यं प्रमाणत उपलभ्येत ५ तदा तेषु तस्य वृत्तिप्रकल्पना स्यात् न च तत् तथोपलभ्यत इत्युक्तं प्राक् । अपि च, उत्पन्ने पिण्डे सामान्यं वर्तते, आहोस्विद् अनुत्पन्ने, उत उत्पद्यमाने इति विकल्पाः । न तावद् अनुत्पन्ने, तदा पिण्डस्याऽसत्त्वात् । नापि उत्पन्ने, अगोरूपे अश्वपिण्ड इव तत्र तस्य वृत्त्ययोगात् इत्युक्तत्वात् । नापि उत्पद्यमाने, अनिष्पन्नस्य आधारत्वायोगात् विद्यमानस्वरूपाणामेव कुण्डबदराणामाश्रयाश्रयिभावदर्शनात् अतः 'य एव पिण्डोत्पत्तिकालः स एव तत्सामान्यसंबन्धसमयः' इति अयुक्तम्, १० अन्यत्र एवमदर्शनात् ।

किञ्च, उत्पद्यमानेन पिण्डेन सह सामान्यं संबन्ध्यमानं किमन्यत आगत्य संबध्यते उत पिण्डेन सह उत्पादात्, आहोस्वित् पिण्डोत्पत्तेः प्रागेव तद्देशावस्थानात् इति विकल्पाः । तत्र न तावद् अन्यत आगत्य संबध्यत इति पक्ष आश्रयितुं युक्तः यतः प्राक्तनपिण्डपरित्यागेन तत् तत्र आगच्छति, उत अपरित्यागेन इति वाच्यम् । यदि परित्यागेन इति पक्षः स न युक्तः प्राक्तनपिण्डस्य गोत्वपरि- १५ त्यक्तस्य अगोरूपताप्रसक्तेः । अथ अपरित्यागेन तदा अपरित्यक्तप्राक्तनपिण्डस्य निरंशस्य रूपादेरिव गमनासंभवः न हि अपरित्यक्तप्राक्तनाधाराणां रूपादीनामाधारान्तरसंक्रान्तिः क्वचिदपि उपलब्धा, न च प्राक्तनाधारापरित्यागेऽपि आधारान्तरसंक्रमः सर्पादेरिव सामान्यस्य भविष्यतीति वक्तव्यम्, सामान्यस्य अमूर्तत्वाभ्युपगमात् अमूर्तस्य च रूपादिवद् गमनासंभवात् । न च सर्पवत् पूर्वाधारापरित्यागेन आधारान्तरक्रोडीकरणे सामान्यरूपता, सप्रदेशस्य घटवत् सामान्यरूपतानुपपत्तेः । न च २० पिण्डोत्पत्तेः प्राक् तद्देशे तस्य अवस्थानाद् उत्पद्यमाने पिण्डे तस्य वृत्तिरित्यभ्युपगमोऽपि युक्तः निराधारस्य सामान्यस्य तत्र अवस्थानासंभवात् अवस्थाने वा आकाशवत् सामान्यरूपताविरहात् । न च पिण्डेनैव सह उत्पद्यत इति पक्षप्रकल्पनाऽपि संगता, उत्पत्तिमत्त्वेन तस्य अनित्यताप्रसक्तेः अनित्यस्य च ज्वालादिवत् सामान्यरूपताऽयोगात् । न च शाबलेयादिपिण्डस्य सामान्यसंबन्धविकलस्यैव परेण अवस्थानमभ्युपगतमिति सामान्यप्रकल्पना अनेकदोषदुष्टत्वाद् असंगतैव । तदुक्तम्— २५

"न याति न च तत्रासीदस्ति पश्चान्न चांऽशवत् ।
जहाति पूर्वं नाधारमहो! व्यसनसंततिः" ॥ [ ]

तथा—

"यत्रासौ वर्तते भावस्तेन संबध्यते न च ।
तद्देशिनं च व्याप्नोति किमप्येतद् महाद्भुतम्" ॥ [ ] ३०

न च गमनादिधर्मविकलस्यापि सामान्यस्य उत्पद्यमानपिण्डसंबन्धो 'गौः' 'गौः' इत्यनुस्यूताकारप्रत्ययात् प्रतीयत एवेति प्रमाणप्रतिपन्ने वस्तुनि विरोधाद्युद्भावनमसंगतमेवेति वाच्यम्, 'गौः' 'गौः' इत्यनुगताकारप्रत्ययस्य प्रागभावादिषु अभावप्रत्ययवत् सामान्यसंबन्धमन्तरेणाऽपि सिद्धत्वात् । किञ्च, पिण्डेभ्यो व्यतिरिक्तं यदि अनुस्यूतमेकं सामान्यमभ्युपगम्येत तदा एकपिण्डोपलम्भे तस्य अविभक्तत्वात् पिण्डान्तरालेऽपि उपलब्धिः स्यात् न हि तस्य एकत्राभिव्यक्तस्य अन्यत्र अनभिव्यक्त- ३५ स्वरूपता विरुद्धधर्माध्यासतो भेदप्रसक्तेः तथापि अभेदे न किञ्चिद् भिन्नं स्याद् इति सर्वत्र भेदव्यवहारनिवृत्तेः तदपेक्षस्य अभेदव्यवहारस्याऽपि विरहात् सर्वाभावप्रसक्तिः । अथ अन्तराले संयुक्तसमवायसंबन्धस्य उपलम्भहेतोश्चक्षुषोऽभावाद् अनुपलम्भः, असदेतत्; तत्र तत्सद्भावे प्रमाणाभावात्-यदि हि पिण्डद्वयान्तराले सामान्यस्य कुतश्चित् प्रमाणात् सद्भावः सिद्धः स्यात् तदा ग्रहण-

---

१-अत्र सामान्यगोचरा चर्चाऽवगन्तव्या—पृ० २३९ पं० ३-पृ० २४१ पं० १ । हेतुबिन्दुतोऽप्येषाऽवधारणीया लि० पृ० ३१ ब०-३५ अ० ।

२ 'तदुक्तम्' इत्युक्तिस्थायं श्लोकः स्याद्वादरत्नाकरे उद्धृतो वर्तते—पृ० ९५५ पं० १८ ।

निमित्तं यथोपवर्णितमुपपद्येताऽपि, न च तत्सद्भावः सिद्ध इति असकृद् आवेदितम् । न च स्वव्यक्तिसर्वगतत्वात् सामान्यस्य अयमदोषः, अन्तराले तस्य अभावे स्वव्यक्तिषु च सद्भावे अनेकत्व-प्रसक्तेः तदन्तरेण अन्तराले विच्छिन्नस्य सकलस्वव्यक्तिसंबद्धत्वानुपपत्तेः । यदपि 'अत्र 'अन्तराल' शब्देन किं पिण्डान्तरमश्वादिरूपमभिधीयते, आहोस्विद् मूर्तद्रव्याभावः, उत आकाशादिप्रदेश इति ५ विकल्पाः । यदि अश्वादिपिण्डान्तराभिधानं तदा तत्र गोत्वसामान्यस्य अवृत्तेरग्रहणमुपपन्नमेव न हि यद् यत्र नास्ति तत् तत्र गृह्यत इति परस्याभ्युपगमः अथ आकाशादिदेशस्तदा तत्रापि सामान्यस्य वृत्तेरग्रहणमेव । एवं मूर्तद्रव्याभावेऽपि अग्रहणमभावादेव' इति दूषणाभिधानम्, तदपि असंगतमेव । एवं दूषणाभिधाने सर्वत्र तदभिधानानिवृत्तेः । तथाहि—'घटद्वयान्तराले पटादि-द्रव्यस्य अग्रहणाद् अभावः' इत्यत्रापि विकल्पैत(कल्प्यैत)द्दोषाभिधानस्य अभिधातुं शक्यत्वात् । १० अथ अत्र 'अन्तराल'शब्दस्य लोकप्रसिद्ध एवार्थः प्रकल्प्यते तर्हि एतद् अन्यत्रापि समानमिति न पर्यनुयोगावकाशः ।

किञ्च, यदि उपलभ्यस्वभावं सामान्यमभ्युपगम्यते तदा सास्नाद्यवयवानामिव शाबलेयादौ तद्बुद्ध्या ग्रहणं स्यात्, अग्रहणात् तद् असदित्यत्र किं सास्नादिबुद्ध्याऽग्रहणात् सामान्यस्य असत्त्वम्, आहोस्वित् स्वबुद्ध्या इति कल्पनाद्वयम् । न तावत् सास्नादिबुद्ध्या अगृह्यमाणत्वात् तस्य असत्त्वम् १५ रूपादेरपि रसादिबुद्ध्यग्रहणाद् असत्त्वप्रसक्तेः । अथ स्वबुद्ध्या अगृह्यमाणत्वाद् असत्त्वम्, तदयुक्तम्; विरोधात्–न हि 'सामान्यबुद्धिः सामान्यस्य च अग्राहिका' इत्यभिधानमविरुद्धम् 'माता च मे वन्ध्या च' इत्यभिधानवत् । न च अनुगताकारबुद्ध्या सामान्यं न गृह्यते, व्यावृत्तबुद्धेरपि विशेषं प्रत्यग्राहकत्वप्रसक्तेः । अतः 'तद्बुद्ध्या अगृह्यमाणत्वात् असत् सामान्यमित्ययुक्तम्' इत्यपि अभिधानमसंगतम् यतो भवदभिप्रायेण समानाकारशाबलेयादिबुद्धिः सामान्यबुद्धिः तया च देश-कालव्यापि २० सामान्यं न गृह्यते तथाभूतस्य बुद्ध्यजनकत्वेन तद्ग्राह्यत्वायोगात् अत एव अनुगताकारबुद्धेरव्यापक-क्षणिकशाबलेयादिपदार्थप्रभवत्वात् तद्ग्राहकत्वमेव न सामान्यग्राहकत्वम् । किञ्च, अक्षणिक-व्यापकैकस्वभावत्वे सामान्यस्य किं येनैव स्वभावेन एकस्मिन् पिण्डे वर्तते सामान्यं तेनैव पिण्डान्तरे, आहोस्वित् स्वभावान्तरेण? यदि तेनैव ततः सर्वपिण्डानामेकत्वप्रसक्तिः एकदेश-काल-स्वभाव-नियतपिण्डवृत्त्यभिन्नसामान्यस्वभावक्रोडीकृतत्वात् सर्वपिण्डानाम् प्रतिनियतदेश-काल-स्वभावैक-२५ पिण्डवत् । अथ स्वभावान्तरेण, तदा अनेकस्वभावयोगात् सामान्यस्य अनेकत्वप्रसक्तिः स्वभावभेदस्य भावभेदकत्वात् अन्यथा भेदायोगात् । न च एकस्य अनेकवृत्तित्वं रूपादेरिव युक्तम् । अथ यथा एकस्य रूपादेरेकवृत्तित्वं-तथैवोपलम्भात्-अभ्युपगम्यते तथा एकस्य सामान्यस्य अनेकवृत्तित्वमनेकत्रोपलम्भात् किं नाऽभ्युपगम्यते अबाधितोपलम्भस्य भावरूपव्यवस्थानिबन्धनत्वात्? भवेद् एतत् यदि अनेकवृत्तितया एकं सामान्यं स्वरूपतोऽध्यक्षे प्रतिभासेत न चैवम् व्यक्तिव्यवस्थितस्य एकस्य ३० व्यक्तिभ्यो भिन्नस्य कुत्रचित् प्रत्यये अप्रतिभासनात् । न च देशव्याप्तिः कालव्याप्तिर्वा कस्यचिद् भावस्य केनचित् प्रमाणेन प्रतिपत्तुं शक्येति प्राक् प्रतिपादितम् । न च परस्परव्यावृत्तात्मानो भावा अनुगतनिमित्तमन्तरेण कथमभिन्नाकारप्रत्ययनिबन्धनं भवन्तीति वक्तव्यम् यतो यथा गुडूच्यादयो भावाः परस्परविविक्ता अपि सह प्रत्येकं च एकसामान्यमन्तरेणापि एकं ज्वरादिशमनलक्षणं कार्यं निर्वर्तयन्ति—न हि तत्र एकं सामान्यं तदर्थक्रियासंपादनसमर्थमस्ति अन्यथा तेषां चिर-क्षिप्रादिभेदेन ३५ व्याध्युपशमसामर्थ्योपलब्धिर्न स्यात् सामान्यस्य सर्वत्र एकरूपत्वात्, न च सरसौषधाद्युपयोग-संपाद्यशीघ्रव्याध्युपशमादिभेदोपलब्धिश्च स्यात् सामान्यस्य नित्यस्वभावतया परैरनाधेयातिशयस्य सर्वत्र सर्वदा एकरूपत्वात् । गुडूच्यादिभावनिबन्धनत्वे तु नायं दोषः तस्य प्रतिक्षणं भिन्नत्वे भिन्न-शक्तित्वात्—तथा इहापि केचिद् भावाः प्रकृत्यैव एकाकारपरामर्शहेतवो भविष्यन्तीति न तदर्थं सामान्यप्रकल्पनं युक्तम् । यदपि 'अनुगतप्रत्ययः पिण्डव्यतिरिक्तानुगतनिमित्तनिबन्धनः' इत्याद्य-४० नुमानम् तत्र प्रतिज्ञाया अनुमानबाधा । तथाहि-अनुगतप्रत्ययानां पिण्डव्यतिरिक्तमनुगतं निमित्त-मालम्बनभूतं साधयितुमभिप्रेतम् तदयुक्तम् तस्य तत्र अप्रतिभासनात् वर्णाऽऽकृत्यक्षराकारस्यैव

१ २-२-६५ न्यायवा० पृ० ३१५ पं० २१—। २–कल्पैत–बृ० । ३–मित्यभिधान–वा० बा० । ४–क्षणिकाव्या–वा० बा० ।–क्षणिके व्या–बृ० । ५ पृ० ६८८ पं० १० ।

अर्थस्य तत्र प्रतिभासनाच्च तद्रूपविकलतया सामान्यस्य परैरभ्युपगमात् कथं तत्प्रतिभासे तस्य प्रतिभासः अन्याकारस्य विज्ञानस्य अन्यालम्बनत्वे अतिप्रसङ्गात्? तथाहि—यो यद्विलक्षणार्थप्रतिभासः प्रत्ययः स तद्ग्राहको न भवति, यथा रूपप्रत्ययो न रसादिग्राहकः, जातिविलक्षणवर्णादिप्रतिभासश्च अन्वयी प्रत्यय इति व्यापकविरुद्धोपलब्धिः ।

योऽपि शंकरस्वामी अत्राह—"सामान्यमपि नीलत्वादि नीलाद्याकारमेव अन्यथा 'नीलम्'[१] 'नीलम्' इति अनुवृत्तिप्रत्ययो न स्यात् इति हेतोरसिद्धत्वात् नानुमानबाधा" [ ] इति, सोऽपि अयुक्तकारी; नीलादेर्गुणाद् नीलत्वादेः सामान्यस्य एवमभेदप्रसङ्गात् । अथ गुणस्य व्यावृत्तत्वात् तत्सामान्यस्य तु अनुगतत्वात् आकारभेदाद् भेदः, न; व्यावृत्तनीलादिगुणव्यतिरिक्तानुगतनीलत्वादिसामान्यस्य नीलाद्याकारस्य अप्रतिभासनाद् अध्यक्षे असाधारणस्य नीलादेरेकस्यैव प्रतिभासनात् विकल्पज्ञानेऽपि यथादृष्टस्यैव निर्णयात् द्वितीयस्य सामान्याकारस्य तत्रापि अनिश्चयात् । न च क्षणिकत्ववत् प्रतिभासमानमपि सामान्यं व्यक्तिभेदेन नोपलक्ष्यत इति वक्तव्यम्-अनुपलक्षितस्य व्यक्तिष्वभिन्नधी-ध्वनिनिमित्तत्वायोगात् न हि विशेषणानुपलक्षणे विशेष्ये बुद्धि, रुपजायते दण्डानुपलक्षणे दण्डिबुद्धिवत् तथा च "समवायिनः श्वैत्यात् श्वैत्यबुद्धेः श्वेते बुद्धिः" [वैशेषिकद० ८-१-९] इति वचनं निरवकाशं भवेत् । किञ्च, अविकल्पविज्ञानवादिनः प्रतिभातानुपलक्षणं युज्येतापि भवतस्तु सविकल्पकाध्यक्षवादिनो गृहीताऽनुपलक्षणमयुक्तम् निश्चयानामुपलक्षणमन्तरेण अपरग्रहणासंभवात् न हि निश्चयैरनिश्चितं गृहीतं नाम । किञ्च, यदि अत्र अनुगतं निमित्तं नित्यं साध्यते तदा तस्य असिद्धिः विपर्ययसिद्धेः । तथाहि—अनुगताभिधानप्रत्ययाः क्रमवत्कारणप्रभवाः, क्रमेण उपजायमानत्वात्, प्रदीपज्वालाप्रभवक्रमभाविप्रत्ययवत् । यदि तु अक्रमसामान्यहेतुका एते अभविष्यन्न क्रमेण उत्पत्तिमासादयिष्यन् अविकलकारणत्वात् तथापि तेषां तद्धेतुकत्वे सर्वं सर्वहेतुकं स्यात् इति प्रतिनियतकार्यकारणभावव्यवस्थाविलोपप्रसक्तिः । अनैकान्तिकश्च हेतुः षट्सु पदार्थेषु अपरानुगतनिमित्ताभावेऽपि 'पदार्थाः' 'पदार्थाः' इत्यनुगतप्रत्ययोपलब्धेः । न च सदुपलम्भकप्रमाणविषयत्वादिकमनुगतं निमित्तमत्रापि अस्ति इत्यव्यभिचारः, प्रागुक्तोत्तरत्वाद् अस्य । न च विपक्षे वृत्तौ अस्य बाधकं प्रमाणमस्ति इति संदिग्धविपक्षव्यावृत्तिकत्वाद् अनैकान्तिकः । न च अनुगतनिमित्ताभावेऽपि अस्य भावे प्रत्ययभेदकृता विषयभेदव्यवस्था न स्यादिति रूपादिप्रत्ययानामपि न स्वविषयव्यवस्थापकत्वं भवेदिति वक्तव्यम्, अनुगतप्रत्ययस्याविशिष्टाभिलापत्वेन स्वलक्षणाविषयीकरणात् तद्व्यवस्थापकत्वायोगात् यथासंकेतं तत्तद्व्यावृत्ति-

---

१ "शङ्करस्वामी त्वाह—सामान्यमपि नीलत्वादि नीलाद्याकारमेव अन्यथा हि नील इत्येवमनुवृत्तिप्रत्ययो न स्यात्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २४३ पं० २७ ।

> "सामान्यस्यापि नीलादिरूपत्वे गुणतोऽस्य कः । भेदो नानुगतश्चैको नीलादिरुपलक्ष्यते ॥
> भासमानोऽपि चेदेष न विवेकेन लक्ष्यते । तत्कथं धीध्वनी व्यक्तौ वर्तेते तद्बलेन तौ ॥
> निश्चयात्मक एवायं सामान्यप्रत्ययः परैः । इष्टश्चाग्रहणे प्राप्ते युक्तं नानुपलक्षणम्" ॥
>
> —तत्त्वसं० का० ७४०-७४२ पृ० २४४ ।

२ मुद्रितेषु वैशे० द० पुस्तकेषु "समवायिनः श्वैत्याच्छ्वैत्यबुद्धेश्च श्वेते बुद्धिस्ते एते कार्यकारणभूते"-८-१-९ इति सूत्रं वर्तते, केवलं गू० वै० पुस्तके इत्थं टिप्पणी दृश्यते—"त एते" इत्यादि पृथक् सूत्रं चन्द्रकान्तमते—पृ० ३०३ ।

३ "सिद्धेऽप्यन्यनिमित्तत्वे न सामान्यं प्रसिध्यति । अनुगाम्येकमध्रौव्यविविक्तं च क्रमोदयात्" ॥

—तत्त्वसं० का० ७४३ पृ० २४४ ।

४ "पदार्थशब्दः कं हेतुमपरं षट्स्वपेक्षते । अस्तीति प्रत्ययो यश्च सत्तादिष्वनुवर्तते ॥
अन्यधर्मनिमित्तश्चेत् तत्राप्यस्त्यास्तितामतिः । तदन्यधर्महेतुत्वेऽनिष्ठासक्तेरधर्मिता ॥
व्यभिचारी ततो हेतुरमीभिरयमिष्यते । न च सर्वोपसंहाराद् व्याप्तिरस्य प्रसाधिता" ॥

—तत्त्वसं० का० ७४४-७४६ पृ० २४५ ।

५-स्याविष्टाभि-मू० । "न हि सामान्यप्रत्ययो वस्तुस्वलक्षणविषयः परमार्थतो युक्तः आविष्टाभिलापेन प्रत्ययेन स्वलक्षणस्याविषयीकारणात्"—तत्त्वसं० पञ्जि० पृ० २४६ पं० २ ।

मादाय एकत्रापि अनेकविरुद्धधर्माध्यवसायिविकल्पप्रसूतेरविरोधात् । यदि च अनुगतनिमित्त-
मन्तरेण अनुगतप्रत्ययो न भवेत् इच्छाविरचितरूपेषु 'चन्द्रापीडादि'भावेषु नष्टाऽजातेषु च
महासम्मत-शङ्खचक्रवर्तिप्रभृतिषु कथं भवेत्? न हि तत्रापि सामान्यसद्भावः तस्य व्यक्त्याश्रि-
तत्वात् तदभावे तस्याप्यभावात् न हि आश्रितानामयं धर्मः–यदुत आश्रयाभावेऽपि केवलानामव-
५ स्थानम् अनाश्रितत्वप्रसङ्गात् केवलस्य वा अवस्थाने ग्रहणप्रसक्तिरेव इति न नष्टाऽजातेषु अनुग-
ताकारः प्रत्ययः सामान्यनिबन्धनः स्यात् इति अनेकान्त एव हेतोः । न च परेणापि केवलस्य
सामान्यस्य ग्रहणमभ्युपगम्यते । तथा चोक्तम्—"स्वाश्रयेन्द्रियसंनिकर्षापेक्षप्रतिपत्तिकं सामान्यम्"
[ ] इति । केवलस्यापि च सामान्यस्य ग्रहणाभ्युपगमे सामान्यप्रत्ययस्य व्यक्त्य-
ध्यवसायो न प्राप्नोति व्यक्तेस्तदानीमभावाद् 'व्यक्तीनामिदं सामान्यम्' इति संबन्धश्च न
१० स्यात् निमित्ताभावात् । तथाहि–संबन्धस्य निमित्तं भवत् तद्व्यङ्ग्यत्वं वा सामान्यस्य भवेत्,
तज्जन्यता वा, तद्ग्रहणापेक्षग्रहणता वा? तत्र न तावद् व्यक्तिभिर्व्यङ्ग्यत्वात् सामान्यं ताभिः
संबद्धम् परैरनुपकार्यस्य नित्यत्वात् सामान्यस्य अविशेषतो व्यङ्ग्यत्वानुपपत्तेः यो हि यस्य
अनुपकार्यः स तस्य अभिव्यङ्ग्यो न भवति, यथा हिमवान् विन्ध्यस्य, अनुपकार्यं च सामान्यं
व्यक्तिभिः इत्यनुपकार्यस्यापि व्यङ्ग्यत्वे सर्वः सर्वस्य व्यङ्ग्यः स्यात् इत्यतिप्रसङ्गः । नापि तज्जन्यता
१५ तन्निबन्धनम् नित्यतया अभ्युपगतस्य तज्जन्यत्वायोगात् केवलस्यापि ग्रहणाभ्युपगमाच्च । नापि
तज्ज्ञानपारतन्त्र्यमपि तस्य संभवति तेन "स्वाश्रयेन्द्रियसन्निकर्षापेक्षप्रतिपत्तिकं सामान्यम्" इति
अयुक्तमभिधानम् आश्रयस्यायोगात् तद्गतेन्द्रियसन्निकर्षाद्यपेक्षाया दूरोत्सारितत्वात् न चास्य
नित्यतया परैरनाधेयविशेषत्वान् क्वचिदपि अपेक्षा अतो यदि तत्स्वविषयज्ञानोत्पादनसमर्थं तदा
सर्वदैव तद् जनयेत् अथ असमर्थम् न कदाचिदपि जनयेत् न हि समर्थम् असमर्थं वा तस्य तद्रूपं
२० तत् केनचिद् अन्यथा कर्तुं शक्यम् नित्यत्वहानिप्रसङ्गात् । यदुक्तम्—

"तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता ।
नित्यत्वादचिकित्स्यस्य कस्तां क्षपयितुं क्षमः?" ॥ [ ] इति ।

अत एव अस्य व्यक्तिषु वृत्तिरपि अनुपपन्ना । तथाहि–वृत्तिरस्य भवन्ती स्थितिलक्षणा वा भवेत्,

---

१–प्रसूते–बृ० आ० हा० वि० ।

२ "इच्छारचितरूपेषु नष्टाजातेषु वा ततः । अनैकान्तिकता हेतोः सर्वैरेभिर्यथोदितैः" ॥

—तत्त्वसं० का० ७८९ पृ० २४६ ।

३ महाव्युत्पत्तिनामके बौद्धग्रन्थे चक्रवर्तिनां षष्टिर्नामानि परिगणितानि विद्यन्ते, तेषु 'महासंमत' इत्याद्यं नाम वर्तते—पृ० ५२ अं० १८० ।

४–चक्रप्र–बृ० आ० हा० वि० । "इच्छारचितरूपेषु चन्द्रापीडादिषु नभस्तलोपकल्पितधवलगृहादिषु नष्टाजातेषु च महासम्मत–शङ्खप्रभृतिषु"—तत्त्वसं० पञ्जि० पृ० २४६ पं० २१ । ५ प्र० पृ० पं० ७ ।

६ न हि समर्थमसमर्थं वा तस्य तत्स्वविषयज्ञानोत्पादरूपं तत् केनचिदन्यथा कर्तुं शक्यं नित्यत्व—आ० हा० वि० । अस्मिन् पाठान्तरे 'स्वविषयज्ञानोत्पाद' इत्यंशोऽधिको भाति स च यदि 'तत्' इत्यस्य टिप्पणात्मकत्वेन अन्तःप्रविष्टो न स्यात् तर्हि पाठान्तरत्वेन समर्थनीयः । वस्तुतः 'तद्रूपम्' इत्यस्य स्थाने 'यद्रूपम्' इति सम्यग् भाति परामर्शकस्य 'तत्'–पदस्याग्रे सत्त्वेन तत्संबन्धितया 'यत्' पदस्यैवापेक्षणात् । अत्रार्थे संवादो यथा—

"तस्य योग्यमयोग्यं वा रूपं यत् प्रकृतिस्थितम् । तद् ध्रौव्यादप्रकम्प्यं हि को नाम चलयिष्यति" ॥

—तत्त्वसं० का० ७९५ पृ० २५६ ।

अस्याः कारिकायाः पञ्जिका तु इत्थं वर्तते—"न हि तस्य तद्रूपं समर्थमसमर्थं वा तत् क्वचिद् अन्यथाकर्तुमीशते नित्यत्वहानिप्रसङ्गात्"—तत्त्वसं० पञ्जि० पृ० २५७ पं० ४ ।

७ पृ० ४८२ पं० २२ टि० ६ ।

८ "अपि चानेकवृत्तित्वं सामान्यस्य यदुच्यते । तत्र केयं मता वृत्तिः स्थितिः किं व्यक्तिरेव वा ॥
स्वरूपाप्रच्युतिस्तावत् स्थितिरस्य स्वभावतः । नाधारस्तत्कृतौ शक्तो येन स्थापकता भवेत् ॥
गमनप्रतिबन्धोऽपि न तस्य बदरादिवत् । विद्यते निष्क्रियत्वेन नाधारोऽतः प्रकल्प्यते ॥
स्थितिस्तत्समवायश्चेत् तथैव विचार्यते । सोऽभीष्टोऽयुतसिद्धानामाश्रयाश्रयितात्मकः" ॥

—तत्त्वसं० का० ७९८–८०१ पृ० २५९ ।

अभिव्यक्तिलक्षणा वा? स्थितिरपि निःस्वभावताप्रच्युतिरभ्युपगम्यते, आहोस्विद् अधोगतिप्रतिबन्धस्वरूपा? तत्र न तावद् आद्यः पक्षः, सामान्यस्य नित्यतया स्वभावाऽप्रच्युतेः स्वतःसिद्धत्वात्। नापि अधोगतिप्रतिबन्धस्वरूपा स्थितिस्तत्र संभविनी, अमूर्त-सर्वगतत्वाभ्यां निष्क्रियत्वात् स्वत एव अधोगमनासंभवात् प्रतिबन्धकानां वैयर्थ्यात् । न च सामान्यस्य स्वव्यक्तिषु समवायः स्थितिरभ्युपगन्तव्या, तस्यैव विचार्यमाणत्वात्। तथाहि-अयुतसिद्धानामाश्रयाश्रयिभावो यः संबन्धः 'इह' ५ इति प्रत्ययहेतुः स समवायः परैरभ्युपगतः । 'आश्रितत्वं च सामान्यस्य व्यक्तिप्रतिबद्धस्थितित्वेन वा, तदभिव्यङ्ग्यतया वा' इत्येतदेव पर्यालोचयितुं प्रक्रान्तम् परस्परासंकीर्णरूपाणां भावानामकिञ्चित्करार्थान्तरसमवायायोगात् योगे वा सर्वः सर्वस्य समवायः प्रसज्येत । तथाहि-व्यावृत्तस्वरूपान् भावान् संश्लेषयन् पदार्थः समवायः प्रकल्पितः। न च अर्थान्तरभावेऽपि स्वात्मव्यवस्थिता भावाः परस्परस्य स्वभावमात्मसात्कुर्वन्ति । न च अर्थान्तराश्लेषकारिणो भावान्तरस्य 'समवायः' १० इति नामकरणेऽपि काचिन् क्षतिः । न च श्लेषकरणात् समवायरूपत्वं संश्लेषस्य, संश्लिष्यमाणपदार्थेभ्यो भिन्नस्य करणे तैस्तस्य संबन्धासिद्धेः अभिन्नस्य करणे सामान्यादेः कार्यत्वेन अनित्यत्वप्रसक्तेः। तन्न सामान्यस्य व्यक्तिषु स्थितिर्वृत्तिः । नापि तदभिव्यक्तिलक्षणाऽसौ युक्ता । तथाहि-तद्विषयविज्ञानोत्पादनलक्षणा वा तदभिव्यक्तिः, स्वरूपपरिपोषलक्षणा वा? न तावत् स्वभावपरिपोषलक्षणा, नित्यस्य स्वभावान्यथाकरणासंभवात्। नापि तद्विषयविज्ञानोत्पादनस्वरूपा असौ युक्ता, १५ सामान्यस्य स्वत एव विज्ञानोत्पादनसामर्थ्ये अभिव्यक्तिकारणापेक्षाऽयोगात् असामर्थ्येऽपि परैरनाधेयविशेषत्वात् सामान्यस्य तदपेक्षत्वानुपपत्तेः परैराधेयविशेषत्वाभ्युपगमेऽपि अनित्यत्वप्रसक्तितो व्यक्तिवद् असाधारणत्वात् सामान्यरूपताऽनुपपत्तेः तेन सामान्यस्य व्यक्तिषु वृत्तिनिबन्धनाभावाद् अवृत्तिः। तथा च प्रयोगः-यस्मिन् यस्य वृत्तिनिबन्धनं नास्ति न तत्र तद् वर्तते, विन्ध्ये इव हिमवान्, नास्ति च भेदेषु वृत्तिनिबन्धनं सामान्यस्य इति व्यापकानुपलब्धिः । सर्वेऽपि च पर- २० प्रकल्पिताः सामान्यसाधनाय हेतवः अनया दिशा प्रतिषेद्धव्याः।

कुमारिलप्रकल्पितास्तु-गोपिण्डभेदेषु गोबुद्धिः एकगोत्वनिबन्धना, गवाभासत्वात् एकाकारत्वाच्च, एकगोपिण्डविषयबुद्धिवत्। अथवा येयं गोबुद्धिः सा शाबलेयान्न भवति तद्व्यतिरिक्तार्थान्तरालम्बना वा, तदभावेऽपि भावात्, घटे पार्थिवबुद्धिवत्। सर्वगतत्वं च सामान्यस्य प्रमाणान्तरात् सिद्धम्। तथाहि-येयं गोमतिः सा प्रत्येकसमवेतार्थविषया, प्रतिपिण्डं कृत्स्नस्वरूपपदार्थाकारत्वात्, २५ प्रत्येकव्यक्तिविषयबुद्धिवत् । एकत्वमपि सामान्यस्य प्रमाणोपपन्नमेव । तथाहि-यद्यपि सामान्यं सर्वात्मना प्रतिव्यक्ति परिसमाप्तं तथापि एकमेव तत्, एकाकारबुद्धिग्राह्यत्वात्, यथा 'नञ्'-युक्तेषु वाक्येषु ब्राह्मणादिनिवर्तनम्। न चैतत् शक्यं वक्तुम्—'भिन्नेषु अभिन्नाकारः प्रत्ययो भ्रान्त इति न तद्बलाद् वस्तुतत्त्वव्यवस्था' इति, यतो नास्य दुष्टकारणप्रभवत्वमस्ति, नापि बाधकप्रत्ययसद्भावः ततो मिथ्यात्वनिबन्धनाभावात् कथं भ्रान्तता? तदुक्तम्— ३०

"[3]पिण्डभेदेषु गोबुद्धिरेकगोत्वनिबन्धना ।
[4]गवाभासैकरूपाभ्यामेकगोपिण्डबुद्धिवत् ॥
न शाबलेयाद् गोबुद्धिः ततोऽन्यालम्बनाऽपि वा ।
तदभावेऽपि सद्भावाद् घटे पार्थिवबुद्धिवत् ॥
प्रत्येकसमवेतार्थविषयैवाथ गोमतिः । ३५
[5]प्रत्येकं कृत्स्नरूपत्वात् प्रत्येकव्यक्तिबुद्धिवत् ॥

---

१ "स्यादाधारो जलादीनां गमनप्रतिबन्धकः । अगतीनां किमाधारैः सामान्यानां प्रकल्पितैः ॥
स्वज्ञानोत्पत्तियोग्यत्वे किमभिव्यक्तिकारणैः । स्वज्ञानोत्पत्त्ययोग्यत्वे किमभिव्यक्तिकारणैः ॥
त्यः समर्थः समर्थात्मा व्यञ्जकैः क्रियते यदि । भावोऽस्थिरो भवेदेवं दीपव्यङ्ग्यघटादिवत्" ॥
—तत्त्वसं० का० ८०२-८०४ पृ० २६० ।

२ "अनया च दिशाऽन्येऽपि सर्वे दूष्याः कुहेतवः" ।
"अन्येऽपि कुहेतव इति कुमारिलगदिताः तत्रामी तेन कुहेतव उक्ताः"—तत्त्वसं० का० ७५७ तथा पञ्जि० पृ० २५७ पं० १६—।

३ "तस्मात् पिण्डेषु गोबुद्धि"—श्लो० वा० । ४ "गवाभासैकरूप्याभ्या"—श्लो० वा० । ५ "प्रत्येकं कृत्स्नबुद्धित्वाद्"—श्लो० वा० ।

प्रत्येकसमवेताऽपि जातिरेकैव बुद्धितः ।
'नञ्'युक्तेष्विव वाक्येषु ब्राह्मणादिनिवर्तनम् ॥
नैकरूपा मतिर्गोत्वे मिथ्या वक्तुं च शक्यते ।
नात्र कारणदोषोऽस्ति बाधकः प्रत्ययोऽपि वा" ॥
५ [श्लो० वा० वन० श्लो० ४४-४७-४९] इति ।

अत्र प्रथमसाधने साध्यविकलमुदाहरणम् गोत्वस्य एकस्य तत्रासिद्धेस्तन्निबन्धनत्वस्यैकगोपिण्ड-
विषयबुद्धेरप्यसिद्धत्वात्[1] । अथ सामान्येन एकनिबन्धनत्वमात्रं साध्यते तदा सिद्धसाध्यता
विजातीयव्यवच्छेदेन कल्पितैकाऽगोव्यावृत्तिनिबन्धनत्वस्य इष्टत्वात् । न 'शाबलेयाद् गोबुद्धिः'
इत्यत्रापि साक्षात् तदुत्पत्तिनिषेधे साध्ये सिद्धसाध्यता तत्स्वलक्षणानुभवाहितसंस्कारसंकेतादि-
१० व्यवहितत्वात् तस्याः । अथ परंपरयाऽपि 'ततो न भवति' इति साध्यते तदा अनुमानबाधः प्रति-
ज्ञायाः साध्यविकलता च दृष्टान्तस्य । अन्यालम्बनत्वेऽपि साध्ये सन्निहितशाबलेय-गोबुद्धेर्यदि
ततोऽर्थान्तरालम्बनत्वं साध्यते तदा अनुभवविरोधः सन्निहितशाबलेयादिपिण्डाध्यवसायित्वेन
तस्याः संवेदनात् दृष्टान्तस्य च साध्यविकलता पूर्ववत् । अथ शाबलेयाऽसन्निधौ बाहुलेयादिसन्नि-
धानप्रवृत्ता या बुद्धिः सा ततोऽन्यालम्बनेति पक्षः तदा सिद्धसाध्यता । अथ साक्षात् वस्तुसदा-
१५ लम्बनेति साध्यते तदा अनैकान्तिकता हेतोः न हि परमार्थतोऽस्या वस्तुसदालम्बनमस्तीति
प्रसाधितत्वात् । यदपि[2] 'प्रत्येकपरिसमाप्तार्थविषयत्वसाधनम्' तत्रापि सामान्येन साध्ये सिद्ध-
साध्यता प्रतिपदार्थमतद्रूपपरावृत्तवस्तुरूपाध्यवसायेन अस्याः प्रवृत्तेः । अथ वस्तुभूत-प्रत्येकपरि-
समाप्त-नित्यैकसामान्याख्यपदार्थविषयत्वं साध्यते तदा दृष्टान्तस्य साध्यविकलता अनैकान्तिकता
च हेतोः तथाविधेन साध्येन हेतोः क्वचिदपि अन्वयासिद्धेः । एकस्य च क्रमवत्सु बहुषु सर्वात्मना
२० परिसमाप्तत्वे सर्वव्यक्तिभेदानामन्योन्यमेकरूपताप्रसक्तिः एकव्यक्तिपरिनिष्ठितस्वभावसामान्यसंसृ-
ष्टत्वात् एकव्यक्तिरूपवत्, सामान्यस्य वा अनेकरूपतापत्तिः युगपदनेकवस्तुपरिसमाप्तात्मरूप-
त्वात् अतिदूरदेशावस्थितानेकभाजनव्यवस्थितानेकाम्रादिफलवत् इत्यनुमानबाधः । अत एव
'न चात्र बाधकः प्रत्ययोऽस्ति' इति यदुक्तम्[3] तदपास्तम् बाधकस्य प्रदर्शितत्वात् । यदपि[4]
'एकत्वसाधनं सामान्यस्य,' तत्रापि तस्य प्रत्येकसमवेतत्वासिद्धेः आश्रयासिद्धो हेतुः । स्वरूपा-
२५ सिद्धश्च-एकबुद्धिग्राह्यत्वस्य परमार्थतस्तत्रासिद्धेः शाबलेयादिषु 'समानाः' इति बुद्ध्युत्पत्तेः ।
ब्राह्मणादिनिवर्तनं च परमार्थतो नैकमस्ति, तस्याऽवस्तुत्वात् अतः साध्यविकलमुदाहरणम् ।
कल्पनाशिल्पिघटिते चैकत्वे साध्ये सिद्धसाध्यता अपोहस्य कल्पनानिमित्तस्य एकत्वेन इष्टेः ।
'न चात्र कारणदोषोऽस्ति' इत्येतदपि[5] असिद्धम्, अनाद्यविद्यावासनास्वरूपस्य कारणदोषस्य
सद्भावात् । बाधकसद्भावश्च 'न च याति' इत्यादिना[6] प्रदर्शितः । तथाहि-ये यत्र नोत्पन्नाः
३० नापि प्रागवस्थायिनः नापि पश्चात् अन्यतो देशादागतिमन्तस्ते तत्र न वर्तन्ते नापि उपलभ्यन्ते,
यथा रासभशिरसि तद्विषाणादयः, तथा च सामान्यं तच्छून्यदेशोत्पादवति शाबलेयादिके
वस्तुनि इति व्यापकानुपलब्धिः । न चायमनैकान्तिको हेतुः तत्र वृत्त्युपलम्भयोः प्रकारान्तरासंभवात्
तच्च स्वाश्रयमात्रव्यापित्वाऽभ्युपगमे गोत्वादिजातेर्बाधकं प्रमाणं प्रदर्शितम् । सर्वसर्वगतत्वाऽभ्युप-
गमे तु तस्या एकस्मिन् व्यक्तिभेदे ग्रहणे विजातीयव्यक्तिभेदे व्यक्त्यन्तराले चोपलम्भः स्यात् अनुप-
३५ लम्भात् तु तदभाव इति दृश्यानुपलम्भो बाधकं प्रमाणम् । तथाहि-उपलब्धव्यक्तिसमवेतसामान्य-
स्वरूपाद् उपलब्धाद् अव्यतिरिक्तं चेद् व्यक्त्यन्तरालवर्ति सामान्यरूपम् तदा तस्यापि ग्रहणं भवेत्
गृहीतादभिन्नत्वात् गृहीतस्वरूपवत् । अथ न तस्य उपलम्भस्तथासति अनुपलब्धरूपाव्यतिरेकात्
तद्वद् उपलब्धव्यक्तिसमवायिनोऽपि रूपस्योपलम्भो न स्यात् । अथ उभयरूपताऽभ्युपगम्यते तदा
रूपभेदात् तद्वस्तुभेदः परस्परविरुद्धधर्माध्यासात् न हि अन्योन्यविरुद्धरूपग्रहणाग्रहणधर्माध्यासि-
४० तमपि वस्तु एकं युक्तम् अतिप्रसङ्गात्-विश्वस्यैवमेकद्रव्यताप्रसक्तेः सहोत्पाद-विनाशाद्युपपत्तिः
स्यात् अन्यथा 'एकम्' इति नाममात्रमेव भवेत् न च तत्र विवादः । नित्यत्वैकत्वरूपाभ्युपगमे च

१ "-स्तन्निबन्धनत्वमेकगोबुद्धेरप्यसिद्धमेव"—तत्त्वसं० पञ्जि० पृ० २५८ पं० ५—।
२ पृ० ६९५ पं० २५—। ३ पृ० ६९५ पं० २९। ४ पृ० ६९५ पं० २६। ५ पृ० ६९५ पं० ११।
६ पृ० ६९१ पं० २६।

सामान्यस्य अनेकशो बाधकं प्रतिपादितमेवानुमानम्-ये क्रमित्वाऽनुगामित्व-वस्तुत्वोत्पत्तिमत्त्वादि-धर्मोपेतास्ते परपरिकल्पितनित्यैकसर्वगतसामान्यतो नात्मलाभमासादयन्ति, यथा पाचकादिप्रत्ययाः, तथा चामी गवादिप्रत्यया इति विरुद्धव्याप्तोपलब्धिः नित्यभावविरुद्धाऽनित्यताभावेन क्रमित्वादेर्व्याप्तत्वात् नित्यस्य च क्रमाऽक्रमाभ्यामर्थक्रियाविरोधाद् नानैकान्तिकता हेतोः दृष्टान्तस्य च साध्यान्वितत्वेन पूर्वं प्रसाधितत्वान्नासिद्धो दृष्टान्तः । तदेवं बाधकप्रत्ययस्य अभावोऽसिद्धः अनेक-५ प्रकारस्य बाधकस्य प्रदर्शितत्वात् ।

भवतु वा गोत्वादि सामान्यम् कर्कादिविलक्षणत्वेन शाबलेयादीनां प्रतिपत्तेः, ब्राह्मणत्वादि सामान्यं तु उपदेशमात्रव्यङ्ग्यम् गवाश्वादिवद् ब्राह्मणेतरविशेषप्रतिपत्त्यभावात् । न च उपदेशसहायाध्यक्षगम्यं तत् अध्यक्षविषये उपदेशापेक्षाऽयोगात्, तद्योगे वा उपदेशस्यैव केवलस्य व्यापार इति उपदेशमात्रव्यङ्ग्यतैव । अथ 'वर्णविशेषाऽध्ययनाऽऽचार-यज्ञोपवीतादिव्यतिरिक्तनिमित्तनिबन्धनं १० 'ब्राह्मणः' इति ज्ञानम्, तन्निमित्तबुद्धिविलक्षणत्वात्, गवाश्वादिज्ञानवत्' इति लिङ्गात् प्रतिपत्तेः ब्राह्मणत्वादिसामान्यस्य नागममात्रव्यङ्ग्यत्वमिति, असदेतत्: नगरादिज्ञानवद् व्यतिरिक्तनिबन्धनाभावेऽपि तथाभूतज्ञानस्य कथंचिद् उपपत्तेः । न हि नगरादिज्ञानेऽपि व्यतिरिक्तं द्रव्यान्तरमस्ति यद् एकाकारज्ञाननिबन्धनं भवेत् काष्ठादीनामेव प्रत्यासत्त्या कयाचित् प्रासादादिव्यवहारनिबन्धनानां नगरादिव्यवहारनिबन्धनत्वोपपत्तेः अन्यथा 'पण्णगरी' इत्यादिष्वपि वस्त्वन्तरकल्पनाप्रसक्तेः । न १५ च तत्रापि तथाऽस्तु इति वक्तव्यम्, वस्त्वन्तरस्य तन्निबन्धनस्य तत्र निषिद्धत्वात् । अतोऽनैकान्तिको हेतुः सिद्धसाध्यता च समुदायिभ्योऽन्यत्वाङ्गीकरणे समुदायस्य तन्निबन्धनत्वाद् ब्राह्मणबुद्धेः तदग्रहे तद्बुद्ध्यभावात् पानकवत् इति न वर्णादिभ्यो व्यतिरिक्तम् । तस्मात् शरीरोत्पत्तिकारणं श्रुतं तपो वा ब्राह्मणत्वं परिकल्पनीयं स्यात् । तत्र ब्राह्मणशुक्रशोणितसंभूते शरीरविशेषे यदि ब्राह्मणत्वजातिः समवेता भवेत् ततः संस्कारभ्रंशेऽपि न ततो व्यावर्तेत तेन संस्काराभावात् व्रात्यो नाऽब्राह्मणो २० भवेत् । अथ संस्काररहितोऽपि व्रात्यो ब्राह्मण एव केवलं ब्राह्मणक्रियामकुर्वाणस्य भवति अब्राह्मण-व्यपदेशस्तत्र पुत्रस्येव पुत्रक्रियामकुर्वतः । तथाहि-'अयमगौः' 'अयमनश्वः' 'अयममनुष्यः' इत्यादि-व्यवहारो लोके सुप्रसिद्ध एव । न चैतावता तत्क्रियावैकल्येऽपि परमार्थतस्तस्य तथाभावः, प्रत्यक्षादिविरोधात् । एतस्यां च वस्तुव्यवस्थायां ब्राह्मणमातापित्रुत्पाद्यत्वस्य प्राधान्यात् गजादीनां शिक्षेव केवलमध्ययनादिका क्रिया संपद्यते, तथाऽभ्युपगमे च ब्रह्म-व्यास-मतङ्ग-विश्वामित्रप्रभृतीनां २५

---

१ प्रमेयकमलमार्तण्डे स्याद्वादरत्नाकरे च ब्राह्मणत्वस्य नित्यजातिरूपत्वनिषेधपरा विस्तृता रुच्या च चर्चा वर्तते-पृ० १४१ प्र०-पृ० १४३ प्र० । पृ० ९५८ पं० ९-पृ० ९६३ पं० १० ।

तत्त्वसंग्रहे तु जातिमदनिषेधव्याजेन ब्राह्मणत्वस्य नित्यप्रतिष्ठानता निरस्ता । सा चेत्थम्—

"शतशः प्रतिषिद्धायां जातौ जातिमदश्च किम् । तदन्यातिशयासिद्धौ विशिष्टा सा च किं मता ॥
वशिष्ठादिगुणाधाराः प्रक्षीणाशेषकल्मषाः । सर्वेऽप्यत्राविशेषेण तद्योगे च विजातयः ॥
भवेयुर्यदि सिद्ध्यन्ति विशिष्टास्तत्समाश्रयाः । वैशिष्ट्यमन्यथा नैव लुब्धकद्विजजातिवत् ॥
जातकर्मादयो ये च प्रसिद्धास्ते तदन्यवत् । आचाराः मांत्रतास्ते हि कृत्रिमेष्वपि भाविनः ॥
अतीतश्च महान् कालो योषितां चातिचापलम् । तद् भवत्यपि निश्चेतुं ब्राह्मणत्वं न शक्यते ॥
अतीन्द्रियपदार्थज्ञो न हि कश्चित् समस्ति वः । तदन्वयविशुद्धिं च नित्यो वेदोऽपि नोक्तवान्" ॥

—तत्त्वसं० का० ३५७५-३५८० पृ० ९२०-२१ ।

अयं भावो हर्षेणापि दर्शितः—

"शुद्धिर्वंशद्वयीशुद्धौ पित्रोः पित्रोर्यदेकशः । तदानन्तकुलादोषाददोषा जातिरस्ति का ॥
कामिनीवर्गसंसर्गैर्न कः संक्रान्तपातकः" ।—नैषध० स० १७ श्लो० ४०-४१ पृ० ३६९ ।

तट्टीकायां च "यदाहुः" इत्यादिना

"अप्येकपङ्क्त्यां नाश्नीयात्संयतः स्वजनैरपि । को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत्" । इति । तथा—

"अनादाविह संसारे दुर्वारे मकरध्वजे । कुले च कामिनीमूले का जातिपरिकल्पना" ।

इति पद्यद्वयं उद्धृतं दृश्यते तत्रत्यं प्रथमं पद्यं पराशरमाधवे बृहस्पत्युक्तत्वेन समुद्धृतम्—

अ० १ आचारका० पृ० ३७६ ।

ब्राह्मणत्वं न स्यात् । न च अदृश्ये वस्तुनि निर्णयो विधातुं शक्यः 'शूद्राद्युत्पाद्यत्वमस्य नास्ति' इति, अनादिगोत्रपद्धतौ च कामार्तत्वात् सर्वदा प्रमदानां कस्याश्चिद् व्यभिचारसंभवात् कुतो योनिनिबन्धनब्राह्मण्यनिश्चयात् संस्कारस्य अध्ययनादेश्च अविपर्ययस्तत्त्वनिश्चयः? आगमस्य च तन्निश्चयनिबन्धनत्वेन कल्पितस्य रागादियुक्तपुरुषप्रणीतत्वेन अप्रामाण्यात् न निश्चयहेतुता अपौरुषेयस्य च ५ प्रतिव्यक्ति एवंभूतार्थप्रतिपादनपरस्य अनुपलम्भाच्च ततोऽपि तन्निश्चयः । न च अविगानतस्त्रैवर्णिकप्रवादोऽत्र वस्तुनि प्रमाणम् तस्यापि व्यभिचारित्वोपलब्धेः—दृश्यन्ते च बहवस्त्रैवर्णिकैरविगानेन ब्राह्मणत्वेन व्यवह्रियमाणा विपर्ययभाजः इत्यलमतिनिर्बन्धेन वचनमात्रगम्येऽर्थे । इति व्यवस्थितमेतत्–असत् सामान्यम्, तत्साधकप्रमाणाभावात् बाधकोपपत्तेश्च ।

[निरूपणपुरस्सरं विशेषपदार्थस्य खण्डनम्]

१० नित्यद्रव्यवृत्तयः[1] परमाण्वाकाश-काल-दिगात्ममनस्सु वृत्तेः अत्यन्तव्यावृत्तबुद्धिहेतवो विशेषाः ते च—परमाणूनां जगद्विनाशारम्भकोटिभूतत्वात् मुक्तात्मनाम् मुक्तमनसां च संसारपर्यन्तरूपत्वाद् अन्तत्वं तेषु भवा—अन्त्या इत्युच्यन्ते तेषु स्फुटतरमालक्ष्यमाणत्वात्, वृत्तिस्त्वेषां सर्वस्मिन्नेव परमाण्वादौ नित्ये द्रव्ये विद्यत एव अत एव 'नित्यद्रव्यवृत्तयः' 'अन्त्याः' इत्युभयपदोपादानम् । अपरे[2] तु उत्पाद-विनाशलक्षणान्तरहितेषु द्रव्येषु भवा अन्त्या इत्यस्य व्याख्यानं 'नित्यद्रव्य- १५ वृत्तयः' इति पदं वर्णयन्ति । व्यावृत्तबुद्धिहेतुत्वं च विशेषाणां सद्भावप्रतिपादकं प्रमाणम् । यथा हि अस्मदादीनां गवादिषु आकृति-गुण-क्रियाऽवयव-संयोगनिमित्तोऽश्वादिभ्यो व्यावृत्तः प्रत्ययो दृष्टः– तद्यथा-'गौः' 'शुक्लः' 'शीघ्रगतिः' 'पीनककुदः' 'महाघण्टः' इति यथाक्रमम् –तथास्मद्विशिष्टानां योगिनां नित्येषु तुल्याऽऽकृति-गुण-क्रियेषु परमाणुषु मुक्तात्म-मनस्सु च अन्यनिमित्ताभावे प्रत्याधारं यद्बलाद्[3] 'विलक्षणोऽयम्' 'विलक्षणोऽयम्' इति प्रत्ययवृत्तिः देश-कालविप्रकर्षोपलब्धे च 'स २० एवायम्' इति प्रत्यभिज्ञानं च यतो भवति ते योगिनां विशेषप्रत्ययोर्ज्ञानमस्त्वा अन्त्या विशेषाः सिद्धाः । योगिनां तु एते प्रत्यक्षत एव सिद्धाः ।

एते च लक्षणासंभवादेव असन्तः । तथाहि[4]—यद् एषां नित्यद्रव्यवृत्तित्वादिकं लक्षणमभिहितम्, तत् असंभवदोषदुष्टत्वाद् अलक्षणमेव । यतः न किञ्चिन्नित्यं द्रव्यमस्ति, तस्य पूर्वमेव निरस्तत्वात् । तदभावे च तद्वृत्तित्वं लक्षणमेषां दूरोत्सारितमेव । यच्च योगिप्रभवविशेषप्रत्ययबलाद् एषां सत्त्वं २५ साध्यते, तद् असंगतमेव; हेतोरनैकान्तिकत्वात् । तथाहि-परमाण्वादीनां स्वस्वभावव्यवस्थितेः स्वरूपं परस्परासंकीर्णरूपं वा भवेत्, संकीर्णस्वभावं वेति कल्पनाद्वयम् । आद्यकल्पनायां स्वत एव असंकीर्णपरमाण्वादिरूपोपलम्भात् योगिनां तेषु वैलक्षण्यप्रत्ययोत्पत्तिर्भविष्यतीति व्यर्थमपरविशेषपदार्थकल्पनम् । द्वितीयायामपि विशेषाख्यपदार्थान्तरसन्निधानेऽपि परस्परव्यतिमिश्रेषु परमाण्वादिषु तद्बलाद् व्यावृत्तप्रत्ययो योगिनां प्रवर्तमानः कथमभ्रान्तो भवेत् स्वरूपतोऽव्यावृत्तस्वरूपेषु

---

१ "नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः । ते खल्वत्यन्तव्यावृत्तिहेतुत्वाद् विशेषा एव"—प्रशस्त० कं० पृ० १३ पं० २० ।
"विशेषा एव केचित्तु व्यावृत्तेरेव हेतवः । नित्यद्रव्यस्थिता येऽन्त्या विशेषा इति वर्णिताः" ॥
—तत्त्वसं० का० ७१२ पृ० २३६ ।

२ "अन्तेषु भवा अन्त्याः स्वाश्रयविशेषकत्वाद् विशेषाः । विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमानाः अत्यन्तव्यावृत्तिबुद्धिहेतवः"—इत्यादि—प्रशस्त० कं० पृ० ३२१ पं० १२—।

३ यद्वर्णाद् वृ० आ० हा० वि० ।
"यद्बलात् परमाण्वादौ जायन्ते योगिनां धियः । विलक्षणोऽयमेतस्मादिति प्रत्येकमाश्रिताः" ॥
—तत्त्वसं० का० ७१३ पृ० २३७ ।

४ "ये पुनः कल्पिता एते विशेषा अन्त्यभाविनः । नित्यद्रव्यव्यपोहेन तेऽप्यसंभविताः क्षणाः ॥
अण्वाकाशदिगादीनामसंकीर्णं यदा स्थितम् । स्वरूपं च तदेतस्माद् वैलक्षण्योपलक्षणम् ॥
मिश्रीभूतापरात्मानो भवेयुर्यदि ते पुनः । नान्यभावेऽप्यविभ्रान्तं वैलक्षण्योपलक्षणम् ॥
कथं तेषु विशेषेषु वैलक्षण्योपलक्षणम् । स्वत एवेति चेत्सैवमण्वादावपि किं मतम्" ॥
—तत्त्वसं० का० ८१३-८१६ पृ० २६३ ।

अण्वादिषु व्यावृत्ताकारतया प्रवर्तमानस्य तस्य अतस्मिंस्तद्ग्रहणरूपतया भ्रान्तत्वाऽनतिक्रमात्? एवमेतत्प्रत्यययोगिनस्तेऽयोगिन एव स्युः। किञ्च, यदि विशेषाख्यपदार्थान्तरव्यतिरेकेण विलक्षणप्रत्ययोत्पत्तिर्न भवेत् कथं विशेषेषु तस्योत्पत्तिर्भवेत् तेषु अपरविशेषाभावात्? भावे वा अनवस्थाप्रसक्तेः 'नित्यद्रव्यवृत्तयः'[1] इति च अभ्युपगमक्षतिः स्यात् विशेषेषु अपि विशेषाणां वृत्तेः। अथ स्वत एव तेषु परस्परवैलक्षण्यमिति अपरविशेषमन्तरेणापि वैलक्षण्यबुद्धिविषयता तर्हि परमाण्वादी- ५ नामपि तत एव तद्बुद्धिप्रवृत्तिर्भविष्यतीति व्यर्थं विशेषाख्यपदार्थपरिकल्पनम्। अथ विशेषेषु अपरविशेषयोगाद् व्यावृत्तबुद्धिपरिकल्पनायामनवस्थादिबाधकोपपत्तेः उपचारात् तेषु तद्बुद्धिः, नः तथाभूतविज्ञानाधाराणां योगिनामयोगित्वप्रसक्तेः-तद्बुद्धेः 'विशेषा इव' इति स्खलद्रूपतया प्रवृत्तौ अनिर्णयबुद्ध्यधिकरणत्वात् तेषां 'विशेषा एव' इत्यस्खलद्रूपबुद्ध्यधिकरणत्वे अपरविशेषविकलानां विशेषाणां परमाण्वादीनामिव अविशेषरूपतया तद्बुद्धेर्विपर्यस्तरूपत्वेन तदाधाराणां कथं न अयोगि- १० त्वम्? यदि च बाधकोपपत्तेर्विशेषेषु व्यावृत्तबुद्धिर्न अपरविशेषनिबन्धना तर्हि परमाण्वादिष्वपि भिन्नविशेषनिबन्धना नासावभ्युपगन्तव्या, तेषां तत्र भिन्नाभिन्नव्यावृत्तरूपकरणानुपपत्तेर्बाधकस्य सद्भावात्। यदप्यत्र अध्ययनाद्युक्तं प्रतिसमाधानम्—"[2]यथा [3]श्वमांसाशुच्यादीनां स्वत एव अशुचित्वम् अन्येषां च भावानां तद्योगात् तत् तथेहापि तादात्म्यात् विशेषेषु स्वत एव व्यावृत्तप्रत्ययहेतुत्वम् परमाण्वादिषु तु तद्योगात्। किञ्च, अतदात्मकेष्वपि अन्यनिमित्तः प्रत्ययो भवत्येव यथा प्रदीपात् १५ पटादिषु न पुनः पटादिभ्यः प्रदीपे एवं विशेषेभ्य एव अण्वादौ विशिष्टप्रत्ययः न अण्वादिभ्य इत्यादिकम्" [ ], तदपि असंगतम्; [4]यतोऽशुचित्वं भावानां कल्पनासमारोपितम् न पारमार्थिकम् अव्यवस्थितेस्तस्य। तथाहि—यदेव कस्यचित् श्रोत्रियादेर्द्रव्यमशुचित्वेन प्रतिभाति तदेव कापालिकादेः शुचित्वेन। न च एकस्य परस्परविरुद्धानेकरूपसमावेशो युक्तः एकत्वहानिप्रसक्तेः। भवतु वा पारमार्थिकं पदार्थानामशुचित्वं तथापि न दृष्टान्त-दार्ष्टान्तिकयोः साम्यम् यतः २० [5]स्वै(श्व)मांसाद्यशुचिद्रव्यसंसर्गाद् मोदकादयो भावाः प्रच्युतप्राक्तनशुचिस्वभावा अपर एव अशुचिरूपा उत्पद्यन्ते इति युक्तमेषामन्यसंसर्गजमशुचित्वम् न तु परमाण्वादिषु एतत् संभवति तेषां नित्यत्वादेव प्राक्तनाऽविविक्तस्वरूपपरित्यागेन अपरविविक्तस्वरूपतयाऽनुपपत्तेः अत एव प्रदीपपटदृष्टान्तोऽपि असंगतः पटादीनां प्रदीपादिपदार्थान्तरोपाधिकस्य रूपान्तरस्य उत्पत्तेः प्रकृते च तदसंभवात् इति। अनुमानबाधितश्च विशेषसद्भावाभ्युपगमः। तथाहि-विवादाधिकरणेषु भावेषु २५ विलक्षणप्रत्ययः तद्व्यतिरिक्तविशेषनिबन्धनो न भवति, व्यावृत्तप्रत्ययत्वात्, विशेषेषु व्यावृत्तप्रत्ययवत् इति। पूर्ववद् अस्य हेतोः प्रतिबन्धादिकं वाच्यम्। तन्न विशेषपदार्थसद्भावः तत्साधकप्रमाणाभावात् बाधकोपपत्तेश्चेति स्थितम्।

---

१ "नित्यद्रव्यवृत्तयोऽन्त्या इति चाभ्युपगमहानिप्रसङ्गाच्च"—तत्त्वसं० पञ्जि० पृ० २६३ पं० २२।

२ "यथा गवाश्वमांसादीनां स्वत एवाशुचित्वं तद्योगादन्येषां तथेहापि तादात्म्यादन्त्यविशेषेषु स्वत एव प्रत्ययव्यावृत्तिः तद्योगात् परमाण्वादिष्विति"—प्रशस्त० कं० पृ० ३२२ पं० १३।

" 'स्वत एव' इत्यादिना प्रशस्तमतेरत्रोत्तरमाशङ्कते—

स्वत एवाशुचित्वं हि श्वमांसादेर्यथा स्थितम्। तद्योगादपरेषां तु तथेहापि यदीष्यते॥

यथा प्रकाशको दीपो घटादेश्च स्वतः स्थितः। तत्प्रकाशात्मतायां च नियतोऽयमिदं तथा॥"

—तत्त्वसं० का० ८१७–८१८ पृ० २६४।

३ यथा स्वमांसा-बा० बा० भां० मां०। "स ह्याह यथा श्वमांसा"-तत्त्वसं० पञ्जि० पृ० २६४ पं० ६।

४ "ननु चाशुचिभावोऽयं सांवृतो न तु तात्त्विकः। तत् स्वयं परतो वाऽयं कथं नाम भविष्यति॥

अथवा भाविकत्वेऽपि श्वमांसादिवशादिमे। जायन्तेऽशुचयो भावा नैव नित्या अजन्मतः॥

प्रदीपादिप्रभावाच्च ज्ञानोत्पादस्वरूपताम्। लभन्ते क्षणिका ह्यर्थाः कलशाभरणादयः॥

न विवादास्पदीभूतविशेषबलभाविनी। वैलक्षण्यमतिस्तेषु क्रमोत्पत्तेः सुखादिवत्॥"

—तत्त्वसं० का० ८१९–८२२ पृ० २६४।

५ "तथाहि—श्वमांसादिकाशुचिद्रव्यसंपर्कोदकादयो भावाः"-तत्त्वसं० पञ्जि० पृ० २६४ पं० २५।

[निरूपणपुरस्सरं समवायपदार्थस्य खण्डनम्]

समवायस्तु 'इह तन्तुषु पटः' इत्यादीहबुद्धिविशेषाद् द्रव्यादिभ्यो अर्थान्तरत्वेन अभ्युपगम्यते "अयुतसिद्ध"–[प्रशस्त० कं० पृ० १४ तथा ३२४] इत्यादिलक्षणोपेतः । यथा हि सत्ता-द्रव्यत्वादीनामात्मानुरूपप्रत्ययकर्तृत्वात् स्वाधारेषु तेभ्यः परस्परतश्च अर्थान्तरभावस्तथा समवायस्यापि ५ पञ्चसु पदार्थेषु 'इह तन्तुषु पटः' 'इह पटद्रव्ये गुण-कर्मणी' 'इह द्रव्य-गुण-कर्मसु सत्ता' 'इह द्रव्ये द्रव्यत्वम्' 'इह गुणे गुणत्वम्' 'इह कर्मणि कर्मत्वम्' 'इह द्रव्येषु अन्त्या विशेषाः' इत्यादिविशेषप्रत्ययदर्शनात् पञ्चभ्यः पदार्थेभ्य अर्थान्तरता तस्य अवसीयते । तथा च प्रयोगः-येषु यदाकारविलक्षणो यः प्रत्ययः तद्व्यतिरिक्तार्थान्तरनिबन्धनः सोऽभ्युपगन्तव्यः, यथा 'पुरुषे दण्डी इति प्रत्ययः, तथा चायं पञ्चसु पदार्थेषु 'इह' प्रत्यय इति स्वभावहेतुप्रतिरूपकः प्रयोगः। निबन्धनमन्तरेण अस्य १० सद्भावे नित्यं सत्त्वमसत्त्वं वा स्यादिति विपर्यये बाधकं प्रमाणम् । एवम् 'इह' बुद्धिलिङ्गावसेयः समवायः। अध्यक्षबुद्ध्यवसेयत्वमपि तस्य केचन मन्यन्ते । तथाहि–अक्षव्यापारे सति 'इह तन्तुषु पटः' इत्यादिप्रत्ययोत्पत्तेर्विशेषणभूतस्य तस्य 'इह' बुद्ध्यध्यक्षावसेयता । समवायश्च न संयोगवद् भिन्नः किन्तु तल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्च सत्तावत् सर्वत्र एक एव, अकारणत्वाच्च तद्वदेव नित्यः। अकारणत्वं च तत्कारणानुपलब्धेः सिद्धम् ।

१५ अत्र प्रतिविधीयते—'इह तन्तुषु पटः'इत्यादिका बुद्धिः स्वसमयाहितवासनाप्रकल्पितैव न तु लोके तथोत्पद्यमानत्वेन सिद्धेति धर्म्यसिद्धेराश्रयासिद्धो हेतुः । तथाहि—यत्र नानात्वमुपलक्षितं भवेत् तत्र आधाराधेयभावे सति 'इह' बुद्धिरुत्पद्यमाना लोके संवेद्यते, यथा 'इह कुण्डे दधि' इति । न च नानात्वं तन्तु-पटयोरुपलब्धिगोचरः इति कथं तत्र 'इह'बुद्ध्युत्पादः ? न च स्वमतिप्रकल्पितस्य कार्यस्य कारणपर्यनुयोगः परं प्रति विधेयः। न चेच्छायाः पदार्थरूपानुरोधः तस्याः स्वातन्त्र्य- २० वृत्तित्वात् ततोऽपि वस्तुव्यवस्थापने तेषामव्यवस्थाप्रसक्तेः भवत्परिकल्पितस्यापि वस्तुनोऽन्यथाऽन्यस्य प्रकल्पयितुं शक्यत्वात् न केवलम् 'इह तन्तुषु पटः' इत्यादिका बुद्धिर्लोके न संवेद्यते किन्तु विपर्ययेणैव तस्या उत्पादानुभवः। तथाहि—'वृक्षे शाखा' 'पर्वते शिला' इत्यादिका बुद्धिर्लोके उत्प-

---

१ "तन्तुष्वेव पटोऽमीषु वीरणेषु कटः पुनः । इत्यादीहमतेर्भावात् समवायोऽवगम्यते" ॥—तत्त्वसं० का० ८२३ पृ० २६५ ।

२ "अयुतसिद्धानामाधार्याधारभूतानां यः संबन्ध इहप्रत्ययहेतुः स समवायः"—प्रशस्त० कं० ।

३ "तस्याभावे स चेत् किं हि मतेरस्या निबन्धनम् । न विशेषमतिर्दृष्टा निमित्तान्तरवर्जिता ॥
इहबुद्ध्यविशेषाच्च योगवन्न विभिद्यते । सर्वस्मिन् भाववत्त्वेष एक एव प्रतीयते ॥
कारणानुपलब्धेश्च नित्यो भाववदेव सः । न ह्यस्य कारणं किञ्चित् प्रमाणेनोपलभ्यते" ॥
—तत्त्वसं० का० ८२४-८२६ पृ० २६५ ।

४ "एवं तावद् वैशेषिकाणां मतेन इहबुद्धिलिङ्गानुमेयः समवायः । नैयायिकमतेन तु इहबुद्धिप्रत्यक्षगम्य एव"
—तत्त्वसं० पञ्जि० पृ० २६५ पं० २४—।

५ "तदेतदिहविज्ञानं परेषामेव वर्तते । स्वसिद्धान्तानुरागेण न दृष्टं लौकिकं तु तत्" ॥
—तत्त्वसं० का० ८२७ पृ० २६६ ।

६ "नानात्वलक्षणे हि स्यादाधाराधेयभूतयोः । इदमत्रेति विज्ञानं कुण्डादौ श्रीफलादिवत् ॥
नैव तन्तुपटादीनां नानात्वेनोपलक्षणम् । विद्यते येन तेषु स्युरिदमत्रेति बुद्धयः" ॥
—तत्त्वसं० का० ८२८-२९ पृ० २६६ ।

७ "स्वेच्छया रचिते वाऽस्मिन् कल्पितेष्विव वस्तुषु । न कारणनियोगोऽयं परं प्रत्युपपद्यते" ॥
—तत्त्वसं० का० ८३० पृ० २६६ ।

८ "वृक्षे शाखाः शिलाश्चाग इत्येषा लौकिकी मतिः । अगाख्यपरिशिष्टाश्मैस्तत्रोपलम्भनात् ॥
तौ पुनस्तास्विति ज्ञानं लोकातिक्रान्तमुच्यते । घटे रूपं क्रियावीति तादात्म्यं खगच्छति ॥
रूपकुम्भादिशब्दा हि सर्वावस्थाभिधायकाः । तद्विशेषाभिधानाय तथा ते विनिवेशिताः ॥
तानाश्रित्यैषु विज्ञानं तेनाकारेण वर्तते । समवायाच्च भेदस्य सर्वेषामप्यनीक्षणात्" ॥
—तत्त्वसं० का० ८३१-८३४ पृ० २६७ ।

९ उत्पाद्य-वा० बा० भां० मां० ।

[illegible] संकेत्यते । न च 'वृक्षे शाखा' इत्यादिकाऽपि मतिः समवायनिबन्धना किन्तु [illegible] शाखाव्यतिरिक्तस्कन्धादिविशिष्टसमुदायनिबन्धनैव । एवम् 'इह घटे रूप-रस-गन्ध-स्पर्शाः' इत्यादिबुद्धेरपि घटस्वभावत्वं रूपादीनां निबन्धनत्वेन प्रतिपद्यते लोकः । तथाहि—घटे रूपादिकं घटस्वभावमेव एतद्रूपादिकं न पटादिस्वभावम् बहुषु रूपादिषु साधारणशक्तिविशेषप्रतिपादनाभिप्रायेण तदन्यरूपादिव्यवच्छेदेव घटादिश्रुतेः संकेतः रूपादिश्रुतेस्तु प्रत्येकमसाधारणवस्तुरूपादि[illegible]-५ दबशक्तिप्रकाशनाय समयकरणम् अत एव घटादिश्रुतिर्न रूपादीन् भेदान् आक्षिपति [illegible]धिकरण्याभावात् रूपादिशब्दाश्च घट-पटादिसर्वावस्थरूपादिवाचका इति रूपादिशब्देभ्यः केवलेभ्यो न तद्विशेषप्रतीतिस्तेन विशिष्टावस्थरूपादिप्रतिपादनाय 'घटे रूपादयः' इत्येवमुभयपदप्रयोगः क्रियते ततोऽपि घटात्मका रूपादयः पटात्मकरूपादिव्यवच्छेदेव प्रतीयन्ते घटशब्दस्तु सर्वावस्थं चलनादिस्वभावान्वितं घटं ब्रूत इति केवलान्न विशेषप्रतीतिः 'रूपम्' इत्यादिशब्दप्रयोगे तु तदन्य-१० व्यवच्छेदेन विशेषप्रतिपत्तिरुपजायते इति तत्प्रयोगः । तस्मात् संकेतवशात् 'इह घटे रूपादयः' इत्यादि ज्ञानं तथाभूतपदार्थनिबन्धनम् न समवायनिबन्धनम् यतो न घटरूपादिसमवायानां भेदः परस्परतः कश्चिदपि उपलब्धिगोचरः तत् कथमेतद् ज्ञानं समवायनिबन्धनं भवेत् ? तेन परोपन्यस्तहेतोरनैकान्तिकत्वात् उक्तन्यायेन प्रतिज्ञायाश्च अनुमानबाधितत्वान्न समवायसिद्धिः । यदपि 'इह बुद्ध्यविशेषात्' इत्याद्यभिधानम् तदपि असंगतम्, यतो यदि एकः समवायः स्यात् तदा 'तन्तुषु १५ घटः' इत्यादिबुद्धेरपि उत्पत्तिः स्यात् । तथाहि—यत एव समवायात् 'कपालेषु घटः' इति प्रत्ययोत्पत्तिरभ्युपगता स एव समवायः तन्तुषु घटस्य इति किमिति तथाप्रत्ययोत्पत्तिर्न भवेत् ? अथ न तन्तुषु घट आश्रितः इति तत्र तथाप्रत्ययो नोत्पद्यते, असदेतत्; यतः 'कपालेषु घट आश्रितः' इति समवायबलाद् भवद्भिरभिधीयते; स च समवायः किं तन्तुषु नास्ति येन 'इह तन्तुषु घटोऽस्ति' इति प्रत्ययो न भवेत् समवायस्य एकत्वेन सर्वत्र अविशेषात् ? एवं च द्रव्य-गुण-कर्मणां द्रव्यत्व-गुणत्व-२० कर्मत्वादिविशेषणैः संबन्धस्य एकत्वात् पदार्थपञ्चकस्य विभागो न भवेत् । अथ समवायस्य एकत्वेऽपि न पदार्थसंकरः, आधाराधेयनियमात् । तथाहि—'द्रव्येष्वेव द्रव्यत्वम्' 'गुणेष्वेव गुणत्वम्' 'कर्मस्वेव कर्मत्वम्' इत्येवं द्रव्यत्वादीनां प्रतिनियताधारावच्छेदेन प्रतिपत्तेः सद्भावः, न; एवं समवायस्य प्रतिपदार्थं भिन्नत्वोपपत्तेः । अथ 'इह' इति समवायनिमित्ताया बुद्धेरभिन्नाकारतया सर्वत्र अनुगमाद् एकः समवायः सर्वत्रावसीयते, तदेकत्वेऽपि द्रव्यत्वादिनिमित्तानां प्रत्ययानां प्रतिनियताधारावच्छेदेनाऽ-२५

---

१ "अतो घटादिश्रुती रूपादिभेदानाक्षिपतीति सामानाधिकरण्याभावाद् वैयधिकरण्येनैव तादात्म्यं प्रतिपाद्यते" —तत्त्वसं० पञ्जि० पृ० २६७ पं० १९ ।

२-सर्वावस्तुरू-बृ० आ० हा० वि० । "रूपादिशब्दा हि सर्वावस्थस्य रूपादेर्वाचकाः"—तत्त्वसं० पञ्जि० पृ० २६७ पं० २१ ।

३ पृ० ७०० पं० १० टि० ३ ।

४ "यद्येकः समवायः स्यात् सर्वेष्वेव च वस्तुषु । कपालादिष्वपि ज्ञानं पटादीति प्रसज्यते ॥
गजादिष्वपि गोत्वादि समस्तीत्यनुषज्यते । ततो गवादिरूपत्वममीषां शाबलेयवत् ॥
पटस्तन्तुषु योऽस्तीति समवायात् प्रतीयते । अस्ति न्वसौ कपालेषु तस्येति न तथेति किम् ॥
नाश्रितः स कपाले चेन्ननु तन्तुष्वपीष्यते । आश्रितः समवायेन स कपालेऽपि नास्ति किम् ? ॥
तन्तोर्यः समवायो हि पटस्येत्यभिधीयते । स घटस्य कपालेषु तद्धीरनवधिर्भवेत् ॥
एवं यश्च गजत्वादिसमवायो गजादिषु । गोत्वादिजातिभेदानां स एव स्वाश्रयेष्वपि" ॥
—तत्त्वसं० का० ८३५-८४० पृ० २६८-२६९ ।

५ भवतु अ-वा० बा० भां० मां० । "किमिति तथाप्रतीतिर्न भवेत्"—तत्त्वसं० पञ्जि० पृ० २६८ पं० २० ।

६ " 'आधार' इत्यादिनाऽत्र प्रशस्तमतेरुत्तरमाशङ्कते—
आधाराधेयनियमः स चैकत्वेऽपि विद्यते । द्रव्येष्विव हि तज्जातिकर्मस्वेव च कर्मता" ॥
—तत्त्वसं० का० ८४१ पृ० २६९ ।

७ "इहेति समवायोत्थविज्ञानान्वयदर्शनात् । सर्वत्र समवायोऽयमेक एवेति मन्यते ॥
द्रव्यत्वादिनिमित्तानां व्यतिरेकस्य दर्शनात् । धियां द्रव्यादिजातीनां नियमस्त्ववसीयते" ॥
—तत्त्वसं० का० ८४२-८४३ पृ० २६९ ।

८-वच्छेदेनानुपा-वा० बा० । "प्रतिनियताधारावच्छेदेनोत्पत्तेर्व्यतिरेकस्यानन्वयलक्षणस्य दर्शनात्" —तत्त्वसं० पञ्जि० पृ० २६९ पं० १६ ।

ननुयायितयोत्पत्तेर्द्रव्यत्वादीनां भेद इति न पदार्थपञ्चकस्य संकीर्णताप्रसक्तिः, यथा हि दधि-कुण्डयोः संयोगैकत्वेऽपि आधाराधारप्रतिनियम उपपत्तिमान् तथा समवायैकत्वेऽपि द्रव्यत्वादीनां व्यङ्ग्यव्यञ्जकशक्तिभेदाधा(दादाधा)राधेयप्रतिनियमोपपत्तेः असंकीर्णपदार्थव्यवस्था संगतैव प्रमाणनिबन्धनत्वात् प्रमेयव्यवस्थायाः इति, असदेतत्; यतो नास्माकं रूपत्वादीनां रूपादिषु आधेयनियमः सिद्धः ५ भवतां पुनः समवायमेकं सर्वत्राऽभ्युपगच्छतां प्रतिनियमो दुर्घटः प्रसज्येत। तथाहि—'द्रव्ये एव द्रव्यत्वम्' इत्येवं नियमः समवायनिबन्धनो भवद्भिरभ्युपगम्यते, द्रव्यत्वादेः समवायस्य च गुणादिष्वपि एकस्यैव सद्भावात् कथं न पदार्थसंकरप्रसङ्गः द्रव्यत्वाद्याधेयत्वस्य अभिन्ननिमित्तत्वात्? अथ द्रव्ये द्रव्यत्वस्य यः समवायः न स एव गुणादिषु गुणत्वादेस्तर्हि संयोगवत् समवायस्य प्रत्याधारं भेदः स्यात्। अथ स्वरूपेण अभिन्नस्यापि समवायस्य द्रव्यत्वादिविशेषणभेदाद् भेद इति न पदा-१० र्थसंकरः; ननु द्रव्यत्वादेर्विशेषणस्य समवायाभेदे कुतो भेदः? यदि स्वत एव आधेयतानियमोऽपि तेषां स्वत एव भविष्यतीति समवायप्रकल्पना व्यर्था। अथ प्रतिनियताधारसंबन्धवशात् तेषां प्रतिनियतरूपता तर्हि 'समवायस्य विशेषणभेदाद् भिन्नता विशेषणानां च समवायात् सा' इत्यन्योन्यसंश्रयः। यदपि 'द्रव्यत्वादिनिमित्तानाम्' इत्याद्यभिहितम् तदपि असंबद्धम्; न हि अविकले निमित्ते सति कार्यस्य अनन्वयित्वं युक्तम् तस्य अतत्कार्यत्वप्रसक्तेः। एवं च बुद्धिव्यतिरेकासंभवात् तद्वशाद् १५ आधाराधेयभावनियमव्यवस्था न युक्तिसंगता। न च 'द्रव्य एव द्रव्यत्वमाश्रितम्' इति व्यपदेशात् तन्नियमः समवायवशादेव आश्रितत्वादिव्यवस्थोपवर्णनात्, तस्य च सर्वत्राऽविशिष्टत्वात् तथाव्यपदेशस्यापि भवदभ्युपगमेनायोगात्। न च व्यङ्ग्यव्यञ्जकशक्तिप्रतिनियमाद् आधाराधेयप्रतिनियमः, व्यङ्ग्याद्दिप्रतिनियमस्यापि समवायनिमित्तत्वात्। तथाहि—द्रव्यादीनां द्रव्यत्वादिसामान्यव्यञ्जकत्वं तत्समवायबलादेव परैरभ्युपगम्यते यतः द्रव्य एव द्रव्यत्वं समवेतम् ततस्तेनैव तद् व्यज्यते न पुन-२० र्ज्ञानोत्पादनयोग्यस्वभावोत्पादनात् नित्ये सत्तादौ तदयोगात् स च समवायः सर्वत्राऽविशिष्ट इति न तद्बलाद् व्यङ्ग्यव्यञ्जकशक्तिप्रतिनियम इति न ततोऽपि आधाराधेयप्रतिनियमः।

योऽपि दधि-कुण्डसंयोगो दृष्टान्तत्वेन उपात्तः सोऽपि अस्मान् प्रत्यसिद्धः पूर्वमेव संयोगस्य

---

१ "तद्यथा कुण्ड–दध्नोश्च संयोगैक्येऽपि दृश्यते। आधाराधेयनियमस्तथेह नियमो मतः॥
व्यङ्ग्यव्यञ्जकसामर्थ्यभेदाद् द्रव्यादिजातिषु। समवायैकभावेऽपि नैव चेत् स विरुध्यते"॥
—तत्त्वसं० का० ८४४–८४५ पृ० २६९।

२ "व्यङ्ग्यव्यञ्जकशक्तिभेदादाधाराधेयप्रतिनियम इति"—तत्त्वसं० पञ्जि० पृ० २६९ पं० २६।

३ "आधाराधेयनियमो नन्वेकत्वेऽस्य दुर्घटः। द्रव्यत्वं द्रव्य एवेष्टं कथं तत्समवायतः॥
तस्यासौ समवायश्च गुणादिष्वपि विद्यते। गुणजात्यादिसंबन्धादेक एव ह्ययं तयोः"॥
—तत्त्वसं० का० ८४६–८४७ पृ० २७०।

४ "अन्यथा गुणजात्यादिभिन्न एव भवेदयम्। योगिभेदात् प्रतिव्यक्ति यथा योगो विभिद्यते"॥
—तत्त्वसं० का० ८४८ पृ० २७०।

५ पृ० ७०१ पं० २५ टि० ७।

६ "द्रव्यत्वादिनिमित्तानां व्यतिरेको न युज्यते। धिया निमित्तसद्भावादतस्तन्नियमोऽपि न"॥
—तत्त्वसं० का० ८४९ पृ० २७०।

७ "तदाश्रितत्वस्थानादि तस्मादेवाभिधीयते। समवायादतश्चैतन्न युक्तं तन्नियामकम्"॥
—तत्त्वसं० का० ८५० पृ० २७०।

८ "व्यङ्ग्यव्यञ्जकसामर्थ्यभेदोऽपि समवायतः। नान्यतस्तु स नित्यानामुत्पादानुपपत्तितः॥
न हि दीपादिसद्भावाज्जायन्ते यादृशा इमे। विज्ञानजनने योग्या घटाद्या जातयस्तथा"॥
—तत्त्वसं० का० ८५१–८५२ पृ० २७१।

९ "कुण्ड–दध्नोश्च संयोग एकः पूर्वं निराकृतः। न चासौ नियतस्तस्माद् युज्यते (तिप्रसङ्गतः)"॥
—तत्त्वसं० का० ८५३ पृ० २७१।

प्रतिषिद्धत्वात्, तत्सद्भावेऽपि चायं पर्यनुयोगस्तत्रापि तुल्यः। तथाहि—यदि 'इह कुण्डे दधि' इति बुद्धिः संयोगनिमित्ता तस्य च एकत्वम् तदा निमित्तत्वाविशेषात् यथा 'कुण्डे दधि' इति प्रत्ययः तथा 'दध्नि कुण्डम्' इत्यपि स्यात् दधि-कुण्डसंयोगस्याविशेषे तज्जन्यप्रत्ययस्यापि अविशेषप्रसक्तेः अन्यथा तस्य तन्निमित्तत्वायोगात् अतिप्रसङ्गात्। किञ्च, यदि 'इह तन्तुषु पटः' इति प्रत्ययः तन्तु-पटव्यतिरिक्तनिमित्तमन्तरेण न स्यात् 'इह समवायिषु समवायः' इत्यपि प्रत्ययः अपरसमवाय-५ निमित्तमन्तरेण न स्यात्। अथापरसमवायप्रकल्पनायामनवस्थाप्रसक्तेस्तमन्तरेणापि अस्य प्रत्ययस्योत्पत्तिस्तर्हि अनेनैव हेतुरनैकान्तिकः स्यात् इति न 'इह' प्रत्ययात् समवायसिद्धिः। यच्च 'कारणानुपलब्धेर्नित्यः समवायः' इत्यभिधानम्, तदप्यसंगतम्, यतो[3] यद्यसौ नित्यः स्यात् तदा घटादीनामपि नित्यत्वं प्रसज्येत स्वाधारेषु तेषां सर्वदाऽवस्थानात्। तथाहि-एषां समवायवशात् स्वाधारेषु अवस्थानमिष्यते स च नित्य इति किमिति सदैते न संतिष्ठेरन्? अथ[4] स्वारम्भकावयवविनाशाद् १० विभागाद् वा घटादीनां विनाशः सत्यपि समवायेऽवस्थितिहेतौ सहकारिकारणान्तराभावाद् विरोधिप्रत्ययोपनिपाताच्च ततो न घटादीनां नित्यत्वप्रसङ्ग इति, असदेतत्; यतः कपालादीनां घटाद्यारम्भकावयवानामपि स्वारम्भकावयवेषु समवायोऽभ्युपगम्यते तेषामपि स्वारम्भकावयवेषु यावत् परमाणुः तस्य च नित्यत्वाद् नान्यथात्वसद्भाव इति सर्वेषां सर्वदा स्वारम्भकावयवेषु समवायसद्भावात् कुतो विभागो विनाशो वा—येन कारणविभागादिसद्भावात् घटादेर्विनाशोत्पत्तिर्भवेत्—विरोधि- १५ समवायसद्भावे विभागादेरनुत्पत्ते (?) यदि[5] च स्वारम्भकावयवानां विनाशोऽभ्युपगम्येत तदा समवायस्यापि विनाशाभ्युपगमोऽवश्यंभावी संबन्धिनिवृत्तौ संबन्धनिवृत्तेरवश्यंभावित्वात् कुण्ड-बदरसंयोगिविनाशे तत्संयोगवत्, संबन्धिनां वा अविनाशप्रसङ्गः अविनष्टसंबन्धत्वात् अनुपरतसंयोगद्रव्यद्वयवत् अन्यथा उभयेषामपि त[6]त्संबद्धस्वभावहानिप्रसक्तिः स्यात्। अथ[7] यदि निवृत्ताशेषसंबन्धित्वात् समवायविनाश इति प्रथमप्रयोगार्थस्तदा हेतोः पक्षैकदेशासिद्धताप्रसक्तिः न हि अशेषाणां २० संबन्धिनां प्रलयेऽपि विनाशः परमाण्वादीनां तत्रापि अवस्थानात्। अथ 'विनष्टकतिपयसंबन्धित्वात्' इति हेतुर्विवक्षितस्तदा अनैकान्तिकः यतः यदि नाम कश्चित् संबन्धी विनष्टस्तथापि अपरसंबन्धिनिबन्धना संबन्धस्य अवस्थितिर्युक्तैव। न च संयोगस्यापि कतिपयसंयोगिविनाशेऽपि अपरसंयोग्यवस्थानात् अनेनैव न्यायेन अवस्थानप्रसक्तिः, संयोगस्य प्रतिसंयोगि भिन्नत्वात् तद्विनाशे विनाशोपपत्तेः समवायस्य तु सर्वत्र एकत्वात् नैकसंबन्धिविनाशे विनाशः 'इह' प्रत्ययस्य अन्यत्रापि अविशे- २५ षात् तन्निबन्धनस्य समवायस्यापि अभेद इति नान्यसंबन्धिसद्भावे तद्विनाशप्रसक्तिः, असदेतत्; यतः[8]

---

१ पृ० ६७९ पं० ९ तथा पृ० ११३ पं ४२–।

२ पृ० ७०० पं० १४।

३ "नित्यत्वेनास्य सर्वेऽपि नित्याः प्राप्ताः (घटादयः)। आधारेषु सदा तेषां समवायेन संस्थितेः" ॥
—तत्त्वसं० का० ८५४ पृ० २७१।

४ "स्वारम्भकविभागाद्वा यदि वा तद्विनाशतः। ते नश्यन्ति क्रियाद्या (दीव) योगादेरिति चेन्न तत्॥
स्वाधारैस्समवायो हि तेषामपि सदा मतः। तेषां विनाशभावे तु नियताऽस्यापि नाशिता" ॥—
—तत्त्वसं० का० ८५५-८५६ पृ० २७१।

५ "संबन्धिनो निवृत्तौ हि संबन्धोऽस्तीति दुर्घटम्। न हि संयुक्तनाशेऽपि संयोगो नोपतिष्ठते॥
यथा संयोगभावे तु संयुक्तानामवस्थितिः। समवायस्य सद्भावे तथा स्यात् समवायिनाम्" ॥
—तत्त्वसं० का० ८५६-८५८ पृ० २७२।

६ तत्संबन्धस्व-आ०। "अन्यथा तत्संबन्धस्वभावहानिरुभयेषामपि प्रसज्येत"—तत्त्वसं० पञ्जि० पृ०२७२ पं०१८।

७ "एकसंबन्धिनाशेऽपि समवायोऽवतिष्ठते। अन्यसंबन्धिसद्भावाद् योगो नो चेन्न भेदतः" ॥
—तत्त्वसं० का० ८५९ पृ० २७२।

८ "यद्येवं ये विनश्यन्ति घटाद्याः समवायिनः। तेषां वृत्त्यात्मको योऽसौ समवायः प्रकल्पितः॥
स एव व्यवतिष्ठेत किं संबन्ध्यन्तरस्थितेः। अथान्य एव संयोगविभागबहुनादिवत्॥
नाद्यस्तल्लक्षणस्यैव समवायस्य संस्थितौ। पूर्ववत् ते स्थिता एव प्राप्नुवन्ति घटादयः॥
न तेषामनवस्थाने तेषां (वृत्त्यात्मकः क्वचित्)। सम(वायो)वतिष्ठेत संज्ञामात्रेण वा तथा।
अतः प्रागपि सद्भावान्न ते वृत्ताः स्युराश्रये। पश्चादिव तथा ह्येषा वृत्तिस्तेषामवस्तुतः" ॥
—तत्त्वसं० का० ८६०-८६४ पृ० २७३।

किं य एव घटादयो विनश्वरवनुभवन्ति स्वकारणादिसमवायिनः तद्वृत्त्यात्मक एव समवायः अविनष्टे घटादिसंबन्ध्यन्तरेऽवतिष्ठते, आहोस्वित् अन्य एव असौ इति कल्पनाद्वयम् । यदि प्रथमः पक्षस्तदा प्रागवस्थावद् अप्रच्युतवृत्तित्वाद् घटादयोऽवस्थिता एव स्युः तदनवस्थाने वा अनवस्थित-वृत्तित्वात् समवायस्यापि विनाशः तस्य वृत्त्यात्मकत्वात् अन्यथा तस्य तद्वृत्तत्वानुपपत्तेः । [illegible] च ५ तदनुपकारिणस्तद्वृत्तिः 'समवायः' इति नामकरणे संज्ञामात्रमेव भवेत् न वस्तुतत्त्वभावः तथा च अविनष्टसंबन्ध्यवस्थायामपि घटादयो न स्वाश्रयवृत्ताः समवायसद्भावबलात् सिध्येयुः विनष्टसम-वायिकारणावस्थायामिव परमार्थतो वृत्त्यभावात् एकरूपवृत्तिसद्भावेऽपि तेषां विनाशाभ्युपगमात् न तन्निमित्ता स्वकारणेषु तेषां स्थितिर्भवेत् तत्सद्भावेऽपि कथं तद्भावनिमित्तस्तद्भाव इति स्वयमेव चिन्त्यम् । अथ द्वितीयः पक्षस्तदा संयोगादिवत् समवायबहुत्वप्राप्तेः 'समवायोऽभेदवान्' इत्यभ्युप-१० गमव्याहतिः नित्यत्वे च समवायस्य अभ्युपगम्यमाने स्वकारणसमवायस्य स्वसत्तासमवायस्य च जन्मशब्दवाच्यस्य सर्वदा सद्भावात् कार्यजन्मनि क्वचिदपि कारणानां साफल्यं न स्यात् तथा च अध्यक्षादिविरोधः तन्त्वादेः पटादिकार्यजनकत्वेन अध्यक्षादिना प्रतीतेः "अन्यतरकर्मजः उभयकर्मजः संयोगजश्च संयोगः" [वैशेषिकद० ७-२-९] "विभागोऽपि अन्यतरोभयकर्म-विभागजः" [ ] "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम्" [न्यायद० १-१-४] इत्यादिजन्मप्रतिपादकसूत्रसमूहविरोधश्च । १५ समवायलक्षणस्य च जन्मनो नित्यतया क्रमासंभवाद् भावानां क्रमोत्पत्तिरुपलभ्यमाना विरुद्धा च स्यात् । समवायलक्षणजन्मनित्यतया च 'जगद् अनुपकार्योपकारकभूतम्' इति शास्त्रप्रणयनमनर्थकं भवेत् । बुद्धिजन्मनोऽपि समवायस्वभावतया क्रमाभावात् "युगपद् ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" [न्यायद० १-१-१६] इत्यादि सर्वमपि विरुद्धं स्यात् इति नित्यसमवायप्रकल्पनमसमञ्जसमिति स्थितम् । तदेवमुलूकप्रतिपादितशास्त्रस्य मिथ्यात्वम् तदभिहितपदार्थानामप्रमाणत्वात् प्रमाण-२० बाधितत्वाच्च । आचार्यस्तु एतत् सर्वं हृदि कृत्वा तन्मिथ्यात्वाऽविनाभूतं प्रतिपादितसकलन्याय-व्यापकम् '**जं सविसय-**' इत्यादिना गाथापश्चार्धेन **हेतुमाह-यस्मात् स्वविषयप्रधानता-व्यवस्थिताऽन्योन्यनिरपेक्षो**भयनयाश्रितं तत् अन्योन्यनिरपेक्षनयाश्रितत्वस्य मिथ्यात्वाविना-ऽविनाभूतत्वात् ॥ ४९ ॥

[अन्योन्यनिरपेक्षनयाश्रितानां वादानां मिथ्यात्वराहित्याभावप्रतिपादनम्]

२५ अन्योन्यनिरपेक्षनयाश्रितस्य मिथ्यात्वाऽविनाभूतत्वमेव दर्शयन्नाह—

जे संतवायदोसे सक्कोलूया भणंति संखाणं ।
संखा य असव्वाए तेसिं सव्वे वि ते सच्चा ॥ ५० ॥

यान् एकान्तसद्वादपक्षे द्रव्यास्तिकाभ्युपगतपदार्थाभ्युपगमे **शाक्यौलूक्या दोषान् वदन्ति साङ्ख्यानां** क्रिया-गुणव्यपदेशोपलब्ध्यादिप्रसङ्गादिलक्षणान् **ते सर्वेऽपि तेषां सत्या** ३० इत्येवं संबन्धः कार्यः । ते च दोषाः एवं सत्याः स्युः यद्यन्यनिरपेक्षनयाभ्युपगतपदार्थप्रतिपादकं तत्

१-त् न तत्स-वा० बा० ।

२ "अथान्य एव संयोगविभागबहुतादिवत् । संबन्ध्यन्तरसद्भावे समवायोऽवतिष्ठते ॥
संयोगादिवदेवं हि नन्वस्य बहुता भवेत् । एवमाद्यस्य सद्भावे बहु स्यादसमञ्जसम्" ॥
—तत्त्वसं० का० ८६५-८६६ पृ० २७३-२७४ ।

३-कर्मसं-बृ० भां० मां० । "अप्राप्तयोः प्राप्तिः संयोगः स च त्रिविधः—अन्यतरकर्मजः उभयकर्मजः संयोग-जश्च"—प्रशस्त० कं० पृ० १३९ पं० १८ ।—तत्त्वसं० पञ्जि० पृ० २७४ पं० ९ ।

४ "एतेन विभागो व्याख्यातः"—वैशेषिकद० ७-२-१० ।
"प्राप्तिपूर्विकाऽप्राप्तिर्विभागः स च त्रिविधः—अन्यतरकर्मजः उभयकर्मजः विभागजश्च"—प्रशस्त० कं० पृ० १५१ पं० ५ ।

५ पृ० ६५६ गा० ४९ ।

कार्यं मिथ्या स्यात् नान्यथा प्रागपि कार्यावस्थात एकान्तेन तत्सत्त्वनिबन्धनत्वात् तेषाम् अन्यथा कथंचित् सत्त्वे अनेकान्तवादापत्तेर्दोषाभाव एव स्यात् । साङ्ख्या अपि असत्कार्यवाददोषान् असदकरणादीन् यान् वदन्ति ते सर्वे तेषां सत्या एव एकान्ताऽसति कारणव्यापारासंभवात् अन्यथा शशशृङ्गादेरपि कारणव्यापारादुत्पत्तिः स्यात् ।

[न्याय–वैशेषिकसम्मतस्यासत्कार्यरूपस्यासद्वादस्य सदोषत्वप्रदर्शनम्] ५

अथ शशशृङ्गस्य न कारणावस्थायामसत्त्वादनुत्पत्तिः किन्तु कारणाभावात् घटादेस्तु मृत्पिण्डावस्थायामसतोऽपि कारणसद्भावादुत्पत्तिः । ननु कुतः शशशृङ्गस्य कारणाभावः? अत्यन्ताभावरूपत्वात् तस्येति चेत् तदेव कुतः? कारणाभावात् इति चेत् सोऽयमितरेतराश्रयदोषः । घटादीनामपि च मृत्पिण्डावस्थायामसत्त्वे कुतः कारणसद्भावः? प्रागसत्त्वादेव तत्र कारणसद्भावः सति कारणव्यापारासंभवादिति चेत्, असदेतत्; घटस्य मृत्पिण्डावस्थायां सत्त्वे प्रागनवस्थायोगाद्-१० सत्त्वेऽपि शशशृङ्गस्येव तदनुपपत्तेः । अथास्य उत्पत्तिदर्शनात् प्रागभावः न शशशृङ्गस्य, न; इतरेतराश्रयदोषप्रसक्तेः । तथाहि—यावदस्य[1] प्रागभावित्वं न तावदुत्पत्तिसिद्धिः यावच्च नोत्पत्तिसिद्धिर्न तावत् प्रागभावित्वसिद्धिरिति व्यक्तमितरेतराश्रयत्वम्[2] । अथ कारणस्य कार्यशून्यता प्रागभावः प्रागेव सिद्धः, असदेतत्; अकारणस्यापि कार्यशून्यतोपलम्भात् तत्संबन्धाद् घटस्य तत्कार्यताप्रसक्तेः । तथाहि—यस्य प्रागभावित्वं तस्य कार्यता तच्च कार्यशून्यं पदार्थान्तरं कारकाभिमताद् अन्यदपि च १५ तत्प्रागभावस्वभावं प्राप्तम् तत्संबन्धेन च घटादेः शशशृङ्गादिव्यवच्छेदेन कार्यता अभ्युपगतेति सूत्रपिण्डकार्यताऽपि[3] घटस्यैवं भवेत् । न च तदन्वय-व्यतिरेकाभावान्न तत्कार्यता, अन्वय-व्यतिरेकाभावस्य तत्राऽसत्त्वनिबन्धनत्वात् । न च प्रागभावो नाम प्रत्यक्षादिप्रमाणग्राह्यः, मृत्पिण्डस्वरूपमात्रस्यैव तत्र प्रतिभासनात् । न च कारणस्वरूपमेव प्रागभावः, निर्विशेषणस्य स्वरूपमात्रस्य कार्येऽपि सद्भावात् तस्यापि प्रागभावरूपताप्रसक्तेः । अथ कार्यान्तरापेक्षया तस्यापि प्रागभावरूपता कारण-२० स्वभावाऽभ्युपगम्यत एव, न; कारणाभिमतापेक्षयाऽपि तद्रूपताप्रसक्तेः । तथाप्रतीत्यभावान्न तद्रूपतेति चेत्, न; प्रतीतिमात्रादनपेक्षितवस्तुस्वरूपाद् वस्तुव्यवस्थाऽयोगात् । ततो मृत्पिण्डादिरूपतया वस्तु गृह्यतेऽध्यक्षादिना न पुनस्तद्व्यतिरिक्तकारणादिरूपतया तस्यास्तत्राऽप्रतिभासनात्, प्रतिभासनेऽपि विशिष्टकार्यापेक्षया कारणत्वस्य प्रतिपत्तौ कार्यप्रतिभासमन्तरेण तत्कारणत्वस्याऽप्रतीतेरसतस्तदानीं कार्यस्याप्रतिभासनात् प्रत्यक्षस्य असदर्थग्राहकत्वेन भ्रान्तताप्रसक्तेः तदा २५ तत्कार्यस्य सत्त्वप्रसक्तिः स्यादिति कथमसति कारणव्यापारः प्रतीयेत? नच असतः कार्यत्वं युक्तम् ॥

[बौद्धसम्मतस्यासत्कारणरूपस्यासद्वादस्य सदोषत्वदर्शनम्]

नापि असत्कारणं कार्यम्[4] तदानीमसति कारणे तस्य तत्कृतत्वायोगात् क्षणमात्रावस्थायिनः कारणस्य स्वभावमात्रव्यवस्थितेरन्यत्र व्यापारायोगात् । अथ तदनन्तरं कार्यस्य भावात् प्राग्भावित्वमात्रमेव कारणस्य व्यापारः, असदेतत्; समस्तभावक्षणानन्तरं विवक्षितकार्यस्य सद्भावात् सर्वेषां ३० तत्पूर्वकालभावित्वस्य भावात् तत्कारणताप्रसक्तेः । अथ सर्वभावक्षणाभावेऽपि तद्भाव इति न तस्य तत्कार्यता, न; क्षणिकेषु भावेषु विवक्षितक्षणाभाव एव सर्वत्र विवादाध्यासितकार्यसद्भावान्न तदपेक्षयाऽपि तस्य कार्यता भवेत् । न च क्षणिकस्य कार्यस्य तदभावेऽपि पुनर्भवनसंभवः तस्य तदैव भावाद् अन्यदा कदाचिदप्यभावात् । न च विशिष्टभावक्षणधर्मानुविधानात् तस्य तत्कार्यताव्यवस्था, सर्वथा तद्धर्मानुविधाने तस्य कारणरूपतापत्तेस्तत्प्राक्कालभावितया तत्कार्यताव्यतिक्रमात्, कथं-३५ चित् तद्धर्मानुविधाने अनेकान्तवादापत्तेः 'असत्कारणं कार्यम्' इत्यभ्युपगमव्याघातात् । अथ

---

[1] पृ० २८२ पं० १८ । [2] उत्पत्तिस्थितिज्ञप्तीनां मध्याद् ज्ञप्तिसापेक्षस्यैव इतरेतराश्रयस्यात्र सुघटत्वेन 'यावदस्य न प्रागभावित्वम्' इत्येव पाठो ज्यायान् भाति । [3] -पि तत्प्रा-आ० ।

[4] "यद्यसत् सर्वथा कार्यं तन्मा जनि खपुष्पवत् । मोपादाननियामो भून्माऽऽश्वासः कार्यजन्मनि" ॥—आप्तमी० का० ४२ पृ० २४ । कारिकैषाऽत्र साष्टशतिका सवृत्तिका चावबोद्धव्या ।

[5] प्रागभा-वा० बा० विना ।

संतानापेक्षः कार्यकारणभाव इत्ययमदोषः, न; संतानस्य पूर्वापरक्षणव्यतिरेकेणाभावात् भावे वा तस्यैव कार्यकारणरूपस्य अर्थक्रियासामर्थ्यात् सत्त्वं स्यात् न क्षणानामर्थक्रियासामर्थ्यविकलतया भवेत् । अथ तत्संबन्धिनः संतानस्य कार्यकारणत्वे तेषामपि कार्यकारणभावः, न; भिन्नयोः कार्यकारणभावादपरस्य संबन्धस्य अभावात् संतानस्य च सर्वजगत्क्षणानन्तरभावित्वेन सर्वसंतान-
५ताप्रसक्तिः स्यात् । किञ्च, तस्यापि नित्यत्वे क्षणकार्यत्वे च सत्कार्यवादप्रसक्तिः, क्षणिकत्वे च अन्वयाऽप्रसिद्धेस्तस्य तत्कार्यताऽप्रसिद्धिः, व्यतिरेकश्च कार्यतानिबन्धनं क्षणिकपक्षे न संभवतीति प्रतिपादितमेव । न च अत्रापि अपरसंतानप्रकल्पनया कार्यकारणभावप्रकल्पनं युक्तम् अनवस्था-प्रसक्तेः । तथाहि-संतानस्यापि कार्यताऽभ्युपगमे क्षणिकत्वान्न कार्यरूपता अतः संतानान्तरमत्रापि कार्यतानिबन्धनमभ्युपगन्तव्यम् तत्रापि च क्षणिकत्वे कार्यताऽप्रसिद्धेस्तन्निबन्धनमपरं संतानान्तर-
१०मभ्युपगमनीयमित्यनवस्था परिस्फुटैव । किञ्च, क्षणिकभावाभ्युपगमवादिनो यदि भिन्नकार्योदया-द्धेतोः सत्त्वमभिमतं तदा तत्कार्यस्यापि अपरकार्योदयात् सत्त्वसिद्धिरित्यनवस्थाप्रसक्तेर्न क्वचित् सत्त्वव्यवस्था स्यात् इति कुतस्तद्व्यवच्छेदेन 'असत् कार्यम्' इति व्यपदेशः । अथ ज्ञानलक्षणकार्य-सद्भावाद्धेतोः सत्त्वव्यवस्थितिः, ननु ज्ञानस्यापि कथं ज्ञेयसत्ताव्यवस्थापकत्वम्? ज्ञेयकार्यत्वात् इति चेत्, ननु किं तेनैव ज्ञानेन ज्ञेयकार्यता स्वात्मनः प्रतीयते, उत ज्ञानान्तरेण? न तावत् तेनैव, तस्य
१५प्रागसत्त्वाभ्युपगमादप्रवृत्तेः प्रवृत्तौ वा तत्कार्यतावगतिः पुनः प्राक् प्रवर्तने संगच्छते तत्रापि पुनः प्राक् प्रवृत्ताविति अनवस्थाप्रसक्तेः कुतस्तस्य तत्कार्यतावगतिः? अथ समानकालत्वेऽपि ज्ञानस्य ज्ञेयकार्यता, ननु एवमविशेषाद् ज्ञेयस्यापि ज्ञानकार्यतावगतिः स्यादिति तदपि तद्व्यवस्थापकं प्रसज्येत । न च समानकालयोः स्तम्भ-कुम्भयोः कार्यकारणतोपलब्धेति प्रकृतेऽपि सा न स्यात् । अथ केवलस्यापि कुम्भस्य दृष्टेरकार्यता, ज्ञानस्यापि केवलस्य दृष्टेरकार्यताप्रसक्तिः । तस्य ततोऽन्य-
२०त्वान्न व्यभिचार इति चेत्, ननु कुम्भोऽपि कुतोऽन्यः स न भवेत्? प्रत्यभिज्ञानान्नान्य इति चेत्, एतद् ज्ञानेऽपि समानम्, नित्यता च कुम्भस्यैवं भवेदिति कुतोऽसत्कार्यवादः? न च प्रत्यभिज्ञानं भवतः प्रमाणम् पूर्वापररूपाधिकरणस्यैकतयाऽप्रतीतेः न हि पूर्वापरप्रत्ययाभ्यामपरपूर्वरूपताग्रहः । नापि एकप्रत्ययेन पूर्वापररूपद्वयस्य क्रमेण ग्रहः एकस्य अक्रमस्य क्रमवद्रूपग्राहकतयाऽप्रवृत्तेः । न च स्मरणस्य द्वयोर्वृत्तिः संभवति । न चास्य प्रमाणता । न च पूर्वापरप्रत्यययोः परस्परपरिहारेण वृत्तौ
२५तत उत्पद्यमानं स्मरणमेकत्वस्य वेदकं युक्तम् अगृहीतग्राहितया अस्मरणरूपताप्रसक्तेः । न च आत्मापि एकत्वमवैति प्रत्यक्षादिप्रमाणवशेन अर्थावेदकत्वात् तस्य चैकत्वे अप्रवृत्तेः । न च प्रमाणनिरपेक्ष एव आत्मा एकत्वग्राहकः स्वाप-मद-मूर्च्छाद्यवस्थायामपि तस्य तद्ग्राहकत्वोपपत्तेः । न च तस्यापि एकत्वं कुतश्चित् प्रमाणात् प्रसिद्धम् तद्ग्राहकत्वेन तस्याऽप्रतीतेः । न च बौद्धस्य आत्मा अन्यद् वा वस्तु नित्यमस्ति "क्षणिकाः सर्वसंस्काराः" [ ] इति वचनात् । तन्न तेनैव आत्मनः
३०प्रमेयकार्यताऽवगतिः । नापि अन्येन तस्यापि स्वप्रमेयकार्यावगतौ प्रागवृत्तितयाऽसामर्थ्यात् । तन्न ज्ञानलक्षणमपि कार्यं हेतोः सत्तां व्यवस्थापयितुं समर्थं क्षणिकैकान्तवादे । अध्यक्षस्य यथोक्तन्यायेन पौर्वापर्येऽप्रवृत्तेः, अत एव नानुमानस्यापि पौर्वापर्ये प्रवृत्तिः तस्य तत्पूर्वकत्वात् प्रत्यक्षाऽप्रतिपन्नेऽर्थे परलोकादाविवार्थविकल्पनमात्रत्वेन सर्वज्ञानस्य अभ्युपगमात् । तन्न असत्कार्यवादः प्रमाणसंगतः ।

[सांख्यसम्मतस्य सत्कार्यरूपस्य सद्वादस्य सदोषत्वख्यापनम्]

३५ सत्कार्यवादस्तु प्रागेव निरस्तत्वाद् अयुक्त एव । तथाहि—नित्यस्य कार्यकारित्वं तत्र स्यात्, तच्च अयुक्तम्; नित्यस्य व्यतिरेकाप्रसिद्धितः कार्यकरणे सामर्थ्याप्रसिद्धेः, न हि नित्यस्य सर्वदेशका-

---

१-वर्तते सं-वृ० हा० । २-कत्यवेद-वृ० ।-कत्वेवेद-आ० । ३ पृ० ४२४ पं० ११ ।

४ "यदि सत् सर्वथा कार्यं पुंवन्नोत्पत्तुमर्हति । परिणामप्रक्लृप्तिश्च नित्यत्वैकान्तबाधिनी" ॥—आप्तमी० का० ३९ पृ० २३। एषाप्यत्र सविवरणाऽवगन्तव्या । सत्कार्यवादनिरसनं प्रमेयकमलमार्तण्डतोऽप्यवधारणीयम्—पृ० ८२ प्र० पं० ११ ।

५ पृ० २९७ पं० ३१ तथा पृ० ४२३ पं० ५ ।

"इदं त्विह निरूप्यते किं सत् क्रियते असदेव वा" इत्यादिना सत्कार्यवादः प्रतिक्षिप्तः श्रीधरेण न्यायकन्दल्याम्—पृ० १४३ पं० ५–।

"सत्कार्यवादश्च विचार्यमाणो न समस्त्येवेति कुतस्त्या हेतुसिद्धिः?" इत्यादिना सत्कार्यवादो निरस्तो जयन्तभट्टेन न्यायमञ्जर्याम्—पृ० ४९२ पं० २२ ।

व्यापिनः कस्यचित् कार्यव्यापारविरहिणः सामर्थ्यमवगन्तुं शक्यम् । अथ सर्वदेशाव्यापिनस्तस्य तत्र सामर्थ्यं भविष्यति, तद् असत्; यतः सर्वदेशाव्याप्तिस्तस्य तथाप्रतीतेर्यद्यवसीयते सर्वकालाव्याप्तिरपि तस्य तत एव अभ्युपगमनीया स्यात् । अभ्युपगम्यत एवेति चेत्, नन्वेवं कतिपयदेशकालव्याप्तिरप्यप्रतिपत्तेरेव अनुपपन्नेति निरंशैकक्षणरूपता भावानां समायाता । न च तदेकान्तपक्षेऽपि कार्यजनकता, प्राक् प्रतिक्षिप्तत्वात् । न चैकान्तनित्यव्यापकत्वपक्षे प्रमाणप्रवृत्तिः इत्यसकृत् प्रतिपा- ५
दितम् । न चासति कार्ये निर्विषयत्वात् कारणव्यापारासंभवात् सत्येव तत्र तेषां व्यापारः, यतो न दृष्ट्वा श्रुत्वा ज्ञात्वा वा हेतूनां कार्ये व्यापारः तेषां जडत्वेन तदसंभवात् । न चादृश्यमानाऽजडेश्वरादिहेतुकमकृष्टोत्पत्तिकं भूरुहादि संभवतीति प्राक् प्रतिपादितम् । न चाऽसतः कार्यस्य विज्ञानं न ग्राहकम् असत्यप्यक्षादिबुद्धेः प्रवृत्तेः अन्यथा कथं कार्यार्थप्रतिपादिका चोदना भवेत्? किञ्च, यदि सत्येव कार्ये कारणव्यापारस्तदा उत्पन्नेऽपि घटादिकार्ये कारणव्यापारादनवरतं तदुत्पत्तिप्रसक्तिः १०
तत्सत्त्वाविशेषात् । अथाभिव्यक्तत्वान्नोत्पन्ने पुनरुत्पत्तिः उत्पत्तेरभिव्यक्तिस्वरूपत्वात् तस्याश्च प्रथमकारणव्यापारादेव निर्वृत्तत्वात् ननु अभिव्यक्तिरपि यदि विद्यमानैव उत्पद्यते उत्पन्नाऽपि पुनः पुनरुत्पद्येत । अथ अविद्यमाना तदाऽसदुत्पत्तिप्रसक्तिः । न चाभिव्यक्तावप्यसत्यां कार्य इव कारणव्यापारोऽभ्युपगन्तुं युक्तः स्वसिद्धान्तप्रकोपप्रसङ्गात् ।

[सत्कारणककार्यरूपस्य सद्वादस्य सदोषत्वप्रकटनम्] १५

अथ सतः कारणाद् कार्यमिति सत्कार्यवादः असतो हेतुत्वायोगात् तथाभ्युपगमे वा शशशृङ्गादेरपि पदार्थोत्पत्तिप्रसक्तिः । अत्यन्ताभाव-प्रागभावयोः असत्त्वेनाविशेषात् न च प्रागभावी आसीदिति हेतुर्नात्यन्ताभावीति वक्तव्यम् यतो यदा आसीत् तदा न हेतुः अन्यदा हेतुरिति प्रसक्तेः । ततश्च इदं प्रसक्तम्—असन् हेतुः संश्च अहेतुरिति । ततः सन्नेव हेतुः तस्य कार्ये व्यापारात् नासन् तत्र तदयोगात्, एतदप्यसत्; यतः सतोऽपि कारणस्य प्राक्तनरूपापरित्यागान्न कार्यं प्रति हेतुता २०
प्राक्तनावस्थावत् । अथ तदा व्यापारयोगाद् हेतुता, असदेतत्; व्यापारेण कार्यं प्रति तस्य हेतुत्वे 'सोऽपि व्यापारः कुतस्तस्य ?' इति पर्यनुयोगसंभवाद् व्यापारवत्पदार्थाच्चेत्, ननु तत्रापि व्यापारो यद्यपरव्यापारात् तदा व्यापारपरंपराव्यवहितत्वात् कारणस्य न कदाचित् कार्योत्पादने प्रवृत्तिः स्यात् अनन्तव्यापारपरंपरापर्यवसानं यावत् कस्यचिदनवस्थानादसतः कारणात् कार्योत्पत्तिश्च स्यात् । अथ कारणस्वरूपमेव व्यापारः तत्काल एव च कार्यम् तेन नानवस्था, नापि असतः कारणात् कार्यो- २५
त्पत्तिः, नन्वेवं कारणसमानकालं कार्यं स्यात् तथा च सव्येतरगोविषाणवत् कुतः कार्यकारणभावः? अथ कार्यभावकाले कारणस्य न सद्भावस्तर्हि चिरतरनष्टादिव तत्कालध्वंसिनोऽपि कुतः कार्यसद्भावः? कार्योत्पत्तिकाले तदनन्तरभाविनः सत्ता चेत्, तर्हि कार्योत्पत्तिः कार्यान्न भिन्नेति कार्यकारणयोः समानकालतैव स्यात् तथा च कुतः कार्यकारणभावः? न च 'सतः कारणात् कार्योत्पत्तिः' इत्यभ्युपगमवादिनः कार्योत्पत्तिकाले कारणस्यासत्त्वं बौद्धस्येव सिद्धम् । अविचलितरूपस्य च तस्य ३०
सद्भावे तदापि न कार्यवत्ता विकलकारणत्वात् प्राग्वत्, तदा तद्वत्त्वे वा पूर्वमपि तद्वत्त्वं स्यात् अविकलकारणत्वात् तदवस्थावत् । तन्नैकान्तसत्कार्यवादः असत्कार्यवादो वा युक्तः अनेकदोषदुष्टत्वात् ।

[कथंचित् सदसद्वादस्य निर्दोषत्वसमर्थनम्]

अथ एकान्तेन सदसतोरजन्यत्वात् अजनकत्वाच्च कार्यकारणभावाभावात् सर्वशून्यतैव । तदुक्तम् 'अशक्तं सर्वमिति चेत्' इत्यादि, न; कथंचित् सदसतोर्जन्यत्वात् जनकत्वाच्च । न चैकस्य सद- ३५
सद्रूपत्वं विरुद्धम्, कथंचिद् भिन्ननिमित्तापेक्षस्य सदसत्त्वस्य एकदा एकत्र अबाधिताध्यक्षतः प्रतिपत्तेः । न च अध्यक्षप्रतिपन्ने वस्तुनि विरोधः अन्यथा एकचित्रपटज्ञाने चित्ररूपतायाः चित्रपटे च चित्रैकरूपस्य विरोधः स्यात् । तथा च 'शुक्लाद्यनेकप्रकारं पृथिव्या रूपम्' इति वैशेषिकस्य विरुद्धाभिधानं भवेत् ।

---

१ पृ० १०२ । २-गादृथा-बृ० आ० हा० वि० । ३ प्रागभा-वा० बा० भां० मां० । ४-नन्तरव्या-वा० बा० भां० मां० । 'नन्तरव्या-'इत्यत्र '२' इत्यस्य द्विलसंख्यासूचकाङ्कस्य रेफतया भ्रान्तैः पुस्तकलेखकैः-'नन्तरव्या'—इति लिपिकरणेन-'नन्तरव्या'-इति पाठान्तरं जातमिति प्रतिभाति । ततश्च 'अनन्तानन्तव्यापार'-इत्येव पाठः सम्यक् स्यात् । ५-णस्य स-वा० बा० ।

[प्रसङ्गात् चित्ररूपचर्चा]

अथ तदवयवानां शुक्लाद्यनेकरूपयोगिता अवयविनस्तु एकमेव रूपम्, न; तदवयवानामपि अव-
यवित्वेनानेकप्रकारैकरूपयोगित्वविरोधात्। अथ प्रत्येकमवयवेषु शुक्लादिकमेकैकं रूपम् तर्हि तदव-
यवादिष्वपि एकैकमेव रूपं यावत् परमाणव इति विभिन्नघट-पटादिपदार्थेष्विव चित्रपटेऽपि 'नील-
५ पीत-शुक्लरूपा एते भावाः' इति प्रतिपत्तिः स्यात् न पुनः 'चित्ररूपः पटः' इति, अवयवाऽवयविनो-
रन्यत्वात् अवयवानामनेकरूपा(प)संबन्धित्वेऽपि अवयविनस्तथाभावाभावात्। अथावयविनोऽपि
विभिन्नानेकरूपसंबन्धित्वमभ्युपगम्यते तथापि चित्रैकरूपप्रतिभासानुपपत्तिः अनेकरूपसंबन्धित्व-
स्यैव तत्र सद्भावात् सूत्रव्याघातश्चैवं स्यात् "अविभुनि द्रव्ये समानेन्द्रियग्राह्याणां विशेषगुणानामसंभ-
वात्" [ ] इति सूत्रणाभिधानात् अव्यापके पटादिद्रव्ये एकेन्द्रियग्राह्याणां शुक्लादीनां विशेषगुणा-
१० नामसंभवोऽनेन सूत्रेण प्रतिपादितः स च व्याहन्येत। किञ्च, शुक्लादीनामेकत्र पटादावनेकस्वरूपाणां
सद्भावाभ्युपगमे व्याप्यवृत्तित्वम्, अव्याप्यवृत्तित्वं वा? अव्याप्यवृत्तित्वे "शेषाणामाश्रयव्यापित्वम्"[1]
[प्रशस्त० कं० पृ० १०३ पं० ८] इति विरुध्येत। आश्रयव्यापित्वेऽप्येकावयवसहितेऽपि अवयविनि
उपलभ्यमाने अपरावयवाऽनुपलब्धावपि अनेकरूपप्रतिपत्तिः स्यात् सर्वरूपाणामाश्रयव्यापित्वात्।
अथ शुक्लाद्यनेकाकारं चित्रमेकं तद्रूपं यथा शुक्लादिको रूपविशेषः कथं तर्हि अनेकाकारमेकं[2] रूपम-
१५ विरुद्धं भवेत् चित्रैकरूपाभ्युपगमस्य चित्रतरत्वात्। अथ चित्रैकरूपस्य तस्य प्रत्यक्षेण प्रतीतेर्न विरो-
धस्तर्हि सदसद्रूपैकरूपतया कार्यकारणरूपस्य वस्तुनः प्रतिपत्तौ विरोधः कथं भवेत्? न च चित्रपटा-
दावपास्तशुक्लादिविशेषं रूपमात्रं तदुपलम्भान्यथानुपपत्त्याऽस्तीति अभ्युपगन्तव्यम् 'चित्ररूपः पटः'
इति प्रतिभासाभावप्रसक्तेः। अथ परस्परविरुद्धानां शुक्लादिरूपाणां चित्रैकरूपानारम्भकत्वात् शुक्ला-
दीनां रूपाणां समानरूपारम्भकत्वोपलम्भाच्च तत्र चित्रैकरूपोत्पत्तिः। नन्वयमपरो वैशेषिकस्यैव
२० दोषोऽस्तु असमानजातीयगुणानारम्भवादिनः। किञ्च, यदि समानजातीयगुणारम्भकत्वमेव कारण-
गुणानामित्यभ्युपगमः 'शुक्लात् शुक्लम्' इत्यादिप्रतीतेः कथं तर्हि कारणगतशुक्लादिरूपविशेषेभ्यः
कार्यं रूपमात्रस्य अपास्ततद्विशेषस्य उत्पत्तिर्भवेत् तेभ्यस्तस्यासमानत्वात्। अथ तद्गतरूपमात्रेभ्य-
स्तद्रूपमात्रस्य उत्पत्तेर्न दोषः, असदेतत्; शुक्लादिरूपविशेषव्यतिरेकेण रूपत्वादिसामान्यमपहाय
रूपमात्रस्याभावात् सामान्यस्य च नित्यत्वेन अजन्यत्वात्। न च रूपमात्रनिबन्धनः 'चित्ररूपः
२५ पटः' इति प्रतिभासो युक्तः, शुक्लादिप्रत्ययस्यापि तन्निबन्धनत्वेन शुक्लादिरूपविशेषस्याऽप्यभाव-
प्रसक्तेः। न चावयवगतचित्ररूपात् पटे चित्रप्रतिभासः अवयवेष्वपि तद्रूपासंभवात्। न च अन्य-
रूपस्यान्यत्र विशिष्टप्रतिपत्तिजनकत्वम् पृथिवीगतचित्ररूपाद् वायौ चित्ररूपप्रतिपत्तिप्रसक्तेः
भेदश्चावयवावयविनोर्भवदभिप्रायेण यदि च रूपमात्रमेव तत्र स्यात् 'क्षितौ रूपमनेकप्रकारम्' इति
विरुध्यते—अनेकप्रकारं हि शुक्लत्वादि भेदभिन्नमुच्यते रूपमात्रं च शुक्लादि विशेषरहितम् तस्य
३० शुक्लादिविशेषेष्वनन्तर्भावात् कथं न विरोधः? यदपि शुक्लाद्यनेकप्रकाररूपाभ्युपगमे क्षितौ सूत्रवि-
रोधपरिहाराभिधानं किल अविभुनि द्रव्ये समानेन्द्रियग्राह्याणां विशेषगुणानामेकाकाराणामसंभवः
न तु अनेकाकाराणाम् क्षितौ 'शुक्लाद्यनेकाकाराणां तेषामुपलम्भात् एकाकाराणामेकत्र बहूनां सद्भावे
एकेनैव शुक्लादिप्रतिपत्तेर्जनितत्वाद् अपरतद्भेदकल्पनावैयर्थ्यप्रसङ्गाच्च तदभ्युपगमः न चैवमनेका-
काराणाम्' इति, तदपि असंगतम्; व्याप्याऽव्याप्यवृत्तित्वविकल्पद्वयेऽपि दोषप्रतिपादनात् अथ
३५ अव्याप्यवृत्तित्वे न विरोधदोषः शेषाणामाश्रयव्यापित्वमेव इत्यवधारणानभ्युपगमात् नन्वेवं सूक्ष्म-
विवरप्रविष्टालोकोद्द्योतितात्पतरपटविभागवृत्तिरूपदेशस्य प्रतिपत्तौ यदि तदाधारस्य पटावयविनः
प्रतिपत्तिस्तदा तदाधेयाशेषशुक्लादिरूपप्रतिपत्तिरपि भवेत् आधेयप्रतिपत्तिमन्तरेण तदाधारत्वस्य
प्रतिपत्तुमशक्तेः। न चाल्पतराल्पतमरूपाधारत्वव्यतिरिक्तं तस्य तदन्यरूपाधारत्वमनेकम्[4][5] अनेकस्व-
भावयोगिनः पटस्य अनेकत्वप्रसक्तेः स्वभावभेदलक्षणत्वाद् वस्तुभेदस्य अन्यथा तदयोगात्

१-त्वे विशेषाणा-वृ० आ० हा० वि०। "शेषास्त्वेकैकद्रव्यवृत्तयः"—प्रशस्त० कं० पृ० ९५ पं० २१।
२-मेकरू-वा० बा० भां० मां०। ३-ण यदि चित्ररूप-भां०। -ण च यदि चित्ररूप-मां०। -णं
चित्ररूप-वा० बा० आ०। ४-रान्यतम-वा० बा० भां० मां०। ५-त्वमनेकस्व-बा० बा० बिना।

तदनेकत्वेऽपि तस्यैकत्वे कथं न अनेकाकारमेकं स्यात्? अथ तत्प्रतिपत्तौ नावयविप्रतिपत्तिस्तर्हि निराधारस्य रूपस्य प्रतिपत्तौ गुणरूपता विशीर्येत द्रव्याश्रयादिलक्षणयोगित्वात् तस्य। न च तद्रूपता(ताऽ)प्रतिपत्तौ तल्लक्षणयोगिता तस्य अवगन्तुं शक्या प्रमेयव्यवस्थायाः प्रमाणाधीनत्वात्। अणुपरिमाणयोगित्वे च अल्पतरपटादिरूपस्य परमाणोरिव द्रव्यरूपताप्रसक्तिः तस्यैव तद्योगित्वात् अत एव 'एकावयवसहितस्य पटस्योपलम्भात् एकरूपोपलम्भेऽपि आश्रयाव्यापितया शेषरूपाणामनु- ५ पलम्भाच्चित्रप्रतिभासाभावः' इति यदुक्तम् तदपि निरस्तम्, एकरूपोपाध्युपकाराङ्गशक्त्यभिन्नस्य पटद्रव्यस्य निश्चयात्मना अध्यक्षेण ग्रहणे अशेषरूपोपाध्युपकारकशक्त्यभिन्नात्मनस्तस्य एकरूपतया ग्रहणात् उपकार्यग्रहणमन्तरेण उपकारकत्वग्रहणस्यासंभवात् शक्तीनां ततो भेदे संबन्धासिद्धेरपरोपकारकशक्तिप्रकल्पनायामनवस्थाप्रसक्तेः कथं नाशेषोपकार्यरूपप्रतिभासाच्चित्रप्रतिभासप्रसक्तिः? एतेन 'तन्तूनां नीलाद्यनेकरूपसंबन्धित्वात् पटेऽपि अनेकरूपारम्भकत्वे न किञ्चिद् बाधकं प्रमाणं १० कारणगुणपूर्वक्रमेण तथाविधस्य रूपस्य उत्पादात्' इत्यपि प्रत्युक्तम् एकावयवप्रतिभासे चित्रप्रतिभासोत्पत्तिप्रसङ्गस्यैव बाधकत्वात्। यदपि 'भवतु वा एकं पटे चित्रं रूपम् नीलादिरूपैरेकरूपारम्भात् यथा हि शुक्लादिर्विशेषो रूपस्य तथा चित्रमपि रूपविशेष एव चित्रशब्दवाच्यः' इति, तदपि असंगतमेव; अनेकाकारस्य एकत्वे चित्रैकशब्दवाच्यत्वे वाभ्युपगम्यमाने सदसदनेकाकारानुगतस्य एकस्य कारणादिशब्दवाच्यत्वेनाभ्युपगमाविरोधात्। यथा च बहूनां तन्त्वादिगतनीलादिरूपाणां १५ पटगतैकचित्ररूपारम्भकत्वं दृष्टत्वादविरुद्धं तथानेकाकारस्य एकरूपत्वं वस्तुनो दृष्टत्वादेवाविरुद्धमभ्युपगन्तव्यम् अत एव एकानेकरूपत्वात् चित्ररूपस्य एकावयवसहितेऽवयविनि उपलभ्यमाने शेषावयवावरणे चित्रप्रतिभासाभाव उपपत्तिमान्। सर्वथा त्वेकरूपत्वे तत्रापि चित्रप्रतिभासः स्यात् अवयविव्याप्त्या तद्रूपस्य वृत्तेः। न चावयवनानारूपोपलम्भसहकारीन्द्रियमवयविनि चित्रप्रतिभासं जनयतीति तत्र सहकार्यभावात् चित्रप्रतिभासानुत्पत्तिरिति वाच्यम्, अवयविनोऽप्यनुपलब्धि- २० प्रसङ्गात् न हि चाक्षुषप्रतिपत्त्याऽगृह्यमाणरूपस्यावयविनो वायोरिव ग्रहणं दृष्टम्। न च चित्ररूपव्यतिरेकेणापरं तत्र रूपमात्रमस्ति यतस्तत्प्रतिपत्त्या पटग्रहणं भवेत्। न चावयवरूपोपलम्भोऽवयविरूपप्रतिपत्तौ अक्षसहकारी, तद्भावे वा तदवयवरूपोपलम्भोऽपि स्वावयवरूपोपलम्भाक्षसहकारी इति तमन्तरेण स न स्यादिति पूर्वपूर्वावयवरूपोपलम्भापेक्षया परमाणुरूपोपलम्भाभावात् तज्जन्यद्व्यणुकाद्यवयविरूपोपलम्भासंभवान्न क्वचिदपि रूपोपलब्धिः स्यात्। तदभावे च नावयव्युपलब्धि- २५ रिति तदाश्रितपदार्थानामप्युपलम्भाभावात् सर्वप्रतिभासाभावः स्यात्। तत एकानेकस्वभावं चित्रपटरूपवद्वस्तु अभ्युपगन्तव्यं वैशेषिकेण[1]।

बौद्धेनापि चित्रपटप्रतिभासस्य एकानेकरूपतामभ्युपगच्छता एकानेकरूपं वस्तु अभ्युपगतमेव। अथ प्रतिभासोऽपि एकानेकरूपो नाभ्युपगम्यते तर्हि सर्वथा प्रतिभासाभावः स्यात् इति असकृद् आवेदितम्। तत एकान्ततोऽसति कार्ये न कारणव्यापारस्तेनाभ्युपगन्तव्यः असति तत्र ३० तदभावात्। नापि सति, मृत्पिण्डे तस्य तमन्तरेणापि ततः प्रागेव निष्पन्नत्वात्। न च मृत्पिण्डे कारकव्यापारः पृथुबुध्नोदराद्याकारस्तत्फलम् अन्यत्र व्यापारे अन्यत्र फलासंभवात् स एव मृत्पिण्डः कारकव्यापारात् पृथुबुध्नोदराद्याकारतां प्रतिपद्यते इति कारकव्यापार-फलयोरैक्यविषयत्वे अनेकान्तवादसिद्धिः। तस्माद् द्रव्यास्तिक-पर्यायास्तिकाभ्यां केवलाभ्यां सहिताभ्यामन्योन्यनिरपेक्षाभ्यां व्यवस्थापितं वस्तु असत्यमिति तत्प्रतिपादकं शास्त्रं सर्वं मिथ्येति व्यवस्थितम् ॥ ५० ॥ ३५

[अन्वय–व्यतिरेकाभ्यां निरपेक्षनयद्वये मिथ्याज्ञानरूपत्वस्य दृढीकरणम्]

अमुमेवार्थमन्वय-व्यतिरेकाभ्यां दृढीकर्तुमाह—

ते उ भयणोवणीया सम्मद्दंसणमणुत्तरं होंति।
जं भवदुक्खविमोक्खं दो वि न पूरेंति पाडिक्कं ॥ ५१ ॥

तौ द्रव्य-पर्यायास्तिकनयौ भजनया परस्परस्वभावाऽविनाभूततया उपनीतौ सदसद्रूपैका- ४० त्म्यव्यवच्छेदेन तदात्मकैककार्यकारणादिवस्तुप्रतिपादकत्वेन उपयोजितौ यदा भवतस्तदा सम्यग्दर्शनमनुत्तरं–नास्ति अस्माद् अन्यद् उत्तरं प्रधानं यस्मिंस्तत् तथाभूतं–भवतः परस्पराविनिर्भाग-

1 अत्र कन्दलीगतं चित्ररूपसमर्थकं युक्तिकथनमवबोद्धव्यम्—प्रशस्त० कं० पृ० ३० पं० ३—।

धर्तिद्रव्यपर्यायात्मकैकवस्तुतत्त्वविषयरूप्यात्मकाऽबाधिताऽवबोधस्वभावत्वात्। यदा तु अन्योन्यनि-रपेक्षद्रव्य-पर्यायप्रतिपादनत्वेन उपनीतौ भवतो न तदा सम्यक्त्वं प्रतिपद्येते यस्मात् संसारमा-विजन्मादिदुःखविमोक्षमात्यन्तिकं विश्लेषं द्वावपि तौ प्रत्येकं न विधत्तः मिथ्याज्ञानात् सम्य-क्रियानङ्गतया आत्यन्तिकभवोपद्रवाभिवृत्त्यसिद्धेः तद्विपर्ययकारणत्वात् तच्चासकृत् प्राक् प्रति-
५ पादितमिति न पुनः प्रतन्यते। ततः कारणात् कार्यं कथंचिद् अन्यत् कथंचिदनन्यत् अत एव तदत-द्रूपतया 'सच्च असच्च' इति ॥ ५१ ॥

[कार्य—कारणयोर्भेदाभेदरूपत्वदर्शनेनानेकान्तरूपत्वोपपादनम्]

अमुमेव अर्थमुपसंहारद्वारेण उपदर्शयन्नाह—

नत्थि पुढवीविसिट्ठो'घडो'त्ति जं तेण जुज्जइ अणण्णो।
१० जं पुण'घडो'त्ति पुव्वं ण आसि पुढवी तओ अण्णो ॥ ५२ ॥

नास्ति सद्द्रव्यमृत्पृथिवीत्वादिभ्यो विश्लिष्टो भिन्नो घटः सदादिव्यतिरिक्तस्वभावतया तस्यानुपलम्भात्। किञ्च, यदि सत्त्वादयो धर्मा घटाद् एकान्ततो भिन्नाः सोऽपि वा तेभ्यो भिन्नः स्यात् तदा न घटस्य सदादित्वं स्यात् स्वतोऽसदादेरन्यधर्मयोगेऽपि शशशृङ्गादेरिव तत्त्वा(तथात्वा)-योगात् सदादेरपि घटाद्याकाराद् अत्यन्तमेदे निराकारतया अत्यन्ताभावस्येव उपलम्भविषयत्वायो-
१५ गाद् ज्ञेयत्व-प्रमेयत्वादिधर्माणामपि सदादिधर्मेभ्यो भेदे असत्त्वम् सदादेस्तु तेभ्यो भेदे अज्ञेयत्वाद् असत्त्वमेव "उपलम्भः सत्ता" [ ] इति वचनात्। ततः सदादिरूपतया उपलभ्यमा-नत्वाद् घटस्य तेभ्योऽभिन्नरूपताऽभ्युपगन्तव्या प्रमेयव्यवस्थितेः प्रमाणनिबन्धनत्वात्। यत् पुनः पृथुबुध्नोदराद्याकारतया पूर्वं सदादिर्न आसीत् ततोऽसौ अन्यस्तेभ्यो घटरूपतया प्राक् सदा-देरनुपलम्भात् प्रागपि तद्रूपस्य सदादौ सत्त्वे अनुपलम्भायोगात् इयाऽनुपलम्भस्य च अभावाव्य-
२० भिचारित्वात् तदतद्रूपतायां च विरोधाभावात् प्रतीयमानायां तदयोगात् अबाधितप्रत्ययस्य च मिथ्यात्वासंभवाद् बाधाविरहस्य च प्रागेव उपपादितत्वात् ॥ ५२ ॥

[सदाद्येकान्तवत् कालाद्येकान्तेऽपि मिथ्यात्वख्यापनम्]

सदाद्येकान्तवादवत् कालाद्येकान्तवादेऽपि मिथ्यात्वमेव इत्याह—

कालो सहाव णियई पुव्वकयं पुरिस कारणेगंता।
२५ मिच्छत्तं ते चेवा(व) समासओ होंति सम्मत्तं ॥ ५३ ॥

काल-स्वभाव-नियति-पूर्वकृत-पुरुषकारणरूपा एकान्ताः सर्वेऽपि एकका मिथ्या-त्वम् त एव समुदिताः परस्पराऽजहद्वृत्तयः सम्यक्त्वरूपतां प्रतिपद्यन्ते इति तात्पर्यार्थः।

१-तत्तथात्वयो-आ० हा० वि०। २-न्ताभावादस्यैव वोपल-बृ० आ० हा० वि०। ३-वादोऽपि वा० बा० मां० मां०। ४ चेव उ स-गु० मू० मु० मू०।

५ श्वेताश्वतरोपनिषदि ब्रह्मकारणताप्रश्नविचारे काल-स्वभावादीनामपि कारणता चर्चिता निरस्ता च विद्यते। तद्यथा—
"ॐ ब्रह्मवादिनो वदन्ति—

किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठाः।
अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥
काल-स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्।
संयोग एषां न त्वात्मभावादात्माप्यनीशः सुख-दुःखहेतोः" ॥—१-२ इत्यादि–। अ० १।

माठरेण सांख्यकारिकावृत्तौ, क्रियाऽक्रियावादादिमतं विवेचयता शीलाङ्केन सूत्रकृताङ्गसूत्रटीकायाम् हरिभद्रेण शास्त्र-वार्तासमुच्चये च काल-स्वभावादिवादा भङ्ग्यन्तरेण उपन्यस्ता निरस्ताश्च विद्यन्ते। तद्यथा—

का० ६१ पृ० ७५-७६। समवस० अ० १२ पृ० २१० प्र०—२११ प्र०। शास्त्रवा० समु० स्तब० २ श्लो० ५२-८१ पृ० ७९-८९।

क्रियाऽक्रियावादादिस्वरूपं निरूपयन् गुणरत्नः षड्दर्शनसमुच्चयबृहट्टीकायां काल-स्वभावादिवादानां स्वरूपमात्रं प्ररूपि-तवान्। तत्र-पृ० १० पं० १५—पृ० १६ पं० ५।

[कालैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

तत्र काल एव एकान्तेन जगतः कारणमिति कालवादिनः प्राहुः । तथाहि—सर्वस्य शीतोष्ण-वर्ष-वनस्पति-पुरुषादेर्जगतः प्रभव-स्थिति-विनाशेषु ग्रहोपरागयुतियुद्धोदयास्तमयगतिगमनागमनादौ च कालः कारणम् तमन्तरेण सर्वस्यास्याऽन्यकारणत्वाभिमतभावसद्भावेऽप्यभावात् तत्सद्भावे च भावात् । तदुक्तम्— ५

"कालः पचति भूतानि कालः संहरति प्रजाः ।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः" ॥

[महाभा० आदिप० अ० १ श्लो० २७३,२७५],

असदेतत्; तत्कालसद्भावेऽपि वृष्ट्यादेः कदाचिददर्शनात् । न च तदभवनमपि तद्विशेषकृतमेव, नित्यैकरूपतया तस्य विशेषाभावात् । विशेषे वा तज्जननाऽजननस्वभावतया तस्य नित्यत्वव्य-१० तिक्रमात् स्वभावभेदाद् भेदसिद्धेः । न च ग्रहमण्डलादिकृतो वर्षादेर्विशेषः तस्यापि अहेतुकतयाऽभावात् । न च काल एव तस्य हेतुः इतरेतराश्रयदोषप्रसक्तेः—सति कालभेदे वर्षादिभेदहेतोर्ग्रहमण्डलादेर्भेदः तद्भेदाच्च कालभेद इति परिस्फुटमितरेतराश्रयत्वम् । अन्यतः कारणाद् वर्षादिभेदे न 'काल एव एकः कारणं भवेत्' इत्यभ्युपगमविरोधः । कालस्य च कुतश्चिद् भेदाभ्युपगमे अनित्यत्वमित्युक्तम् । तत्र च प्रभव-स्थिति-विनाशेषु यद्यपरः कालः कारणम्, तदा तत्रापि स एव पर्यनुयोग १५ इत्यनवस्थानान्न वर्षादिकार्योत्पत्तिः स्यात् । न चैकस्य कारणत्वं युक्तम् क्रम-यौगपद्याभ्यां तद्विरोधात् । तन्न काल एव एकः कारणं जगतः ।

[स्वभावैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

अपरे तु 'स्वभावत एव भावा जायन्ते' इति वर्णयन्ति । अत्र यदि 'स्वभावकारणा भावाः' इति तेषामभ्युपगमस्तदा स्वात्मनि क्रियाविरोधो दोषः न हि अनुत्पन्नानां तेषां स्वभावः समस्ति उत्पन्नानां २० तु स्वभावसंगतावपि प्राक् स्वभावाभावेऽपि उत्पत्तेर्निर्वृत्तत्वान्न स्वभावस्तत्र कारणं भवेत् । अथ कारणमन्तरेण भावा भवन्ति स्व-परकारणनिमित्तजन्मनिरपेक्षतया सर्वहेतुनिराशंसस्वभावा भावाः । तथा चात्र स्वभाववादिभिर्युक्तिः प्रदर्श्यते—यद् अनुपलभ्यमानसत्ताकं तत् प्रेक्षावतामसद्व्यवहारविषयः, यथा शशशृङ्गम्, अनुपलभ्यमानसत्ताकं च भावानां कारणमिति स्वभावानुपलब्धिः । न च अयमसिद्धो हेतुः कण्टकादितैक्ष्ण्यादेर्निमित्तभूतस्य कस्यचिद् अध्यक्षादिना असंवेदनात् । तदुक्तम्—२५

---

१ अत्र ग्रहीयविविधदशायाः प्रस्तुतत्वेन उपराग–युति–युद्धादयः सर्वेऽपि शब्दा ग्रहेण योज्याः तदर्थश्च सूर्यसिद्धान्तादिज्योतिषग्रन्थेभ्योऽवसेयः ।

२–मयगमन–वृ० आ० हा० वि० । ३–त् न तत्स–वृ० आ० हा० वि० । ४ महाभारते कालमाहात्म्यमित्थं वर्णितं विद्यते—

"विधातृविहितं मार्गं न कश्चिदतिवर्तते । कालमूलमिदं सर्वं भावाभावौ सुखासुखे ॥
कालः सृजति भूतानि कालः संहरते प्रजाः । संहरन्तं प्रजाः कालं कालः शमयते पुनः ॥
कालो विकुरुते भावान् सर्वाल्लोके शुभाशुभान् । कालः संक्षिपते सर्वाः प्रजा विसृजते पुनः ॥
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः । कालः सर्वेषु भूतेषु चरत्यविधृतः समः ॥
अतीताऽनागता भावा ये च वर्तन्ति साम्प्रतम् । तान् कालनिर्मितान् बुद्ध्वा न संज्ञां हातुमर्हसि" ॥

—महाभा० आदिप० अ० १ श्लो० २७२–२७६ ।

५ सांख्यकारिकावृत्तौ, शास्त्रवार्तासमुच्चये षड्दर्शनसमुच्चयबृहट्टीकायां च अयमीदृश एव श्लोको वर्तते–पृ० ७६ । पृ० ८० श्लो० ५४ । पृ० ११ पं० १२–१३ ।

६ स्वभाववादनिरूपण–तन्निरसनपरा प्रस्तुता टीका तत्त्वसंग्रहीयस्वाभाविकवादपरीक्षयाऽक्षरशः साम्यं भजते । तथाहि–
"सर्वहेतुनिराशंसं भावानां जन्म वर्ण्यते । स्वभाववादिभिस्ते हि नाहुः स्वमपि कारणम्" ॥

—तत्त्वसं० का० ११० पृ० ६२ ।

७–दा स्यादात्म–मां० मां० । "ते स्वक्रियाया विरोधत इत्यादिना निरस्ताः"–तत्त्वसं० पञ्जि० पृ० ६२ पं० ९ ।

८ "राजीवकेसरादीनां वैचित्र्यं कः करोति हि । मयूरचन्द्रकादिर्वा विचित्रः केन निर्मितः" ॥

—तत्त्वसं० का० १११ पृ० ६२ ।

"कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां वा ।
स्वभावतः सर्वमिदं प्रवृत्तं न कामचारोऽस्ति कुतः प्रयत्नः ?" ॥ [ ]

अथापि स्यात् भवतु बाह्यानां भावानां कारणानुपलब्धेरहेतुकत्वम् आध्यात्मिकानां तु कुतो निर्हेतुकत्वसिद्धिः ? असदेतत्; यतो यदि नाम दुःखादीनामध्यक्षतो निर्हेतुकत्वमसिद्धं तथापि अनुमानतस्तत् तेषां सिद्धमेव । तथाहि—यत् कादाचित्कं तद् निर्हेतुकम्, यथा कण्टकादेस्तैक्ष्ण्यम्, कादाचित्कं च सुखादिकमिति स्वभावहेतुः । न च यस्य भावाभावयोर्नियमेन यस्य भावाभावौ तत् तस्य कारणम्, व्यभिचारात् । तथाहि—स्पर्शसद्भाव एव चक्षुर्विज्ञानम् तदभावे न तत् कदाचित्, न च स्पर्शः तत्कारणम् । तन्नैतत् कारणभावलक्षणम् व्यभिचारित्वात् । अतः सर्वहेतुनिराशंसं जन्म भावानामिति सिद्धम्,

असदेतत्; कण्टकादितैक्ष्ण्यादेरपि निर्हेतुकत्वासिद्धेः । तथाहि—अध्यक्षाऽनुपलम्भाभ्यामन्वय-व्यतिरेकतो बीजादिकं तत्कारणत्वेन निश्चितमेव । यस्य हि यस्मिन् सत्येव यस्य भावः यस्य च विकाराद् यस्य विकारः तत् तस्य कारणमुच्यते । उत्सूनादिविशिष्टावस्थाप्राप्तं च बीजं कण्टकादितैक्ष्ण्यादेरन्वय-व्यतिरेकवत् अध्यक्षाऽनुपलम्भाभ्यां कारणतया निश्चितमिति 'अनुपलभ्यमानसत्ताकं च कारणम्' इति असिद्धो हेतुः । यदपि 'कार्यकारणभावलक्षणं व्यभिचारि' इत्युक्तम्, तदपि असिद्धम्; स्पर्शस्यापि रूपहेतुतया चक्षुर्विज्ञाने निमित्ततया इष्टत्वात् तमन्तरेण रूपस्यैव विशिष्टावस्थस्यासंभवात् । न च व्यतिरेकमात्रं कार्यकारणभावनिबन्धनत्वेन अभ्युपगम्यते तद्वादिभिः किन्तु तद्विशेष एव । तथाहि—समर्थेषु सत्सु येषु कार्यं भवद् उपलब्धम् तेषां मध्ये अन्यतमस्यापि अभावे तद् अभवत् तत्कारणं तद् इति व्यवस्थाप्यते न तु यस्याभावे यन्न भवतीति व्यतिरेकमात्रतः; अन्यथा मातृविवाहोचितपारशीकदेशप्रभवस्य पिण्डखर्जूरस्य तद्विवाहाभावे अभावाद् अव्यभिचारः स्यात् । न चैवंभूतस्य व्यतिरेकस्य स्पर्शेन व्यभिचारः न हि रूपादिसंनिधानमुपदर्श्य स्पर्शस्य एकस्याभावात् चक्षुर्विज्ञानं न भवतीति शक्यं दर्शयितुमिति कुतो व्यभिचारः कार्यकारणभावलक्षणस्य ? नै

---

१ अयं श्लोकः शास्त्रवा० स्याद्वादक० टीकायाम् षड्द० बृ० टीकायां च विद्यते-पृ० ८३ प्र० । पृ० १३ ।
माठरवृत्तौ तु—

"येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः । मयूराश्चित्रिता येन स नो वृत्तिं विधास्यति" ॥

इति भावार्थकः श्लोको वर्तते-पृ० ७५ ।

२ "यथैव कण्टकादीनां तैक्ष्ण्यादिकमहेतुकम् । कादाचित्कतया तद्वद् दुःखादीनामहेतुता" ॥

—तत्त्वसं० का० ११२ पृ० ६२ ।

बोधिचर्यावतारपञ्जिकायां तत्त्वसंग्रहीयकारिकाभिरेव स्वभाववादः स्थापितः निरस्तश्च प्रकारान्तरेण-परि० ९ पृ० ५४१ । धर्मसंग्रहण्यां तु केवलं स्वभाववादस्थापनं तन्निरसनं चोभयमन्यया भङ्ग्या वर्णितं विद्यते । तथाहि तदाद्यान्त्यभागौ—

"किन्न सहावो त्ति मई भावो वा होज्ज जं अभावो वा । जइ भावो किं चित्तो किं वा सो एगरूवो त्ति ॥ × × ×
एवं नियइ जइच्छा कालो दिव्वं पधाणमादी वि । सव्वे वि असव्वाया एगंतेणं मुणेयव्वा" ॥

—धर्मसं० गा० ५४९-५६६ पृ० २११-२१६ ।

३ "सरोजकेसरादीनामन्वयव्यतिरेकवत् । अवस्थातिशयाक्रान्तं बीजपङ्कजलादिकम् ॥
प्रत्यक्षानुपलम्भाभ्यां निश्चितं कारणं यदा । किमित्यन्यस्तदा हेतुरमीषां परिपृच्छयते ॥

—तत्त्वसं० का० ११३-११४ पृ० ६३ ।

४ अत्र वाक्ये द्वयोः 'यस्य' पदयोः निष्प्रयोजनकत्वेन 'यस्य हि यस्मिन् सत्येव भावः' इत्येव पाठः समीचीनः संभाव्यते । "तथाहि-यस्मिन् सत्येव यस्य जन्म भवति यस्य च विकाराद् यस्य विकारस्तत् तस्य कारणमुच्यते । तच्चैवंभूतं बीजादिकमुच्छूनादिविशिष्टावस्थाप्राप्तं राजीवकेसरादीनामन्वयव्यतिरेकवत्"—तत्त्वसं० पञ्जि० पृ० ६३ पं० १५ ।

५-पश्यैवं वि-बृ० । "स्पर्शस्यापि रूपहेतुतया चक्षुर्विज्ञानेऽपि निमित्तभावस्येष्टत्वात् । तथाहि—स्पर्श इति भूतान्युच्यन्ते । तानि चोपादायोपादाय रूपं वर्तते ततश्चक्षुर्विज्ञानं प्रति स्पर्शस्य निमित्तभावोऽस्त्येव केवलं साक्षात्पारंपर्यकृतो विशेषः"—तत्त्वसं० पञ्जि० पृ० ६३ पं० १९ ।

६ "नियतौ देश-कालौ च भावानां भवतः कथम् । यदि तद्धेतुता नैषां स्युस्ते सर्वत्र-सर्वदा ॥
क्वचित् कदाचित् कस्मिंश्चित् भवन्तो नियताः पुनः । तत्सापेक्षा भवन्त्येते तदन्यपरिहारतः" ॥

—तत्त्वसं० का० ११५-११६ पृ० ६४ ।

केवलं बीजादिः कारणत्वेन भावानां निश्चितः किन्तु देश-कालादिरपि । तथाहि—यदि प्रतिनियत-देश-कालहेतुता कण्टकादेस्तैक्ष्ण्यादेर्न स्यात् तदा येयमतद्देश-कालपरिहारेण प्रतिनियतदेश-कालता तेषामुपलम्भगोचरचारिणी सा न स्यात् तन्निरपेक्षत्वात् तद्वद् अन्यदेशकाला अपि ते भवेयुः न चैवम् अतः प्रतिनियतदेशादौ वर्तमानास्तदपेक्षास्त इति सिद्धम् तथा च तत्कार्या अपेक्षालक्षणत्वात् तत्कार्यत्वस्य नियतदेशतया च तेषां वृत्तिरध्यक्षत एव सिद्धेति कथं न तत्कार्यतावगतिः? यदपि ५ 'कादाचित्कत्वात्' इति साधनम्, तदपि विरुद्धम्; साध्यविपर्ययसाधनाद् अहेतोः कादाचित्कत्वानुपपत्तेः। साध्यविकलश्च दृष्टान्तः अहेतुकत्वस्य तत्राप्यभावात्। एवमनुपलभ्यमानसत्ताकं भावानां कारणमिति हेतोरसिद्धता प्रतिज्ञायाश्च प्रत्यक्षविरोधो व्यवस्थितः । सिद्धत्वेऽपि चास्य हेतोरनैकान्तिकत्वम्। तथाहि—यदि अनुपलम्भमात्रं हेतुत्वेन उपादीयते तदा प्रमाणाभावात् कारण-सत्ताभावासिद्धेः कथं नानैकान्तिकता? तथाहि—कारणम् व्यापकं वा निवर्तमानं कार्यम् व्याप्यं वा १० आदाय निवर्तते। न च प्रमाणमर्थसत्ताया व्यापकं वृक्षत्ववत् शिंशपायाः अभिन्नस्यैव व्यापकत्वात्। न च प्रमाण-प्रमेययोरभेदः भिन्नप्रतिभासविषयत्वात्। नापि प्रमाणं कारणमर्थस्य व्यभिचारात् देश-कालादिविप्रकृष्टानां भावानां प्रमाणाविषयीकरणेऽपि सत्ताऽविरोधात् । न च यदन्तरेणापि यद् भवति तत् तस्य कारणम् अतिप्रसङ्गात् कारणत्वाभ्युपगमे स्वाभ्युपगमव्याघातात्। न च प्रमाणात् प्रमेयप्रभवः अपि तु प्रमेयात् प्रमाणस्य अन्यथा तेन तद्ग्रहणाऽयोगात्। न च प्रमाणमप्रतिबद्धमपि १५ अर्थसत्तानिवर्तकम् अतिप्रसङ्गात्—गोनिवृत्तौ अश्वनिवृत्तिप्रसक्तेः। किञ्च, अनुपलब्धिर्हेतुत्वेन उपादीयमाना स्वोपलम्भनिवृत्तिरूपा वा उपादीयेत, सर्वपुरुषोपलम्भनिवृत्तिस्वभावा वा? तत्र न तावद् आद्यः पक्षः खल-बिलाद्यन्तर्गतस्य बीजादेः स्वोपलम्भनिवृत्तावपि सत्ताअनिवृत्तेर्हेतोरनैकान्तिकत्वात्। अथ द्वितीयः पक्षः सोऽपि न युक्तः; हेतोरसिद्धेः न हि मयूरचन्द्रकादेः सर्वपुरुषैरदृष्टं कारणं नोपलभ्यते इत्यर्वाग्दशा निश्चेतुं शक्यम्। किञ्च, 'निर्हेतुका भावाः' इत्यत्र हेतुरुपादीयते, आहो-२० स्वित् नेति? यदि नोपादीयते तदा न स्वपक्षसिद्धिः प्रमाणमन्तरेण तस्या अयोगात्। अथ हेतुरुपादीयते तदा स्वाभ्युपगमविरोधः प्रमाणजन्यतया स्वपक्षसिद्धेरभ्युपगमात्। तदुक्तम्—

"न हेतुरस्तीति वदन् सहेतुकं ननु प्रतिज्ञां स्वयमेव बाधते।

---

१ "तदपेक्षा तथावृत्तिरपेक्षा कार्यतोच्यते। प्रत्यक्षा च तथा वृत्तिः सिद्धास्तेनेह हेतवः" ॥
—तत्त्वसं॰ का॰ ११७ पृ॰ ६४।

-कार्यापे-बृ॰ आ॰ हा॰ वि॰। "तदन्यदेशादिपरिहारेण नियते देशादौ या वृत्तिरियमेवापेक्षेत्युच्यते न त्वभिप्रायात्मिका। स्यादेतद् यदि नाम तदपेक्षा तेषाम् तथापि तत्कार्यता कथमवसितेत्याह—अपेक्षा कार्यतोच्यत इति"
—तत्त्वसं॰ पञ्जि॰ पृ॰ ६४ पं॰ १७।

२-षामवृ—भां॰ मां॰ विना।

३ "तत्स्वाभाविकवादोऽयं प्रत्यक्षेण प्रबाध्यते। प्रत्यक्षानुपलम्भाभ्यां हेतुरूपस्य निश्चयात्" ॥
—तत्त्वसं॰ का॰ ११८ पृ॰ ६४।

४ "मा वा प्रमाणसत्ता भूद्धेतुसद्भावसिद्धये। तथापि मानाभावेन नैवार्थासत्त्वनिश्चयः" ॥
—तत्त्वसं॰ का॰ ११९ पृ॰ ६५।

५ "यस्मादर्थस्य सत्ताया व्यापकं न च कारणम्। प्रमाणं भेदसद्भावाद्व्यभिचारात् तदुद्भवात्" ॥
—तत्त्वसं॰ का॰ १२० पृ॰ ६५।

६ यमन्त-बृ॰ आ॰ हा॰ वि॰। ७ "कारणत्वाभ्युपगमे वा"—तत्त्वसं॰ पञ्जि॰ पृ॰ ६५ पं॰ १५।

८ "यश्च नैवंविधो भावस्तस्य नैव निवृत्तितः। ऐकान्तिकमसंबन्धाद् गम्यतेऽन्यनिवर्तनम्" ॥
—तत्त्वसं॰ का॰ १२१ पृ॰ ६५।

९ "सर्वा दृष्टिश्च संदिग्धा स्वा दृष्टिर्व्यभिचारिणी। विन्ध्याद्रिरन्ध्रदूर्वादेरदृष्टावपि सत्त्वतः" ॥
—तत्त्वसं॰ का॰ १२२ पृ॰ ६५।

१० धुस्तूरे तमाले च खलशब्दः बिलस्तु वेतसवृक्षे—वैद्यक॰ सिं॰।

११ "अहेतुकत्वसिद्ध्यर्थं न चेद्धेतुः प्रयुज्यते। न चाप्रमाणिकी सिद्धिरतः पक्षो न सिद्ध्यति ॥
तत्सिद्धये च हेतुश्चेत् प्रयुज्येत तथापि न। सिद्धेस्तद्धेतुजन्यत्वात् पक्षस्ते संप्रसिद्ध्यति" ॥
—तत्त्वसं॰ का॰ १२३-१२४ पृ॰ ६६।

१२ तत्त्वसं॰ पञ्जिकायाम् "तथा चोक्तमाचार्यसूरिपादैः" इति निर्दिश्य पद्यमिदमुपनिबद्धम् तत्र च "स्वयमेव सादयेत्" इति पाठो मुद्रितः—पृ॰ ६६ पं॰ १४।

अथापि हेतुप्रणयालसो भवेत् प्रतिज्ञया केवलयाऽस्य किं भवेत् ?" ॥
[ ] इति।

न च ज्ञापकहेतूपन्यासेऽपि कारकहेतुप्रतिक्षेपवादिनो न स्वपक्षबाधा इति वक्तव्यम् यतो लिंङ्गं तत्प्रतिपादकं वा वचो यदि पक्षसिद्धेरुत्पादकं न भवेत् कथं तस्य ज्ञापकहेतुता स्यात् अन्यथा सर्वस्य
५ सर्वं प्रति ज्ञापकता प्रसज्येत। न चैवं कारक-ज्ञापकहेत्वोरविशेषः साध्यानुत्पादकस्य ज्ञापकहेतुत्वात् तदुत्पादकस्य तु कारकहेतुशब्दवाच्यत्वात् अनुमानबाधितत्वं च प्रतिज्ञायाः स्पष्टमेव। तथाहि—प्रतिनियतभावसंनिधौ ये प्रतिनियतजन्मानस्ते सहेतुकाः यथा भवत्प्रयुक्तसाधनसंनिधिभावि तत्साध्यार्थज्ञानम् तथा च मयूरचन्द्रकादयो भावाः इति स्वभावहेतुः। तन्न स्वभावैकान्तवादाभ्युपगमो युक्तिसंगतः।

१० [नियत्येककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

सर्वस्य वस्तुनस्तथातथानियतरूपेण भवनाद् नियतिरेव कारणमिति केचित्। तथाहि—तीक्ष्णशस्त्राद्युपहता अपि तथामरणनियतताऽभावे जीवन्त एव दृश्यन्ते नियते च मरणकाले शस्त्रादिघातमन्तरेणापि मृत्युभाज उपलभ्यन्ते, न च नियतिमन्तरेण स्वभावः कालो वा कश्चिद् हेतुः यतः कण्टकादयोऽपि नियत्यैव तीक्ष्णादितया नियताः समुपजायन्ते न कुण्ठादितया कालोऽपि
१५ शीतादेर्भावस्य तथानियततयैव तदा तदा तत्र तत्र तथा तथा निर्वर्तकम्(कः)। तथा चोक्तम्—

"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः सोऽवश्यं भवति नृणां शुभोऽशुभो वा।
भूतानां महति कृतेऽपि हि प्रयत्ने नाऽभाव्यं भवति न भाविनोऽस्ति नाशः" ॥ [ ] इत्यादि।

असदेतत्; शास्त्रोपदेशवैयर्थ्यप्रसक्तेः तदुपदेशमन्तरेणापि अर्थेषु नियतिकृतत्वबुद्धेर्नियत्यैव भावाद् दृष्टादृष्टफलशास्त्रप्रतिपादितशुभाशुभक्रियाफलनियमाभावश्च। अथ तथैव नियतिः कारणमिति
२० नायं दोषः, न; नियतेरेकस्वभावत्वाभ्युपगमे विसंवादाऽविसंवादादिभेदाभावप्रसक्तेः अनियमेन नियतेः कारणत्वाद् अयमदोष इति चेत्, न; अनियमे कारणाभावान्न नियतिरेव कारणम् नियतेर्नित्यत्वे कारकत्वायोगात् अनित्यत्वेऽपि तदयोग एव। किञ्च, नियतेरनित्यत्वे कार्यत्वम् कार्यं च कारणादुत्पत्तिमदिति तदुत्पत्तौ कारणं वाच्यम्। न च नियतिरेव कारणम् तत्रापि पूर्ववत् पर्यनुयोगानिवृत्तेः। न च नियतिरात्मानमुत्पादयितुं समर्था स्वात्मनि क्रियाविरोधात्। न च काला-
२५ दिकं नियतेः कारणम् तस्य निषिद्धत्वात्। न च अहेतुका सा युक्ता नियतरूपताऽनुपपत्तेः। न च स्वतोऽनियता अन्यभावनियतत्वकारणम् शशशृङ्गादेस्तद्रूपतानुपलम्भात्। तन्न नियतिरपि प्रतिनियतभावोत्पत्तिहेतुः।

[कर्मैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

जन्मान्तरोपात्तमिष्टाऽनिष्टफलदं कर्म सर्वजगद्वैचित्र्यकारणमिति कर्मवादिनः। तथा चाहुः—
३० "यथा यथा पूर्वकृतस्य कर्मणः फलं निधानस्थमिवाऽवतिष्ठते।
तथा तथा तत्प्रतिपादनोद्यता प्रदीपहस्तेव मतिः प्रवर्तते" ॥ [ ]

---

१ "तथाहि ज्ञापको हेतुर्वचो वा तत्प्रकाशकम्। सिद्धेर्निमित्ततां गच्छन् साध्यज्ञापकमुच्यते" ॥
—तत्त्वसं० का० १२५ पृ० ६६।

२ "अतः कारक एवायं ज्ञापको हेतुरुच्यते। साध्यानुत्पादकत्वात् तु कारको न प्रकाश्यते" ॥
—तत्त्वसं० का० १२६ पृ० ६६।

३ "तस्मात् सहेतवोऽन्येऽपि भावा नियतजन्मतः। साध्यार्थविषयं यद्वज्ज्ञानं साधनभावि ते" ॥
—तत्त्वसं० का० १२७ पृ० ६७।

४-नस्तथानि-वृ० आ० हा० वि०। ५ नियतिवादस्य प्ररूपको मस्करी गोशालक इति जैनागमानामभिप्रायः। गोशालकचरितं च भगवतीसूत्रीयपञ्चदशशतकादवसेयमत्र।

६-दा तत्र तथा आ० भां०। ७ अयं श्लोकः शास्त्रवा० स्याद्वादक० टीकायामुद्धृतो वर्तते-पृ० ८३ द्वि०।
८ शास्त्रवा० स्याद्वादक० पृ० ८५ प्र० पं० ५।

तथा च—

"स्वकर्मणा युक्त एव सर्वो ह्युत्पद्यते नरः ।
स तथाऽऽकृष्यते तेन न यथा स्वयमिच्छति" ॥ [ ]

तथाहि—समानमीहमानानां समानदेश-काल-कुलाऽऽकारादिमतामर्थप्राप्त्यप्राप्ती नाऽनिमित्ते युक्ते अनिमित्तस्य देशादिप्रतिनियमायोगात् । न च परिदृश्यमानकारणप्रभवे तस्य समानतयोपल-५ म्भात् न चैकरूपात् कारणात् कार्यभेदः तस्याहेतुकत्वप्रसक्तेः अहेतुकत्वे च तस्य कार्यस्यापि तद्रूपतापत्तेः भेदाऽभेदव्यतिरिक्तस्य तस्यासत्त्वात् । ततो यन्निमित्ते एते तद् दृष्टकारणव्यतिरिक्तमदृष्टं कारणं कर्म इति,

असदेतत्; कुलालादेर्घटादिकारणत्वेनाध्यक्षतः प्रतीयमानस्य परिहारेणापराऽदृष्टकारणप्रकल्पनायां तत्परिहारेणापराऽपराऽदृष्टकारणकल्पनयाऽनवस्थाप्रसक्ततः क्वचिदपि कारणप्रतिनियमाऽनुप-१० पत्तेः । न च स्वतन्त्रं कर्म जगद्वैचित्र्यकारणमुपपद्यते तस्य कर्त्रधीनत्वात् । न चैकस्वभावात् ततो जगद्वैचित्र्यमुपपत्तिमत् कारणवैचित्र्यमन्तरेण कार्यवैचित्र्यायोगात् वैचित्र्ये वा तदेककार्यताप्रच्युतेः अनेकस्वभावत्वे च कर्मणः नाममात्रनिबन्धनैव विप्रतिपत्तिः पुरुष-काल-स्वभावादेरपि जगद्वैचित्र्यकारणत्वेन अर्थतोऽभ्युपगमात् । न च तेन चेतनवताऽनधिष्ठितमचेतनत्वाद् वास्यादिवत् कर्म प्रवर्तते । अथ तदधिष्ठायकः पुरुषोऽभ्युपगम्यते न तर्हि कर्मैकान्तवादः पुरुषस्यापि तदधिष्ठायक-१५ त्वेन जगद्वैचित्र्यकारणत्वोपपत्तेः । न च केवलं किञ्चिद् वस्तु नित्यमनित्यं वा कार्यकृत् संभवतीति असकृत् प्रतिपादितम् । तन्न कर्मैकान्तवादोऽपि युक्तिसंगतः ।

[पुरुषैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

अन्यस्त्वाह—"पुरुष एवैकः सकललोकस्थिति-सर्ग-प्रलयहेतुः प्रलयेऽपि अलुप्तज्ञानातिशयशक्तिः" [ ] इति । तथा चोक्तम्— २०

"ऊर्णनाभ इवांऽशूनां चन्द्रकान्त इवाऽम्भसाम् ।
प्ररोहाणामिव प्लक्षः स हेतुः सर्वजन्मिनाम्" ॥ [ ] इति ।

तथा, "पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्" [ ] इत्यादि । ऊर्णनाभोऽत्र मर्कटको व्याख्यातः । अत्र सकललोकस्थिति-सर्ग-प्रलयहेतुता ईश्वरस्येव पुरुषवादिभिः पुरुषस्य इष्टा । विशेषस्तु समवाय्यपरकारणसव्यपेक्ष ईश्वरो जगद् निर्वर्तयति अयं तु केवल एव । २५ अस्य च ईश्वरस्येव जगद्धेतुता असंगता । तथाहि—

"पुरुषो जन्मिनां हेतुर्नोत्पत्तिविकलत्वतः ।
गगनाम्भोजवत् सर्वमन्यथा युगपद् भवेत्" ॥ [ ]

किञ्च, प्रेक्षापूर्वकारिप्रवृत्तिः प्रयोजनवत्तया व्याप्तेति किं प्रयोजनमुद्दिश्य अयं जगत्करणे प्रवर्तते ?

---

१ "दैवादेवार्थसिद्धिश्चेद् दैवं पौरुषतः कथम् । दैवतश्चेदनिर्मोक्षः पौरुषं निष्फलं भवेत्" ॥ इत्यादिर्दैवविचारोऽत्रानुसंधेयः—आप्तमी० परि० ८ श्लो० ८८—।

२ "अन्ये त्वीशसधर्माणं पुरुषं लोककारणम् । कल्पयन्ति दुराख्यातसिद्धान्तानुगबुद्धयः ॥
समस्तवस्तुप्रलयेऽप्यलुप्तज्ञानशक्तिमान् । ऊर्णनाभ इवांऽशूनां स हेतुः किल जन्मिनाम्" ॥
—तत्त्वसं० का० १५३–१५४ पृ० ७५–७६ ।

३ अयं भावो भङ्ग्यन्तरेण बृहदारण्यकाद्युपनिषत्सु वर्णितः—बृहदा० उ० २-१-२० । श्वेताश्वत० उ० ६-१० । ब्रह्मोप० पृ० १५२ पं० ५ । तत्त्वसं० पञ्जि० पृ० ७६ पं० ४ । ४ पृ० २७३ पं० १३ टि० १० ।

५–त्र कर्मटको वा० बा० । "ऊर्णनाभो मर्कटकः"—तत्त्वसं० पञ्जि० पृ० ७६ पं० १० ।

६ "अस्यापीश्वरवत् सर्वं वचनीयं निषेधनम् । किमर्थं च करोत्येष व्यापारमिममीदृशम्" ॥
—तत्त्वसं० का० १५५ पृ० ७६ ।

७ तत्त्वसं० पञ्जि० पृ० ७६ पं० १४ ।

८ "यद्यन्येन प्रयुक्तत्वान्न स्यादस्य स्वतन्त्रता । अथानुकम्पया कुर्यादेकान्तसुखितं जगत् ॥
आधिदारिद्र्यशोकादिविविधायासपीडितम् । जनं तु सृजतस्तस्य कानुकम्पा प्रतीयते" ॥
—तत्त्वसं० का० १५६–१५७ पृ० ७६ ।

नेश्वरादिप्रेरणात् अस्वातन्त्र्यप्रसक्तेः । न परानुग्रहार्थमनुकम्पया दुःखितसत्त्वनिर्वर्तनानुपपत्तेः । न तत्कर्मप्रक्षयार्थं दुःखितसत्त्वनिर्माणे प्रवृत्तिः तत्कर्मणोऽपि तत्कृतत्वेन तत्प्रक्षयार्थं तन्निर्माणप्रवृत्तौ अप्रेक्षापूर्वकारितापत्तेः । न च प्राक् सृष्टेः अनुकम्पनीयसत्त्वसद्भाव इति निरालम्बनाया अनुकम्पाया अयोगात् नातोऽपि जगत्करणे प्रवृत्तिर्युक्ता । न च अनुकम्पातः प्रवृत्तौ सुखिसत्त्व-
५ प्रक्षयार्थं प्रवृत्तिर्युक्तेति देवादीनां प्रलयानुपपत्तिर्भवेत् । न च समर्थस्य दुःखकारणमधर्मादिकमपेक्ष्य कृपालोर्दुःखितसत्त्वनिर्वर्तनं युक्तम् कृपापरतन्त्रतया दुःखप्रदे कर्मण्यवधा(धी)रणोपपत्तेः न हि कृपालवः परदुःखहेतुत्वमेव इच्छन्ति परदुःखवियोगेच्छयैव तेषां सर्वदा प्रवृत्तेः । न च क्रीडया अपि तत्र तस्य प्रवृत्तिर्युक्ता क्रीडोत्पादेऽपि जगदुत्पादापेक्षया तस्यास्वातन्त्र्योपपत्तेः जगदुत्पत्ति-स्थिति-प्रलयात्मकस्य विचित्रक्रीडोपायस्य तदुत्पत्तौ अपेक्षणात् । यदि विचित्र-
१० क्रीडोपायोत्पादने तस्य प्रागेव शक्तिः तदा युगपद् अशेषजगदुत्पत्ति-स्थिति-प्रलयान् विदध्यात् । अथ आदौ न तत्र शक्तिस्तदा अशक्तावस्थाया अविशिष्टत्वात् क्रमेणापि न तान् विदध्यात् एकत्र एकस्य शक्ताऽशक्तत्वलक्षणविरुद्धधर्मद्वयायोगात् । अयं च दोष ईश्वरवादिनामपि समान इति । "परानुग्रहार्थमीश्वरः प्रवर्तते यथा कश्चित् कृतार्थो मुनिरात्महिताऽहितप्राप्ति-परिहारार्थासंभवेऽपि परहितार्थमुपदेशादिकं करोति तथा ईश्वरोऽपि आत्मीयामैश्वर्यविभूतिं विख्याप्य
१५ प्राणिनोऽनुग्रहीष्यन् प्रवर्तत इति अथवा शक्तिस्वाभाव्यात् यथा कालस्य वसन्तादीनां पर्यायेण अभिव्यक्तौ स्थावर-जङ्गमविकारोत्पत्तिः स्वभावतः तथैव ईश्वरस्यापि आविर्भावाऽनुग्रह-संहारशक्तीनां पर्यायेण अभिव्यक्तौ प्राणिनामुत्पत्ति-स्थिति-प्रलयहेतुत्वम्"-[ ] इति यदुक्तं प्रशस्तमतिना तदपि प्रतिक्षिप्तं द्रष्टव्यम् । तथाहि—यदि असौ अनुग्रहप्रवृत्तस्तदा सर्वमेकान्तसुखिनं प्राणिगणं विदध्यात् इत्युक्तम् । शक्तिस्वाभाव्यात् करणे उत्पत्ति-स्थित्युपसंहारान्
२० जगतो युगपत् कुर्यात् इत्यादिकमपि उक्तमेव दूषणम् । तथा चाह—

"सर्ग-स्थित्युपसंहारान् युगपद् व्यक्तशक्तितः ।
युगपच्च जगत् कुर्यात् नो चेत् सोऽव्यक्तशक्तिकः" ॥

---

१ "सृष्टेः प्रागनुकम्पा(म्प्या)नामसत्त्वे नोपपद्यते । अनुकम्पाऽपि सद्योगाद्धाताऽयं परिकल्प्यते" ॥
—तत्त्वसं० का० १५८ पृ० ७६ ।

२ "न चायं प्रलयं कुर्यात् सदाऽभ्युदययोगिनाम् । तददृष्टव्यपेक्षायां स्वातन्त्र्यमवहीयते" ॥
—तत्त्वसं० का० १५९ पृ० ७७ ।

३ "पीडाहेतुमदृष्टं च किमर्थं स व्यपेक्षते । उपेक्षैव पुनस्तत्र दयायोगेऽस्य युज्यते" ॥
—तत्त्वसं० का० १६० पृ० ७७ ।

४ "किन्त्ववधीरणमेव तत्र तस्य कृपापरतन्त्रतया युक्तं कर्तुम्"—तत्त्वसं० पञ्जि० पृ० ७७ पं० १४ ।

५ "क्रीडार्था तस्य वृत्तिश्चेत् क्रीडायां न प्रभुर्भवेत् । विचित्रक्रीडनोपायव्यपेक्षातः शिशुर्यथा" ॥
—तत्त्वसं० का० १६१ पृ० ७७ ।

६ "क्रीडासाध्या च या प्रीतिस्तस्या यदपि साधनम् । तत्सर्वं युगपत् कुर्याद् यदि तत्कृतिशक्तिमान् ॥
क्रमेणाऽपि न शक्तः स्यात्तो चेदादौ स शक्तिमान् । नाऽविभक्तस्य युज्येते शक्त्यशक्ती हि वस्तुनः" ॥
—तत्त्वसं० का० १६२–१६३ पृ० ७७ ।

७ "यदाह प्रशस्तमतिः" इत्यादि—तत्त्वसं० पञ्जि० पृ० ७८ पं० २– ।

८ न्यायवार्तिके ईश्वरोपादानताप्रकरणे उद्योतकरः "अथायमीश्वरः कुर्वाणः किमर्थं करोति" इति ईश्वरविषयं प्रश्नमुत्थाप्य तद्विषये इमानि मतान्तराणि समुपन्यस्यति—

"क्रीडार्थमित्येके" × × × "विभूतिख्यापनार्थमित्यपरे—जगतो वैश्वरूप्यं ख्यापनीयमित्यपरे मन्यन्ते"—४-१-२१ पृ० ४६२ पं० १७–४६३ पं० १ ।

९–"शक्तिकः"—तत्त्वसं० पञ्जि० पृ० ७८ पं० ९ । १०–शक्तितः हा० ।

"न व्यक्तशक्तिरीशोऽयं क्रमेणाप्युपपद्यते ।
व्यक्तशक्तिरतोऽन्यश्चेत् भावो ह्येकः कथं भवेत्" ॥ [ ]

एवं कालस्यापि पर्यायेण वसन्ताद्यभिव्यक्तिप्रवृत्तौ अयमेव दोषः । भावास्तु शीतोष्णादिपरिणतिभाजः प्रतिक्षणविशरारवः कथंचित् काल इत्यभिधानाभिधेयाः प्राग् व्यवस्थापिताः । अथ न क्रीडाद्यर्थो भगवतः प्रवृत्तिः किन्तु पृथिव्यादिमहाभूतानां यथा स्वकार्येषु स्वभावत एव प्रवृत्तिस्तथा ईश्वरस्यापि इति, अयुक्तमेतत्; एवं हि तदाधारमात्रभाविनामशेषभावानां युगपद् भावो भवेत् अविकलकारणत्वात् सहकार्यपेक्षाऽपि न नित्यस्य संगता इत्युक्तम् । पुरुषवादिनां तु केवलस्यैव पुरुषस्य जगत्कारणत्वेन अभ्युपगमात् तदपेक्षा दूरापास्तैव । पृथिव्यादिमहाभूतानां तु स्वहेतुबलायाताऽपरापरस्वभावसद्भावान्न तदुत्पाद्यकार्यस्य युगपदुत्पत्त्यादिदोषः संभवी । न च यथा ऊर्णनाभः स्वभावतः प्रवृत्तोऽपि न स्वकार्याणि युगपद् निर्वर्तयति तथा पुरुषोऽपीति वाच्यम्, यत ऊर्णनाभस्यापि प्राणिभक्षणलाम्पट्यात् स्वकार्ये प्रवृत्तिर्न स्वभावतः अन्यथा तत्राप्यस्य दोषस्य समानत्वात् न ह्यसौ नित्यैकस्वभावः अपि तु स्वहेतुबलभाव्यपरापरकादाचित्कशक्तिमानिति तद्भाविनः कार्यस्य क्रमप्रवृत्तिरुपपन्नैव । न च यथा कथंचिद् अबुद्धिपूर्वकमेव पुरुषो जगन्निर्वर्तने प्रवर्तते, प्राकृतपुरुषादप्येवमस्य हीनतया प्रेक्षापूर्वकारिणामनवधेयवचनताप्रसक्तेः । एवं प्रजापतिप्रभृतीनामपि जगत्कारणत्वेनाभीष्टानां निरासो द्रष्टव्यः न्यायस्य समानत्वात् । तन्न कालाद्येकान्ताः प्रमाणतः संभवन्तीति तद्वादो मिथ्यावाद इति स्थितम् । त एव अन्योन्यसव्यपेक्षा नित्याद्येकान्तव्यपोहेन एकानेकस्वभावाः कार्यनिर्वर्तनपटवः प्रमाणविषयतया परमार्थसन्त इति तत्प्रतिपादकस्य शास्त्रस्यापि सम्यक्त्वमिति तद्वादः सम्यग्वादतया व्यवस्थितः ॥ ५३ ॥

[आत्मन्येकान्तरूपस्य नास्तित्वादिवादषट्कस्य मिथ्यारूपत्वकथनम्]

यथैते कालाद्येकान्ता मिथ्यात्वमनुभवन्ति स्याद्वादोपग्रहात् तु त एव सम्यक्त्वं प्रतिपद्यन्ते तथा आत्माऽपि एकान्तनित्याऽनित्यत्वादिधर्माध्यासितो मिथ्यात्वम् अनेकान्तरूपतया तु अभ्युपगम्यमानः सम्यक्त्वं प्रतिपद्यत इत्याह—

णत्थि ण णिच्चो ण कुणइ कयं ण वेएइ णत्थि णिव्वाणं ।
णत्थि य मोक्खोवाओ छम्मिच्छत्तस्स ठाणाइं ॥ ५४ ॥

---

१ तत्त्वसं० पञ्जि० पृ० ७८ पं० १०-।

२ "अथ स्वभावतो वृत्तिरित्यादिना उद्द्योतकरमताशङ्कते—
अथ स्वभावतो वृत्तिः सर्गादावस्य वर्ण्यते । पावकादेः प्रकृत्येव यथा दाहादिकर्मणि ॥
यद्येवमखिला भावा भवेयुर्युगपत् ततः । तदुत्पादनसामर्थ्ययोगिकारणसन्निधेः" ॥
—तत्त्वसं० का० १६४-१६५-पृ० ७८ ।

एतदेवोद्द्योतकरीयं मतं न्यायवार्तिके इत्थमुपन्यस्तमस्ति—
"किमर्थं तर्हि करोति ? तत्स्वाभाव्यात् प्रवर्तते इत्यदुष्टम्—यथा भूम्यादीनि धारणादिक्रियां तत्स्वाभाव्यात् कुर्वन्ति तथेश्वरोऽपि तत्स्वाभाव्यात् प्रवर्तत इति प्रवृत्तिस्वभावकं तत् तत्त्वमिति" इत्यादि—४-१-२१ पृ० ४६३ पं० ४—।

३ "स्वहेतुबलसंभूता नियताः एव शक्तयः । असर्वकालभाविन्यो ज्वलनादिषु वस्तुषु ॥
अन्यथा यौगपद्येन सर्वं कार्यं समुद्भवेत् । तेषामपि न चेदेष नियमोऽभ्युपगम्यते" ॥
—तत्त्वसं० का० १६६-१६७ पृ० ७८-७९ ।

४ "प्रकृत्यैवांशुहेतुत्वमूर्णनाभेऽपि नेष्यते । प्राणिभक्षणलाम्पट्याल्लालाजालं करोति यत्" ॥
—तत्त्वसं० का० १६८ पृ० ७९ ।

५ "यथाकथंचिद्वृत्तिश्चेद् बुद्धिमत्ताऽस्य कीदृशी । नासमीक्ष्य यतः कार्यं शनकोऽपि प्रवर्तते" ॥
—तत्त्वसं० का० १६९ पृ० ७९ ।

६ "शौर्यात्मजादयो येऽपि धातारः परिकल्पिताः । एतेनैव प्रकारेण निरस्तास्तेऽपि वस्तुतः" ॥
—तत्त्वसं० का० १७० पृ० ७९ ।

नास्ति आत्मा एकान्तत इति बृहस्पतिमतानुसारी। अस्ति आत्मा किन्तु प्रतिक्षणविशरारु-तया चित्तसंततेर्न **नित्य** इति बौद्धाः। अस्ति आत्मा नित्यो भोक्ता **न तु करोति** इति सांख्याः त एव प्राहुः कर्ता असौ न भोक्ता प्रकृतिवत् कर्तुर्भोक्तृत्वानुपपत्तेः। यद्वा येन कृतं कर्म नासौ तद् भुङ्क्ते क्षणिकत्वाद् चित्तसंततेः इति बौद्धाः क्षणिकत्वात् चित्तसंततेः **कृतं न वेदयते** इति बौद्ध

५ एव आह। कर्ता भोक्ता च आत्मा किन्तु न मुच्यतेऽसौ चेतनत्वात् अभव्यवत्—रागादीनामात्मस्व-रूपाऽव्यतिरेकात् तदक्षये तेषामपि अक्षयात् इति याज्ञिकः। निर्हेतुक एवासौ मुच्यते तत्स्वभावता-व्यतिरेकेण अपरस्य तत्र उपायस्य अभावात् इति मण्डली[1] प्राह। एतानि षड् मिथ्यात्वस्य स्थानानि षण्णामप्येषां पक्षाणां मिथ्यात्वाधारतया व्यवस्थितेः।

तथाहि—एतानि नास्तित्वादिविशेषणानि साध्यधर्मिविशेषणतया उपादीयमानानि किं प्रतिप-

१० क्षव्युदासेन उपादीयन्ते, आहोस्वित् कथंचित् तत्संग्रहेण इति कल्पनाद्वयम्। प्रथमपक्षे अध्यक्षवि-रोधः स्वसंवेदनाध्यक्षतश्चैतन्यस्य आत्मरूपस्य प्रतीतेः कथंचित् तस्य परिणामनित्यताप्रतीतेश्च शरी-रादिव्यापारतः कर्तृत्वोपलब्धेश्च स्वव्यापारनिर्वर्तितभक्त-सूपादि[2]भोक्तृत्वसंवेदनाच्च पुद्गललक्षणविल-क्षणतया रागादिविविक्ततया च शमसुखरसावस्थायां कथंचित् तस्य उपलब्धेश्च स्वोत्कर्षतरतमादि-भावतो रागाद्यपचयतरतमभावविधायिसम्यग्ज्ञान-दर्शनादेरुपलम्भाच्च। अनुमानतोऽपि विरोधः

१५ तथाभूतज्ञानकार्यान्यथानुपपत्तितः चैतन्यलक्षणस्य आत्मनः सिद्धिः घटादिवद् रूपादिगुणतः ज्ञान-स्वरूपगुणोपलम्भात् कथंचित् तदभिन्नस्य आत्मलक्षणस्य गुणिनः सिद्धिरिति कथं नानुमानविरोधः? इतरधर्मनिरपेक्षधर्मलक्षणस्य विशेषणस्य तदाधारभूतस्य च विशेष्यस्य अप्रसिद्धेः अप्रसिद्धविशेषण-विशेष्योभयदोषैर्दुष्टश्च[3] पक्षः। 'आत्मा' इति वचनेन तत्सत्ताभिधानम् 'नास्ति' इत्यनेन च तत्प्रतिषेधा-भिधानमिति पदयोः प्रतिज्ञावाक्ये व्याघातः लोकविरोधश्च तथाभूतविशेषणविशिष्टतया धर्मिणो

२० लोकेन व्यवह्रियमाणत्वात् स्ववचनविरोधश्च तत्प्रतिपादकवचनस्य इतरधर्मसापेक्षतया प्रवृत्तेः। हेतु-रपि इतरनिरपेक्षैकधर्मरूपोऽसिद्धः तथाभूतस्य तस्य क्वचिद् अनुपलब्धेः सर्वत्र तद्विपरीत एव भावाद् विरुद्धश्च। दृष्टान्तश्च साध्यसाधनधर्मविकलः तथाभूतसाध्यसाधनधर्माधिकरणतया कस्यचिद् धर्मिणः अप्रसिद्धेः।[4] तन्न प्रथमः पक्षः। नापि द्वितीयः स्वाभ्युपगमविरोधप्रसङ्गात् साधनवैफल्यापत्तेश्च तथाभूतस्य अनेकान्तरूपतया अस्माभिरप्यभ्युपगमात्। तस्माद् व्यवस्थितमेतद् एकान्तरूपतया

२५ षडपि एतानि मिथ्यात्वस्य स्थानानि ॥ ५४ ॥

[आत्मन्येकान्तरूपस्यास्तित्वादिवादषट्कस्य मिथ्यारूपत्वकथनम्]

न केवलं 'नास्ति' इत्यादिषण्मिथ्यात्वस्थानानि तद्विपर्ययेणापि एकान्तवादे तथैव तानीति दर्शयन्नाह—

अत्थि अविणासधम्मी करेइ वेएइ अत्थि णिव्वाणं।

३० **अत्थि य मोक्खोवाओ छम्मिच्छत्तस्स ठाणाइं ॥ ५५ ॥**

'अस्ति आत्मा' इति पक्षः पूरणादेर्वादिनः। 'स च अविनाशधर्मी' इत्येषा प्रतिज्ञा कपिलमतानु-सारिणः। 'कर्तृ-भोक्तृस्वभावोऽसौ' इति मतं जैमिनेः। 'तथाभूत एवासौ जडस्वरूपः' इति अक्षपाद-कणभुग्मतानुसारिणः। 'अस्ति निर्वाणम्' 'अस्ति च मोक्षोपायः' इत्यामनन्ति नास्तिक-याज्ञिकव्यति-रिक्ताः पाषण्डिनः। एते च अभ्युपगमा एकान्ताभ्युपगमत्वाद् मिथ्यास्थानानि, एष्वपि पूर्ववद्

३५ विकल्पद्वयेऽपि तद्दोषानतिक्रान्तेः एकान्तेन तदस्तित्वादेरध्यक्षाऽनुमानाभ्यामप्रतीतेः तथाभ्युपगमे च स्वास्तित्वेनेवान्यभावास्तित्वेनापि[5] तस्य भावात् सर्वभावसंकीर्णताप्रसक्तेः स्वस्वरूपाऽव्यवस्थितेः खपुष्पवत् असत्त्वमेव स्यात् इत्यादिदूषणमसकृत् प्रतिपादितम्। हेतु-दृष्टान्तदोषाश्च पूर्ववद् अत्रापि वाच्याः।

चतुर्थपादं तु गाथायाः केचिद् अन्यथा पठन्ति—"**छस्सम्मत्तस्स ठाणाइं**"ति। अत्र तु

१-ण्डलीक प्रा—आ०। २-भक्तरूपादि—बृ० विना। ३-षणविशिष्टोभ-बृ० आ० हा० वि०। ४ प्र० पृ० पं० ५। ५-स्तिकत्वेनैवा—बृ० आ० हा० वि०।

पाठे इतरधर्माऽजहद्वृत्त्या प्रवर्तमाना एते षट् पक्षाः सम्यक्त्वस्य आधारतां प्रतिपद्यन्ते इति व्याख्येयम्। न च 'स्यादस्ति आत्मा' 'स्यान्नित्यः' इत्यादिप्रतिज्ञावाक्यम् अध्यक्षादिना प्रमाणेन बाध्यते स्व-परभावाभावोभयात्मकभावावभासकाध्यक्षादिप्रमाणव्यतिरेकेण अन्यथाभूतस्य अध्यक्षादेरप्रतीतेः तेन अनुमानाऽभ्युपगम-स्ववचन-लोकव्यवहारविरोधोऽपि न प्रतिज्ञायाः अध्यक्षादिप्रमाणावसेये सदसत्तात्मके वस्तुनि कस्यचिद् विरोधस्यासंभवात्। न चाप्रसिद्धविशेषणः पक्षः लौकिक-परीक्षकै- ५ स्तथाभूतविशेषणस्याविप्रतिपत्त्या सर्वत्र प्रतीतेः अन्यथा विशेषणव्यवहारस्य उच्छेदप्रसङ्गात् अन्यथाभूतस्य तस्य क्वचिदपि असंभवात् तथाभूतविशेषणात्मकस्य धर्मिणः सर्वत्र प्रतीतेर्नाप्रसिद्धविशेष्यतादोषः। नापि अप्रसिद्धोभयता दूषणम् तथाभूतद्वयव्यतिरेकेणान्यस्यासत्त्वतः प्रमाणाविषयत्वात्। हेतुरपि नाऽप्रसिद्धः तत्र तस्य सत्त्वप्रतीतेः, विपक्षे सत्त्वासंभवाद् नापि विरुद्धः अनैकान्तिकताऽपि अत एवायुक्ता। दृष्टान्तदोषा अपि साध्यादिविकलत्वादयो नात्र संभविनः असिद्धत्वादि- १० दोषवत्येव साधने तेषां भावात्। न च अनुमानतः अनेकान्तात्मकं वस्तु तद्वादिभिः प्रतीयते अध्यक्षसिद्धत्वात् यस्तु प्रतिपन्नेऽपि नतस्तस्मिन् विप्रतिपद्यते तं प्रति तत्प्रसिद्धेनैव न्यायेन अनुमानोपन्यासेन विप्रतिपत्तिनिराकरणमात्रमेव विधीयते इति न अप्रसिद्धविशेषणत्वादेर्दोषस्यावकाशः। प्रतिक्षणपरिणाम-परभागादीनां तु उत्तरविकाराऽर्वाग्भागदर्शनान्यथानुपपत्त्या अनुमाने न अध्यक्षादिबाधा अस्मदाद्यध्यक्षस्य सर्वात्मना वस्तुग्रहणाऽसामर्थ्यात् स्फटिकादौ तु अर्वाग्भाग-परभागयो- १५ रध्यक्षत एवैकदा प्रतिपत्तेः। न च स्थैर्यग्राह्यध्यक्षं प्रतिक्षणपरिणामानुमानेन विरुध्यते अस्य तदनुग्राहकत्वात् कथंचित् प्रतिक्षणपरिणामस्य तत्प्रतीतस्यैव अनुमानतोऽपि निश्चयात्॥ ५५॥

[एकान्तवादिनः साधर्म्येण वा वैधर्म्येण वैकान्तधर्मयुक्तधर्मिसाधनाशक्तत्वाभिधानम्]

अनेकान्तव्यवच्छेदेन एकान्तावधारितधर्माधिकरणत्वेन धर्मिणं साधयन्नेकान्तवादी न साधर्म्यतः साधयितुं प्रभुः नापि वैधर्म्यतः इति प्रतिपादयन्नाह— २०

साहम्मउ व्व अत्थं साहेज्ज परो विहम्मओ वा वि।
अण्णोण्णं पडिकुट्ठा दोण्णवि एए असव्वाया॥ ५६॥

समानस्तुल्यः साध्यसामान्यान्वितः साधनधर्मो यस्य असौ सधर्मा साधर्म्यदृष्टान्तापेक्षया साध्यधर्मी तस्य भावः **साधर्म्यम् ततो वा अर्थं** साध्यधर्माधिकरणतया धर्मिणं **साधयेत् परः** अन्वयिहेतुप्रदर्शनात् साध्यधर्मिणि विवक्षितं साध्यं यदि वैशेषिकादिः साधयेत् तदा तत्पुत्रत्वादे- २५ रपि गमकत्वं स्यात् अन्वयमात्रस्य तत्रापि भावात्। अथ **वैधर्म्याद्** विगतस्तथाभूतः साधनधर्मो यस्माद् असौ विधर्मा तस्य भावो वैधर्म्यम् ततो वा व्यतिरेकिणो हेतोः प्रकृतं साध्यं साधयेत् उभाभ्यां वा-'वा' शब्दस्य समुच्चयार्थत्वात्—तथापि तत्पुत्रत्वादेरेव गमकत्वप्रसक्तिः श्यामत्वाभावे तत्पुत्रत्वादेरन्यत्र गौरपुरुषेऽभावाद् उभाभ्यामपि तत्साधने अत एव साध्यसिद्धिप्रसक्तिः स्यात्।

[प्रसङ्गाद् हेत्वाभाससंख्याविषया चर्चा] ३०

अथात्र कालात्ययापदिष्टत्वादिदोषसद्भावाद् न साध्यसाधकताप्रसक्तिः, नः असिद्ध-विरुद्धाऽनैकान्तिकहेत्वाभासमन्तरेणापरहेत्वाभासासंभवात्। न च त्रैरूप्यलक्षणयोगिनोऽसिद्धत्वादिहेत्वाभासता कृतकत्वादेरिव अनित्यत्वसाधने संभवति, अस्ति च भवदभिप्रायेण त्रैरूप्यं प्रकृतहेताविति कुतोऽस्य हेत्वाभासता ?

अथ भवतु अयं दोषः येषां त्रैरूप्येऽविनाभावपरिसमाप्तिः नास्माकं पञ्चलक्षणहेतुवादिनाम् ३५ प्रकरणसमादेरपि हेत्वाभासत्वोपपत्तेः त्रैलक्षण्यसद्भावेऽपि अपरस्यासत्प्रतिपक्षत्वादेर्हेतुलक्षणस्यासंभवेन तदाभासत्वसंभवात्। "यस्मात् प्रकरणचिन्ता स प्रकरणसमः" [न्यायद० १-२-७] इति प्रकरणसमस्य लक्षणाभिधानात्—प्रक्रियेते साध्यत्वेनाधिक्रियेते निश्चितौ पक्ष-प्रतिपक्षौ यौ तौ प्रकरणम् तस्य चिन्ता संशयात् प्रभृत्यानिश्चयाद् आलोचनस्वभावा यतो भवति स एव तन्निश्चयार्थं

---

१ "यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः" इति पाठो न्यायदर्शने।

प्रयुक्तः प्रकरणसमः पक्षद्वयेऽपि तस्य समानत्वात् उभयत्रापि अन्वयादिसद्भावात्। तथाहि—
तस्योदाहरणम्—अनित्यः शब्दः नित्यधर्मानुपलब्धेः अनुपलभ्यमाननित्यधर्मकं घटादि अनित्यं
दृष्टम् यत् पुनर्नित्यं न तद् अनुपलभ्यमाननित्यधर्मकम् यथा आत्मादि। एवं चिन्तासंबन्धिपुरुषेण
तत्त्वानुपलब्धेरेकदेशभूताया अन्यतरानुपलब्धेः अनित्यत्वसिद्धौ साधनत्वेन उपन्यासे सति द्वितीय-
५ श्चिन्तासंबन्धी पुरुष आह—यदि अनेन प्रकारेण अनित्यत्वं साध्यते तर्हि नित्यतासिद्धिरपि
अन्यतरानुपलब्धेस्तत्रापि सद्भावात्। तथाहि—नित्यः शब्दः अनित्यधर्मानुपलब्धेः अनुपलभ्यमाना-
नित्यधर्मकं नित्यं दृष्टम् आत्मादि यत् पुनर्न नित्यं तत् नानुपलभ्यमानाऽनित्यधर्मकम् यथा घटादि[1]।
एवमन्यतरानुपलब्धेरुभयपक्षसाधारणत्वात् प्रकरणानतिवृत्तेर्हेत्वाभासत्वम् न च निश्चितयोः
पक्ष-प्रतिपक्षपरिग्रहेऽधिकारात् कथं चिन्तायुक्त एवं साधनोपन्यासं विदध्यात् इति वक्तव्यम्
१० यतोऽन्यदा संदेहेऽपि चिन्तासंबन्धी पुरुषः अन्यतरानुपलब्धेः पक्षधर्मान्वय-व्यतिरेकान् अवग-
च्छन् तद्बलात् स्वसाध्यं यदा निश्चिनोति तदा द्वितीयस्तामेव स्वसाध्यसाधनाय हेतुत्वेन अभिधत्ते।
यदि अतः त्वत्पक्षसिद्धिः अत एव मत्पक्षसिद्धिः किं न भवेत् त्रैरूप्यस्य पक्षद्वयेऽपि अत्र तुल्यत्वात्।
अथ नित्यत्वाऽनित्यत्वैकान्तविपर्ययेणापि अस्याः प्रवृत्तेः अनैकान्तिकता उभयवृत्तिर्हि अनैकान्तिकः
न प्रकरणसमः, नः यत्र पक्ष-सपक्ष-विपक्षाणां तुल्यो धर्मो हेतुत्वेन उपादीयते तत्र संशयहेतुता
१५ साधारणत्वेन तस्य विरुद्धविशेषानुसारकत्वात् न तु प्रकृत एवंविधः यतः नित्यधर्मानुपलब्धेरनित्य
एव भावः न नित्ये एवम् अनित्यधर्मानुपलब्धेर्नित्य एव भावः नाऽनित्ये एवं च एकत्र साध्ये विपक्ष-
व्यावृत्तेः प्रकरणसमता न अनैकान्तिकता पक्षद्वयवृत्तितया तस्याभावात्। ननु यदि अयं पक्षद्वये
वर्तते तदा साधारणानैकान्तिकः अथ न प्रवर्तते कथमयं पक्षद्वयसाधकः स्यात् अतद्वृत्तेः अतत्सा-
धकत्वात्, नः पक्षद्वये प्रकृतस्य वृत्त्यभ्युपगमात्। तथाहि—साधनकाले अनित्यपक्ष एव नित्यधर्मा-
२० नुपलब्धिर्वर्तते न नित्ये, यदाऽपि नित्यत्वं साध्यं तदापि नित्यपक्ष एव अनित्यधर्मानुपलब्धिर्वर्तते
नाऽनित्ये, ततश्च सपक्षे एव प्रकरणसमस्य वृत्तिः सपक्ष-विपक्षयोश्च अनैकान्तिकस्यः साध्यापेक्षया
च पक्ष-सपक्ष-विपक्षव्यवहारः नान्यथा तेन साध्यद्वयवृत्तिः उभयसाध्यसपक्ष-वृत्तिश्च प्रकरणसमः
नतु कदाचित् साध्यापेक्षया विपक्षवृत्तिः अनैकान्तिकस्तु विपक्षवृत्तिरपि इत्यस्मात् अस्य भेदः। न
च रूपत्रययोगेऽपि अस्य हेतुत्वम् सप्रतिपक्षत्वात् यस्य तु प्रतिबन्धपरिसमाप्ती रूपत्रययोगे तेन
२५ प्रकरणसमस्य नाहेतुत्वमुपदर्शयितुं शक्यम्। न चास्य कालात्ययापदिष्टत्वम् अबाधितविषयत्वात्
ययोर्हि प्रकरणचिन्ता तयोरयं हेतुः न च तौ संदिग्धत्वात् बाधामस्योपदर्शयितुं क्षमौ। न च
हेतुद्वयसंनिपातात् एकत्र धर्मिणि संशयोत्पत्तेस्तज्जनकत्वेनास्य अनैकान्तिकता यतो न संशयहे-
तुत्वेन अनैकान्तिकत्वम् इन्द्रियसंनिकर्षादेरपि तथात्वप्रसक्तेः। न च तत्त्वानुपलब्धिर्विशेषस्मृत्यादि-
शून्या संशयकारणम् न च तत्सहिताया अस्या हेतुत्वम् केवलाया एव तत्त्वेन उपन्यासात्। न च
३० संदिग्धे विषये भ्रान्तपुरुषेण निश्चयार्थमुपादीयमानाया अस्याः संदेहहेतुता युक्ता। भवतु वा कथं-
चिद् अतस्संशयोत्पत्तिस्तथापि अनैकान्तिकाद् अस्य विशेषः स हि सपक्ष-विपक्षयोः समानः अयं तु
तद्विपरीतः साध्यद्वयवृत्तित्वात् तु प्रकरणसमः न चासंभवः अस्यैवंविधसाधनप्रयोगस्य भ्रान्तेः सद्भा-
वात्। अथास्यासिद्धे अन्तर्भावः नित्यवादिनो नित्यधर्मानुपलब्धेः इतरस्य च इतरधर्मानुपलब्धेरसि-
द्धत्वात्, असदेतत्ः यतश्चिन्तासंबन्धिपुरुषेण प्रकरणसमस्य हेतुत्वेन उपन्यासः तस्य च तत्संबन्धि-
३५ नैव कथमितरेण असिद्धतोद्भावनं विधातुं शक्यम्? यस्य हि अनुपलब्धिनिमित्तसंशयोत्पत्तौ शब्दे[3]
नित्यत्वाऽनित्यत्वजिज्ञासा स कथमन्यतरानुपलब्धेर्हेतुत्वप्रयोगे असिद्धतां ब्रूयात् अत एव सूत्रकारेण
"यस्मात् प्रकरणचिन्ता" [न्यायद० १-२-७] इति असिद्धतादोषपरिहारार्थमुपात्तम्। एवम्
'अनित्यः शब्दः, पक्ष-सपक्षयोः अन्यतरत्वात्, घटवत्' इति चिन्तासंबन्धिना पुरुषेण उक्ते अपरस्त-
त्संबन्धी 'नित्यः शब्दः, पक्ष-सपक्षयोः अन्यतरत्वात्, आकाशवत्' यदाह तदा प्रकरणसम एव।

४०　अत्र प्रेरयन्ति—पक्ष-सपक्षयोः अन्यतरः पक्षः सपक्षो वा? यदि पक्षः तदा न हेतोः सपक्षवृ-
त्तिता न हि शब्दस्य धर्म्यन्तरे वृत्तिः संभवतीति असाधारणतैवास्य हेतोः स्यात्। अथ सपक्षः

१-टादिः ए—आ० हा० वि० विना। २-वृत्तिः प्र—वा० बा०। ३-शब्दे नित्यत्वजि—वा० बा० आ०। ४ पृ० ७१९ पं० ३७। ५ शब्दः सपक्षपक्षयोरन्य—मां० मां० विना।

अन्यतरशब्दवाच्यस्तदा हेतोरसिद्धता सपक्षयोर्घटाऽऽकाशयोः शब्दाख्ये धर्मिणि अप्रवृत्तेः असिद्धे
अन्तर्भूतस्य अस्य न प्रकरणसमता । न च पक्ष-सपक्षयोर्व्यतिरिक्तः कश्चिद् अन्यतरशब्दवाच्यः यस्य
पक्षधर्मता अन्वयश्च भवेत् । तन्नायं हेतुः ।

अत्र प्रतिविदधति—भवेदेष दोषः यदि पक्ष-सपक्षयोर्विशेषशब्दवाच्ययोर्हेतुत्वं विवक्षितं भवेत्;
तच्च न, अन्यतरशब्दाभिधेयस्यैव हेतुत्वेन विवक्षितत्वात्; स च पक्ष-सपक्षयोः साधारणः तस्यैव ५
साधारणशब्दाभिधेयत्वात् । यदि च अनुगतो द्वयोर्धर्मः कश्चित् शब्दवाच्यो न भवेत् तदा 'विशेष'-
शब्दवत् 'अन्यतर'शब्दोऽपि न तत्र प्रवर्तेत । नापि तच्छब्दात् उभयत्र प्रतीतिर्भवेत् दृश्यते च
तस्मात् पक्षताम् सपक्षतां चासाधारणरूपत्वेन कल्पितां परित्यज्य अन्यतरशब्दो द्वयोरपि वाचक-
त्वेन योग्यः ततो या विशेषप्रतीतिः सा पुरुषविवक्षानिबन्धना यदा हि साधनप्रयोक्ता पक्षधर्मत्व-
मस्य विवक्षति तदा 'अन्यतर'शब्दवाच्यः पक्षः सपक्षे अनुगमविवक्षायां तु सपक्षस्तच्छब्दवाच्यः १०
एतदभिप्रायवांश्च 'अन्यतर'शब्दवाच्यं हेतुत्वेन प्रतिपादयति न 'विशेष'शब्दवाच्यम् । न च विवक्षा-
निबन्धनशब्दप्रवृत्तौ पक्षादिशब्दवत् 'अन्यतर'शब्दोऽपि विशेषाभिधायी स्यात् यतो लोकव्यवहारा-
च्छब्दार्थसंबन्धव्युत्पत्तिः तत्र च 'पक्ष'शब्दस्य न सपक्षे प्रवृत्तिः नापि 'सपक्ष'शब्दस्य पक्षे यथा च
अनयोः संकेतादपि नान्यत्र वृत्तिः एवम् 'अन्यतर'शब्दस्य सामान्ये संकेतितस्य न विशेष एव वृत्तिः
उभयाभिधायकत्वे तु विवक्षावशेन अन्यतरत्र नियमः । न चैवमपि विशेषे तस्य वृत्तौ दूषणं तदवस्थ- १५
मेव, एवंदोषोद्भावने कस्यचित् सम्यग्घेतुत्वानुपपत्तेः कृतकत्वादेरपि पक्षधर्मत्वविवक्षायां विशेषरू-
पत्वात् अनुगमाभावात् सपक्षविशेषितस्य पक्षधर्मत्वायोगात् । अथ कृतकत्वमात्रस्य हेतुत्वेन विव-
क्षातो न दोषस्तर्हि तत् प्रकृतेऽपि तुल्यम् 'अन्यतर'शब्दस्यापि अनङ्गीकृतविशेषस्य द्वयाभिधाने
सामर्थ्योपपत्तेः । एतेन यदुक्तं न्यायविदा—"अनर्थः खल्वपि कल्पनासमारोपितो न लिङ्गम् तथा पक्ष
एवायं पक्ष-सपक्षयोरन्यतरः" [ ] इत्यादि तदपि निरस्तम् त्रैरूप्यसद्भावेऽपि २०
प्रकरणसमत्वेनास्यागमकत्वात् । प्रत्यक्षाऽऽगमबाधितकर्मनिर्देशानन्तरप्रयुक्तः कालात्ययापदिष्टोऽपि
हेत्वाभासोऽपरैरभ्युपगतः यथा 'पक्कानि एतानि आम्रफलानि, एकशाखाप्रभवत्वात्, उपयुक्तफल-
वत्' अस्य हि रूपत्रययोगिनोऽपि प्रत्यक्षबाधितकर्मानन्तरप्रयोगात् कालात्ययापदिष्टता अगमकत्वे
निबन्धनम्-हेतोः कालः अदुष्टकर्मानन्तरं प्रयोगः प्रत्यक्षादिविरुद्धस्य तु दुष्टकर्मानन्तरं प्रयोगात् हेतु-
कालव्यतिक्रमेण प्रयोगः तस्माच्च कालात्ययापदिष्टशब्दाभिधेयता हेत्वाभासता च । तदुक्तं न्यायभा- २५
ष्यकृता—"यत् पुनरनुमानं प्रत्यक्षाऽऽगमविरुद्धं न्यायाभासः स इति" [वात्स्यायनभा० पृ०४ पं०५]
तदेवं पञ्चलक्षणयोगिनि हेतौ अविनाभावपरिसमाप्तेः तत्पुत्रत्वादौ तु त्रैलक्षण्येऽपि कालात्ययापदि-
ष्टत्वान्न गमकत्वम् इति नैयायिकाः ।

असदेतत्, असिद्धादिव्यतिरेकेण अपरस्य प्रकरणसमादेः हेत्वाभासस्यायोगात् । यच्च प्रकरण-
समस्य 'अनित्यः शब्दः अनुपलभ्यमाननित्यधर्मकत्वात्' इति उदाहरणं प्रदर्शितम् तद् असंगतमेव, ३०
यतः अनुपलभ्यमाननित्यधर्मकत्वं यदि शब्दे न तत्त्वतः सिद्धं तदा पक्षवृत्तितयास्यासिद्धेः कथं
नासिद्धः? अथ तत् तत्र सिद्धम् तदा किं साध्यधर्मान्विते धर्मिणि तत् सिद्धम्, उत तद्विकल इति
वक्तव्यम् । यदि तदन्विते तदा साध्यवत्येव धर्मिणि तस्य सद्भावसिद्धेः कथमगमकता न हि साध्य-
धर्ममन्तरेण धर्मिण्यभवनं विहाय अपरं हेतोः अविनाभावित्वम् तच्चेत् समस्ति कथं न गमकता
अविनाभावनिबन्धनत्वात् तस्याः? अथ तद्विकले तत् तत्र सिद्धं तदा तत्र वर्तमानो हेतुः कथं न ३५
विरुद्धः विपक्ष एव वर्तमानस्य विरुद्धत्वात्? भवति च साध्यधर्मविकल एव धर्मिणि वर्तमानो विप-
क्षवृत्तिः । अथ संदिग्धसाध्यधर्मवति तत् तत्र वर्तते तदा संदिग्धविपक्षव्यावृत्तिकत्वाद् अनैका-
न्तिकः । अथ साध्यधर्मिव्यतिरिक्ते धर्म्यन्तरे यस्य साध्याभाव एव दर्शनं स विरुद्धः यस्य च तदभा-
वेऽपि असौ अनैकान्तिकः न हि धर्मिण एव विपक्षता तस्य हि विपक्षत्वे सर्वस्य हेतोः अहेतुत्वप्र-
सक्तेः यतः साध्यधर्मी साध्यधर्मसदसत्त्वाश्रयत्वेन सर्वदा संदिग्ध एव साध्यसिद्धेः प्राग् अन्यथा ४०
साध्याभावे निश्चिते साध्याभावनिश्चायकेन प्रमाणेन बाधितत्वात् हेतोरप्रवृत्तिरेव स्यात् । प्रत्यक्षा-
दिप्रमाणेन च साध्यधर्मयुक्ततया धर्मिणो निश्चये हेतोर्वैयर्थ्यप्रसक्तिः प्रत्यक्षादित एव हेतुसाध्यस्य

१-तां वा सा—मां० । २ पृ० ७२० पं० २ ।

सिद्धेः तस्मात् संदिग्धसाध्यधर्मा धर्मी हेतोराश्रयत्वेन एष्टव्य इति यदि अनैकान्तिकस्तत्र वर्तमानो
हेतुर्धूमादिरपि तर्हि तथाविध एव स्यात् तस्यापि एवं संदिग्धव्यतिरेकित्वात् यदि हि विपक्षवृत्तित्वेन
निश्चितो यथाऽगमकस्तथा संदिग्धव्यतिरेक्यपि अनुमानप्रामाण्यं परित्यक्तमेव भवेत् ततोऽनुमेय-
व्यतिरिक्ते साध्यधर्मवति वर्तमानः साध्याभावे चानैकान्तिको हेतुः साध्याभाववत्येव तु वर्तमानः
५ पक्षधर्मत्वे सति विरुद्ध इत्यभ्युपगन्तव्यम्। यश्च विपक्षाद् व्यावृत्तः सपक्षे च अनुगतः पक्षधर्मो
निश्चितः स स्वसाध्यं गमयति प्रकृतस्तु यद्यपि विपक्षाद् व्यावृत्तस्तथापि न स्वसाध्यसाधकः प्रतिब-
न्धस्य स्वसाध्येनानिश्चयात् तदनिश्चयश्च न विपक्षवृत्तित्वेन किन्तु प्रकरणसमत्वेन एकशाखाप्रभव-
त्वादेस्तु कालात्ययापदिष्टत्वेन इति, असदेतत्; यतो यदि धर्मिव्यतिरिक्ते धर्म्यन्तरे हेतोः स्वसाध्येन
प्रतिबन्धोऽभ्युपगम्यते तदा धर्मिण्युपादीयमानोऽपि हेतुः साध्यस्योपस्थापको न स्यात् साध्यधर्मिणि
१० साध्यमन्तरेणापि हेतोः सद्भावाभ्युपगमात् तद्व्यतिरिक्त एव धर्म्यन्तरे तस्य साध्येन प्रतिब-
न्धग्रहणात्। न चान्यत्र स्वसाध्याविनाभावित्वेन निश्चितः अन्यत्र साध्यं गमयेत् अतिप्रसङ्गात्। अथ
यदि साध्यधर्मान्वितत्वेन साध्यधर्मिण्यपि हेतुरन्वयप्रदर्शनकाल एव निश्चितस्तदा पूर्वमेव साध्यध-
र्मस्य साध्यधर्मिणि निश्चयात् पक्षधर्मताग्रहणस्य वैयर्थ्यम्, असदेतत्; यतः प्रतिबन्धप्रसाधकेन
प्रमाणेन सर्वोपसंहारेण साधनधर्मः साध्यधर्माभावे क्वचिदपि न भवतीति सामान्येन प्रतिबन्धनिश्चये
१५ पक्षधर्मताग्रहणकाले यत्रैव धर्मिण्युपलभ्यते हेतुस्तत्रैव स्वसाध्यं निश्चाययतीति पक्षधर्मताग्रहणस्य
विशेषविषयप्रतिपत्तिनिबन्धनत्वान्नानुमानस्य वैयर्थ्यम् न हि विशिष्टधर्मिण्युपलभ्यमानो हेतुस्तद्ग-
तसाध्यमन्तरेण उपपत्तिमान् अन्यथा तस्य स्वसाध्यव्याप्तत्वायोगात् । न चैवं तत्र हेतूपलम्भेऽपि
साध्यविषयसदसत्त्वानिश्चयः येन संदिग्धव्यतिरेकिना हेतोः सर्वत्र भवेत् निश्चितस्वसाध्याविनाभूत-
हेतूपलम्भस्यैव साध्यधर्मिणि साध्यप्रतिपत्तिरूपत्वात् न हि तत्र तथाभूतहेतुनिश्चयात् अपरस्तस्य
२० स्वसाध्यप्रतिपादनव्यापारः अत एव निश्चितप्रतिबन्धैकहेतुसद्भावे धर्मिणि न विपरीतसाध्योपस्थाप-
कस्य तल्लक्षणयोगिनो हेत्वन्तरस्य सद्भावः तयोर्द्वयोरपि स्वसाध्याविनाभूतत्वात् नित्याऽनित्यत्वयोश्च
एकत्र एकदा एकान्तवादिमतेन विरोधात् असंभवात् तद्व्यवस्थापकहेत्वोरपि असंभवस्य न्यायप्रा-
प्तत्वात् संभवे वा तयोः स्वसाध्याविनाभूतत्वात् नित्याऽनित्यत्वधर्मयुक्तत्वं धर्मिणः स्यादिति कुतः
प्रकरणसमस्यागमकता? अथान्यतरस्यात्र स्वसाध्याविनाभावविकलता तर्हि तत एव तस्यागमकता
२५ इति किमसत्प्रतिपक्षतारूपप्रतिपादनप्रयासेन? किञ्च, नित्यधर्मानुपलब्धिः प्रसज्यप्रतिषेधरूपा,
पर्युदासरूपा वा शब्दानित्यत्वे हेतुः? न तावत् आद्यः पक्षः अनुपलब्धिमात्रस्य तुच्छस्य साध्यासा-
धकत्वात्। अथ द्वितीयः तदा अनित्यधर्मोपलब्धिरेव हेतुरिति यद्यसौ शब्दे सिद्धा कथं नानित्यता-
सिद्धिः? अथ चिन्तासंबन्धिना पुरुषेणासौ प्रयुज्यत इति न तत्र निश्चिता तर्हि कथं न संदिग्धा-
सिद्धो हेतुर्वादिनं प्रति प्रतिवादिनस्तु असौ स्वरूपासिद्ध एव नित्यधर्मोपलब्धेस्तत्र तस्य सिद्धेः। यदपि
३० 'उभयानुपलब्धिनिबन्धना यदा द्वयोरपि चिन्ता तदैकदेशोपलब्धेरन्यतरेण हेतुत्वेन उपादाने कथं
चिन्तासंबन्ध्येव द्वितीयः तस्याऽसिद्धतां वक्तुं पारयति' इत्याद्यभिधानम्, तदपि असंगतम्; यतो
यदि द्वितीयः संशयापन्नत्वात् तत्रासिद्धतां नोद्भावयितुं समर्थः प्रथमोऽपि तर्हि कथं संशयितत्वादेव
तस्य हेतुतामभिधातुं शक्तो भवेत्। अथ संशयितोऽपि तत्र हेतुतामभिदध्यात् तर्हि असिद्धतामप्य-
भिदध्यात् भ्रान्तेरुभयत्राविशेषात्। यदपि 'साधनकाले नित्यधर्मानुपलब्धिः अनित्यपक्ष एव वर्तते न
३५ विपक्षे' इत्याद्यभिधानम् तदपि असंगतम्; विपक्षाद् एकान्ततोऽस्य व्यावृत्तौ पक्षधर्मत्वे च स्वसा-
ध्यसाधकत्वमेव अन्योन्यव्यवच्छेदरूपाणामेकव्यवच्छेदेन[3] अपरत्र वृत्तिनिश्चये गत्यन्तराभावात् न हि
योऽनित्यपक्ष एव वर्तमानो निश्चितो वस्तुधर्मः स तत्र साधयतीति वक्तुं युक्तम्। अथ द्वितीयोऽपि
वस्तुधर्मस्तत्र तथैव निश्चितः, न; परस्परविरुद्धधर्मयोस्तदविनाभूतयोर्वा एकत्र धर्मिण्ययोगात् योगे
वा नित्यानित्यत्वयोः शब्दाख्ये धर्मिणि एकदा सद्भावाद् अनेकान्तरूपवस्तुसद्भावोऽभ्युपगतः स्यात्
४० तमन्तरेण तद्धेत्वोः स्वसाध्याविनाभूतयोस्तत्रायोगात्। अथ द्वयोस्तुल्यबलयोरेकत्र प्रवृत्तौ परस्पर-
विषयप्रतिबन्धान्न स्वसाध्यसाधकत्वम्, असदेतत्; स्वसाध्याविनाभूतयोर्धर्मिणि तयोरुपलब्धिरेव
स्वसाध्यसाधकत्वमिति कुतस्तत्सद्भावे परस्परविषयप्रतिबन्धः? तत्प्रतिबन्धो हि तयोस्तथाभूतयो-

---

१ साध्यधर्ममन्तरे—वा० बा०। २ पृ० ७२० पं० १९। ३—च्छेद्यरू—वा० बा०।

त्सत्राप्रवृत्तिः सा च त्रैरूप्याभ्युपगमे विरोधाद् अयुक्ता भावाऽभावयोः परस्परपरिहार-स्थितलक्षणतया एकत्रायोगात् । अथ द्वयोरन्योन्यव्यवच्छेदरूपयोः एकत्रायोगाद् अनित्यधर्मानुपलब्धेर्नित्यधर्मानुपलब्धेर्वा बाधा, न; अनुमानस्यानुमानान्तरेण बाधाऽयोगात् । तथाहि—तुल्यबलयोर्वा तयोर्बाध्यबाधकभावः अतुल्यबलयोर्वा ? न तावत् आद्यः पक्षः द्वयोस्तुल्यत्वे एकस्य बाधकत्वम् अपरस्य च बाध्यत्वमिति विशेषानुपपत्तेः । न च पक्षधर्मत्वाद्यभावादिरेकस्य विशेषः तस्यानभ्युपगमात् ५ अभ्युपगमे वा तत एव एकस्य दुष्टत्वान्न किञ्चिद् अनुमानबाधया । तन्न पूर्वः पक्षः । नापि द्वितीयः यतः अतुल्यबलत्वं तयोः पक्षधर्मत्वादिभावाभावकृतम्, अनुमानबाधाजनितं वा ? न तावत् आद्यः पक्षः तस्यानभ्युपगमात् अभ्युपगमे वाऽनुमानबाधावैयर्थ्यप्रसक्तेः । नापि द्वितीयः तस्याद्यापि विचारास्पदत्वात् न हि द्वयोस्त्रैरूप्यात् तुल्यत्वे एकस्य बाध्यत्वम् अपरस्य च बाधकत्वम् इति व्यवस्थापयितुं शक्यम् । तन्न अनुमानबाधाकृतमपि अतुल्यबलत्वम् इतरेतराश्रयदोषापत्तेः परिस्फुटत्वात् । एतेन १० पक्ष-सपक्षान्यतरत्वादेरपि प्रकरणसमस्य व्युदासः कृतो द्रष्टव्यः न्यायस्य समानत्वात् । यदपि 'अत्र असाधारणत्वाऽसिद्धत्वदोषद्वयनिरासार्थमन्यतरशब्दाभिधेयत्वं पक्ष-सपक्षयोः साधारणं हेतुत्वेन विवक्षितम् अन्यतरशब्दात् तथाविधार्थप्रतिपत्तेः तस्य तत्र योग्यत्वात्' इत्यभिधानम्, तदपि असंगतम्; यतः यत्रानियमेन फलसंबन्धो विवक्षितो भवति तत्रैव लोके 'अन्यतर'शब्दप्रयोगो दृष्टः यथा 'देवदत्त-यज्ञदत्तयोरन्यतरं भोजय' इत्यत्र अनियमेन देवदत्तः यज्ञदत्तो वा भोजनक्रियया संबध्यते १५ इति'अन्यतर'शब्दप्रयोगः न चैवं शब्दः पक्ष-सपक्षयोरन्यतरः तस्य पक्षत्वेन 'अन्यतर'शब्दवाच्यत्वाऽयोगात् । यदपि 'यदा पक्षधर्मत्वं प्रयोक्ता विवक्षति तदा 'अन्यतर'शब्दवाच्यः पक्षः' इत्याद्यभिधानम्, तदपि असंगतम्; एवंविवक्षायामस्य कल्पनासमारोपितत्वे अनर्थरूपतया लिङ्गत्वानुपपत्तेः न हि कल्पनाविरचितस्यार्थत्वम् त्रैरूप्यं वा उपपत्तिमत् अतिप्रसङ्गात् तत्त्वे वा अन्यस्य गमकतानिबन्धनस्याभावात् सम्यग्घेतुत्वं स्यात् इति उक्तं प्राक् । कालात्ययापदिष्टस्य तु लक्षणमसंगतमेव न हि २० प्रमाणप्रसिद्धत्रैरूप्यसद्भावे हेतोर्विषयबाधा संभविनी तयोर्विरोधात् साध्यसद्भाव एव हेतोर्धर्मिणि सद्भावस्त्रैरूप्यम् तदभाव एव च तत्र तत्सद्भावो बाधा भावाभावयोश्च एकत्र एकस्य विरोधः । किञ्च, अध्यक्षाऽऽगमयोः कुतो हेतुविषयबाधकत्वमिति वक्तव्यम्, स्वार्थासंभवे तयोरभावात् इति चेत् हेतावपि सति त्रैरूप्ये तत् समानमित्यसावपि तयोर्विषये बाधकः स्यात् दृश्यते हि चन्द्रार्कादिस्थैर्यग्राहि अध्यक्षं देशान्तरप्राप्तिलिङ्गप्रभवतद्गत्यनुमानेन बाध्यमानम् । अथ तत्स्थैर्यग्राह्यध्यक्षस्य तदा- २५ ऽऽभासत्वाद् बाध्यत्वं तर्हि एकशाखाप्रभवत्वानुमानस्यापि तदाभासत्वाद् बाध्यत्वमित्यभ्युपगन्तव्यम् । न चैवमस्त्विति वक्तव्यम् यतस्तस्य तदाभासत्वं किमध्यक्षबाध्यत्वात्, उत त्रैरूप्यवैकल्यात् ? न तावत् आद्यः पक्षः इतरेतराश्रयदोषसद्भावात्—तदाभासत्वे अध्यक्षबाध्यत्वम् ततश्च तदाभासत्वमिति एकाऽसिद्धौ अन्यतराऽप्रसिद्धेः । नापि द्वितीयः त्रैरूप्यसद्भावस्य तत्र परेणाभ्युपगमात् अनभ्युपगमे वा तत एव तस्यागमकतोपपत्तेरध्यक्षबाधाभ्युपगमवैयर्थ्यात् । न चाबाधितविषयत्वं ३० हेतुलक्षणमुपपन्नम् त्रैरूप्यवन्निश्चितस्यैव तस्य गमकाङ्गतोपपत्तेः । न च तस्य निश्चयः संभवति, स्वसंबन्धिनोऽबाधितत्वनिश्चयस्य तत्कालभाविनः असम्यगनुमानेऽपि सद्भावात् उत्तरकालभाविनः असिद्धत्वात्, सर्वसंबन्धिनस्तादात्विकस्य उत्तरकालभाविनश्चासिद्धत्वात् । न हि अर्वाग्दृशा 'सर्वत्र सर्वदा सर्वेषामत्र बाधकस्याभावः' इति निश्चेतुं शक्यम्, तन्निश्चयनिबन्धनस्याभावात् नानुपलम्भतन्निबन्धनः सर्वसंबन्धिनस्तस्यासिद्धत्वात्, आत्मसंबन्धिनः अनैकान्तिकत्वान्न संवादस्तन्निब- ३५ न्धनः प्राग् अनुमानप्रवृत्तेस्तस्यासिद्धेः अनुमानोत्तरकालं तत्सिद्ध्यभ्युपगमे इतरेतराश्रयदोषप्रसक्तेः । तथाहि—अनुमानात् प्रवृत्तौ संवादनिश्चयः ततश्चाबाधितत्वावगमे अनुमानप्रवृत्तिरिति परिस्फुटमितरेतराश्रयत्वम् । न चाविनाभावनिश्चयादपि अबाधितविषयत्वनिश्चयः, पञ्चलक्षणयोग्यविनाभापरिसमाप्तिवादिनामबाधितविषयत्वानिश्चये अविनाभावनिश्चयस्यैव असंभवात् । यदि च प्रत्यक्षाऽऽगमबाधितकर्मनिर्देशानन्तरप्रयुक्तस्यैव कालात्ययापदिष्टत्वम् तर्हि 'मूर्खोऽयं देवदत्तः, त्वत्पुत्र- ४० त्वात्, उभयाभिमतत्वत्पुत्रवत्' इत्यस्यापि गमकता स्यात् । न हि सकलशास्त्रव्याख्यातृत्वलिङ्गजनितानुमानबाधितविषयत्वमन्तरेण अन्यद् अध्यक्षबाधितविषयत्वम् आगमबाधितविषयत्वं वा अगम-

१-प्यातु-भां० मां० विना ।

कतानिबन्धनमस्यास्ति। न चानुमानस्य तुल्यबलत्वान्नानुमानं प्रति बाधकता संभविनी इति वक्त-
व्यम्, निश्चितप्रतिबन्धलिङ्गसमुत्थस्यानुमानस्यानिश्चितप्रतिबन्धलिङ्गसमुत्थेन अतुल्यबलत्वात् अत
एव न साधर्म्यमात्राद् हेतुर्गमकः अपि तु आक्षिप्तव्यतिरेकात् साधर्म्यविशेषात्। नापि व्यतिरेकमा-
त्रात् किन्तु अङ्गीकृतान्वयात् तद्विशेषात्। न च परस्परानुविद्धोभयमात्रादपि अपि तु परस्परस्व-
५ रूपाजहद्वृत्तिसाधर्म्य-वैधर्म्यरूपवत्त्वात्। न च प्रकृतहेतौ प्रतिबन्धनिश्चायकप्रमाणनिबन्धनं त्रैरूप्यं
निश्चितमिति, तदभावादेव अस्य हेत्वाभासत्वम् न पुनरसत्प्रतिपक्षत्वाऽबाधितविषयत्वापररूपविर-
हात्। यदा च पक्षधर्मत्वाद्यनेकवास्तवरूपात्मकमेकं लिङ्गमभ्युपगमविषयस्तदा तत् तथाभूतमेव
वस्तु प्रसाधयतीति कथं न विपर्ययसिद्धिः? न च साध्यसाधनयोः परस्परतो धर्मिणश्च एकान्तभेदे
पक्षधर्मत्वादिधर्मयोगो लिङ्गस्य उपपत्तिमान्, संबन्धासिद्धेः। न च समवायादेः संबन्धस्य निषेधे
१० एकार्थसमवायादिः साध्य-साधनयोः धर्मिणश्च सम्बन्धः संभवी, एकान्तपक्षे तादात्म्य-तदुत्पत्तिल-
क्षणोऽप्यसौ अयुक्त एव इति'पक्षधर्मत्वम्'इत्यादि हेतुलक्षणमसंगतमेव स्यात्। यदि च पक्षधर्मत्वा-
दिकं हेतोस्त्रैरूप्यमभ्युपगम्यते कथं न परवादाश्रयणम् एकस्य हेतोरनेकधर्मात्मकस्य अभ्युपगमात्।
न च यदेव पक्षधर्मस्य सपक्ष एव सत्त्वम् तदेव विपक्षात् सर्वतो व्यावृत्तत्वमिति वाच्यम्, अन्वय-
व्यतिरेकयोर्भावाभावरूपयोः सर्वथा तादात्म्यायोगात् तत्त्वे वा केवलान्वयी केवलव्यतिरेकी वा
१५ सर्वो हेतुः स्यात् न त्रिरूपवान् व्यतिरेकस्य च अभावरूपत्वात् हेतोस्तद्रूपत्वे अभावरूपो हेतुः
स्यात्। न चाभावस्य तुच्छरूपत्वात् स्वसाध्येन, धर्मिणा वा संबन्ध उपपत्तिमान्। न च विपक्षे
सर्वत्रासत्त्वमेव हेतोः स्वकीयं रूपं व्यतिरेकः न तुच्छाभावमात्रमिति वक्तव्यम्, यतो यदि सपक्ष
एव सत्त्वं विपक्षाद् व्यावृत्तत्वम् न ततो भिन्नमस्ति तदा तस्य तदेव सावधारणं[1] नोपपत्तिमत् वस्तुभू-
तान्याभावमन्तरेण प्रतिनियतस्य तस्य तत्राऽसंभवात्[2]। अथ ततः तद् अन्यद् धर्मान्तरम् तर्हि एक-
२० रूपस्य अनेकधर्मात्मकस्य हेतोस्तथाभूतस्य साध्याविनाभूतत्वेन निश्चितस्य अनेकान्तात्मकवस्तुप्रति-
पादनात् कथं न परोपन्यस्तहेतूनां सर्वेषां विरुद्धता एकान्तविरुद्धेनानेकान्तेन व्याप्तत्वात्?

किञ्च, हेतुः सामान्यरूपो वा उपादीयेत परैः, विशेषरूपो वा? यदि सामान्यरूपस्तदा तद्
व्यक्तिभ्यो भिन्नम्, अभिन्नं वा? न तावद् भिन्नम् 'इदं सामान्यम् अयं विशेषः, अयं तद्वान्' इति
वस्तुत्रयोपलम्भानुपलक्षणात् तथा च सामान्यस्य भेदेन अभ्युपगन्तुमशक्यत्वात्। न च समवाय-
२५ वशात् परस्परं तेषां भेदेन अनुपलक्षणम् यतः समवायस्य 'इह'बुद्धिहेतुत्वमुपगीयते, न च भेदग्रह-
णमन्तरेण 'इह इदमवस्थितम्'इति बुद्ध्युत्पत्तिसंभवः। किञ्च, "नागृहीतविशेषणा विशेष्ये बुद्धिः"
[ ] इति काणादानां सिद्धान्तः न च सामान्यनिश्चयः संस्थानभेदावसायमन्तरेण
उपपद्यते यतः दूरात् पदार्थस्वरूपमुपलभमानो नागृहीतसंस्थानभेदः अश्वत्वादिसामान्यमुपलब्धुं
शक्नोति, न च संस्थानभेदावगमस्तदाधारोपलम्भमन्तरेण संभवतीति कथं नेतरेतराश्रयदोषप्रसङ्गः।
३० तथाहि--पदार्थग्रहणे सति संस्थानभेदावगमः तत्र च सामान्य-विशेषावबोधः तस्मिंश्च सति पदार्थ-
स्वरूपावगतिः इति व्यक्तमितरेतराश्रयत्वम् चक्रकप्रसङ्गो वा। किञ्च, अश्वत्वादेः सामान्यभेदस्य
स्वाश्रयसर्वगतत्वे कर्कादिव्यक्तिशून्ये देशे प्रथमतरमुपजायमानाया व्यक्तेः अश्वत्वादिसामान्येन
योगो न भवेत् व्यक्तिशून्ये देशे सामान्यस्य अनवस्थानात् व्यक्त्यन्तरादनागमनाच्च ततः सर्वसर्वगतं
तद् अभ्युपगन्तव्यम् एवं च कर्कादिभिरिव शाबलेयादिभिरपि तद् अभिव्यज्येत। न च कर्कादीनामेव
३५ तदभिव्यक्तौ सामर्थ्यम् न शाबलेयादीनामिति वाच्यम्, यतः यया प्रत्यासत्त्या ता एव तद् आत्मनि
अवस्थापयन्ति तयैव ता एव 'अश्वः अश्वः' इति एकाकारपरामर्शप्रत्ययमुपजनयिष्यन्तीति किमपरत-
द्भिन्नसामान्यप्रकल्पनया? न च स्वाश्रयेन्द्रियसंयोगात् प्राक् स्वज्ञानजनने असमर्थं सामान्यं तदा
परैरनाधेयातिशयम् तमपेक्ष्य स्वावभासि ज्ञानं जनयति, प्राक्तनाऽसमर्थस्वभावाऽपरित्यागे स्वभावा-
न्तरानुत्पादे च तदयोगात् तथाभ्युपगमे च क्षणिकताप्रसक्तेः। न च स्वभावान्तरस्योपजायमानस्य,
४० ततो भेदः संबन्धासिद्धितः तत्सद्भावेऽपि प्राग्वत् तस्य स्वावभासिज्ञानजननायोगान्न प्रतिभासः
स्यात्। तथा च सामान्यस्य व्यक्तिभ्यो भेदेन अप्रतिभासमानस्य असिद्धत्वात् कथं हेतुत्वम्? किञ्च,
प्रतिव्यक्ति सामान्यस्य सर्वात्मना परिसमाप्तत्वाभ्युपगमात् एकस्यां व्यक्तौ विनिवेशितस्वरूपस्य तदैव

---

१ साधारणं वा० बा० भां० मां० विना। २-यतस्य तत्रा--वा० बा० भां० मां०।

व्यक्त्यन्तरे वृत्त्यनुपपत्तेस्तदनुरूपप्रत्ययस्य तत्रासंभवात् असाधारणता च हेतोः स्यात् । यदि च असाधारणरूपा व्यक्तयः स्वरूपतः तदा परसामान्ययोगादपि न साधारणतां प्रतिपद्यन्त इति व्यर्था सामान्यप्रकल्पना स्वतः असाधारणस्य अन्ययोगादपि साधारणरूपत्वानुपपत्तेः स्वतस्तद्रूपत्वेऽपि निष्फला सामान्यकल्पना इति व्यक्तिव्यतिरिक्तस्य सामान्यस्य अभावात् असिद्धस्तल्लक्षणो हेतुः इति कथं ततः साध्यसिद्धिः? अथ व्यक्त्यव्यतिरिक्तं सामान्यं हेतुः तदपि असंगतमेव व्यक्त्यव्यतिरिक्तस्य ५ व्यक्तिस्वरूपवद् व्यक्त्यन्तराननुगमात् सामान्यरूपतानुपपत्तेः व्यक्त्यन्तरसाधारणस्यैव वस्तुनः 'सामान्यम्' इत्यभिधानात् तत्साधारणत्वे वा न तस्य व्यक्तिस्वरूपाऽव्यतिरिच्यमानमूर्तिता सामान्यरूपतया भेदाव्यतिरिच्यमानस्वरूपस्य विरोधात् । तन्न व्यक्त्यव्यतिरिक्तमपि सामान्यं हेतुः व्यक्तिस्वरूपवत् असाधारणत्वेन गमकत्वायोगात् अत एव न व्यक्तिरूपमपि हेतुः । न चोभयं परस्परराननुविद्धं हेतुः उभयदोषप्रसङ्गात् । न अनुभयम् अन्योन्यव्यवच्छेदरूपाणामेकाभावे द्वितीयविधानात् अनुभयस्य १० असत्त्वेन हेतुत्वायोगात् बुद्धिप्रकल्पितं च सामान्यम् अवस्तुरूपत्वात् साध्येन अप्रतिबद्धत्वात् असिद्धत्वाच्च न हेतुः । तस्मात् पदार्थान्तरानुवृत्तव्यावृत्तरूपमात्मानं बिभ्रद् एकमेव पदार्थस्वरूपं प्रतिपत्तुर्भेदाभेदप्रत्ययप्रसूतिनिबन्धनं हेतुत्वेन उपादीयमानं तथाभूतसाध्यसिद्धिनिबन्धनमभ्युपगन्तव्यम् । न च यदेव रूपं रूपान्तराद् व्यावर्तते तदेव कथमनुवृत्तिमासादयति, यच्च अनुवर्तते तत् कथं व्यावृत्तिरूपतामात्मसात्करोति इति वक्तव्यम् भेदाभेदरूपतया अध्यक्षतः प्रतीयमाने वस्तु- १५ स्वरूपे विरोधासिद्धेरिति असकृद् आवेदितत्वात् ।

किञ्च, एकान्तवाद्युपन्यस्तहेतोः किं सामान्यं साध्यम्, आहोस्विद् विशेषः, उत उभयं परस्परविविक्तम्, उतस्विद् अनुभयमिति विकल्पाः । तत्र न तावत् सामान्यम् केवलस्य तस्य असंभवात् अर्थक्रियाकारित्वविकलत्वाच्च । नापि विशेषः तस्य अननुयायित्वेन साधयितुमशक्यत्वात् । नापि उभयम् उभयदोषानतिवृत्तेः । नापि अनुभयम् तस्य असतो हेत्वव्यापकत्वेन साध्यत्वायोगात् । २० एतदेव आह गाथापश्चार्धेन **अन्योन्यप्रतिकुष्टौ** प्रतिक्षिप्तौ **द्वावपि एतौ** सामान्य-विशेषैकान्तौ **असद्वादा**विति । इतरविनिर्मुक्तस्य एकस्य शशशृङ्गादेरिव साधयितुमशक्यत्वात् ॥ ५६ ॥

[परस्परभिन्नं सामान्य-विशेषयोः स्वरूपमनूद्य तस्य निराकरणम्]

सामान्य-विशेषयोः स्वरूपं परस्परविविक्तमनूद्य निराकुर्वन् आह—

दव्वट्ठियवत्तव्वं सामण्णं पज्जवस्स य विसेसो । २५

एए समोवणीआ विभज्जवायं विसेसेंति[1] ॥ ५७ ॥

द्रव्यास्तिकस्य वक्तव्यं वाच्यम् विशेषनिरपेक्षं **सामान्य**मात्रम्, **पर्यायास्तिकस्य** पुनः अनुस्यूताकारविविक्तो **विशेष** एव वाच्यः **एतौ** च सामान्यविशेषौ अन्योन्यनिरपेक्षौ एकैकरूपतया परस्परप्राधान्येन वा एकत्र **उपनीतौ** प्रदर्शितौ **विभज्यवादम्** अनेकान्तवादं सत्यवादस्वरूपम् **अतिशयाते** असत्यरूपतया ततः तौ अतिशयं लभेते इति यावत्—विशेषे साध्ये अनुगमाभा- ३० वतः, सामान्ये साध्ये सिद्धसाधनतया साधनवैफल्यतः, प्रधानोभयरूपे साध्ये उभयदोषापत्तितः, अनुभयरूपे साध्ये उभयाभावतः साध्यत्वायोगात् । तस्माद् विवादास्पदीभूतसामान्यविशेषोभयात्मकसाध्यधर्माधारसाध्यधर्मिणि अन्योन्यानुविद्धसाधर्म्यवैधर्म्यस्वभावद्वयात्मकैकहेतुप्रदर्शनतो नैकान्तवादपक्षोक्तदोषावकाशः संभवी, अत एव गाथापश्चार्धेन—एतौ सामान्य-विशेषौ समुपनीतौ परस्परसव्यपेक्षतया 'स्यात्'पदप्रयोगतो धर्मिणि अवस्थापितौ विभज्यवादम् एकान्तवादम् ३५ **विशेषयतः** निराकुरुतः एवमेव तयोरात्मलाभात् अन्यथा अनुमानविषयस्य उक्तन्यायतः असत्त्वात् इत्यपि दर्शयति ॥ ५७ ॥

[अनेकान्तरूपतया वस्तु साधयतो वादिनोऽजेयत्वाभिधानम्]

यत्र अनुमानविषयतया अभ्युपगम्यमाने साध्ये दूषणवादिनः अवकाश एव न भवति तदेव तत्साध्यं हेतुविषयतया अभ्युपगन्तव्यमिति दर्शयन्नाह—

1-सेसंति भां० मां० आ० हा० वि० ।

हेउविसओवणीयं जह वयणिज्जं परो नियत्तेइ ।
जइ तं तहा पुरिल्लो दाइंतो केण जिंव्वंतो ॥ ५८ ॥

हेतुविषयतया उपनीतम् उपदर्शितं साध्यधर्मिलक्षणं वस्तु पूर्वपक्षवादिना 'अनित्यः शब्दः' इत्येवं यथा वचनीयं परो दूषणवादी निवर्तयति सिद्धसाध्यताऽननुगमदोषाद्युपन्या-
५ सेन एकान्तवचनीयस्य तदितरधर्मानुपक्तस्य अनेकदोषदुष्टतया निवर्तयितुं शक्यत्वात् । यदि तत् तथा द्वितीयधर्माक्रान्तं 'स्यात्'शब्दयोजनेन पुरिल्लः पूर्वपक्षवादी अदर्शयिष्यत ततोऽसौ नैव केनचिद् अजेष्यत । जितश्चासौ तथाभूतस्य साध्यधर्मिणोऽप्रदर्शनात् प्रदर्शितस्य च एकान्तरूपस्य असत्त्वात् तत्प्रदर्शकोऽसत्यवादितया निग्रहार्ह इति ॥ ५८ ॥

[एकान्तानिश्चितरूपाभ्यां वस्तु वदतो लौकिकपरीक्षकाग्राह्यवचनत्वकथनम्]

१० एतदेव दर्शयन्नाह—

एयन्ताऽसब्भूयं सब्भूयमणिच्छियं च वयमाणो ।
लोइय-परिच्छियाणं वयणिज्जपहे पडइ वादी ॥ ५९ ॥

आस्तां तावत् एकान्तेन असद्भूतम् असत्यम्, सद्भूतमपि अनिश्चितं वदन् वादी लौकिकानाम् परीक्षकाणां च वचनीयमार्गं पतति । ततः अनेकान्तात्मकाद् हेतोः तथा-
१५ भूतमेव साध्यधर्मिणं साधयन् वादी सद्वादी स्यादिति तथैव साध्याऽविनाभूतो हेतुर्धर्मिणि तेन प्रदर्शनीयः तत्प्रदर्शने च 'हेतोः सपक्ष-विपक्षयोः सदसत्त्वमवश्यं प्रदर्शनीयम्' इति यदुच्यते परैः तद् अपास्तं भवति तावन्मात्रादेव साध्यप्रतिपत्तेः । न च ततस्तत्प्रतिपत्तावपि विद्यमानत्वाद् रूपान्तरमपि तत्रावश्यं प्रदर्शनीयम्, ज्ञानत्वादेरपि तत्र प्रदर्शनप्रसक्तेः । अथ सामर्थ्यात् तत् प्रतीयत इति न वचनेन प्रदर्श्यते तर्हि अन्वय-व्यतिरेकावपि तत एव नावश्यं प्रदर्शनीयौ । अत एव
२० दृष्टान्तोऽपि नावश्यं वाच्यः साधर्म्य-वैधर्म्यप्रदर्शनपरत्वात् तस्य । उपनय-निगमनवचनयोस्तु दूरापास्तता तदन्तरेणापि साध्याविनाभूतहेतुप्रदर्शनमात्रात् साध्यप्रतिपत्त्युत्पत्तेः अन्यथा तदयोगात् । त्रिलक्षणहेतुप्रदर्शनवादिनस्तु निरंशवस्त्वभ्युपगमविरोधः निरंशे त्रैलक्षण्यविरोधात् परिकल्पितस्वरूपत्रैरूप्याभ्युपगमोऽप्यसंगतः परिकल्पितस्य परमार्थसत्त्वे तद्दोषानतिक्रमात् अपरमार्थसत्त्वे तल्लक्षणत्वायोगात् असतः सल्लक्षणत्वविरोधात् । न च कल्पनाव्यवस्थापितलक्षणभेदाल्लक्ष्य-
२५ भेद उपपत्तिमान् इति लिङ्गस्य निरंशस्वभावस्य किञ्चिद् रूपं वाच्यम् । न च साधर्म्यादिव्यतिरेकेण तस्य स्वरूपं प्रदर्शयितुं शक्यत इति तस्य निस्स्वभावताप्रसक्तिः । न चैकलक्षणहेतुवादिनोऽपि अनेकान्तात्मकवस्त्वभ्युपगमाद् दर्शनव्याघात इति वाच्यम् "प्रयोगनियम एव एकलक्षणो हेतुः" [ ] इति अभिधानात् । न च स्वभावनियमे तथाभूतस्य शशशृङ्गादेरिव निःस्वभावत्वात् । 'गमकाङ्गनिरूपणया एकलक्षणो हेतुः' इति व्यवस्थापितत्वात् । न च एकान्तवादिनां प्रतिबन्धग्रहणमपि
३० युक्तिसंगतम् अविचलितरूपे आत्मनि ज्ञानपौर्वापर्याऽभावात् प्रतिक्षणध्वंसिन्यपि उभयग्रहणानुवृत्तैकचैतन्याभावात् 'कारणस्वरूपग्राहिणा ज्ञानेन कार्यस्य तत्स्वरूपग्राहिणा च कारणस्य ग्रहणासंभवात् एकेन च द्वयोरग्रहणे कार्यकारणभावादेः प्रतिबन्धस्य ग्रहणायोगात् कारणादिस्वरूपाव्यतिरेकेऽपि कारणत्वादेर्न तत्स्वरूपग्राहिणा कार्यकारणभावादेर्ग्रहः एकसंबन्धिस्वरूपग्रहणेऽपि तद्ग्रहणप्रसक्तेः । न च तद्ग्रहेऽपि निश्चयानुत्पत्तेर्न दोषः सविकल्पकत्वेन प्रथमाक्षसन्निपातजस्य अध्यक्षस्य
३५ व्यवस्थापनात् । न च कार्यानुभवानन्तरभाविना स्मरणेन कार्यकारणभावोऽनुसंधीयत इति वक्तव्यम् अनुभूत एव स्मरणप्रादुर्भावात् न च प्रतिबन्धः केनचिदनुभूतः तस्य उभयनिष्ठत्वात् उभयस्य च पूर्वापरकालभाविनः एकेन अग्रहणात् । न च कार्यानुभवानन्तरभाविनः स्मरणस्य

१ जिप्पंतो गु० मू० मु० मू० । २-त्येव य—वा० बा० । ३-परिच्छया—गु० मू० मु० मू० ४ न स—वृ० । ५-त्पत्तेरदो—वा० बा० भां० मां० ।

कार्यानुभवो जनकः तदनन्तरं स्मरणस्य अभावात् । न च क्षणिकैकान्तवादे कार्यकारणभाव उपपत्तिमान् इत्युक्तम् । न च संतानादिकल्पनाप्यत्रोपयोगिनी । न च स्मरणकाले अतीततद्विषयस्मरणमात्रं प्रतीयते अपि तु तदनुभविताऽपि 'अहमेवमिदमनुभूतवान्' इति अनुभवित्राधारानुभूतविषयस्मृत्यध्यवसायात् एकाधारे अनुभव-स्मरणे अभ्युपगन्तव्ये तदभावे तथाऽध्यवसायानुपपत्तेः । न चानुभव-स्मरणयोः अनुगतचैतन्याभावे तद्धर्मतया प्रतिपत्तिर्युक्ता, न हि यत्प्रतिपत्तिकाले यद् ५ नास्ति तत् तद्धर्मतया प्रतिपत्तुं युक्तम्, बोधाभावे ग्राह्य-ग्राहक-संवित्तित्रितयप्रतिपत्तिवत्, अस्ति च तद्धर्मतया अनुभव-स्मरणयोस्तदा प्रतिपत्तिरिति कथं क्षणिकैकान्तवादः तत्र वा प्रतिबन्धनिश्चय इति ? न चैकान्तवादिनः सामान्यादिकं साध्यं संभवतीति प्रतिपादितम् । तस्मात् अनेकान्तात्मकं वस्तु अभ्युपगन्तव्यम् अध्यक्षादेः प्रमाणस्य तत्प्रतिपादकत्वेन प्रवृत्तेः ॥ ५९ ॥

[निर्दोषभावप्ररूपणाया मार्गप्रकाशनम्] १०

स एव च सन्मार्गः इति उपसंहरन्नाह—

दव्वं खित्तं कालं भावं पज्जाय-देस-संजोगे ।
भेदं च पडुच्च समा भावाणं पण्णवणपज्जा ॥ ६० ॥

द्रव्य-क्षेत्र-काल-भाव-पर्याय-देश-संयोगान् भेदं चेत्यष्टौ भावान् आश्रित्य वस्तुनो भेदे सति **समा** सर्ववस्तुविषयायाः **प्रज्ञापना**याः स्याद्वादरूपायाः **पर्या**[1] पन्था मार्ग १५ इति यावत् ।

तत्र द्रव्यं पृथिव्यादि, क्षेत्रं स्वारम्भकावयवस्वरूपम् तदाश्रयं वा आकाशम्, कालं युगपदयुगपच्चिरक्षिप्रप्रत्ययलिङ्गलक्षणम् वर्तनात्मकं वा नव-पुराणादिलक्षणम्, भावं मूलाङ्कुरादिलक्षणम्, पर्यायं रूपादिस्वभावम्, देशं मूलाङ्कुरपत्रकाण्डादिक्रमभाविविभागम्, संयोगं भूम्यादिप्रत्येकसमुदायं द्रव्य-पर्यायलक्षणम्, भेदं प्रतिक्षणविवर्तात्मकं वा जीवाजीवादि**भावानां प्रतीत्य** २० समानतया तदतदात्मकत्वेन प्रज्ञापना निरूपणा या सा सत्पथ इति न हि तदतदात्मकैकद्रव्यत्वादिभेदाभावे खरविषाणादेर्जीवादिद्रव्यस्य विशेषः यतो न द्रव्य-क्षेत्र-काल-भाव-पर्याय-देश-संयोग-भेदरहितं वस्तु केनचित् प्रत्यक्षाद्यन्यतमप्रमाणेन अवगन्तुं शक्यम् । न च प्रमाणागोचरस्य सद्व्यवहारगोचरता संभविनीति तदतदात्मकं तद् अभ्युपगन्तव्यम् । न हि एकान्ततः अतदात्मकं द्रव्यादिभेदभिन्नम् व्यतिरिक्तरूपं च प्रमाणतस्तद् निरूपयितुं शक्यम् द्रव्यादिव्यतिरिक्तस्य शश-२५ शृङ्गवत् कुतश्चित् प्रमाणाद् अप्रतीतेः न हि ततो द्रव्यादीनां भेदेऽपि समवायसंबन्धवशात् तत्संबद्धताप्रसङ्गः संबन्धिभेदेन तद्भेदाभेदकल्पनाद्वयानतिवृत्तेः । प्रथमविकल्पे समवायानेकत्वप्रसक्तिः संबन्धिभेदतो भेदात् संयोगवद् अनित्यत्वप्रसक्तिश्च । द्वितीयकल्पनायामपि संबन्धिसंकरप्रसक्तिः । न चैवं छत्र-दण्ड-कुण्डलादिसंबन्धविशेषविशिष्टदेवदत्तादेरिव समवायिनो जाति-गुणत्वादेर्भेदेन उपलब्धेर्न(ब्धिर्न)हि य एव दण्ड-देवदत्तयोः संबन्धः स एव छत्रादिभिरपि तत्संबन्धाविशेषे तद्वि-३० शेषणविशेष्यवैफल्यप्रसक्तेः न हि विशेषणं विशेष्यं धर्मान्तराद् व्यवच्छिद्य आत्मन्यव्यवस्थापयद् विशेषणरूपतां प्रतिपद्यते एवं समवायसंबन्धस्याविशेषे द्रव्यत्वादीनामपि विशेषणानामविशेषान्न जीवाजीवादिद्रव्यव्यवच्छेदकता स्यात् इति समवायिसंकरप्रसक्तिः कथं नासज्येत ? न च समवायतद्ग्राहकप्रमाणाभावात् संभवति तदभावे न वस्तुनो वस्तुत्वयोगो भवेदिति तद् अनेकान्तात्मकंकः रूपमभ्युपगन्तव्यम् । न चैकानेकात्मकत्वं वस्तुनो विरुद्धम् प्रमाणप्रतिपन्ने वस्तुनि विरोधायोगात् । ३५ तथाहि—एकानेकात्मकम् आत्मादि वस्तु, प्रमेयत्वात्, चित्रपटरूपवत् ग्राह्यग्राहकाकारसंवित्तिरूपैकविज्ञानवद् वा । न च वैशेषिकं प्रति चित्रपटरूपस्य एकानेकत्वमसिद्धम् प्राक् प्रसाधितत्वात् । नापि ग्राह्यग्राहकसंवित्तिलक्षणरूपत्रयात्मकमेकं विज्ञानं बौद्धं प्रत्यसिद्धम् तथाभूतविज्ञानस्य प्रत्यात्मसंवेदनीयस्य प्रतिक्षेपे सर्वप्रमाण-प्रमेयप्रतिक्षेपप्रसक्तेः । स्वार्थाकारयोर्विज्ञानमभिन्नस्वरूपम्, विज्ञा-

---

१ "पद्येत्यर्थः" बृ० टि० । २ वर्तमानात्म—भां० मां० आ० । ३-त्यकं स—वा० बा० । ४-त्मनि अनवस्था—वा० बा० भां० मां० । ५-वायसं—बृ० आ० हा० वि० ।

नस्य च वेद्य-वेदकाकारौ भिन्नात्मानौ कथञ्चिद् अनुभवगोचरापन्नौ, एतच्च प्रतिक्षणं स्वभावभेद-
मनुभवदपि न सर्वथा भेदवत् संवेद्यते इति संविदात्मनः स्वयमेकस्य क्रमवर्त्यनेकात्मकत्वं न विरोध-
मनुभवतीति कथमध्यक्षादिविरुद्धं निरन्वयविनाशित्वमभ्युपगन्तुं युक्तम्? न हि कदाचित् क्वचित्
क्षणिकत्वमन्तर्बहिर् वा अध्यक्षतोऽनुभूयते 'तथैव' इति निर्णयानुत्पत्तेः भेदात्मन एव अन्तर्विज्ञानस्य
५ बहिर्घटादेश्च अभिन्नस्य निश्चयात्। तथाभूतस्यापि अनुभवस्य भ्रान्तिकल्पनायां न किञ्चिद् अध्यक्ष-
मभ्रान्तलक्षणभाग् भवेत् न हि ज्ञानं वेद्य-वेदकाकारशून्यं स्थूलाकारविविक्तम् परमाणुरूपं वा
घटादिकमेकं निरीक्षामहे यतः बाह्याध्यात्मिकं भेदाभेदरूपतया अनुभूयमानं भ्रान्तविज्ञानविषयतया
व्यवस्थाप्येत। अतः "यथादर्शनमेव इयं मानमेयव्यवस्थितिः न पुनर्यथातत्त्वम्" [ ]
इत्येतद् अनिश्चितार्थाभिधानम्। न हि क्वचित् केनचित् प्रमाणेन एकान्तरूपं वस्तुतत्त्वमयं प्रतिपन्न-
१० वान् यत एवं वदन् शोभेत । यदा च अध्यक्षविरुद्धः निरंशक्षणिकैकान्तः ततो नानुमानमपि अत्र
प्रवर्तितुमुत्सहते अध्यक्षबाधितविषयत्वात् तस्य । तेन "निरन्वयविनश्वरं वस्तु प्रतिक्षणमवेक्ष-
माणोऽपि नावधारयति" [ ] इत्येतदपि असदभिधानम्, प्रतिक्षणविशरारुतायाः
कुतश्चिदपि अनीक्षणात्।

[एकान्तक्षणिकाक्षणिकत्वे निरस्य तदुभयात्मकत्वसाधनम्]

१५ अत एव क्षणिकत्वैकान्ते सत्त्वादिहेतुरुपादीयमानः सर्व एव विरुद्धः अनेकान्त एव तस्य
संभवात्। तथाहि—अर्थक्रियालक्षणं सत्त्वम् न चासौ तदेकान्ते क्रम-यौगपद्याभ्यां संभवति, यतः
'यस्मिन् सत्येव यद् भवति तत् तस्य कारणम् इतरच्च कार्यम्' इति कार्यकारणलक्षणम् क्षणिके च
कारणे सति यदि कार्योत्पत्तिर्भवेत् तदा कार्य-कारणयोः सहोत्पत्तेः किं कस्य कारणम् किं वा कार्यं
व्यवस्थाप्येत त्रैलोक्यस्य च एकक्षणवर्तिता प्रसज्येत । 'यदनन्तरं यद् भवति तत् तस्य कार्यम्
२० इतरत् कारणम्' इति व्यवस्थायां कारणाभिमते वस्तुनि असत्येव भवतस्तदनन्तरभावित्वस्य दुर्घट-
त्वात् चिरतरविनष्टादपि च तस्य भावो भवेत् तदभावाविशेषात्। न च अनन्तरस्यापि कार्योत्पत्ति-
कालमप्राप्य विनाशमनुभवतश्चिरातीतस्येव कारणता यतः अर्थक्रिया क्षणक्षयेण विरुध्येत प्राक्काल-
भावित्वेन कारणत्वे सर्वं प्रति सर्वस्य कारणता प्रसज्येत सर्ववस्तुक्षणानां विवक्षितकार्यं प्रति
प्राग्भावित्वाविशेषात् तथा च स्वपरसंतानव्यवस्थाऽपि अनुपपन्नैव स्यात्। न च सादृश्यात् तद्व्य-
२५ वस्था सर्वथा सादृश्ये कार्यस्य कारणरूपताप्रसक्तेरेकक्षणमात्रं संतानः प्रसज्येत, कथंचित्सादृश्ये[3]-
ऽनेकान्तवादप्रसक्तिः न च सादृश्यं भवदभिप्रायेण अस्ति सर्वत्र वैलक्षण्याविशेषात् अन्यथा
स्वकृतान्तप्रकोपात् । न च क्षणिकैकान्तवादिनः अन्वय-व्यतिरेकप्रतिपत्तिः संभवतीति साध्य-
साधनयोस्त्रिकालविषययोः साकल्येन व्याप्तेरसिद्धेः यत् सत् तत् सर्वं क्षणिकम् संश्च शब्द इत्याद्यनु-
मानप्रवृत्तिः कथं[4] भवेत्? अकारणस्य च प्रमाणविषयत्वानभ्युपगमे साध्य-साधनयोस्त्रिकालविषय-
३० व्याप्तिग्रहणस्य दूरोत्सारितत्वात् "नाननुकृतान्वयव्यतिरेकं कारणम् नाकारणं विषयः" [ ]
इति वचनमनुमानोच्छेदकं च प्रसक्तम् ग्राह्यग्राहकाकारज्ञानैकत्ववद् ग्राह्याकारस्यापि युगपदने-
कार्थावभासिनश्चित्रैकरूपता एकान्तवादं प्रतिक्षिपत्येव भ्रान्त्यात्मनश्च दर्शनस्य अन्तर् बहिश्च
अभ्रान्तात्मकत्वं कथंचिद् अभ्युपगन्तव्यम् अन्यथा कथं स्वसंवेदनाध्यक्षता तस्य भवेत् तदभावे च
कथं तत्स्वभावसिद्धिर्युक्ता? कथं च भ्रान्तज्ञानं भ्रान्तिरूपतया आत्मानमसंविदद् ज्ञानरूपतया[5] वा
३५ अवगच्छद् बहिस्तथा नावगच्छेत् यतो भ्रान्तैकान्तरूपता तिमिराद्युपप्लुतदृशां भवेत्? कथं च
भ्रान्तविकल्पज्ञानयोः[6] स्वसंवेदनमभ्रान्तमविकल्पं वा अभ्युपगच्छन् अनेकान्तं नाभ्युपगच्छेत्? ग्राह्य-
ग्राहकसंवित्त्याकारविवेकं[7] संविदः स्वसंवेदनेनासंवेदयन् संविद्रूपतां च अनुभवन् कथं क्रमभाविनो-
र्विकल्पेतरात्मनोरनुगतसंवेदनात्मानमनुभवप्रसिद्धं प्रतिक्षिपेत्? ततः क्रम-सहभाविनः परस्पर-

१ तथैव नि—बृ० वा० बा०। तथेति नि-आ० वि०। तथैति नि-हा०।

२ "अयं सौगतः 'यथादर्शनमेव मानमेयफलस्थितिः क्रियते न पुनर्यथातत्त्वं सा क्रियते' इत्येवं ब्रूयात्"—सिद्धिवि० टि० लि० पृ० १२२ पं० २२।

३-श्ये नैका—बृ० विना। ४ कथं न भ—वा० बा० भां० मां०। ५-या चाव-वा० बा० भां० मां०।
६ भ्रान्तावि-भां० मां०। ७-वेकसं-वा० बा० भां० मां० विना।

विलक्षणान् स्वभावान् यथावस्थितरूपतया व्याप्नुवत् सकललोकप्रतीतं स्वसंवेदनम् अनेकान्त-
तत्त्वव्यवस्थापकमेकान्तवादप्रतिक्षेपि प्रतिष्ठितमिति 'निरंशाक्षणिकस्वलक्षणमन्तर्बहिश्चानिश्चिनमपि
संवित्तिर्विषयीकरोति' इति कल्पना अयुक्तिसंगतैव अप्रमाणप्रसिद्धकल्पनायाः सर्वत्र निरङ्कुशत्वात्
सकलसर्वज्ञताकल्पनप्रसक्तेः न हि एकस्य संवित्तिः अपरस्य असंवित्तिः सर्वत्र संबन्धाभावा-
विशेषात् न हि वास्तवसंबन्धाभावे परिकल्पितस्य तस्य नियामकत्वं युक्तम् अतिप्रसङ्गात् । न च ५
वास्तवः संबन्धः परस्य सिद्धः इति तादात्म्य-तदुत्पत्त्योरभावात् साध्य-साधनयोः प्रतिबन्ध-
नियमाभावे अनुमानप्रवृत्तिर्दूरोत्सारितैव ।

अथ क्षणिकान्निवर्तमानमपि अर्थक्रियालक्षणं सत्त्वमक्षणिके अवस्थास्यतीति न ततोऽनेकान्ता-
त्मकवस्तुसिद्धिः, न; अक्षणिकेऽपि क्रमयौगपद्याभ्यां तस्य विरोधात् । तथाहि—न तावद् अक्षणि-
कस्य क्रमवत् कार्यकरणम् प्राक् तत्करणसमर्थस्य अभिमतक्षणवत् तदकरणविरोधात् । प्राक् तदसा- १०
मर्थ्ये पश्चादपि न तत्सामर्थ्यम् अपरिणामिनोऽनाधेयाऽप्रहेयातिशयत्वात् स्वभावोत्पत्तिविनाशाभ्यु-
पगमेऽपि नित्यैकान्तवादविरोधात् । ततो व्यतिरिक्तस्य अतिशयस्य करणे अनतिशयस्य तस्य प्रागिव
पश्चादपि तत्करणासंभवात् । सहकारिकारणापेक्षाऽपि तस्य अयुक्तैव यतोऽसहायस्य प्रागकरणस्व-
भावस्य पुनः ससहायस्य कार्यकरणं भवेत् न हि सहकारिकृतमतिशयमनङ्गीकुर्वतस्तदपेक्षा उपपत्ति-
मती । तन्न क्रमेण अपरिणामी भावः कार्यं निर्वर्तयति । नापि यौगपद्येन, कालान्तरे तस्याकिञ्चित्क- १५
रत्वेनावस्तुत्वापपत्तेः क्षणमात्रावस्थायित्वप्रसक्तेः । न च क्रम-यौगपद्यव्यतिरिक्तं प्रकारान्तरं संभव-
तीति अर्थक्रिया व्यापिका निवर्तमाना व्याप्यां सत्तां नित्यादपि आदाय निवर्तते इति यत् सत् तत्
सर्वमनेकान्तात्मकं सिद्धम् अन्यथा प्रत्यक्षादिविरोधप्रसक्तेः न हि भेदमन्तरेण कदाचित् कस्यचिद्
अभेदोपलब्धिः हर्ष-विषादाद्यनेकाकारविवर्तात्मकस्य अन्तश्चैतन्यस्य स्वसंवेदनाध्यक्षतः वर्ण-संस्थान-
सदाद्यनेकाकारस्य स्थूलस्य पूर्वापरस्वभावपरित्यागोपादानात्मकस्य घटादेर्बहिरेकस्य इन्द्रियजाध्य- २०
क्षतः संवेदनात् सुखादि-रूपादिभेदविकलतया चैतन्य-घटादेः कदाचिदपि उपलम्भागोचरत्वात्
महासामान्यस्य अवान्तरसामान्यस्य वा सर्वगताऽसर्वगतधर्मात्मकस्य व्यक्तिव्यतिरिक्तस्वभावतया
कदाचित् क्वचिद् अनुपलब्धेः द्रव्य-गुण-कर्मणां कथं तद्विशिष्टतया प्रतिपत्तिर्भवेत् ? समवायस्य च
अनवस्थादोषतः संबन्धान्तराभावाद् द्रव्य-गुण-कर्म-सामान्य-विशेषाणामन्योन्यं तादात्म्यानिष्टौ
तेषु अवृत्तेः सर्वपदार्थस्वरूपाऽप्रसिद्धिः स्यात् । स्वत एव समवायस्य द्रव्यादिषु वृत्तौ समवायमन्तरे- २५
णापि द्रव्यादयोऽपि स्वाधारेषु वृत्तिं स्वत एव आत्मसात्करिष्यन्तीति समवायकल्पनावैयर्थ्यप्र-
सक्तिः । अवयविनोऽपि स्वारम्भकावयवेषु तादात्म्यानभ्युपगमे सामान्यस्येव तद्वत्सु वृत्तिविकल्पान-
वस्थादिदोषप्रसङ्गान्न वृत्तिर्भवेत् वृत्तौ वा साकल्येन प्रत्याधारं ग्रहणासंभवात् व्यक्तिवद् भेदप्र-
सक्तिः खण्डशः प्रतिपत्तेः अगृहीतस्वभावाद् गृहीतस्वभावस्य भेदात् तथा च सामान्यादिरूपताहा-
निप्रसक्तिः । ३०

किञ्च, सर्वस्वाधारव्यापिनः सामान्यस्य द्रव्यस्य वा तद्वतां सामस्त्येन ग्रहणासंभवात् कथं तद्-
ग्रहे तद्ग्रहणं भवेत् आधाराप्रतिपत्तौ तदाधेयस्य तत्त्वेनाप्रतिपत्तेः सामान्याद्यंशेषु गृहीतेष्वपि सामा-
न्यादेर्वृत्तिविकल्पादिदोषस्तेष्वपि पूर्ववत् समानः तदंशग्रहणेऽपि च सामान्यस्य व्यापिनः कदाचिद्
अपि अप्रतिपत्तेः 'सद् द्रव्यम्' इत्यादिप्रतिपत्तिस्तद्वत्सु न कदाचिद् भवेत् तदंशानां सामान्यादेर-
त्यन्तभेदात् अत एव द्रव्यादिषट्पदार्थव्यवस्थाऽपि अनुपपन्ना भवेत् प्रतिभासगोचरचारिणां ३५
सामान्याद्यंशानां पदार्थान्तरत्वप्रसक्तेः । अथ निरंशं सामान्यमभ्युपगम्यते इति नायं दोषस्तर्हि
सकलस्वाश्रयप्रतिपत्त्यभावतो मनागपि न सामान्यप्रतिपत्तिरिति 'सद् द्रव्यं पृथिवी' इत्यादिप्रति-
पत्तेर्नितरामभावः स्यात् । तदंशानां सामान्याद् भेदाभेदकल्पनायां द्रव्यादय एव भेदाभेदात्मकाः
किं नाभ्युपगम्यन्ते इति सामान्यादिप्रकल्पना दूरोत्सारितैव इति कुतस्तद्भेदैकान्तकल्पना ? ततः
सामान्यविशेषात्मकं सर्वं वस्तु सत्त्वात् न हि विशेषरहितं सामान्यमात्रम् सामान्यरहितं वा विशेष- ४०
मात्रं संभवति । तादृशः क्वचिदपि वृत्तिविरोधात् वृत्त्या हि सत्त्वं व्याप्तं स्वलक्षणात् सामान्यलक्षणाद्
वा तादृशाद् वृत्तिनिवृत्त्या निवर्तत एव यतः क्वचिद् वृत्तिमतोऽपि स्वलक्षणस्य न देशान्तरवर्तिना

१-वानन्यथा-वा० बा० भां० मां० । २ अत्र लिपिकारभ्रमः आत्मनेपदमनित्यमिति न्यायाद्वा समर्थनीयम् ।
३ तत्कार-भां० मां० । ४ वृत्तिः स्वतोपि बृ० आ० ।

अन्येन संयोगः तत्संसर्गाव्यवच्छिन्नस्वभावान्तरविरहाद् विशेषविकलसामान्यवत् एकस्य प्रतिं-
संबन्धि संबन्धस्वभावविशेषाभ्युपगमे विशेषाणां तत्स्वलक्षणं सामान्यलक्षणमेव स्यात् । न च
विशेषैरन्यदेशस्थितैरसंयुक्तस्यैकत्र तस्य वृत्तिः अव्यवधानाविशेषात् एवं च स्वभावविशेषाणां
सामान्यरूपाः सर्वे एव भावाः विशेषरूपाश्च । तत्र देश-कालावस्थाविशेषनियतानां सर्वेषामपि सत्त्वं
५ सामान्यमेकरूपम् अव्यवधानात् तस्य च ते विशेषा एव अनेकं रूपम् यतः तदेव सत्त्वं परिणाम-
विशेषापेक्षया गोत्व-ब्राह्मणत्वादिलक्षणा जातिः परिणामविशेषाश्च तदात्मका व्यक्तयः इति परस्पर-
व्यावृत्तानेकपरिणामयोगाद् एकस्य एकानेकपरिणतिरूपता संशयज्ञानस्येव अविरुद्धा व्यक्तिव्यति-
रिक्तस्य सामान्यस्य उपलब्धिलक्षणप्राप्तस्य अनुपलब्धेः शशशृङ्गवत् असत्त्वात् 'सन् घटः' इत्यादि-
प्रत्ययः सामान्यविशेषात्मकवस्त्वभावे अबाधितरूपो न स्यात् । न च चक्षुरादिबुद्धौ वर्णाकृत्यक्षराका-
१० रशून्यं सामान्यं परव्यावर्णितस्वरूपमवभासते प्रतिभासभेदप्रसङ्गात् । यदि च तत् सर्वगतम् पिण्डा-
न्तरालेऽपि उपलभ्येत स्वभावाविशेषात् । आश्रयाभावात् अनभिव्यक्त्यभ्युपगमे अभिव्यक्ताद्
अनभिव्यक्तस्वरूपस्य भेदात् सामान्यरूपता न स्यात् । न च आश्रयभावाभावौ अभिव्यक्त्यन-
भिव्यक्ती सत्प्रत्ययकर्तृत्वाऽकर्तृत्वे नित्यैकस्वभावस्य युज्येते, तद्रूपयोगिनोऽप्येकत्वे कथं नानेका-
न्तसिद्धिः ? स्वाश्रयसर्वगतत्वेऽपि सत्ताया आश्रयेण एकेन एकदा प्रकाशितायाः सर्वदा सर्वत्र प्रका-
१५ शितत्वात् सकलवस्तुप्रपञ्चस्य सकृद् उपलब्धिप्रसङ्गः न वा कस्यचिद् उपलब्धिः स्यात् अविशेषात् ।
प्रकारान्तरेण प्रतीत्यभ्युपगमे अनेकान्तवाद एव । स्वतः सतां विशेषाणां सत्तासंबन्धानर्थक्यम् असतां
तत्संबन्धानुपपत्तिः अतिप्रसक्तेः । अक्रियसामान्यसंबन्धाद् व्यक्तीनामक्रियत्वम् सामान्यस्य वा क्रिया-
वत्त्वाद् अव्यापकत्वं स्यात् । व्यक्त्यव्यतिरेके व्यक्तिस्वलक्षणवत् तत् सामान्यमेव न भवेत् व्यक्तीनां
वा सामान्याव्यतिरेकात् व्यक्तिस्वरूपहानेः सामान्यस्य तद्रूपता न भवेत् । न च व्यतिरेकाव्यतिरेक-
२० पक्षेऽपि अनवस्थोभयपक्षदोष-वैयधिकरण्य-संशयविरोधादिदोषप्रसङ्गात् सर्वथा तदभावः, अन-
वस्थादिदोषस्य प्राक् प्रतिषिद्धत्वात् प्रतीयमानेऽपि तथाभूते वस्तुनि विरोधादिदोषासञ्जने
प्रकारान्तरेण प्रतिभासासंभवात् सर्वशून्यताप्रसङ्गः । न च सैवास्तु इति वक्तव्यम् स्वसंवेदनमात्र-
स्यापि अभावप्रसङ्गतः निष्प्रमाणिकायाः तस्या अपि अभ्युपगन्तुमशक्यत्वात् तथापि तस्या अभ्यु-
पगमे वरमनेकान्तात्मकं वस्तु अभ्युपगन्तव्यम् तस्य अबाधितप्रतीतिगोचरत्वात् ।

२५ तेन रूपादिक्षणिकविज्ञानमात्र-शून्यवादाभ्युपगमः तथा पृथिव्याद्येकान्तनित्यत्वाभ्युपगमः
तथा आत्माद्यद्वैताङ्गीकरणम् तथा परलोकाभावनिरूपणम् द्रव्य-गुणादेरत्यन्तभेदप्रतिज्ञानं च तथा
हिंसातो धर्माभ्युपगमः दीक्षातो[2] मुक्तिप्रतिपादनम् इत्याद्येकान्तवादिप्रसिद्धं सर्वमसत् प्रतिपत्तव्यम्
तत्प्रतिपादनहेतूनां प्रदर्शितनीत्या अनेकान्तव्याप्तत्वेन विरोधात् इतरधर्मसव्यपेक्षस्यैकान्तवाद्यभ्युप-
गतस्य सर्वस्य पारमार्थिकत्वात् अभिष्वङ्गादिप्रतिषेधार्थं विज्ञानमात्राद्यभिधानस्य सार्थकत्वात् ।
३० तथाहि—'अहमस्यैव अहमेवास्य' इति एकान्तनित्यत्वस्वस्वामिसंबन्धाभिनिवेशप्रभवरागादिप्रतिषे-
धपरं क्षणिकरूपादिप्रतिपादनं युक्तमेव । सालम्बनज्ञानैकान्तप्रतिषेधपरं विज्ञानमात्राभिधानम् ।
सर्वविषयाभिष्वङ्गनिषेधप्रवणं शून्यताप्रकाशनम् । 'क्षणिक एवायं पृथिव्यादिः' इति एकान्ताभिनिवे-
शमूलद्वेषादिनिषेधपरं तन्नित्यत्वप्रणयनम् । जात्यादिमदोन्मूलतानुगुणमात्माद्यद्वैतप्रकाशनम् ।
'जन्मान्तरजनितकर्मफलभोक्तृत्वमेव धर्मानुष्ठानम्' इति एकान्तनिरासप्रयोजनं परलोकाभावावबो-
३५ धनम् । द्रव्याद्यव्यतिरेकैकान्तप्रतिषेधाभिप्रायं तद्भेदाख्यानम् । अप्रमत्तस्य योगनिबन्धनप्राण-
व्यपरोपणस्य अहिंसात्वप्रतिपादनार्थं 'हिंसातो धर्मः' इति वचनम्, राग-द्वेष-मोह-तृष्णादिनिब-
न्धनस्य प्राणव्यपरोपणस्य दुःखसंवेदनीयफलनिर्वर्तकत्वेन हिंसात्वोपपत्तेः अत एव वैदिकहिंसाया
अपि तन्निमित्तत्वे अपायहेतुत्वमन्यहिंसावत् प्रसक्तम् न च तस्या अतन्निमित्तत्वम्, "चित्रया यजेत
पशुकामः" [ ] इति तृष्णानिमित्तश्रवणात् । न चैवंविधस्य वाक्यस्य प्रमाणताऽपि
४० उपपत्तिमती तत्प्राप्तिनिमित्ततद्धिंसोपदेशकत्वात् तृष्णादिवृद्धिनिमित्ततदन्यतद्विघातोपदेशवाक्य-

---

१-ति संबन्धे सं-बृ० ।-ति संबन्ध-वा० बा० । २-तो युक्ति—भां० मां० ।
३ "चित्रया यजेत पशुकामः"—१-४-३ शाबरभा० पृ० ६० पं० ९ ।

वत् । न च अपौरुषेयत्वादस्य प्रामाण्यम् तस्य निषिद्धत्वात् । न च पुरुषप्रणीतस्य हिंसाविधायकस्य तस्य प्रामाण्यम् 'ब्राह्मणो हन्तव्यः' इति वाक्यवत् । न च वेदविहितत्वात् तद्धिंसाया अहिंसात्वम् प्रकृतहिंसाया अपि तत्त्वोपपत्तेः । न च "ब्राह्मणो न हन्तव्यः"[1] [ ] इति तद्वाक्यबाधितत्वान्न प्रकृतहिंसायास्तद्विहितत्वम् "न[2] वै हिंस्रो भवेत्" [ ] इति वेदवाक्यबाधितचित्रादियजनवाक्यविहितहिंसावत् प्रकृतहिंसायास्तद्विहितत्वोपपत्तेः । अथ 'ब्राह्मणो हन्तव्यः' ५ इति वाक्यं न क्वचिद् वेदे श्रूयते, न; उत्सन्नानेकशाखानां तत्राभ्युपगमात् तथा च "सहस्रवर्त्मा सामवेदः"[3] [ ] इत्यादिश्रुतिः । अथ यज्ञाद् अन्यत्र हिंसाप्रतिषेधः तत्र च तद्विधानम् यथा च "अन्यत्र हिंसा अपायहेतुः" [ ] इत्यागमात् सिद्धम् तथा तत एव तत्र स्वर्गहेतुः इत्यपि सिद्धम् न च यद् एकदा एकत्र अपायहेतुः तत् सर्वदा सर्वत्र तथेत्यभ्युपगन्तव्यम् आतुर-स्वस्थ[4]भुजिक्रियावत् अवस्थादिभेदेन भावानां परस्परविरुद्धफलकर्तृत्वोपलम्भात्, असम्यगे- १० तत्; तृष्णादिनिमित्तहिंसाया अपायहेतुत्वेन सर्वशास्त्रेषु प्रसिद्धेः तृष्णादिनिमित्ता च प्रकृतहिंसेति प्रतिपादितत्वात् । न च यन्निमित्तत्वेन यत् प्रसिद्धम् तत् फलान्तरार्थित्वेन विधीयमानमौत्सर्गिकं दोषं न निर्वर्तयति, यथा आयुर्वेदप्रसिद्धं दाहादिकं रुगपगमार्थितया विधीयमानं स्वनिमित्तं दुःखं क्लिष्टकर्मसंबन्धहेतुतया च मखविधानाद् अन्यत्र हिंसादिकं शास्त्रे प्रसिद्धमिति मखतन्त्रावपि तद् विधीयमानं काम्यमानफलसद्भावेऽपि तत्कर्मनिमित्तं तद् भवत्येव । न च हिंसातः स्वर्गादिसुखप्राप्तौ १५ असुखनिर्वर्तकक्लिष्टकर्महेतुता असंगता नरेश्वराराधननिमित्तब्राह्मणादिवधानन्तरावाप्तग्रामादिलाभजनितसुखसंप्राप्तौ तद्वधस्यापि तथात्वोपपत्तेः । अथ ग्रामादिलाभो ब्राह्मणादिवधनिर्वर्तितादृष्टनिमित्तो न भवति तर्हि स्वर्गादिप्राप्तिरपि अध्वरविहितहिंसानिर्वर्तिता न भवतीति समानम् । अथ अश्वमेधादौ आलभ्यमानानां छागादीनां स्वर्गप्राप्तेर्न तद्धिंसा हिंसेति तर्हि संसारमोचकविरचिताऽपि तत एव हिंसा न हिंसा स्यात् देवतोद्देशतो म्लेच्छादिविरचिता च ब्राह्मण-गवादिहिंसा च न हिंसा २० स्यात् । अथ तदागमस्य अप्रमाणत्वान्न तदुपदेशजनिता हिंसा अहिंसेति, ननु वेदस्य कुतः प्रामाण्यसिद्धिः ? न गुणवत्पुरुषप्रणीतत्वात्, परैस्तस्य तथाऽनभ्युपगमात् । न अपौरुषेयत्वात्, तस्य असंभवात् । तन्न प्रदर्शिताभिप्रायाद् विना हिंसातो धर्मावाप्तिर्युक्ता ।

परमप्रकर्षावस्थज्ञान-दर्शन-चारित्रात्मकमुक्तिमार्गस्य 'दीक्षा'शब्देन अभिधाने दीक्षातो मुक्तिरुपपन्नैव अविकलकारणस्य कार्यनिर्वर्तकत्वात् अन्यथा कारणत्वायोगात् । तत्र तद्भक्त्युत्पादनार्थं २५ चैवमभिधानाद् अदोषः न हि तद्भक्त्यभावे उपादेयफलप्राप्तिनिमित्तसम्यग्ज्ञानादिपुष्टिनिमित्तदीक्षाप्रवृत्तिप्रवणो भवेत् । तन्न अन्यपरत्वं प्रदर्शितवचसामभ्युपगन्तव्यम् तथाऽभ्युपगमे वा अनाप्तत्वं तद्वादिनां प्रसज्येत तत्र पूर्वोक्तदोषानतिवृत्तेः ॥ ६० ॥

[विवेचनविकलामागमस्य प्रतिपत्तिमाश्रयतां तत्त्वानभिज्ञत्वख्यापनम्]

ये तु अविवेचितागमप्रतिपत्तिमात्रमाश्रयन्ते ते अनवगतपरमार्था एव इति प्रतिपादयन्नाह— ३०

पाडेक्कनयपहगयं सुत्तं सुत्तहरसद्दसंतुट्टा ।
अविकोवियसामत्था जहागमविभत्तपडिवत्ती ॥ ६१ ॥

प्रत्येकनयमार्गगतं सूत्रम्-"क्षणिकाः सर्वसंस्काराः विज्ञानमात्रमेवेदं भो जिनपुत्राः ! यद् इदं त्रैधातुकम्" [ ] इति, "ग्राह्यग्राहकोभयशून्यं तत्त्वम्" इति, "नित्यमेकमणुव्यापि निष्क्रियम्" [ ] इत्यादि, "सदकारणवद् नित्यम्" ३५ [वैशेषिकद० ४-१-१] इति, "आत्मा रे श्रोतव्यो ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः" [बृहदा० उ० २-४-५] इत्यादि, "सत्ता-द्रव्यत्वसंबन्धात् सद्द्रव्यं वस्तु" [ ] इति, "परलोकिनोऽभावात् परलोकाभावः"[5] [ ] "चोदनालक्षणोऽर्थो धर्मः" [मीमांसाद० १-१-२]

---

१ "न जातु ब्राह्मणं हन्यात्"—अ० ८ श्लो० ३८० मनुस्मृ० । २ न च हिं—वा० बा० । ३ "सहस्रवर्त्मा सामवेदः"—१-१-१ महाभा० पृ० ६५ पं० १ । ४-स्वस्थसुभु-भां० मां० । ५ पृ० ७१ पं० २१ ।

इति, "धर्माधर्मक्षयंकरी दीक्षा" [ ] इत्यादिकमधीत्य 'सूत्रधरा वयम्' इति **शब्द-मात्रसंतुष्टा** गर्ववन्तः **अविकोविदसामर्थ्याः** अविकोविदम् अज्ञं सामर्थ्यं येषां ते तथाऽविदित-सूत्रव्यापारविषया इति यावत् । किमित्येवं ते ? इत्याह—**यथाश्रुतमेव अविभक्ता** अविवेकेन **प्रतिपत्ति**रेषामिति कृत्वा सूत्राभिप्रायव्यतिरिक्तविषयविप्रतिपत्तित्वात् इतरजनवद् अज्ञा इत्यभि-५प्रायः । अथवा स्वयूथ्या एव एकनयदर्शनेन कतिचित् सूत्राणि अधीत्य केचित् 'सूत्रधरा वयम्' इति गर्विता यथावस्थितान्यनयसव्यपेक्षसूत्रार्थापरिज्ञानाद् अविदितात्मविद्वत्स्वरूपा इति गाथाभि-प्रायः ॥ ६१ ॥

[निरपेक्षैकनयप्रवृत्तानां दोषोद्भावनम्]

अथ एषामेकनयदर्शनेन प्रवृत्तानां यो दोषस्तमुद्भावयितुमाह—

१० **सम्मद्दंसणमिणमो सयलसमत्तवयणिज्जणिद्दोसं ।**
अत्तुक्कोसविणट्ठा सलाहमाणा विणासेंति ॥ ६२ ॥

सम्यग्दर्शनमेतत् परस्परविषयाऽपरित्यागप्रवृत्तानेकनयात्मकम् तच्च 'स्यान्नित्यः' इत्यादि **सकलधर्मपरिसमाप्तवचनीयनया निर्दोषम्,** एकनयवादिनस्त्वविषये सूत्रव्यवस्थापनेन **आत्मोत्कर्षेण विनष्टाः** स्याद्वादाभिगमं प्रति अनाद्रियमाणा 'वयं सूत्रधराः' इत्यात्मानं १५**श्लाघमानाः** सम्यग्दर्शनं **विनाशयन्ति**—तदात्मनि न व्यवस्थापयन्तीति यावत् ॥ ६२ ॥

[न शासनभक्तिमात्रेण नाप्यांशिकज्ञानमात्रेणानेकान्तप्ररूपणाकुशल इति कथनम्]

अथ न ते आगमप्रत्यनीकाः तद्भक्तत्वात् तद्देशपरिज्ञानवन्तश्चेति कथं तद् विनाशयन्तीति ? अत्राह—

ण हु सासणभत्तीमेत्तएण सिद्धंतजाणओ होइ ।
२० **ण विजाणओ वि णियमा पण्णवणाणिच्छिओ णामं ॥ ६३ ॥**

न च शासनभक्तिमात्रेणैव सिद्धान्तज्ञाता भवति—न च तदज्ञानवान् भावसम्यक्त्व-वान् भवति अज्ञातस्य अर्थस्य विशिष्टरुचिविषयत्वानुपपत्तेः तद्भक्तिमात्रेण श्रद्धानुसारितया द्रव्य-सम्यक्त्वम् । मार्गानुसार्यवबोधमात्रानुषक्तरुचिस्वभावं तु सदपि न भावसम्यक्त्वसाध्यफलनिर्वर्तकम् भावसम्यक्त्वनिमित्तत्वेनैव तस्य द्रव्यसम्यक्त्वरूपत्वोपपत्तेः । **न च जीवादितत्त्वैकदेशज्ञाताऽपि** २५**नियमतो**ऽनेकान्तात्मकवस्तुस्वरूप**प्रज्ञापनायां निश्चितो** भवति एकदेशज्ञानवतः सकलधर्मा-त्मकवस्तुज्ञानविकलतया सम्यक् तत्प्ररूपणाऽसंभवात् । तथाहि—सर्वज्ञो यथावस्थितैकदेशज्ञः जीवादिसकलतत्त्वज्ञता तु आगमविदः सामान्यरूपतया अभिधीयते "मति-श्रुतयोर्निबन्धो द्रव्येष्व-सर्वपर्यायेषु" [तत्त्वार्थ० १-२७] इति वचनात् ।

[तत्त्वसप्तके निरूप्ये पूर्वं जीवाजीवौ निरूप्य तत्र कणादादिसंमततत्त्वानामन्तर्भावप्रदर्शनम्]

३० तत्त्वं तु जीवाऽजीवास्रव-बन्ध-संवर-निर्जरा-मोक्षाख्याः सप्त पदार्थाः । तत्र चेतनालक्षणोऽर्थो जीवः, तद्विपरीतलक्षणस्तु अजीवः, धर्माधर्माकाशकालपुद्गलभेदेन त्वसौ पञ्चधा व्यवस्थापितः । एत-त्पदार्थद्वयान्तर्वर्तिनश्च सर्वेऽपि भावाः न हि रूप-रस-गन्ध-स्पर्शादयः साधारणासाधारणरूपा मूर्ता-

---

१-जनपदवज्ञानिन इत्य-भां० मां० ।-जनपदवदज्ञान इत्य-वृ० आ० हा० वि० । २ णाम मु० मू० ।

३ प्रायो बहुषु आदर्शेषु तत्र च बहुषु स्थलेषु तालव्यशकारस्योपलम्भेऽपि क्वचित् क्वचिद् दन्त्यसकारस्य दर्शनात् तस्यैव च प्रकृते शुद्धतरत्वात् तथैव च ग्रन्थान्तरसंवाददर्शनात् पाठान्तरवैषम्यपरिहाराय लाघवाय एकविधपाठपरिग्रहाय च सर्वत्र दन्त्यसकारविशिष्टं रूपमङ्गीकृत्य 'आस्रव'पदमेव उपयुक्तमत्रास्माभिः न तु 'आश्रव'पदम् ।

ऽमूर्तचेतनाऽचेतनद्रव्यगुणाः, उत्क्षेपणाऽपक्षेपणादीनि च कर्माणि, सामान्य-विशेष-समवायाश्च जीवाऽजीवव्यतिरेकेण आत्मस्थितिं लभन्ते तद्भेदेन एकान्ततस्तेषामनुपलम्भात् तेषां तदात्मकत्वेन प्रतिपत्तेः अन्यथा तदसत्त्वप्रसक्तेः । ततो जीवाजीवाभ्यां पृथक् जात्यन्तरत्वेन द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाया[1] न वाच्याः । एवम् प्रमाण[2]-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव--तर्क-निर्णय वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थाना[3]नि च न पृथग् अभिधानी- ५ यानि । तथा,

"प्रकृतेर्म[4]हान् महतोऽहंकारस्तस्माद् गणश्च षोडशकः ।

तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि" ॥ [सांख्यका० का० २२] इति

चतुर्विंशतिः पदार्थाः पुरुषश्चेति न वक्तव्यम् । तथा, दुःख-समुदा(द)[5]य-मार्ग-निरोधाश्चत्वारि आर्य-सत्यानि इति न वक्तव्यम् । तथा पृथिवी आपः तेजः वायुः इति तत्त्वानि इति न वक्तव्यम् । तत्प्रभेद- १० रूपतया अभिधानेऽपि न दोषः जात्यन्तरकल्पनाया एव अघटमानत्वात् राशिद्वयेन सकलस्य जगतो व्याप्तत्वात् तदव्याप्तस्य शशशृङ्गतुल्यत्वात् । शब्दब्रह्माद्येकान्तस्य च प्राक् प्रतिषिद्धत्वात् अबाधित-रूपोभयप्रतिभासस्य तथाभूतवस्तुव्यवस्थापकस्य प्रसाधितत्वात् विद्याऽविद्याद्वयभेदाद् द्वैतकल्पना-यामपि त्रित्वप्रसक्तेः । बाह्यालम्बनभूतभावापेक्षया विद्यात्वोपपत्तेः अन्यथा निर्विषयत्वेन उभयोर-विशेषात् तत्प्रतिभागस्य अघटमानत्वात् न हि द्वयोर्निरालम्बनत्वे विपर्यस्ताऽविपर्यस्तज्ञानयोरिव १५ विद्याविद्यात्वभेदः ततो नाद्वयं वस्तु, नापि तद्व्यतिरिक्तमस्ति ।

अथ आस्रवादीनामपि अनुपपत्तिः राशिद्वयेन सकलस्य व्याप्तत्वात्, न; ततस्तेषां कथंचिद् भेदप्रतिपादनार्थत्वात् अनयोरेव तथापरिणतयोः सकारणसंसार-मुक्तिप्रतिपादनपरत्वात् तथाभि-धानस्य अनेन वा क्रमेण तज्ज्ञानस्य मुक्तिहेतुत्वप्रदर्शनार्थत्वात् विप्रतिपत्तिनिरासार्थत्वाद् वा तद-भिधानस्य अदुष्टता । तथाहि—आ[6]स्रवति कर्म यतः स आस्रवः काय-वाग्-मनोव्यापारः स च २० जीवाजीवाभ्यां कथंचिद् भिन्नः तथैव प्रतीतिविषयत्वात् । अथ बन्धाभावे कथं तस्योपपत्तिः ? प्राक् तत्सद्भावे वा न तस्य बन्धहेतुता न हि यद् यद्धेतुकं तत् तदभावेऽपि भवति अतिप्रसङ्गात्, असदे-तत्; पूर्वोत्तरापेक्षया अन्योन्यं कार्यकारणभावनियमात् । न च इतरेतराश्रयदोषः प्रवाहापेक्षया अनादित्वात् । पुण्यापुण्यबन्धहेतुतया चासौ द्विविधः उत्कर्षाऽपकर्षभेदेन अनेकप्रकारोऽपि दं[7]ण्ड-गुप्त्यादि त्रित्वादिसंख्याभेदमासादयन् फलानुबन्ध्यननुबन्धिभेदतः अनेकशब्दविशेषवाच्यतामनु- २५ भवति एकान्तवादिनां च नायं संभवतीति **कम्मं जोगनिमित्तं** [प्र० का० गा० १९.[8]] इति गाथार्थं प्रदर्शयद्भिः प्राक् प्रतिपादितत्वात् । तन्निमित्तः सकषायस्य आत्मनः कर्मवर्गणापुद्गलैः संश्लेषविशेषो बन्धः स च सामान्येन एकविधोऽपि प्रकृति-स्थित्यनुभाग-प्रदेशभेदेन चतुर्धा पुनः एकैको ज्ञानावरणीयादि-मूलप्रकृतिभेदादष्टविधः पुनरपि मत्यावरणाद्युत्तरप्रकृतिभेदाद् अनेकविधः अयं च कश्चित् तीर्थकरत्वादिफलनिर्वर्तकत्वात् प्रशस्तः अपरश्च नारकादिफलनिर्वर्तकत्वाद् ३० अप्रशस्तः प्रशस्ताऽप्रशस्तात्मपरिणामोद्भूतस्य कर्मणः सुख-दुःखसंवेदनीयफलनिर्वर्तकत्वात्[9] ।

---

१ कणादमतमेतत्, अस्य स्थापन-निरसने पूर्वं समायाते द्रष्टव्ये । २ अक्षपादमतमेतत् ।

३ न्यायद० १-१-१ । ४ "प्रकृतेर्महान् ततोहंकार"-सांख्यका० ।

५ बौद्धमते दुःखकारणभूतद्वितीयार्यसत्यपरत्वं समुदयपदस्य प्रसिद्धम् । तद्यथा-

"समुदेति यतो लोके रागादीनां गणोऽखिलः । आत्मात्मीयभावाख्यः समुदयः स उदाहृतः" ॥ ६ ॥—षड्द० स० ।

६ **आश्रव**-बृ० विना । ७ अत्र आस्रवस्य निरूपणीयत्वेन तत्र च मनोदण्डादित्रिविधदण्डस्य समावेशेऽपि त्रिवि-धाया गुप्तेः संवररूपत्वेन आस्रवविरोधितया आस्रवे समावेशाभावात् '**दण्डागुप्त्यादि**' इति पाठं कल्पयित्वा अर्थसंगतिः कर्तुमुचिता । ८ पृ० ४१८ गा० १९ ।

९ "ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः"-सांख्यका० ४४ । "ज्ञानस्य विपर्ययोऽज्ञानं तेनाज्ञानेन × × × आत्मानं निबध्नाति-न मोक्षं गच्छतीत्यर्थः × × × स च बन्धस्त्रिविधः प्रकृतिबन्धः वैकारिकबन्धः दक्षिणाबन्धश्चेति । तत्र प्रकृतिबन्धो नाम अष्टासु प्रकृतिषु परत्वेनाभिमानः" [का० ४४ माठरवृ० पृ० ६२] इत्यादिना सांख्या अपि बन्धं प्रतिपन्नाः ।

[ध्यानचतुष्कस्य सभेदप्रभेदं व्यावर्णनम्]

अप्रशस्तश्च आत्मपरिणामो द्विविधः आर्त-रौद्रभेदात् आमुहूर्तस्थायी आक्रन्दन-विलपन-परिदेवन-शोचन-परविभवविस्मय-विषयसंगादिकश्च स्वसंवेद्य आत्मनः अनुमेयश्च परेषाम् क्लिष्टः परिणामविशेष आर्तध्यानशब्दवाच्यो बाह्यः आभ्यन्तरश्च अमनोज्ञसंप्रयोगानुत्पत्त्यध्यवसानम् ५ उत्पन्नस्य च विनाशाध्यवसायः मनोज्ञसंप्रयोगस्य उत्पत्तिकल्पनाध्यवसायः उत्पन्नस्य अविनाश-संकल्पाध्यवसानम् इत्येतत् चतुर्विधमार्तध्यानम् अमनोज्ञसंप्रयोगश्च बाह्याध्यात्मजत्वेन द्विधा-शीताऽऽतप-व्यालादिजनितो बाह्यः वात-पित्त-श्लेष्मादिप्रादुर्भूतोऽभ्यन्तरः शारीरः भय-विषा-दाऽरति-शोक-जुगुप्सा-दौर्मनस्यादिप्रभवो मानसः अयममनोज्ञसंप्रयोगः कथं नाम मे न संपद्यत इति संकल्पप्रबन्ध आर्तध्यानम् कृष्ण-नील-कापोतलेश्याबलाधायकं प्रमादाधिष्ठानम् आप्रमत्त-१० गुणस्थानात् तिर्यग्-मनुष्यगतिनिर्वर्तकम् उत्कर्षाऽपकर्षभेदात् क्षायोपशमिकभावरूपं परोक्षज्ञान-रूपत्वात्। एवं रुद्रे भवं रौद्रं हिंसाऽनृत-स्तेय-संरक्षणाऽऽनन्दभेदेन चतुर्विधम् तत्र हिंसायामा-नन्दो रुचिर्यस्मिन् तद् हिंसानन्दम् एवमुत्तरत्रापि योज्यम् एतदपि बाह्याध्यात्मभेदाद् द्विविधम् परुषनिष्ठुरवचनाक्रोशनिर्भर्त्सनताडनपरदारातिक्रमाभिनिवेशादिरूपं बाह्यम्—स्वपराभ्यां स्वसंवेदना-ऽनुमानगम्यं बाह्यम्; आध्यात्मिकं हिंसायां संरम्भ-समारम्भादिलक्षणायां नैर्घृण्येन प्रवर्तमानस्य १५ संकल्पाध्यवसानम्-संकल्पश्चिन्ताप्रबन्धस्तस्याध्यवसानम्—तीव्रकषायानुरक्तत्वं प्रथमं हिंसानन्दं नाम। परेषामनेकप्रकारैर्मिथ्यावचनैर्वञ्चनं[३] प्रति संकल्पाध्यवसानं मृषानन्दं नाम। परद्रव्यापहरणं प्रति अनेकोपायैर्यत् तत् स्तेयानन्दम्। परिग्रहे 'मम एव इदं स्वम् अहमेव अस्य स्वामी' इति अभिनिवेशः तदपहर्तृविघातेन संरक्षणं प्रति संकल्पाध्यवसानं संरक्षणानन्दम्। चतुर्विधमप्येतत् कृष्णादिलेश्याबलाधायकं प्राक् प्रमत्तगुणस्थानात् प्रमादाधिष्ठानं कषायप्राधान्यादौदयिकभावरूपं २० नरकगतिफलनिर्वर्तकं पापध्यानद्वयमपि हेयम्।

उपादेयं तु प्रशस्तं धर्म-शुक्लध्यानद्वयम्। तत्र पर्वतगुहा-जीर्णोद्यान-शून्यागारादौ मनुष्याद्या-पातविकले अवकाशे मनोविक्षेपनिमित्तशून्ये सत्त्वोपघातरहिते उचिते शिलातलादौ यथासमाधानं विहितपर्यङ्कासन ऊर्ध्वस्थानस्थो वा मन्दमन्दप्राणाऽपानप्रचारः—अतिप्राणनिरोधे चेतसो व्याकुल-त्वेन एकाग्रतानुपपत्तेः—निरुद्धलोचनादिकरणप्रचारो हृदि ललाटे मस्तके अन्यत्र वा यथापरिचयं २५ मनोवृत्तिं प्रणिधाय मुमुक्षुर्ध्यायेत् प्रशस्तं ध्यानम्। तत्र बाह्याध्यात्मिकभावानां याथात्म्यं धर्मः तस्माद् अनपेतं धर्म्यम्। तच्च द्विविधम् बाह्यम् आध्यात्मिकं च। सूत्रार्थपर्यालोचनम् दृढव्रतता शीलगुणानुरागः निभृतकायवाग्व्यापारादिरूपं बाह्यम् आत्मनः स्वसंवेदनग्राह्यमन्येषामनुमेय-माध्यात्मिकं तत्त्वार्थसंग्रहादौ[४] चातुर्विध्येन प्रदर्शितं संक्षेपतः अन्यत्र दशविधम्। तद्यथा—अपा-योपायजीवाऽजीवविपाकविरागभवसंस्थानाज्ञाहेतुविचयानि चेति। लोक संसारविचययोः संस्थान-३० भवविचययोरन्तर्भावान्नोद्दिष्टदशभेदेभ्यः पृथगभिधानम्। तत्र अपाये विचयो विचारो यस्मिन् तद् अपायविचयम्। एवम् अन्यत्रापि योज्यम्। 'दुष्टमनो-वाक्-कायव्यापारविशेषाणामपायः कथं नु नाम स्यात्' इत्येवंभूतः संकल्पप्रबन्धो दोषपरिवर्जनस्य कुशलप्रवृत्तित्वाद् अपायविचयम्। 'तेषामेव कुशलानां स्वीकरणमुपायः स कथं नु मे स्यात्' इति संकल्पप्रबन्ध उपायविचयम्। असंख्ये-यप्रदेशात्मकसाकाराऽनाकारोपयोगलक्षणाऽनादिस्वकृतकर्मफलोपभोगित्वादिजीवस्वरूपानुचिन्तनं ३५ जीवविचयम्। धर्माधर्माकाशकालपुद्गलानामनन्तपर्यायात्मकानामजीवानामनुचिन्तनमजीवविचयम् मूलोत्तरप्रकृतिभेदभिन्नस्य पुद्गलात्मकस्य मधुरकटुफलस्य कर्मणः संसारिसत्त्वविषयविपाकविशेषा-नुचिन्तनं विपाकविचयम्। 'कुत्सितमिदं शरीरकम् शुक्रशोणितसमुद्भूतम् अशुचिभृतघटोपमम् अनित्यम् अपरित्राणम् गलदशुचिनवच्छिद्रतया अशुचि आधेयशौचम् न किञ्चिदत्र कमनीयतरं समस्ति किंपाकफलोपभोगोपमाः प्रमुखरसिका विपाककटवः प्रकृत्या भङ्गुराः पराधीनाः संतोषा-४० मृतास्वादपरिपन्थिनः सद्भिर्निन्दिता विषयाः तदुद्भवं च सुखं दुःखानुषङ्गि दुःखजनकं च नातो देहिनां तृप्तिः न च एतद् आत्यन्तिकमिति नात्र आस्था विवेकिना आधातुं युक्तेति विरतिरेव अतः

---

१ आर्तध्यानादिध्यानचतुष्टयस्य विशेषस्वरूप भगवतीसूत्र-स्थानाङ्गसूत्र-आवश्यकसूत्रेभ्योऽवसेयं भवेत्—श० २५ उद्दे० ७। स्था० ४ उद्दे० १। ध्यानशतकम् पृ० ५८२-६०२। २-यमनोज्ञ-बृ० वा० बा०। ३-नैर्वचनं वा० बा० विना। ४ वाचकउमास्वातिप्रणीततत्त्वार्थसू० अ० ९।

श्रेयस्कारिणी' इत्यादिरागहेतुविरोधानुचिन्तनं वैराग्यविचयम् । 'प्रेत्य स्वकृतकर्मफलोपभोगार्थं पुनः प्रादुर्भावो भवः स च अरघट्टघटीयन्त्रवद् मूत्र-पुरीशाऽस्रतन्त्रनिबद्धदुर्गन्धजठरपुटकोटरादिषु अजस्रमावर्तनम् न चात्र किञ्चिद् जन्तोः स्वकृतकर्मफलमनुभवतः चेतनमचेतनं वा सहायभूतं शरणतां प्रतिपद्यते' इत्यादि भवसंक्रान्तिदोषपर्यालोचनं भवविचयम् । 'भवन-नग-सरित्-समुद्र-भूरुहादयः पृथिवीव्यवस्थिताः साऽपि घनोदधि-घनवात-तनुवातप्रतिष्ठा तेऽपि आकाशप्रतिष्ठाः ५ तदपि स्वात्मप्रतिष्ठम् तत्र अधोमुखमल्लकसंस्थानं वर्णयन्ति अधोलोकम्' इत्यादि च संस्थानानुचिन्तनं संस्थानविचयम् । अतीन्द्रियत्वाद् हेतूदाहरणादिसद्भावेऽपि बुद्ध्यतिशयशक्तिविकलैः परलोक-बन्ध-मोक्ष धर्माऽधर्मादिभावेषु अत्यन्तदुःखबोधेषु आप्तप्रामाण्यात् तद्विषयं तद्वचनं तथैवेति आज्ञाविचयम् । आगमविषयविप्रतिपत्तौ तर्कानुसारिबुद्धेः पुंसः स्याद्वादप्ररूपकागमस्य कष-च्छेद-तापशुद्धितः समाश्रयणीयत्वगुणानुचिन्तनं हेतुविचयम् । एतच्च सर्वं धर्मध्यानम् श्रेयोहेतुत्वात् १० एतच्च संवररूपम् अशुभास्रवप्रत्यनीकत्वात् "आस्रवनिरोधः संवरः" [तत्त्वार्थ० ९-१] इति वचनात् । गुप्ति-समिति-धर्मानुप्रेक्षादीनां चास्रवप्रतिबन्धकारित्वात् । अयमपि जीवाऽजीवाभ्यां कथंचिदभिन्नः भेदाभेदैकान्ते दोषोपपत्तेः । न चायमेकान्तवादिनां घटते मिथ्याज्ञानाद् मिथ्याज्ञानस्य निरोधानुपपत्तेः । संवरश्च द्विविधः सर्व-देशभेदात् । पीत-पद्मलेश्याबलाधानमप्रमत्तसंयतस्य अन्तर्मुहूर्तकालप्रमाणं स्वर्गसुखनिबन्धनमेतद् धर्मध्यानं प्रतिपत्तव्यम् । १५

कषायदोषमलापगमात् शुचित्वम् तदनुषङ्गात् शुक्लं ध्यानम् । तच्च द्विविधम्-शुक्ल-परमशुक्लभेदात् । तत्र पृथक्त्ववितर्कवीचारम् एकत्ववितर्कावीचारं चेति शुक्लं द्विधा । परमशुक्लमपि सूक्ष्मक्रियाप्रतिपाति व्युपरतक्रियानिर्वर्ति चेति द्विधा । बाह्याध्यात्मिकभेदाच्च एतदपि द्विविधम्-गात्र-दृष्टिपरिस्पन्दाभावः जृम्भोद्गारक्षवथुविरहः अनभिव्यक्तप्राणाऽपानप्रचारत्वमित्यादिगुणयोगि बाह्यम् परेषामनुमेयम् आत्मनश्च स्वसंवेद्यम्-आध्यात्मिकं तु पृथग्भावः पृथक्त्वम्-नानात्वम्, वितर्कः-श्रुत- २० ज्ञानम्-द्वादशाङ्गम्, वीचारः-अर्थ-व्यञ्जन-योगसंक्रान्तिः-व्यञ्जनम्-अभिधानम् तद्विषयोऽर्थः मनो-वाक् कायलक्षणो योगः संक्रान्तिः परस्परतः परिवर्तनम् पृथक्त्वेन वितर्कस्य अर्थ-व्यञ्जन-योगेषु संक्रान्तिर्वीचारः यस्मिन् अस्ति तत् पृथक्त्ववितर्कवीचारम् । तथाहि—उत्तमसंहननो भावयति विजृम्भितपुरुषकारवीर्यसामर्थ्यः संहृताशेषचित्तव्याक्षेपः कर्मप्रकृतीः स्थित्यनुभागादिभिर्ह्रासयन् महासंवरसामर्थ्यतो मोहनीयमचिन्त्यसामर्थ्यमशेषमुपशमयन् क्षपयन् वा द्रव्यपरमाणुम् भावपर- २५ माणुं चैकमवलम्ब्य द्रव्य-पर्यायार्थाद् व्यञ्जनम् व्यञ्जनाद् वा अर्थम् योगाद् योगान्तरम् व्यञ्जनाद् व्यञ्जनान्तरं च संक्रामन् पृथक्त्ववितर्कवीचारं शुक्लतरलेश्यमुपशमक-क्षपकगुणस्थानभूमिकमन्तर्मुहूर्तार्ध(द्धं) क्षायोपशमिकभूमिकं प्रायः पूर्वधरनिषेव्यमाश्रितार्थ व्यञ्जनयोगसंक्रमणं श्रेणिभेदात् स्वर्गापवर्गफलप्रदमाद्यं शुक्लध्यानमवलम्बते एतच्च निर्जरात्मकम् आत्मस्थितकर्मक्षयकारणत्वात् तस्याः "तपसा निर्जरा च" [तत्त्वार्थ० ९-३] इति वचनात् ध्यानस्य चान्तरोत्कृष्टतपोरूपत्वाद् ३० जीवाजीवाभ्यां कथंचिदसावभिन्ना द्व्यङ्गुलवियोगवत् वियुक्तात्मनो वियोगस्य कथंचिद् अभेदात् एकान्तवादे तु पूर्ववत् पश्चादपि अवियोगः अतद्धर्मत्वात् वियोगे वा पूर्वमपि तत्स्वभावत्वाद् अयुक्तस्य वियोगाभाव एव न हि बन्धाभावे तद्विनाशः संभवी तस्य वस्तुधर्मत्वात् न हि अङ्गुल्योः संयोगाभावे तद्वियोग इति व्यवहारः । तस्माद् निर्जराया अपि एकान्तवादे अनुपपत्तिः । एकत्वेन वितर्को यस्मिन् तद् एकत्ववितर्कम् विगतार्थ-व्यञ्जन-योगसंक्रमत्वाद् अवीचारं द्वितीयं शुक्लध्यानम् । ३५ तथाहि—एकपरमाणौ एकमेव पर्यायमालम्ब्यत्वेन आदाय अन्यतरैकयोगबलाधानमाश्रितव्यतिरिक्ताशेषार्थव्यञ्जनयोगसंक्रमविषयचिन्ताविक्षेपरहितं बहुतरकर्मनिर्जरारूपं निःशेषमोहनीयक्षयानन्तरं युगपद्घातित्रिघातिकर्मत्रयध्वंसनसमर्थमकषायच्छद्मस्थवीतरागगुणस्थानभूमिकं क्षपको द्वितीयं शुक्ल-

---

१ पीत-पद्मादिकानां षण्णां लेश्यानां सविस्तरं स्वरूपं प्रज्ञापनासूत्रीयलेश्यापदतोऽवगन्तव्यम्—प० १७ पृ० ३३०-३७३ । २ अत्र मूलतत्त्वार्थे तदीये भाष्ये च 'क्रियानिवृत्ति' इत्येव पाठो मुद्रितो दृश्यते-अ० ९-४१ । सर्वार्थसिद्धि-राजवार्तिक-श्लोकवार्तिकेषु तु 'क्रियानिवर्ति' इत्येव पाठो मुद्रितो वर्तते परन्तु सर्वार्थसिद्धौ तालपत्रगतपाठान्तरत्वेन 'क्रियानिवृत्ति' इति पाठोऽधस्तादुपन्यस्तः-अ० ९-३९ ।

ध्यानमासादयति। अथः पूर्वविदेव तदनन्तरं ध्यानान्तरे वर्तमानः क्षायिकज्ञान-दर्शन-चारित्र-वी-
र्यातिशयसंपत्समन्वितो भगवान् केवली जायत इति स च अत्यन्तापुनर्भवसंपदङ्गनासमालिङ्गित-
तनुः कृतकृत्यः अचिन्त्यज्ञानाद्यैश्वर्यमाहात्म्यातिशयपरमभक्तिनम्रामरेश्वरादिवन्द्यचरणः अन्तर्मुहूर्तम्
देशोनां वा पूर्वकोटिं भवोपग्राहिकर्मवशाद् विहरन् यदा अन्तर्मुहूर्तपरिशेषायुष्कस्तत्तुल्यस्थितिनाम-
५ गोत्र वेदनीयश्च भवति तदा मनो-वाग्-बादरकाययोगं निरुध्य सूक्ष्मकाययोगोपगः सूक्ष्मक्रियाऽप्र-
तिपाति शुक्लध्यानं तृतीयमध्यास्ते यदा पुनरन्तर्मुहूर्तस्थितिकायुष्ककर्माधिकतरस्थितिशेषकर्मत्रयो
भवत्यसौ तदा आयुष्ककर्मस्थितिसमानस्थितिशेषकर्मसंपादनार्थं समुद्घातमाश्रित्य दण्ड-कपाट-
मन्थलोकापूरणानि स्वात्मप्रदेशविसरणतश्चतुर्भिः समयैर्विधाय तावद्भिरेव तैः पुनस्तान् उपसंहृत्य
स्वप्रदेशविश(स)रणसमीकृतभवोपग्राहिकर्मा स्वशरीरपरिमाणो भूत्वा ततः तृतीयं शुक्लध्यानभेदं परिस-
१० माप्य पुनश्चतुर्थं शुक्लध्यानमारभते तत् पुनर्विगतप्राणापानप्रचाराशेषकाय-वाग्-मनोयोगसर्वदेश-
परिस्पन्दत्वाद् विगतक्रियानिवर्ति इत्युच्यते तत्र च सर्वबन्धास्रवनिरोधः अशेषकर्मपरिक्षयसामर्थ्यो-
पपत्तेः तदेव च निश्शेषभवदुःखविटपिदावानलकल्पं साक्षाद् मोक्षकारणम् तद्ध्यानवांश्च अयोगिके-
वली निःशेषितमलकलङ्कोऽवाप्तशुद्धनिजस्वभाव ऊर्ध्वगतिपरिणामस्वाभाव्यात् निवातप्रदेशप्रदीपशि-
खावद् ऊर्ध्वं गच्छति एकसमयेन आलोकान्तात् विनिर्मुक्ताशेषबन्धनस्य प्राप्तनिजस्वरूपस्य आत्मनो
१५ लोकान्ते अवस्थानं मोक्षः "बन्धवियोगो मोक्षः"[1] [ ] इति वचनात्।

अत्र च जीवाजीवयोः आगमादिव अध्यक्षाऽनुमानतोऽपि सिद्धिः प्रदर्शिता आस्रवस्यापि
तथैव, कर्मयोग्यपुद्गलात्मप्रदेशानां परस्परानुप्रवेशस्वभावस्य तु बन्धस्य अनुपलब्धावपि अध्यक्षतः
अनुमानात् प्रतिपत्तिः। तथाहि—अशेषज्ञेयज्ञानस्वभावस्य आत्मनः स्वविषयेऽप्रवृत्तिर्विशिष्टद्रव्यसंब
न्धनिमित्ता, पीतहृत्पूरपुरुषस्वविषयज्ञानाऽप्रवृत्तिवत्, यश्च ज्ञानस्य स्वविषयप्रतिबन्धकं द्रव्यं तद्
२० ज्ञानावरणादि वस्तुसत् पुद्गलरूपं कर्म, आत्मनश्च सकलज्ञेयज्ञानस्वभावता स्वविषयाप्रवृत्तिश्च छद्म-
स्थावस्थायां प्राक् प्रदर्शितैव। औदारिकाद्यशेषशरीरनिबन्धनस्य अनेकाऽवान्तरभेदभिन्नाष्टविधकर्मा-
त्मकस्य कार्मणशरीरस्य सर्वज्ञप्रणीतागमात् सिद्धेः कथं न ततो बन्धसिद्धिः? न च कार्मणशरीरस्य
मूर्तिमत्त्वात् सत्त्वे उपलब्धिः स्यात् अनुपलम्भाच्च तद् असत् इति वाच्यम् यतः न सर्वं मूर्तिमद्
उपलभ्यते सौक्ष्म्यात् पिशाचादिशरीरस्येव औदारिकादिशरीरनिमित्ततयोपकल्पितस्य अनुपल-
२५ म्भेऽपि अपह्नोतुमशक्यत्वात्। कथमनुपलभ्यमानस्य अस्तित्वं तस्येति चेत्, नः आप्तवादात् तस्य
सिद्धेः। न च तद्भाव औदारिकाद्यपूर्वशरीरयोग आत्मनः स्यात्। न हि रज्ज्वाकाशयोरिव मूर्तामूर्त-
योर्बन्धविशेषयोगः कार्मणशरीराविनाभूतश्चामुक्तेः सदात्मा इति तस्य कथंचिद् मूर्तत्वम् ततश्च
औदारिकादिशरीरसंबन्धो रज्जु-घटयोरिव उपपत्तिमान्। अथ सूक्ष्मशरीरसिद्धावपि आस्रवनिरपेक्षाः
परमाणवो वाय्वादिसूक्ष्मद्रव्यनिमित्तपरमाणुद्रव्यवद् भविष्यन्तीति न बन्धहेत्वास्रवसिद्धिः, नैतत्,
३० क्रोडीकृतचैतन्यप्रयोजनस्य अचेतनस्य आस्रवनिरपेक्षपरमाणुहेतुत्वानुपपत्तेः न हि अभ्यन्तरीकृतचै-
तन्यप्रयोजनस्य आकाशद्रव्यादेर्वाग्-बुद्धि-शरीरारम्भादिनिरपेक्षपरमाणुजन्यता परस्यापि सिद्धा
अतः तृष्णानुबद्धस्य चैतन्यस्य मनो-वाक्-कायव्यापारवतः कर्मवर्गणापुद्गलसचिवस्य कार्मणशरीरा-
नुविद्धस्य तथाविधतच्छरीरनिर्वर्तकत्वम् अन्यथा तथाविधकारणप्रभवतच्छरीराभावे आत्मनो बन्धा-
भावतः संसारिसत्त्वविकलं जगत् स्यादेव। तीर्थान्तरीयैरपि आतिवाहिकादिशब्दवाच्यतया अभ्युप-
३५ गम्यमानं कार्मणशरीरं सकलदृष्टपदार्थाविसंवाद्यर्हदुक्तागमप्रतिपाद्यमवश्यमभ्युपगन्तव्यम् अन्यथा
सकलदृष्टाऽदृष्टव्यवहारोच्छेदप्रसङ्गः। न च अचेतनस्य तस्य कथं भवान्तरप्रापकत्वम्? चेतनाधि-
ष्ठितस्य अचेतनस्यापि देवदत्तव्यापारप्रयुक्तदेशान्तरप्रापणशक्तिमद्गोद्रव्यवद् अचेतनस्यापि तत्प्रापक-
त्वाविरोधात्। न च सदा चैतन्यानुषक्तस्य तस्य अचेतनव्यपदेशयोगितेति प्राक् प्रतिपादितत्वात्।
तदेवम् अनुमानाऽऽगमाभ्यां बन्धस्य प्रसिद्धिः। संवरस्य तु अध्यक्षाऽनुमानाऽऽगमप्रसिद्धता

---

१ "कृत्स्नकर्मक्षयो मोक्षः" तत्त्वार्थसू० अ० १०-३। २-णुद्रव्यवद् भ-बृ० आ० हा० वि०।

३-तस्यापि देव-बृ० आ० हा० वि०।-तस्यापि चेतस्यापि देव-वा० बा०। पुरस्ताद् 'अचेतनस्यापि' इति
पदस्य सत्त्वेन वाक्यसामञ्जस्याय 'चेतनाधिष्ठितस्य देवदत्तव्यापारप्रयुक्तदेशान्तरप्रापणशक्तिमद्गोद्रव्यवद्
अचेतनस्यापि तत्प्रापकत्वाविरोधात्' इत्येव पाठः कल्पयितुं समुचितः प्रतिभाति।

न्यायानुगतैव चैतन्यपरिणतेः स्वात्मनि स्वसंवेदनाध्यक्षसिद्धत्वात् अन्यत्र तु तत्प्रभवकार्यानुमेयत्वात् आगमस्य च तत्प्रतिपादकस्य प्रदर्शितत्वात् । निर्जरा तु ज्ञानावरणीयादेः कर्मणः केवलज्ञान-सद्भावान्यथानुपपत्त्या अनुमानतः । "तपसा निर्जरा च" [तत्त्वार्थ० ९-३] इति आप्तागमतश्च अस्मदादिभिः प्रतीयते सर्वकर्मनिर्जरावद्भिस्तु स्वसंवेदनाध्यक्षतः परमपदप्राप्तिहेतोः सम्यग्ज्ञानादेः स्वसंविदितत्वात् सर्वकर्मापगमाविर्भूतचैतन्यसुखस्वभावात्मस्वरूपस्य मोक्षस्यापि अनन्तरोक्तन्यायतः ५ प्रतिपत्तिः । तथाहि—'यदुत्कर्षतारतम्याद् यस्य अपचयतारतम्यं तत्प्रकर्षनिष्ठागमने भवति तस्य आत्यन्तिकः क्षयः, यथा उष्णस्पर्शतारतम्यात् शीतस्पर्शस्य, भवति च ज्ञान-वैराग्यादेरुत्कर्षतारतम्याद् अज्ञान-रागादेरपचयतारतम्यम्' इति अनुमानतः भगवदागमतश्च अस्मदादेरपवर्गसिद्धिः भगवतां तु केवलाध्यक्षतः इति जीवाऽजीवपदार्थद्वयाऽव्यतिरिक्तास्रवादिप्रतिपत्तिर्मुमुक्षुभिर्विधेया । तथाहि—मोक्षार्थिभिरवश्यं मोक्षः प्रमाणतः प्रतिपत्तव्यः अन्यथा तदुपायप्रवृत्त्यनुपपत्तेः न हि १० अनवगतसस्यादिसद्भावस्तदर्थी तत्प्राप्त्युपाये कृष्यादौ प्रवर्तितुमुत्सहते तदुपायप्रवृत्तिरपि उपाय-स्वरूपसंवर-निर्जरालक्षणपदार्थद्वयप्रतिपत्तिमन्तरेण अनुपपन्ना अज्ञातस्य प्रेक्षापूर्वकारिप्रवृत्तिविषय-त्वानुपपत्तेः । तथाहि—अशेषकर्मवियोगलक्षणो मोक्षः संवर-निर्जराफलः तदभावे अनुपपद्यमान-स्तत्प्रवृत्तिं तज्ज्ञानपूर्विकामाक्षिपति । न हि अभिनवकर्मोत्पत्तौ प्राक्तनाशेषकर्मसंयोगाभावो भावे वा आत्यन्तिकः तद्वियोगः संभवतीति संवर-निर्जराज्ञानं मुमुक्षुभिरवश्यं विधातव्यम् । कर्म-१५ बन्धोऽपि संवर-निर्जरानिवर्तनीयः संसारसरित्स्रोतःप्रवर्तको ज्ञातव्यः अज्ञातस्य उपायनिवर्तनीय-त्वायोगात् । अयमपि आस्रवफलत्वेन ज्ञातव्यः अन्यथा तदनुत्पत्तेः । यथा हि घटादेः स्नेहाभावे रजःसंबन्धो न घटते तथा कषायस्नेहाभावे नात्मनः कर्मरजःसंबन्ध उपपत्तिमान् । आस्रवोऽपि बन्धहेतुर्जीवाऽजीवकारणतया ज्ञातव्यः अन्यथा कारणस्य तस्य असंभवात् । न हि अज्ञातकारणं तत्कार्यतया शाल्यङ्कुरादिवज् ज्ञातुं शक्यम् । न च जीवाजीवबहिर्भूतमास्रवस्य कारणं भवति २० तद्व्यतिरेकेण पदार्थान्तरस्याऽसत्त्वात् जीवाजीवयोश्च परिणामित्वे सति आस्रवादिहेतुत्वम् एकान्त-नित्यस्य अनित्यस्य वार्थक्रियाऽनिर्वर्तकत्वेन असत्त्वात् । तस्मात् परिणामिजीवाजीवपदार्थद्वया-व्यतिरिक्तौ कथंचित् सकारणौ हेयोपादेयरूपौ बन्ध-मोक्षौ प्रतिपत्तव्याविति सप्त पदार्थाः प्रमाणतोऽभ्युपगन्तव्याः ।

यथा च संवर-निर्जरयोर्मोक्षहेतुता आस्रवस्य च बन्धनिमित्तत्वम् तथा आगमात् प्रति-२५ पत्तव्यम् तस्य च जीवाजीवादिलक्षणे दृष्टविषये वस्तुतत्त्वे सर्वदाऽविसंवादात् अदृष्टविषयेऽपि एक-वाक्यतया प्रवर्तमानस्य प्रामाण्यं प्रतिपत्तव्यम् । न च वक्त्रधीनत्वात् तस्य अप्रामाण्यम् वक्त्रधीनत्व-प्रमाणत्वयोर्विरोधाभावात् वक्त्रधीनस्यापि प्रत्यक्षस्य प्रामाण्योपलब्धेः । न च अक्षजत्वाद् वस्तु-प्रतिबद्धत्वेन तत्र प्रामाण्यम् न शाब्दस्य विपर्ययादिति वक्तव्यम् शाब्दस्य अत एव प्रमाणान्तरत्वो-पपत्तेः अन्यथा अनुमानादविशेषप्रसङ्गात् । तथाहि—गुणवद्वक्तृप्रयुक्तशब्दप्रभवत्वादेव शाब्दम् ३० अनुमानज्ञानाद् विशिष्यते अन्यथा बाह्यार्थप्रतिबन्धस्य अत्रापि सद्भावाद् नानुमानादस्य विशेषः स्यात् । यदा च परोक्षेऽपि विषये अस्य प्रामाण्यमुक्तन्यायात् तदा गुणवद्वक्तृप्रयुक्तत्वेन अस्य प्रामाण्यम् अतश्च गुणवद्वक्तृप्रयुक्तत्वमितीतरेतराश्रयदोषोऽपि नात्र अवकाशं लभते यथोक्त-संवादाद् अस्य प्रामाण्यनिश्चये । 'कुतोऽयमस्यात्र संवादः' इति अपेक्षायाम् 'आप्तप्रणीतत्वात्' इत्य-वगमो न पुनः प्रथममेव तत्प्रणीतत्वनिश्चयाद् अस्य अर्थप्रतिपादकत्वम् प्रतिबन्धनिश्चयात् अनुमान-३५ स्येव नापि दृष्टविषयाविसंवादिवाक्यैकवाक्यतां विरहय्य अदृष्टार्थवाक्यैकदेशस्य अन्यतः कुत-श्चित् प्राक्संवादित्वनिबन्धनस्य प्रामाण्यस्य निश्चयः अभ्यासावस्थायां तु आप्तप्रणीतत्वनिश्चयात् प्रवृत्तिरदृष्टार्थवाक्याच्च वार्यत इति कुत इतरेतराश्रयावकाशः ?

[ऐकान्तिकं वाच्यस्वरूपं निरसितुं लडादेरर्थविचारपक्षाः]

एकान्तवादिवाक्यात् तु दृष्टार्थेऽपि विसंवादिनः सर्वथा अप्रवृत्तिरेव निश्चितविसंवादाङ्गुल्य-४० ग्रहस्तियूथशतप्रतिपादकवाक्यादिवद् न हि एकान्तवादिवचनानां वाच्यं संभवि इत्युक्तम् । यतः सामान्यं वा तद्वाच्यं भवेत्, विशेषो वा, उभयम्, अनुभयं वेति विकल्पाः । { न तावत् सामान्यम् तस्येतरव्यावृत्तप्रतिनियतैकवस्तुरूपत्वायोगात् शब्दवाच्यत्वे घटाद्यानयनाय प्रेरितः सर्वत्र प्रवर्तेत

न वा क्वचित् भेदनिबन्धनत्वात् प्रवृत्तेः सामान्यस्य अनर्थक्रियाकारितया च प्रवृत्तिनिबन्धनत्वायोगात् । अथापि स्यात् यदाऽयं प्रतिपत्ता वाक्यमश्रुतपूर्वं शृणोति तदा पदानां संकेतकालानुभूतानामर्थं सामान्यलक्षणमेव प्रतिपद्यते या तु वाक्यार्थप्रतिपत्तिः सा अपेक्षा-सन्निधानाभ्यां विशेषणविशेष्यभावात् पदार्थप्रतिपत्तिनिबन्धना न पुनस्ततो वाक्यात् तथाविधस्य तस्य स्वार्थेन सह संब-
५न्धाप्रतिपत्तेः वाक्यमेव च प्रवृत्ति-निवृत्तिव्यवहारक्षमम् न पदम् तस्य अनर्थक्रियाकारिसामान्यप्रतिपादकत्वेनाप्रवृत्त्यङ्गत्वात् । अत एव न विवक्षाप्रतिभासिनमर्थं प्रतिपादयन्तः शब्दा अनुमानतामासादयन्ति अगृहीतप्रतिबन्धादपि वाक्यविशेषाद् यथोक्तन्यायतो वाक्यार्थप्रतिपत्तेः । अनेनैव अभिप्रायेण संगता वाक्यगतां चिन्तामनादृत्य पदमेव अनुमानेऽन्तर्भावितवन्तः । उक्तं च मीमांसकैः—

"वाक्यार्थे तु पदार्थेभ्यः संबन्धानुगमाद् ऋते ।
१० बुद्धिरुत्पद्यते तस्माद् भिन्ना साऽप्यक्षबुद्धिवत्" ॥
[श्लो० वा० शब्दप० श्लो० १०९] तथा,

"वाक्येष्वदृष्टेष्वपि सार्थकेषु पदार्थचिन्मात्रतया प्रतीतिम् ।
दृष्ट्वानुमानव्यतिरेकभीताः क्लिष्टाः पदाभेदविचारणायाम्" ॥
[श्लो० वा० शब्दप० श्लो० १११] इति,

१५असदेतत्; एवंकल्पनायां पदार्थानामपि वाक्यार्थप्रतिपत्तिहेतुत्वासंभवात् । तथाहि—'घटः पटः कुम्भः' इत्यादिपदेभ्यः यथा अन्योन्याननुषक्तस्वतन्त्रसामान्यात्मकार्थप्रतिपत्तिस्तथा संबद्धपदसमूहश्रवणादपि किं न तथाभूतसामान्यप्रतिपत्तिर्भवेत्? न हि ततः सामान्यमात्राधिगमे तत्परित्यागतो विशिष्टार्थप्रतिपत्तौ निमित्तमस्ति न वापेक्षा-सन्निधानादिकं पदार्थानां तत्प्रतिपत्तौ निमित्तम् पदार्थस्य पदार्थान्तरं प्रत्युत्पत्तौ प्रतिपत्तौ वा अपेक्षादेरयोगात् तस्य सामान्यात्मकत्वेन उत्पत्तेरसंभ-
२०वात् स्वपदेभ्य एव प्रतिपत्तेः तत्रापि पदार्थान्तरापेक्षाद्यनुपपत्तेः । अर्थशक्तित एव ततो विशेषप्रतिपत्तिरिति चेत् तर्हि पदार्थानामेकार्थसंभवा प्रतिपत्तिर्यस्य तस्यापि ततस्तत्प्रतिपत्तिर्भवेत् । न च सामान्यत्यागे किञ्चिन्निबन्धनम् बाधकाभावात् सति अर्थित्वे उभयप्रतिपत्ति-प्रवृत्ती स्याताम् । न च वाक्यार्थप्रत्यय एव बाधकः तेन तस्य विरोधाभावात् सामान्य-विशेषयोः साहचर्यात् सामान्यप्रत्ययस्य च विशेषप्रतिपत्तिं प्रति निमित्तत्वाभ्युपगमात् निमित्तस्य च निमित्तिना अबाध्यत्वात्
२५अन्यथा तस्य तन्निमित्तत्वायोगात् । अथ प्रागपि एवमयं व्युत्पादितः—यत्र पदार्थानामेकद्रव्यसंभवस्तत्र पदार्थसामान्यत्यागाद् विशेषः प्रतिपत्तव्यः यथा नीलोत्पलादौ, नन्वेवं सर्ववाक्यानि अस्य व्युत्पादितान्येव भवन्ति । तथाहि—यः कश्चित् संभवदेकद्रव्यार्थनिवेशः पदसमूहः स संकेतसमयावगतसामान्यात्मकावयवार्थपरित्यागतस्तेषामेव विशेषणविशेष्यभावेन विशिष्टार्थगोचरः प्रतिपत्तव्यः, यथा 'नीलोत्पलं पश्य' इत्यादिपदसंघातः, तथा चायमपूर्ववाक्यात्मकः पदसमुदायः इति संकेतमनु-
३०सृत्य यदा ततस्तथाभूतमर्थं प्रत्येति तदा कथं न विशिष्टार्थवाचकं वाक्यम्? अनेनैव च क्रमेण शब्दविदां समयव्यवहार उपलभ्यते । यथा 'धात्वादिः क्रियादिवचनः कर्त्रादिवचनश्च लडादिः'[1] इति समयपूर्वकं प्रकृति-प्रत्ययौ प्रत्ययार्थं सह ब्रूत इति व्युत्पादितोऽनर्थक्रियाकारित्वेन सामान्यमात्रस्य विशेषनिरपेक्षस्य प्रतिपादयितुमनिष्टेः तत्परित्यागेन व्यवहारकाले विशेषमवगच्छति व्यवहारी । न च प्रकृति-प्रत्ययार्थावेव अत्र पदार्थं प्रतिपादयतः न पदमिति मन्तव्यम्,

३५ "अशाब्दे वापि वाक्यार्थे न पदार्थेष्वशाब्दता ।
वाक्यार्थस्येव नैतेषां निमित्तान्तरसंभवः" ॥ [श्लो० वा० वाक्याधि० श्लो० २३०]

इत्यस्य विरोधप्रसक्तेः । न च वाक्यस्य वाक्यार्थे संकेतकरणे अनुमानात् शाब्दस्य अविशेषप्रतिपत्तिः, विशेषस्य प्राक् प्रतिपादितत्वात् केवलस्य च पदस्य प्रयोगानर्हत्वात् वाक्यस्य तु प्रयोगार्हस्य सामान्यानभिधायकत्वात् कथं सामान्यं शब्दार्थः स्यात्?

---

1 लगडादिः आ० हा० वि० । लगुडादिः वृ० । नियोगस्वरूपप्रतिपादन-निरसनपरा अष्टसहस्रीगता चर्चाऽत्रानुसंधेया-पृ० ५ पं० १७-पृ० १० ।

यैस्तु पूर्वपदानुरञ्जितं पदमेव वाक्यम् पदार्थ एव पदार्थान्तरविशेषितो वाक्यार्थोऽभ्युपगतः । तथाहि—'दण्डी' 'छत्री' इत्यादिव्यपदेशं यथा पुरुष एव समासादयति नान्यस्तद्व्यतिरिक्तः तथा 'अपाक्षीत्' 'पचति' 'पक्ष्यति' इत्याद्यतीतकालाद्यवच्छिन्नः क्रियाविशिष्टश्च देवदत्त एव प्रतीयते-'अपाक्षीत्' इत्यादिशब्दानां देवदत्तशब्देन सामानाधिकरण्यात्-न तु तद्व्यतिरिक्तोऽर्थः । अथ यद्यत्र कालाद्यवच्छिन्नपुरुष एव प्रतीयते तदा 'अग्निहोत्रं जुहुयात्' 'ग्रामं गच्छ' 'स्वाध्यायः कर्तव्यः' इति लिङ्-लोट्-कृत्यप्रयोगेषु कस्यार्थस्य प्रतीतिः? अत्रापि कर्मणि नियुक्तः क्रियाविशिष्टोऽध्येषणादिविशिष्टश्च देवदत्त एव प्रतीयते केवलं वर्तमानादिः कालो न विशेषणत्वेन अत्र अवतिष्ठते । अथ यदि नात्रार्थातिरेकावगतिर्भावसंपादने कथं पुरुषः प्रवर्तते[1]? यथा हि देवदत्तः 'पचति' इत्यादिवाक्यान्न प्रवर्तते[2] तथा 'जुहुयात्' इत्यस्मादपि नैव प्रवर्तेत[3] प्रवृत्तिनिमित्तस्य अनवबोधात्, असदेतत्; 'जुहुयात्' इत्यादिवाक्यजनितविज्ञानस्यैव प्रवर्तकत्वात् प्रवृत्तेस्तद्भावभावित्वेन उपलम्भात् एतद्वाक्यसमुत्थं ज्ञानं पुरुषं स्वर्गादिसाधने नियोजयद् उपलभ्यते न 'पचति' आदिवाक्यसमुत्थम् । तथाहि—विध्यादिवाक्यजनितज्ञानानन्तरमिच्छा तदनन्तरं प्रयत्नः तदनन्तरं च पुरुषस्य स्वर्गादिफलार्थः परिस्पन्दः ततोऽपि फलपर्यन्तात् स्वर्गफलावाप्तिः इत्यभिधानात् । तेऽपि अयुक्तिकारिणः[4] एकान्तपक्षे विशेषण-विशेष्ययोरत्यन्तभेदे अभेदे वा विशेषणानुरागस्य पद-पदार्थेष्वसंभवात् वाक्यार्थकल्पनादेरनुपपत्तेः अत एव 'अपाक्षीद् देवदत्तः' इत्यादौ न कालक्रियाविशिष्टपुरुषप्रतिपत्तिः क्रियादेः पुरुषाद् भेदे संबन्धासिद्धितो व्यवच्छेदकत्वानुपपत्तेः अभेदेऽपि एकस्य तात्त्विकविशेषण-विशेष्यरूपताऽसंगतेः अन्यथा अतिप्रसङ्गात् कल्पनारचितस्य तद्रूपत्वस्य सर्वत्राविशेषात् विशिष्टप्रत्ययोत्पत्तेश्च अन्यनिमित्तत्वात् विरोधादिदोषस्य च तत्र प्रागेव प्रतिविहितत्वात् । एतेन लिङादियुक्तवाक्यजनितविज्ञानस्य प्रवर्तकत्वमेकान्तवादिप्रकल्पितं प्रतिक्षिप्तम् तद्भावभावित्वस्य अन्यथासिद्धत्वप्रतिपादनात् । यदपि अत्र

' "संसर्गमोहितधियो विविक्तं धातुगोचरात् ।
भावात्मानं न पश्यन्ति ये तेभ्यः स विविच्यते" ॥ [ ]

इत्यादिना ग्रन्थसंदर्भेण प्रतिपादयन्ति—भाव एव साध्यतया लिङादिभिरभिधीयते न कर्ता "पूर्वापरीभूतं भावमाख्यातमाचष्टे" [ ] इति वचनाद् भाव एव च कालत्रयशून्यः साध्यतया प्रतीयमानो विधिरिति अभिधीयते स च आत्मलाभाय प्रेरयन् पुरुषं लिङर्थः' इति, तदपि अनुपपन्नम्; भावस्य फलसापेक्षत्व-निरपेक्षत्वविकल्पद्वयेऽपि साध्यत्वानुपपत्तेः । न तावत् फलनिरपेक्षो भाव आत्मविषयसाध्यतायां पुरुषं प्रेरयितुं समर्थः, प्रेक्षापूर्वकारिणः फलविकले कर्मणि कुतश्चिदप्रवृत्तेः । अपि च, असौ भावः स्वात्मनिष्पादनाय पुरुषं प्रेरयन् निष्पन्नः अनिष्पन्नो वा प्रेरयेत्? न तावद् निष्पन्नः तत्सद्भावस्य सिद्धत्वात् । नापि अनिष्पन्नः अविद्यमानस्य अतिप्रसक्ततः प्रेरकत्वायोगात् । न च सामान्याकारेण विद्यमानो विशेषाकारसंपादनाय भावः पुरुषं प्रेरयतीति वक्तव्यम् सामान्याकारेण विद्यमानतया तस्य साध्यत्वानुपपत्तेः विद्यमानस्य च वर्तमानत्वेन लिङर्थत्वानुपपत्तेः त्रिकालशून्यस्य लिङर्थत्वाभ्युपगमाद् विशेषाकारतायाश्च संपाद्यत्वेऽपि प्रेरकत्वानुपपत्तिरित्युक्तम् । अथ फलापेक्षो भावः स्वात्मसंपादनाय पुरुषं प्रेरयतीत्यभ्युपगमस्तर्हि फलस्यैव प्रेरकत्वम् न भावस्य स्यात् तथाभ्युपगमेऽपि दोष एव-तत्रापि विद्यमानाविद्यमानविकल्पद्वयानतिवृत्तेः । तथाहि—यद्यपि सर्वाः क्रियाः प्रयोजनवत्त्वेन व्याप्ता इति तदेव भावसंपादने पुरुषं प्रेरयति तथापि तत् एकान्ततो विद्यमानं कथं पुरुषं प्रेरयेत्? न हि यद् यस्यास्ति स तदर्थमेव लोके प्रवर्तमानो दृष्टः प्रयोजनमनुद्दिश्य प्रेरकसद्भावेऽपि कस्यचित् प्रवृत्त्यनुपलब्धेः । न च प्रयोजनस्य आत्मसंबन्धितामुत्पादयितुमसौ प्रवर्तते, आत्मसंबन्धिताया अपि विद्यमानत्वेन प्रवृत्तिविषयत्वानुपपत्तेः । किञ्च, दुःखविरहसुख[5]स्वभावलक्षणं प्रयोजनमुपजायमानमात्मसंबन्धितयैव उपजायत इति न तदर्थोऽपि प्रयासः सफलः । न च प्रयोजनमविद्यमानं पुरुषं प्रेरयति अविद्यमानस्य कारकत्वायोगात् । कार्यतया तत् तत्र प्रेरयतीति चेत्, ननु साऽपि यदि भावरूपा न तर्हि विद्यमानत्वात् पुरुषप्रवर्तिका भवेत् । न च विद्यमानस्य कार्यरूपता संभवति तस्य कार्यताविरोधात् । अथ अभावरूपा तथापि

१-वर्तेत बृ० । २-वर्तेत बृ० । ३-वर्तते बा० बा० । ४ अयुक्तका-वा० बा० । ५-सुख भा-भां० ।

न प्रेरकत्वम् अभावस्यापि स्वरूपेण विद्यमानत्वात्। न च स्वर्गाभावः पुरुषार्थत्वेन अभ्युपगतः । न च परस्परविविक्तोभयरूपतयाऽपि कार्यतायाः प्रेरकत्वम् उभयदोषानुषङ्गात् अन्योन्यानुषक्तोभयरूपताऽभ्युपगमे परपक्षाभ्युपगमप्रसक्तिः फलानुभवपर्यायाव्यतिरिक्तस्य कारणपर्यायात्मकस्य आत्मनः फलात्मतया परिणामात् कारण-फलपर्याययोः कथंचिद् अभेदात् एकस्यैव आत्मद्रव्यस्य तत्तद्रूपतया ५ विवृत्तेः फलस्य भावाभावरूपतया प्रवर्तकत्वात् अन्यथा सर्वव्यवहारोच्छेदप्रसक्तेः।

अन्ये तु विधेः प्रवर्तकत्वमभ्युपपन्नाः त्रिकालशून्यो विधिरेव प्रवर्तकैकस्वभावः लिङोपदिश्यमानः कर्मणि पुरुषं नियोजयति स च प्रेषणाऽध्येषणादिव्यतिरिक्तस्तदनुगतश्च गोव्यक्तिषु गोत्ववत्। अध्येषणा सत्कारपूर्वको नियोगः प्रेषणा तु न्यत्कारपूर्वको नियोग एव पुरुषगताशयविशेषः प्रेषणाऽध्येषणाशब्दवाच्यः। न चास्य प्रेरकत्वम् व्यभिचारात् । तथाहि—अध्येषणाऽभावेऽपि प्रेषणातः १० पुरुषप्रवृत्तिरुपलभ्यते तदभावेऽपि चाध्येषणातः इति न प्रेषणादेः पुरुषप्रवर्तकत्वम् किन्तु यथोक्तो विधिर्भाव्यनिष्ठभावकव्यापारस्वभावभावनानुगते स्वर्गादिफलसंपादके धात्वर्थे पुरुषं नियोजयति। तदुक्तम्—

"विधावनाश्रिते साध्यः पुरुषार्थो न लभ्यते।
श्रुतः[1] स्वर्गादिवाक्येन धात्वर्थः साधनतां व्रजेत्" ॥

१५ [श्लो० वा० औत्पत्तिकसू० श्लो० १४]

अपरे तु मन्यन्ते धात्वर्थमात्रं फलपर्यालोचनानिरपेक्षो विधिः पुरुषं प्रेरयति स तथाभूतो लिङादिप्रत्ययाभिधेयः इति।

सर्वं एते अयुक्तवादिनः यतः विधिर्न अलब्धसत्ताकः पुरुषं प्रेरयति अविद्यमानस्य गगनकुसुमादेरिव प्रेरकत्वासंभवात् संभवे वा विद्यमानताप्रसक्तेः । न च अविद्यमानविध्यर्थं प्रेरणा २० प्रतिपादयितुं प्रभवति प्रतिपादने वा अविद्यमानविषयत्वेन केशोण्डुकादिज्ञानवद् न प्रमाणं भवेत्। न च अविद्यमानेन सह लिङ्प्रत्ययस्य संबन्धः तदभावात् तस्य अवाचकत्वं स्यात्। अथ लब्धसत्ताको विधिः प्रेरकस्तदा त्रिकालशून्यता तस्य व्यावर्तेत वर्तमानकालताप्राप्तेः लिङ्प्रत्ययगम्यता च न स्यात् सांप्रतकाले च तस्मिन् प्रत्यक्षादेरप्यवतारात् चोदनैव धर्मे प्रमाणम् प्रमाणमेव चोदना इति न वक्तव्यं स्यात् प्रत्यक्षादेस्तत्र प्रवृत्तौ अवधारणद्वयस्यापि अनुपपत्तेः । न च सामान्याभिधायि पदं २५ विशेषाभिधायि युक्तम् औत्पत्तिकश्च शब्दस्य संबन्धः सामान्यलक्षणेन अर्थेन न विशेषेण । न च असंबद्धपदं विशेषे विज्ञानं विधातुं समर्थम् । न च अनवगतो विधिः प्रवर्तको युक्तः । किञ्च, विधेरपि निष्पाद्यत्वात् तन्निष्पत्तये पुरुषः केन प्रेर्येत इति वक्तव्यम्। यदि विध्यन्तरेण[2] तथा तत्रापि तदन्तरेण इति अनवस्था। अथ इच्छातः तत्रासौ प्रवर्तते तर्हि सर्वत्र तथैव प्रवर्तताम् किमप्रमाणकविधिकल्पनया? अथ नित्यो विध्यर्थः पुरुषं प्रेरयतीत्यभ्युपगमस्तर्हि तस्य लिङ्प्रत्ययवाच्यता ३० व्यावर्तेत लिङस्त्रिकालशून्यार्थविषयत्वात् विध्यर्थस्य तु नित्यतया वर्तमानकालत्वात् वर्तमानकालत्वे च तत्र अध्यक्षादेरपि अवतारात् प्रतीतार्थानुवादकत्वेन न तत्र प्रेरणा प्रमाणं स्यात्। किञ्च, नित्यत्वे लिङर्थस्य धर्मरूपता व्यावर्तेत कार्यरूपस्य अर्थस्य धर्मरूपताभ्युपगमात् चोदनैकगम्यस्य तु विध्यर्थस्य लिङा संबन्धानवगमात् न ततस्तत्प्रतिपत्तिः स्यात्। अथ अनवधारितनित्यसंबन्धमपि शब्दशक्तिस्वाभाव्यात् तत्पदं तमर्थमेव बोधयति तर्हि गवादिपदानामपि शब्दशतथैव अनवगतसंबन्धानां ३५ स्वार्थप्रत्यायकत्वं भवेत्। अथ तेषां तथाभूतानां न तत्त्वम् तर्हि विधिपदस्यापि तन्न स्यात् अत एव न पदाद् वाक्यम् पदार्थाद् वा वाक्यार्थ एकान्ततो भिन्नः अभिन्नो वा अभ्युपगन्तव्यः अन्यथा उक्तदोषानतिवृत्तेः। किञ्च, अयं विधिर्वाक्यश्रवणानन्तरं किं प्रतिभाति, उत पुरुषव्यापारान्यथानुपपत्त्या प्रतीयते? न तावद् आद्यः पक्षः वाक्यश्रवणानन्तरं पुरुषस्यैव अध्येषणादिविशिष्टतया प्रतीतेः पुरुषश्च आत्मानमेव वाक्यात् कर्मणि नियुज्यमानमवगच्छति तदवगमाच्च इच्छयैव प्रवर्तते अतः ४० प्रवृत्तिरपि अन्यथासिद्धेति नासौ लिङर्थमवगमयति। किञ्च, प्रवृत्त्यन्यथानुपपत्त्या निमित्तमात्रस्यैव अवगतिर्न विध्यर्थस्य प्रत्यक्षादेरपि हेयम् उपादेयं चार्थमवगत्य निवर्तन्ते प्रवर्तन्ते वा जन्तवः । न

---

१ "श्रुतस्वर्गादिबाधेन"–श्लो० वा०।

२–ण तत्रापि वा० बा०। अत्र 'विध्यन्तरेण तदा तत्रापि' इति पाठः सुचारुः। ३–न्द्व्यक्ति–बृ०

च तत्र विधेर्निवर्तकत्वम् प्रवर्तकत्वं वेष्यते एवमिहापि अभिप्रेतफलार्थी अध्येषणादेः इच्छातो वा प्रवर्तेत । न च अध्येषणादेर्व्यभिचारात् प्रवर्तकत्वमयुक्तम् यथासंभवं प्रवर्तकत्वोपपत्तेः यदा अध्येषणा तदा तस्या एव प्रवर्तकत्वम् यदा तु प्रेषणा तदा तस्या एव । न हि रक्ततन्त्वभावेऽपि शुक्लेभ्यस्तेभ्यः पटोत्पत्तौ रक्ततन्तवो न स्वोत्पाद्यपटोत्पत्तौ परिणामिकारणतां प्रतिपद्यन्ते न च तद्व्यतिरिक्तोऽन्यः कश्चित् तत्र परिणामिकारणत्वमासादयति । किञ्च, धात्वर्थोऽपि यदि धातुना परिनिष्पन्नोऽभिधीयते ५ तदा न विधेः पुरुषप्रेरकत्वमभ्युपगन्तव्यम् धात्वर्थस्य निष्पन्नत्वात् । सामान्यपदार्थवादिनां तु धात्वभिधेयस्य कथं पुरुषव्यापारसाध्यत्वम् सामान्यस्य नित्यतया साध्यत्वानुपपत्तेः ? न च विशेष उत्पाद्यो धातुवाच्यः तेन सह नित्यतया संबन्धायोगात् न हि अनित्येन नित्यः संबन्धो घटते अभ्युपेयते वा वाच्यवाचकतत्संबन्धानां परेण नित्यत्वाभ्युपगमात् । अपि च, विधेः प्रवर्तकत्वे कारकत्वं स्यात् न प्रामाण्यम् इच्छा-प्रयत्नादेरिव तथात्वे तदनुपपत्तेः प्रवर्तकत्वं च १० यथोक्तन्यायाद् अनुपपन्नम् । एवं 'ब्राह्मणं न हन्यात्' इति प्रतिषेधविधिरपि प्रतिक्षिप्तो द्रष्टव्यः । तथाहि—अयं पुरुषं क प्रेरयतीति वक्तव्यम् नञर्थे, भावनायाम्, धात्वर्थे वा ? तत्र यदि नञर्थे विधिः पुरुषं प्रवर्तयति, तदयुक्तम्; नञर्थस्य अभावरूपत्वात् तत्र विधेः प्रेरकत्वासंभवात् । न हि अक्रियात्मके नञर्थे कस्यचित् प्रेरकत्वमुपपन्नमित् । अथ वधप्रवृत्तं पुरुषं निवर्तयति प्रतिषेधविधिः, अयुक्तमेतत्; प्रतिषेधेनैव निवर्तिनत्वाद्[1] विधेस्तत्र नैरर्थक्यात् । अथ प्रतिषेधनिषिद्धस्य अनिवृत्तेस्तत्र १५ विधिराश्रीयते विधिनिषिद्धोऽपि यदि न निवर्तते तदा किमाश्रयणीयम् ? अथ भावनायां विधेः प्रवर्तकत्वम्, अयुक्तमेतत्; रागत एव तस्यामस्य प्रवृत्तेः विधेर्वैयर्थ्यात् । न च धात्वर्थेऽपि तमसौ प्रवर्तयति, तत्रापि रागादेवास्य प्रवृत्तेः । विधिर्हि अप्रवृत्तप्रवर्तकः रागात् प्रवृत्तस्य च प्रवर्तने विधित्वायोगात् । अथ नञ्संबद्धभावनायां विधिः प्रवर्तयति, न; नञर्थसंबद्धायास्तस्या अभावरूपत्वेन प्रवृत्तिविषयत्वानुपपत्तेः । अथ नञर्थविशिष्टधात्वर्थे प्रतिषेधविधिना पुरुषः प्रवर्त्यते, नैतत् २० सारम्; तस्यापि नञर्थविशिष्टस्य अभावरूपत्वात् प्रवृत्तिविषयत्वायोगात् । न च भावनायां हननविशिष्टायां रागात् प्रवर्तमानः पुरुषः प्रतिषेधपर्युदस्तायां विधिना नियुज्यते, अभावविशिष्टाया भावनाया विधिविषयत्वायोगात् । न चासौ हननाभावविशिष्टा विधि[2]विषयतां प्रतिपद्यते, अभावस्य अव्यापाररूपतया भावनां प्रति व्यवच्छेदकत्वायोगात् । न च हन्तिर्नञुपहितः । अभक्ष्याऽस्पर्शनीयन्यायेन हननव्यतिरिक्तधात्वर्थान्तराभिधायकत्वात् तदवच्छिन्नां भावनां प्रकाशयति सा च विधेर्गो- २५ चरतां प्रतिपद्यते इति वक्तव्यम्, यतो भावनायां हननव्यतिरिक्तधात्वर्थमात्रविशिष्टायां विधेः प्रवर्तकत्वमेव न निवर्तकत्वम् प्रवर्तकत्वैकरूपत्वेन तस्याऽभ्युपगमात् तच्च यथा तस्य न संभवति तथा प्रतिपादितमेव । तन्न मीमांसकाभिप्रायेण विधेः प्रवर्तकत्वम् निवर्तकत्वं वा संभवति । तेन—

"साधने पुरुषार्थस्य संगिरन्ते त्रयीविदः ।
बोधविधौ समायत्तम्" [ ] इत्याद्यसंगतार्थाभिधानम् । ३०

ये तु भावनां वाक्यार्थत्वेन प्रतिपादयन्ति भावना हि भाव्येऽर्थे स्वर्गादिके पुरुषस्य व्यापारः "भाव्यनिष्ठो भावकव्यापारो भावना" [ ] इति वचनात् सा च 'किं केन कथम्' इति त्र्यंशपरिपूर्णा—किम् इति स्वर्गम्, केन इति दर्श-पूर्णमास्यादिना भावयन्, कथम् इति इतिकर्तव्यतां दर्शयति प्रयोगादिव्यापाररूपाम्—इयमित्थंभूता भावना पदार्थप्रतिपाद्या पदानां वाक्यार्थप्रतिपादने सामर्थ्याभावात् तानि हि स्वार्थप्रतिपादनमात्रेण निवृत्तव्यापाराणि न वाक्यार्थबोधक्षमाणि ३५ आकाङ्क्षासन्निधियोग्यतावच्छिन्नानां पदार्थानामेव अन्वय-व्यतिरेकाभ्यां वाक्यार्थवेदकत्वप्रतिपत्तेः । तथाहि—पदश्रवणाभावेऽपि यदा श्वेतगुणं द्रव्यं पश्यति अश्वजातिं च 'हेषा'शब्दाद् अनुमिनोति क्रियां च खुरविक्षेपादिशब्देन च बुध्यते तदा 'श्वेतोऽश्वो धावति' इति अवगच्छति । उक्तं च—

"पश्यतः श्वैत[3]मारूपं 'हेषा'शब्दं च शृण्वतः ।
पदविक्षेपशब्दं च श्वेताश्वो धावतीति धीः" ॥ ४०
[श्लो० वा० वाक्याधि० श्लो० ३५८]

---

१ अत्र 'निवर्तितत्वाद् विधेस्तत्र' इति पाठः संभाव्यते । २ विधेवि-(-धेर्वि-)-बृ० ।
३ अत्र 'श्वेतता' इत्यपि संभाव्येत । "श्वैतिमा"-श्लो० वा० ।

यत्र चापचारात् मानसात् शृण्वन्नपि पदानि पदार्थान् नावधारयति तत्र न भवति वाक्यार्थप्रत्यय इति व्यतिरेकबलात् पदार्थानां वाक्यार्थावेदकत्वमवसीयते । उक्तं च—

"भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया" ॥

"अनेकगुणजात्यादिविकारार्थानुरञ्जिता" ।

५ [श्लो० वा० वाक्याधि० श्लो० ३३०-३३१]

एतेऽपि अयुक्तवादिन एव, पुरुषव्यापारस्य तद्व्यतिरिक्तस्य प्राक् प्रतिषिद्धत्वात् वाक्यार्थानुपपत्तेः । तत्सत्त्वेऽपि यदि असौ पदार्थाद् अभिन्नस्तदा पदार्थ एव स्यात् न वाक्यार्थः तथा च कुतः पदार्थगम्यता । न च पदार्थस्य सामान्यात्मकत्वात् कार्यता ततो न धर्मरूपता तथा च प्रत्यक्षादिगोचरत्वात् चोदनायास्तदनुवादकत्वेन तद्विषयत्वेन प्रवर्तमानाया न प्रामाण्यं स्यात् इत्युक्तं प्राक् । न च पदाना-
१० मपि प्रामाण्यं स्मृत्युत्पादकत्वेन भवद्भिरभ्युपगम्यते

"पदमप्यधिकाभावात् स्मारकान्न विशिष्यते" [श्लो० वा० शब्दप० श्लो० १०७]

इति अभिधानात् । तथा च न क्वचिदर्थे शाब्दस्य प्रामाण्यं भवेत् । अथ क्रियाकारकसंसर्गरूपः पदार्थादर्थान्तरं वाक्यार्थः ननु असावपि यदि अनित्यस्तदा कारकसंपाद्यः, पदार्थसंपाद्यो वा ? न कारकसंपाद्यः स्वकृतान्तप्रकोपात् । पदार्थोत्पाद्यत्वेऽपि य एव पदार्थास्तस्योत्पादकास्त एव यदि ज्ञापका-
१५ स्तदा पूर्वं किं ज्ञापकाः, उत उत्पादका इति वक्तव्यम् । यदि प्राक् ज्ञापकास्तदा तदुत्पादितं ज्ञानमविद्यमानवाक्यार्थविषयत्वात् केशोन्दुकादिज्ञानवत् अप्रमाणं स्यात् कर्तव्यतया ते तं ज्ञापयन्तीति चेत्, न; तस्यामपि भावाभावोभयानुभयविकल्पानतिक्रमात् । आद्यविकल्पे तत्कर्तव्यताया भावस्वभावतया विद्यमानवाक्यार्थविषया चोदना स्यात् तथा च विद्यमानोपलम्भनत्व-तत्संप्रयोगजत्वोपपत्तेः अध्यक्षवन्न भावना अर्थविषया स्यात् । अथ अभावस्वभावा कर्तव्यता, नः अभावस्य तुच्छतया कर्तुम-
२० शक्तेः । अतुच्छत्वेऽपि स्वेन रूपेण विद्यमानत्वात् कर्तव्यताऽसंभवात् । न च अभावविषयं चोदनायाः परैः प्रामाण्यमभ्युपगम्यते अभावप्रमाणविषयत्वाच्च अभावस्य तद्विषयत्वे चोदनाया अनुवादकत्वाद् अप्रामाण्यप्रसङ्गश्च । न च उभयाकारताऽपि, उभयदोषप्रसक्तेः । अनुभयविकल्पेऽपि चोदनाजनितज्ञानस्य निर्विषयताप्रसक्तिः । अथ ते तं प्राग् उत्पादयन्ति पश्चाद् ज्ञापयन्ति इत्यभ्युपगमः सोऽपि अनुपपन्नः विद्यमानार्थविषयत्वेन चोदनायाः प्रत्यक्षाद्यवगतार्थगोचरत्वाद् अप्रामाण्यप्रसक्तेः । अथ
२५ नित्यो वाक्यार्थः पदार्थैः प्रतिपाद्यते नन्वेवं विद्यमानार्थगोचरत्वं चोदनायाः स्यात् तथा च 'त्रिकालशून्यकार्यरूपार्थविषयविज्ञानोत्पादिका चोदना'इत्यभ्युपगमव्याघातः ।

अपि च, वाक्यार्थमवबोधयन्तः पदार्थाः किं शब्दप्रमाणतया अवबोधयन्ति, उत अनुमानत्वेन, आहोस्वित् अर्थापत्तितः, उतस्वित् प्रमाणान्तरत्वेन इति विकल्पाः । यद्याद्यो विकल्पः स न युक्तः, पदार्थानामशब्दात्मकत्वात् । अथ द्वितीयः सोऽपि न युक्तः, पदार्थानां वाक्यार्थाविनाभावित्वेन प्राग्
३० अप्रतिपत्तेः अनुमानानवतारात् । न च वाक्यार्थस्य प्रमाणान्तरागोचरत्वात् पदार्थव्यापकताऽनवगता अनुमानगोचरः अन्यत्रापि तथाभावप्रसक्तेः वाक्यार्थाविनाभावित्वावगमे वा पदार्थानां चोदनाया अनुवादरूपताप्रसक्तेरप्रामाण्यानुषङ्गः । न च पदार्थानां पक्षधर्मता क्वचिद् अवगम्यते । न च तदवगमव्यतिरेकेण अनुमानप्रवृत्तिः । न च अर्थापत्तिरूपत्वेन पदार्था वाक्यार्थमवबोधयन्ति 'चोदनालक्षणोऽर्थो धर्मः' इत्यभ्युपगमव्याघातप्रसक्तेः । न च अर्थापत्तिरनुमानाद् विशिष्यते इति

---

१ यत्र चापचारात् मानसाच्छृ–वा० बा० भां० मां० । यत्र चापरात् मानसाच्छृ–बृ० आ० हा० वि० । यत्र चापरात्मा न स्याच्छृ–बृ० सं० ।

पार्थसारथिमिश्रेण शाबरवचनमित्थमुद्धृतम्—

"मानसादपचारादुच्चरितेभ्योऽपि पदेभ्यः" श्लो० वा० पार्थ० व्या० पृ० ९४६ पं० १५ । मुद्रिते शाबरे तु इत्थं पाठो दृश्यते—"मानसादप्याघाताद् यदुच्चरितेभ्यः पदेभ्यः"–पृ० २५ पं० १७ । "यत्रापि मानसापचारादग्रहणं तत्रापि" —श्लो० वा० पार्थ० व्या० पृ० ९४७ पं० १० ।

"मानसेनापराधेन पदार्थान् ये न गृह्णते"–श्लो० वा० वाक्याधि० श्लो० ३६० ।

"किञ्च, अन्वयव्यतिरेकाभ्यामपि पदार्थानां निमित्तत्वमवसीयते । उच्चरितेभ्योऽपि पदेभ्यः कदाचिद् मानसादपचारात् पदार्थाग्रहणे वाक्यार्थाग्रहणात्"—शाबरदी० युक्तिस्नेहप्रपूरणी सिद्धान्तचन्द्रिका पृ० १६० पं० २६ ।

प्रसङ्ग प्रतिपादितत्वात् । न च प्रमाणान्तरात्मकाः सन्तः पदार्था वाक्यार्थं गमयन्ति, तृतीयविकल्पोक्त-दोषप्रसक्तेः । अथ 'पदेभ्यः पदार्थाः तेभ्यश्च वाक्यार्थः प्रतीयते' इति पारम्पर्येण चोदनाया धर्मं प्रति निमित्तता तर्हि श्रोत्रात् पदज्ञानम् ततोऽपि पदार्थविज्ञानम् तस्माच्च धर्मज्ञानम् इति प्रत्यक्ष-लक्षणोऽर्थो धर्मः प्रसक्तः । अथ साक्षाद् धर्मे प्रेत्यक्षस्य व्यापाराभावान्न प्रत्यक्षलक्षणता धर्मस्य तर्हि चोदनाया अपि साक्षात् तत्र व्यापाराभावान्न चोदनालक्षणोऽपि धर्मः स्यात् । पदं च ५ पदार्थस्यापि स्मारकत्वाद् न वाचकम् । न च वाक्यार्थे स्मर्यमाणपदार्थसंबद्धतयाऽविज्ञाते पदार्थ-स्मरणान्यथानुपपत्त्या प्रतिपत्तिर्युक्ता । न च संबन्धो वाक्यार्थेन सह कस्यचिद् अवगन्तुं शक्यः संबन्ध्यवगमपुरस्सरत्वात् संबन्धप्रतिपत्तेः स्मर्यमाणपदार्थप्रतिपत्त्यन्यथानुपपत्तिं च विना नान्यतो वाक्यार्थप्रतिपत्तिः तामन्तरेण च नान्यथानुपपत्तेः प्रवृत्तिः इति इतरेतराश्रयप्रवृत्तेर्न कथंचिद् वाक्यार्थप्रतिपत्तिः स्यात् । संबन्धावगममन्तरेण अपि पदार्थानां वाक्यार्थावेदकत्वे एकपदार्थसमु- १० दायस्य सर्ववाक्यार्थावेदकत्वप्रसक्तिः । यदपि मानसाद् अपचारात् पदश्रवणेऽपि पदार्थानवगमाद् न वाक्यार्थज्ञानं दृष्टमिति पदार्थानामेव वाक्यार्थावबोधकत्वमवसीयत इत्युक्तम् तदपि अचारु; विशिष्टपदसमुदायात् कथंचिद् अभिन्नस्य वाक्यस्यैव अनवबोधात् तत्र वाक्यार्थप्रतिपत्त्यनुत्पत्तेर्न पुनः पदार्थानवगमात् । न हि उपहतमनसो वाक्यात्मकपदानां श्रोत्रसंबन्धमात्रेण अवगमः न चान-वगतं स्वरूपेण वाक्यं वाक्यार्थसंबद्धत्वेन वा स्वार्थं प्रतिपादयति अतिप्रसङ्गात् । यदि च उपहतमनाः १५ पदानि शृणोति तदर्थान् किमिति नावधारयति ? अथ परामर्शरूपं तदर्थावधारणं तर्हि पदश्रवण-मपि निश्चयात्मकमेव अभ्युपगन्तव्यम् अतदात्मकस्य तच्छ्रवणस्य स्वाप-मद-मूर्च्छादिष्विव परमार्थ-तोऽश्रवणरूपत्वात् अविकल्पज्ञानस्य अज्ञानरूपतया व्यवस्थापितत्वात् । पूर्वपदानुविद्धं चान्त्यपदं यदा वाक्यम् पूर्वपदानि च स्वाभिधेयविशिष्टतया अन्त्यपदप्रतिपत्तिकाले परामृश्यमानानि वाक्यार्थ-प्रतिपत्तिजनकानि तदा पदार्थानवगमे वाक्यस्यैव स्वार्थाभिसंबद्धतया अनवगमात् कथं ततो २० वाक्यार्थप्रतिपत्तिर्भवेत् ? तथाहि—'गौर्गच्छति' इति वाक्यप्रयोगे गोशब्दात् सामान्यविशेषात्मकं गवार्थं गच्छत्याद्यन्यतमक्रियासापेक्षं प्राक् प्रतिपद्यते 'गच्छति' इत्येतस्माच्च तमेव प्रतिनियतगमि-क्रियावच्छिन्नमवगच्छति ततः क्रियाद्यवच्छिन्नः सामान्यविशेषात्मको वाक्यार्थो व्यवतिष्ठते पद-समुदायात्मकाद् वाक्यात् पदार्थात्मकस्यैव तस्य प्रतिपत्तेः । यस्मिन्नुच्चरिते यः प्रतीयते स एव तस्यार्थः इति शाब्दिकानां व्यवहारात् । यश्च शब्दमन्तरेणापि अध्यक्षादेरर्थः प्रतीयते न स शब्दार्थः २५ तेन 'पश्यतः श्वेतमारूपम्' इत्याद्यभिधानं प्रकृतानुपयोग्येव अतः पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि । अथेदानीं पदार्थाः प्रागवगताः सन्तो वाक्यार्थं गमयन्ति तस्मात् पदेभ्यः पदार्थप्रत्ययः पदार्थेभ्यो वाक्यार्थप्रत्ययः

"पदार्थानां तु मूलत्वमिष्टं तद्भावभावनः" ।
"पदार्थपूर्वकस्तस्माद् वाक्यार्थोऽयमवस्थितः" । ३०

[श्लो० वा० वाक्याधि० श्लो० १११,३३६]

इत्यादि यत् परैरुक्तम् तत् अपास्तं भवति अतो नाभिहितान्वयः नापि अन्वितानां क्रिया-कारकादी-नामेकान्ततोभिधानम् यतः पदार्थः पदार्थान्तरसंसक्त एव यदि पदेन अभिधीयते तदा प्रथमपदेनैव वाक्यार्थस्य अभिहितत्वात् शेषपदोच्चारणमनर्थकमासज्येत पदस्य च वाक्यरूपताप्रसक्तिः विशेषा-भिधायित्वात् यावन्ति च वाक्ये पदानि तावन्ति वाक्यानि स्युः यावन्तश्च पदार्था वाक्यार्था अपि ३५ तावन्त एव प्रसज्येरन् । यदि च पदार्थानेकत्वेऽपि एक एव वाक्यार्थस्तदा प्रतिपादितार्थप्रतिपादक-त्वात् शेषपदार्थपदानां पौनरुक्त्यमासज्येत । अन्वितार्थाभिधायकत्वे च पदस्य 'गौः' इत्युक्ते 'गच्छ-ति'आदिक्रियाविशेषाकाङ्क्षा न स्यात् तत एव क्रियाविशेषसंसर्गस्य अवगतत्वात् । न च विशेषाणा-मानन्त्यात् समयकरणाशक्तेरसंकेतितस्य च अतिप्रसङ्गतः प्रतिपादनसामर्थ्यायोगात् पदानां विशेष-प्रत्यायनसामर्थ्यं स्यात् । न च केवलसामान्याभिधायि पदं संभवति सामान्यस्य अर्थक्रियाऽनिर्वर्तक- ४० त्वेन व्यापित्वेन चानयनादिक्रियासंसर्गाभावात् ततश्च सामान्य-विशेषयोरन्यतरस्यापि पदेन अन-भिधानात् कथमन्विताभिधानम् ? सामान्यस्य नित्यत्वात् एकत्वाच्च पदेन सह संकेतसद्भावात्

---

१ प्रत्यध्यक्षस्य बृ० । २-णाप्यक्षादे-मां० मा० । ३ पृ० ७४१ पं० ३९ । ४-शेषणानामा-बृ० ।

पदार्थत्वेऽपि वाक्यार्थस्य तत्संबद्धत्वेन अग्रहणात् कुतस्तत्प्रतिपत्तिरित्युक्तं प्राक् । यदि च पदात्
पदार्थे उत्पन्नं ज्ञानं वाक्यार्थपर्यवसायि अभ्युपगम्येत चक्षुरादिप्रभवं रूपादिज्ञानं गन्धादिपर्यवसितं
तदा प्रसज्येत । अथ चक्षुरादिप्रभवं रूपादिज्ञानं न गन्धादिसाक्षात्कारि इति नायं दोषस्तर्हि पदप्रभवं
पदार्थज्ञानमपि न वाक्यार्थावभासि इति न तत्पर्यवसितमभ्युपगन्तव्यम् । चक्षुरादेर्गन्धादाविव पद-
५ स्यापि वाक्यार्थसंबन्धानवगमात् सामर्थ्यानुपपत्तेः । न च पदात् सामान्यमात्रपदार्थप्रतिपत्तावपि
तद्विशेषप्रतिपत्तिः स्यात् विशेषरूपेण तु प्रवृत्त्यादिव्यवहारसमर्थो वाक्यार्थो न संसर्गमात्रम् तस्य
अर्थक्रियाऽक्षमस्य श्रोत्रनभिवाञ्छितत्वात् अनभिवाञ्छितार्थप्रतिपादकस्य च वचस उन्मत्तकविरुत-
स्येवाप्रमाणत्वात् । न च विशेषमन्तरेण सामान्यमनुपपद्यमानं संसर्गविशेषमवबोधयतीति शक्यं
वक्तुम् आधारप्रतिपत्तावपि तद्विशेषप्रतिपत्तेरयोगात् न हि 'पय आनीयताम्' इत्युक्त तदाधारपात्र-
१० मात्रप्रतिपत्तावपि कुटादिविशेषप्रतिपत्तिः संभविनी । तन्न अन्विताभिधानम् अभिहितान्वयो वा
एकान्तवादिमतेन संभवी । विधिवाक्यस्य च प्रामाण्यनिरासे अर्थवादादिवाक्यानां प्रामाण्यमपास्त-
मेव क्रियाङ्गत्वेन तेषां परैः प्रामाण्याभ्युपगमात् अन्यथा तदयोगात् । तदुक्तम्—"आम्नायस्य क्रिया-
र्थत्वाद् आनर्थक्यमतदर्थानाम्" [मीमांसाद० १-२-१] इति । न च विध्यङ्गताऽपि अर्थवादादिवा-
क्यानां पराभ्युपगमेन संभवति सामान्यादेस्तदर्थस्य असंभवेन विध्यर्थोपकारकत्वायोगतोऽर्थद्वारेण
१५ तेषां तदङ्गत्वानुपपत्तेः । न च अर्थकृतं संबन्धमपहाय शब्दः शब्दान्तरस्य अङ्गभावमासादयतीत्यति-
प्रसङ्गात् । तन्न सामान्यशब्दार्थवादिप्रकल्पितं तत् तदभिधेयं संभवतीति न प्रथमपक्षाभ्युप-
गमः श्रेयान् । {

द्वितीयविकल्पाभ्युपगमेऽपि विशेषाः किं समुच्चिताः शब्दवाच्याः, उत विकल्पिताः इति
वक्तव्यम् । यदि विकल्पिता इति पक्षस्तदा एकविशेषव्यतिरेकेण अन्येषां विशेषाणां न विवक्षित-
२० दुग्धशब्दवाच्यता स्यात् ततश्च एकपयःपरमाणोरन्यत्र तत्परमाण्वादौ न दुग्धशब्दात् प्रतिपत्ति-
प्रवृत्ती स्याताम् । समुच्चितानामपि तेषां तच्छब्दवाच्यत्वे एकस्मिन्नपि पयसि तद्बहुत्वप्रसङ्गः पर-
स्परविविक्तपयःपरमाणूनां तत्र अनेकत्वात् । न च तत्समुच्चयेऽपि पयः तद्व्यतिरेकेण तदनभ्युप-
गमात् तथा तस्याप्रतीतेश्च । न च एककार्यकारितया तथा व्यपदेशः तस्यापि वस्तुत्वे तद्रूपत्वात्
अवस्तुत्वे कार्यविरोधात् । तेषां च एकत्रैव सामर्थ्यं तस्य एकस्य एकपरमाणुरूपत्वे अनुपलभ्यता-
२५ प्रसक्तिः अनेकाणुरूपत्वे एककार्यत्वविरोधः एकस्य तत्कर्तृकत्वविरोधश्च स्थूलैकवस्तुनस्तदेककार्यत्वे
तस्य समानरूपताप्रसङ्गः स्वारम्भावयवद्रव्यव्यापकैकरूपत्वात् । एवं च विशेषमात्रवादत्यागः ।
स्वावयवसाधारणैकरूपवस्त्वनभ्युपगमेऽपि च प्रतिनियतविषयप्रतिपत्त्यभावप्रसक्तिः । अनेकावय-
वात्मकैकस्थूलवस्त्वभावे तदाकारप्रतिपत्तेरभावात् सर्वदा सर्वस्यास्तस्यास्तदाकारतयैव संवेदनात्
अन्योन्यानुविद्धानुविद्धवस्तुव्यवस्थापकप्रमाणाभावे च प्रमाणान्तरप्रतिपन्नतथाभूतवस्तुप्रतिपाद-
३० काभिधानस्यापि असंभवात् प्रतिनियतप्रवृत्तिहेतुशाब्दव्यवहाराभावप्रसक्तिश्च अत एव तथाभूत-
विकल्पजननात् 'शब्दः प्रमाणमसत्यपि बाह्यस्वलक्षणविषयत्वे' इत्ययुक्तम्[3] । 'पयः पीयताम्' इत्यभि-
धानोत्थापितविकल्पाकारस्य खरविषाणशब्दोत्थापितविकल्पाकाराद् अभेदप्रसक्तेः सर्वत्र तथाभूत-
वस्त्वनुभवाभाव एव विकल्पाकारप्रवृत्तेर्बहिष्प्रवृत्त्यभावश्च[4] । न च तदध्यवसायेन तत्र प्रवृत्तिः सर्वदा
तत्त्वाग्रहणे अतत्त्वस्य तत्त्वरूपतया तत्राध्यारोपासंभवात् । न चैवं मृगतृष्णिकासु अध्यारोपितो-
३५ दकाकारस्येव तस्य प्राप्तिर्भवेत् । न च स्वलक्षणानुभवद्वारायातविकल्पप्रभवशब्दस्य संवादित्व-
कल्पनाऽपि भवन्मतेन संगता निरंशक्षणिकपरमाणुस्वलक्षणानुभवस्याभावात् अन्यस्य चानभ्युप-
गमात् अभ्युपगमे वा शब्दस्य अनेकान्तवस्तुविषयप्रामाण्यप्रसङ्गः त्रिरूपलिङ्गप्रतिपादकवाक्यवत्
पारम्पर्येण तस्य तत्र प्रतिबन्धात् न चैवमपि विशेषैकान्तसिद्धिः उभयवादप्राप्तिप्रसङ्गात् । तन्न
द्वितीयविकल्पस्यापि संभवः ।

४० तृतीयविकल्पोऽपि प्रत्येकपक्षभाविदोषप्रसङ्गतोऽनभ्युपगमविषयः न च परस्परनिरपेक्षयोः

---

१ उन्मत्तकविरुद्धतस्ये-आ० हा० वि० । उन्मत्तकमविरुतस्ये-वा० बा० । उत्तमकविरुतस्ये-भां० मां० ।
२-लस्वभावे भां० मां० ।-लवस्तुभावे आ० हा० वि० । ३ इत्युक्तम् वा० बा० भां० मां० । ४-वृत्ताभा-
वृ० आ० हा० वि० ।

सामान्यविशेषयोरसत्त्वे तदारब्धोभयवादो युक्तः अङ्गुलिद्वयाभावे तत्संयोगवत् । अनुभयविकल्पाभ्युपगमोऽपि असंगतः प्रतिनियतसामान्यविशेषयोरनभिधाने प्रवृत्त्यादिव्यवहाराभावप्रसक्तेः । न च अनुभयपक्षः संभवति अन्योन्यव्यवच्छेदरूपयोरन्यतरनिषेधस्य तदपरविधिनान्तरीयकत्वात् परस्परापेक्षया द्वयोरपि उपसर्जनत्वे निरपेक्षत्वे च असत्त्वमेव सापेक्षत्वे च इतरेतराश्रयदोषानुषङ्गः द्वयोरपि प्राधान्ये सापेक्षत्वानुपपत्तेरसत्त्वमेव अन्यतरस्यैव उपसर्जनत्वे निमित्तानुपपत्तिः द्वयोरपि ५ औदासीन्याभ्युपगमे अव्यवहार्यत्वोपपत्तिः तदनदात्मकैकवस्तुनो यथाक्षयोपशमं प्रमाणतः प्रधानोपसर्जनरूपतया प्रतिपत्त्यभ्युपगमे 'स्यात् सामान्य-विशेषात्मकं वस्तु' इति अशेषरूपात्मकवस्तुप्रतिपादकत्वेन शब्दादेः प्रमाणभूतप्रतिपत्तिनिबन्धनस्य अभ्युपगमात् अनेकान्तमतानुप्रवेशः समानासमानपरिणामात्मकैकवस्तुप्रतिपादकत्वेन शब्दादेरभ्युपगमात् तस्मात् अनुगत-व्यावृत्तात्मकैकप्रतिभासजनकस्वभावं तथाभूतधर्मद्वयात्मकमेकं वस्तु अभ्युपगन्तव्यम् अन्यथा तथाभूतप्रतिभासस्य १० हेत्वभावतोऽभावप्रसक्तेः अन्यादृशस्य च तस्याऽसंवेदनात् सर्वप्रतिभासविरतिप्रसङ्ग इत्युक्तं प्राक् । न च अनादितथाभूतविकल्पप्रसववासनातस्तथाभूतप्रतिभाससद्भावात् अयमदोषः तस्या अपि अनन्तधर्मात्मकैकरूपताऽनभ्युपगमे तथाविधविज्ञानजनकत्वायोगात् इति असकृदावेदितत्वात् । न च सर्व एवायं प्रमाण-प्रमेयव्यवहारो भ्रान्तिरूप इति वक्तव्यम् अपरस्य अभ्रान्तरूपस्य अभावात् । न च सुगतज्ञानमभ्रान्तम् तस्य उत्पत्तिकारणाभावतोऽभावात् । न नैरात्म्यादिभावना तत्कारणम् तस्या १५ मिथ्यारूपतया अमिथ्यारूपतज्ज्ञानहेतुत्वायोगात् । न च तस्य सद्भावः सिद्धः अध्यक्षतोऽनधिगमात् । न च अनुमानतोऽपि तत्सिद्धिः तत्प्रतिबद्धलिङ्गाप्रतिपत्तेः । न च लोकप्रसिद्धप्रमाणस्य प्रमाणता अभ्युपगता 'सर्व एवायं प्रमाण'-इत्याद्यभिधानात् । न चाप्रमाणकवस्तुभावनाप्रकर्षजं ज्ञानमभ्रान्तम् काम-शोक-भयादिज्ञानस्य भावनाप्रकर्षजस्यापि भ्रान्तत्वोपलब्धेः नैरात्म्यादेश्च वस्तुनः अप्रमाणोपपन्नत्वप्रतिपादनात् । न च सत्यभयादिज्ञानपूर्वकस्यापि भावनोत्थभयज्ञानस्य सत्यतोप- २० लब्धा इति अस्यापि असत्यताप्रसक्तिः अध्यारोपात् कामादिज्ञानस्य असत्यतेति चेत् अत्रापि अध्यारोपः समानः इन्द्रियज्ञानग्राह्यवस्तुनस्तद्विषयत्वेन अभावात् निर्विकल्पकविषयस्य विकल्पज्ञानविषयत्वविरोधात् । न च 'भावनाजमविकल्पम् विशदत्वात्' इति वाच्यम् तथात्वेऽपि तत्प्रतिभासस्य अभ्यासकृतत्वेन तत्र मिथ्यात्वोपपत्तेः । न च तत्प्रतिभासः वस्तुकृत एव न भावनाकृत इति वाच्यम् इतरत्रापि तथा प्रसक्तेः । न च प्रमाणान्तरबाधातः तत्रासौ न तत्कृतः अत्रापि तद्बाधासं- २५ भवात् क्षणिकस्य अर्थस्य प्रमाणान्तरतः प्राग् उपलब्धस्य भावनाप्रकर्षजे ज्ञाने असंभवात् अविकल्पविषयस्य भावनाविकल्पविषयत्वायोगात् तत्प्रकर्षजेऽपि तस्याऽप्रतिभासनात् । न च अन्यदा तस्य दृष्टत्वाद् न प्रमाणबाधा इतरत्रापि अस्य तुल्यत्वात् । न च निरन्वयविनाशसंगते चेतसि भावनादेः संभव इति प्रतिपादितमनेकशः । न च सौगतं ज्ञानं कथंचिदपि प्रमाणतामासादयति तन्निबन्धनतदाकारोत्पत्त्यादेर्निरस्तत्वात् 'अज्ञातार्थप्रकाशो वा' इत्यस्यापि पारमार्थिकप्रमाणलक्षणस्य प्रतिक्षिप्त- ३० त्वात् । तदेवमेकान्तवादिप्रकल्पितस्य प्रमाण-प्रमेयादेः सर्वस्य अघटमानत्वात् तच्छासनं दृष्टवत् अदृष्टार्थेऽपि विसंवादित्वाद् अप्रमाणम् । तत्प्रतिपक्षभूतं च यथोक्तजीवादितत्त्वप्रकाशकं सर्वत्र दृष्टार्थे अव्यभिचारित्वात् अदृष्टार्थेऽपि सहेतुके हेयोपादेयस्वरूपे बन्ध-मोक्षलक्षणे वस्तुतत्त्वे प्रमाणमिति स्थितम् । अतः पूर्वापरैकवाक्यतया सकलानन्तधर्मात्मकजीवादितत्त्वप्रतिपादकसूत्रसंदर्भस्य नय-प्रमाणद्वारेण प्रवृत्तस्य तात्पर्यार्थज्ञाता सिद्धान्तज्ञाता न पुनरपरिहृतविरोधतदेकदेशज्ञाता । न ३५ चैकदेशज्ञः स्याद्वादप्ररूपणायाः सम्यक् समर्थ इति व्यवस्थितम् ॥ ६३ ॥

[अर्थवशात् सूत्रस्य निष्पत्तिर्न तु निरपेक्षसूत्रमात्रेणार्थस्येति कथनम्]

सूत्रस्य सूचनार्थत्वात् अर्थवशात् तस्य निष्पत्तिः न पुनः सूत्रमात्रेणैव अन्यनिरपेक्षेण अर्थनिष्पत्तिः इत्याह—

सुत्तं अत्थनिमेणं[1] न सुत्तमेत्तेण अत्थपडिवत्ती । ४०
अत्थगई उण णयवायगहणलीणा दुरभिगम्मा ॥ ६४ ॥

1-निगेणं वा० बा० भां० मां० ।-नियेणं आ० हा० वि० ।

अनेकार्थराशिसूचनात् सूते वा अस्मात् अर्थराशिः शेते वा अस्मिन् अर्थसमूहः श्रूयते वा अस्मात् अनेकोऽर्थ इति निरुक्तवशात् **सूत्रम्** । अर्यत इति अर्थः साक्षात् तस्याभिधेयः गम्यश्च सामर्थ्यात् तस्य स्थानमेव सूत्रम् यथार्थं सूत्रार्थव्यवस्थापनात् सूत्रान्तरनिरपेक्षस्य तस्य अर्थव्यवस्थापने प्रमाणान्तरबाधया तदर्थस्य तत्सूत्रस्य उन्मत्तकवाक्यवत् असूत्रत्वापत्तेः । अत एव निर्यु-
५ क्त्याद्यपेक्षत्वात् सूत्रार्थस्य न सूत्रमात्रेणैव अर्थस्य पौर्वापर्येण अविरुद्धस्य प्रतिपत्तिः अयथार्थतयाऽपि अविवृतस्य तस्य श्रुतेः । **अर्थस्य** तु यथाव्यवस्थितस्य **गतिः** प्रतिपत्तिः पुनर्द्रव्यार्थ-पर्यायार्थलक्षण-**नयवादा**विव **गहनं** विपिनम् तत्र **लीना** तथा च **दुरधिगम्या** दुरवबोधा सकलनयसम्मतार्थस्य प्रतिपादकं सूत्रम्—"जीवो अणाइणिहणो" [ ] इत्यादिवाक्यवद् न प्रमाणार्थसूचकं स्यात् प्रवृत्तानि च नयवादेन सूत्राणि । तथा च आगमः—

१० "णत्थि णएण विहूणं सुत्तं अत्थो य जिणमए किञ्चि ।
आसज्ज उ सोआरं णए णअविसारओ बूआ" ॥
[आवश्यकनि० उवग्घायनि० गा० ३८] इति ॥ ६४ ॥

[अधीतसूत्रस्यार्थसंपादने प्रयत्नाभावे शासनविडम्बकत्वकथनम्]

यत एवम् अनेकान्तात्मकार्थप्रतिपादकत्वेन सूत्रं व्याख्येयम्—

१५ **तम्हा अहिगयसुत्तेण अत्थसंपायणम्मि जइयव्वं ।**
आयरियधीरहत्था हंदि महाणं विलंबेन्ति ॥ ६५ ॥

तस्मात् इति पूर्वोक्तार्थप्रत्यवमर्शार्थः **अधिगतम्** अधीतम् अशेषं **सूत्रं** येन असौ तथा-अधीततत्कालव्यावहारिकाशेषसिद्धान्तेन इति यावत् **अर्थसंपादने** तद्विषयप्रमाण-नय-स्वरूपावधारणे **यतितव्यम्** । अधीत्य सूत्रं श्रोतव्यम् श्रुत्वा च नयसर्वसंवादविनिश्चयपरिशुद्धं भाव-
२० नीयम् अन्यथा **आचार्या धीरहस्ता** अशिक्षितशास्त्रार्था अनभ्यस्तकर्माऽपि कर्मणि धृष्टतया व्याप्रियते येषां हस्तस्ते धीरहस्ता आचार्याश्च ते अशिक्षितधृष्टाश्च इति यावत् **हंदि** गृह्यताम् ते तादृशा **महाज्ञाम्** आप्तशासनं विगोपयन्ति विडम्बयन्ति इति यावत् ।

[निर्ग्रन्थानां वस्त्रपात्रादिनिषेधकस्य दिगम्बरीयमतस्य[2] पूर्वपक्षतयोपन्यासः]

तथा च दृश्यन्त एव सर्वज्ञवचनं यथावस्थितमनवगच्छन्तो दिग्वाससो वस्त्र-पात्रादिधर्मोप-
२५ करणसमन्वितानां यतीनां नैर्ग्रन्थ्याभावाद् न सम्यग्व्रतानि तीर्थकृद्भिः प्रतिपादितानीति प्रतिपादयन्तः । तथाहि—यद् रागाद्युपचयनिमित्तनैर्ग्रन्थ्यविपक्षरूपं तत् तदुपचयहेतुः यथा विशिष्टशृङ्गारानुषक्ताङ्गनाङ्गसंगादिकम् यथोक्तनैर्ग्रन्थ्यविपक्षभूतं च वस्त्रादिग्रहणं श्वेतवाससामिति । तथा, यः स्वीकृतग्रन्थः सोऽध्वनि संचरन् न अभीष्टस्थानप्राप्तिमान् भवति, यथा चौराद्युपद्रुते[3] पथि संचरन् असहायः स्वीकृतग्रन्थोऽध्वगः, स्वीकृतग्रन्थश्च मोक्षाध्वनि संचरन् वस्त्राद्युपकरणवान् सितपट इति ।
३० तथा, यो यद्विनेयः स तल्लिङ्गानुकारी, यथा चीवरादिलिङ्गधारिसुगतविनेयो रक्तपटः व्युत्सृष्टत्यक्तदेहतीर्थकृद्विनेयाश्च भिक्षव इति । न च वस्त्राद्युपकरणाऽऽग्रहवत्सु प्रव्रज्यापरिणामः संभवी मिथ्यादृष्टिष्वपि परिग्रहाग्रहवत्सु अन्यथा तत्प्रसक्तेः । तथा च प्रयोगः—श्वेतभिक्षवो महाव्रतपरिणामवन्तो न भवन्ति न वा तत्फलसाधकाः, वस्त्र-पात्रादिपरिग्रहाग्रहयोगित्वात्, महारम्भगृहस्थवत् । न च भगवद्भिः वस्त्रग्रहणं यतीनामुपदिष्टम् तदागमे वस्त्रग्रहणप्रतिषेधस्य श्रवणात् । तथाहि—
३५ स्थितकल्प[4] "आचेलक्क(कु)देसिय"[5]-[ ] इत्यादिसूत्रे चेलग्रहणप्रतिषेधः आचेलक्यपदेन

१ पृ० १३६ । विशेषाव० गा० २२७७ ।

२ दिगम्बरीयमतमेतत् प्रमेयकमलमार्तण्डतोऽवगन्तव्यम्—पृ० ६५ प्र० पं० ५-द्वि० पं० ९ ।

३-राद्युपहते आ० । ४ स्थितकल्पा आ-वृ० आ० हा० वि० । ४ स्थितिकल्पे आ-वा० बा० ।

५-चेलुकदेसि-भां० मां० ।-चेलुकेदेसि-आ० हा० वि० ।-चेलुकदेसि-वा० बा० ।

"आचेलक्कुद्देसियसिज्जायररायपिंडकिइकम्मे । वयजेट्ठपडिक्कमणे मासं पज्जोसवणकप्पो" ॥

—पञ्चाश० पृ० २६४ गा० ६ ।

कृत एव । तथा, परीषहेषु अचेलपरीषहस्य यतेरुपदेशात् । तथा, "णगिणस्स[2] वा वि मुण्डस्स" [   ] इत्याद्यागमे बहुशो यतेर्वस्त्रादिपरित्यागो भगवद्भिः प्रतिपादित इति । तत् प्रतिषिद्धं वस्त्रादिग्रहणमाचरन्तः परतीर्थिका इव कथं सम्यग्ज्ञान-दर्शन-चारित्रलक्षणमुक्तिमार्गसमन्विताः श्वेताम्बरा इति ।

[सिद्धान्तिना पूर्वपक्षं प्रतिविधाय निर्ग्रन्थानां धर्मोपकरणतया वस्त्रपात्रादिधारणस्य संमर्थनम्[1]] ५

अत्र प्रतिविधीयते—'यत् तावद् रागाद्यपचयनिमित्त-इत्यादिप्रयोगोपादानम्, तत्र रागाद्यपचयनिमित्तं किमेकदेशनैर्ग्रन्थ्यम्, आहोस्वित् सर्वथा नैर्ग्रन्थ्यम् इति? यदि सर्वथा नैर्ग्रन्थ्यं रागाद्यपचयनिमित्तम् तत्र तथाभूतनैर्ग्रन्थ्यस्य मुक्तव्यतिरेकेण असंभवात् मिथ्यात्वाऽविरति-प्रमाद-कषाय-योग-बलप्रवृत्ताष्टविधकर्मसंबन्धस्य ग्रन्थत्वात् तदभावस्य च आत्यन्तिकस्य निश्शेषतो मुक्तेषु एव संभवात् ततश्च कथं तस्य रागाद्यपचयहेतुतेति कथं न विशेषणासिद्धो हेतुः । अथ देशनैर्ग्रन्थ्यं १० रागाद्यपचयनिमित्ततयाऽत्र विवक्षितं तदाऽत्रापि वक्तव्यम्—किं तत् सम्यग्ज्ञानादितारतम्येन उपचीयमानम् आहोस्विद् बाह्यवस्त्राद्यभावरूपम्? तत्र यदि आद्यः पक्षः स न युक्तः तथाभूतस्य सम्यग्ज्ञानादिविपक्षत्वेन वस्त्रादिग्रहणस्य असिद्धेः हेतोर्विशेष्यासिद्धताप्रसक्तेः । नापि द्वितीयः वस्त्राद्यभावस्य रागाद्यपचयनिमित्तत्वासिद्धेः हेतोर्विशेषणासिद्धतादोषात् । न च वस्त्राद्यभावो रागाद्यपचयहेतुत्वेन सिद्ध इति वक्तव्यम् अतिशयरागवद्भिः पारापतादिभिर्व्यभिचारात् । न च १५ पुरुषत्वे सति वस्त्राभावो रागाद्यपचयहेतुः वस्त्रविकलनाहलैर्व्यभिचारात् । न च आर्यदेशोत्पत्तिमत्पुरुषत्वे सति असौ तद्धेतुरिति वक्तव्यम् तथाभूतकामुकपुरुषैर्व्यभिचारात् । न च व्रतधारितथाभूतपुरुषत्वे सति असौ तन्निमित्तम् तथाभूतपाशुपतैर्व्यभिचारात् । न च 'जैनशासनप्रतिपत्तिमत्तथाभूतपुरुषत्वे सति' इति विशेषणोपादानात् अदोषः, उन्मत्तदिगम्बरैर्व्यभिचारात् । न च 'अनुन्मत्तत्वे सति' इत्यपरविशेषणाद् दोषाभावः मिथ्यात्वोपेतद्रव्यलिङ्गावलम्बिदिग्वाससा व्यभि- २० चारात् । न च सम्यग्दर्शनादिसमन्वितपुरुषत्वे सति असौ तद्धेतुः विशेषणस्यैव तत्र सामर्थ्येन विशेष्यस्यासामर्थ्यतोऽनुपादानप्रसक्तेः । न च विशिष्टश्रुतसंहननविकलानामर्वाक्कालभाविपुरुषाणां वस्त्रादिधर्मोपकरणाभावे यतियोग्याहारविरह इव विशिष्टशरीरस्थितेरभावतः सम्यग्दर्शनादिसमन्वितत्वविशेषणोपपत्तिरिति विशेष्यसद्भावो विशेषणस्य बाधक एव । अथ वस्त्रादिपरिग्रहस्य तृष्णापूर्वकत्वात् तस्यां च रागादेरवश्यंभावित्वात् सम्यग्दर्शनादेश्च तद्विपक्षत्वात् तृष्णाप्रभववस्त्र- २५ ग्रहणाभावः स्वकारणनिवृत्तिमन्तरेण अनुपपद्यमानो रागादिविपक्षभूतसम्यग्ज्ञानाद्युत्कर्षविधायकत्वात् कथं तद्भावबाधकत्वेन उपदिश्यत इति न; वस्त्रादिपरिग्रहस्य तृष्णानिमित्तत्वे आहारग्रहणस्यापि तथात्वप्रसक्तेः । न च आहारग्रहणस्य परिग्रहव्यवहाराविषयत्वात् न तृष्णापूर्वकत्वमिति वाच्यम् मूर्छाविषयत्वे तस्य 'परिग्रह'शब्दवाच्यत्वोपपत्तेः "मूर्छा परिग्रहः" [तत्त्वार्थ० ७-१२] इति वचनात् । अथ स्रक्-चन्दनादिवद् उपभोगार्थम् मांसादिभक्षणवत् शरीरबृंहणार्थं वा नासौ ३० गृह्यते किन्तु ज्ञानाद्युपष्टम्भनिमित्तशरीरस्थित्यादिहेतुतया अतो न तृष्णापूर्वकः नापि 'परिग्रह'-शब्दवाच्यः तर्हि वस्त्रादिधर्मोपकरणग्रहणेऽपि समानमेतत् । अथ वस्त्राद्यभावेऽपि शरीरस्थितिसंभवात् तृष्णापूर्वकमेव तद्ग्रहणम्, न; आहारेऽप्यस्य समानत्वात् । अथ तमन्तरेण चिरतरकालशरीरस्थितेरस्मदादेरदर्शनात् वेदनोपशमादिभिः षड्भिर्निमित्तैस्तस्य ग्रहणं तर्हि अनुत्तमसंहननस्य विशिष्टश्रुताऽपरिकर्मितचित्तवृत्तेः कालातिक्रान्तादिवसतिपरिहारकृतप्रयत्नस्य षड्विधजीवनिकाय- ३५ विध्वंसविधाय्यग्न्याद्यनारम्भिणः शीताद्युपद्रवाद् वस्त्रादिग्रहणमन्तरेण शरीरस्थितेरभावात् तद्ग्रहणमपि न्याय्यम् तथा, वाय्वादिनिमित्तप्रादुर्भूतविक्रियावल्लिङ्गसंवरणप्रयोजनपटलाद्युपधिविशेषस्य च ग्रहणं किं नाभ्युपगम्यते शीतादिबाधोपजायमानार्तध्यानप्रतिषेधार्थं युक्तकल्पादेश्चादानं किमिति

---

१ सविस्तरमेतत् समर्थनं विशेषावश्यकभाष्य-उत्तराध्ययनपाइअटीका-शास्त्रवार्तासमुच्चयटीकातोऽवगन्तव्यम्—गा० २५५०-२६०९ । अ० २ । पृ० ३१७ द्वि०-३२५ द्वि० ।

२-णग्गस्स वा-आ० हा० वि० ।

नेष्यते ? न च स्त्री-स्रक्-चन्दनाद्यभावोपजायमानसंक्लेशपरिणामनिबर्हणार्थं स्त्र्यादेरपि ग्रहणं प्रसज्यत इति वक्तव्यम् क्षुद्वेदनाप्रशमनिमित्तत्रिकोटीपरिशुद्धाहारग्रहणवद् अङ्गनासंप्रयोगसंकल्पप्रभववेदनापरिणामोपशमार्थं वृष्यतरमांसाद्याहारग्रहणस्यापि प्रसक्तेः । अथ तथाभूताहारग्रहणे सुतरां क्लिष्टाध्यवसायोत्पत्तिप्राबल्यमिति न तद्ग्रहणम् तत् स्त्र्यादिग्रहणेऽपि समानम् । यदपि
५ वस्त्राद्यभावे संक्लेशपरिणामोत्पत्तिः कातराणाम् न स्वशरीरमपि काष्ठवद् मन्यमानानां दिग्वाससाम् तथादर्शनात् इति, तदपि अनुभवविरुद्धम्; आर्तध्यानोपगतानामनन्तसत्त्वोपमर्दविधाय्यनलारम्भादिप्रतिषिद्धाचरणवत्तया तेषामुपलम्भात् तदनाचरणवतस्तु आत्मर्हिंसकत्वेन अविरत्याश्रयणाद् अयतित्वं न्यायतः प्रसक्तम् । अथ गण्डच्छेदनादिप्रादुर्भवद्दुःखातिशयमसहमानकातरातुरवत् तद्दुःखान्तं न शीतादिदुःखमसहमानः संसारबाधान्तमुपयातुं क्षमः तर्हि क्षुद्वेदनादुःखासहनेऽपि
१० एतत् समानम् । अथ मुक्तिमार्गाविरोधित्वाद् आहारग्रहणमदुष्टम् वस्त्रादिग्रहणमपि अत एव किं नादुष्टम् ? अथ वस्त्रादेर्मलादिदिग्धस्य यूकादिसन्मू(सम्मू)र्छनानेकसत्त्वहेतुतया तद्ग्रहणे तद्व्यापत्तेरवश्यंभावित्वात् मुक्तिमार्गाविरोधित्वं तस्यासिद्धम् तर्हि आहारग्रहणेऽपि एतत् समानम्—सम्मूर्छनाद्यनेकजन्तुसंपातहेतुत्वस्य तत्परिभोगनिमित्ततद्विनाशस्य च तत्रापि संभवात् । तथाहि—संभवन्त्येव आगन्तुकाः सम्मूर्छनजाश्च अनेकप्रकारास्तत्र जन्तवः तत्परिभोगे च अवश्यंभावी तेषां
१५ विनाशः भुक्तस्य च तस्य कोष्ठगतस्य संसक्तिमत्त्वात् तदुत्सर्गे अनेककृम्यादिसत्त्वव्यापत्तिरवश्यंभाविनी । अथ विधानेन तत्परिभोगादिकं विदधतो न सत्त्वव्यापत्तिः व्यापत्तौ वा शुद्धाशयस्य तद्रक्षादौ यत्नवतो गीतार्थस्य ज्ञानादिपुष्टालम्बनप्रवृत्तेः अहिंसकत्वाद् न तद्ग्रहणं मुक्तिमार्गविरोधि तर्हि वस्त्रादिग्रहणमपि एवं क्रियमाणं कथं मुक्तिमार्गविरोधि स्यात् ? अथ वस्त्रादेर्मलदिग्धस्य क्षालने अप्कायादिविनाशः बाकुशिकत्वं च अक्षालने संसक्तिदोष इति उभयतः पाशारज्जुरिति तद्ग्रहणं
२० मुक्तिमार्गविरोधि, न; आहारादिग्रहणेऽपि अस्य समानत्वात् । तथाहि—तद्दिग्धस्य आस्यादेः प्रक्षालनादौ अप्कायादिविनाशः अक्षालने प्रवचनोपघात इति तद्ग्रहणस्य मुक्तिमार्गविरोधित्वं कथं न समानम् ? अथ प्रासुकोदकादिना यत्नतस्तद्दिग्धाऽऽस्यादिप्रक्षालने नायं दोषः वस्त्रादिशोधनेऽपि यत्नतः क्रियमाणे अदोष एव । तेन 'न साक्षाद् वस्त्रग्रहणस्य मुक्तिसाधनत्वम् रत्नत्रयस्यैव साक्षात् तत्साधनत्वात् । नापि परम्परया रत्नत्रयकारणत्वेन तद्ग्रहणस्य रत्नत्रयविरोधित्वात्—निष्परिग्रह-
२५ विरोधि सपरिग्रहत्वमिति सकललोकप्रसिद्धम् रूपज्ञानोत्पत्तेस्तम इव । न च रत्नत्रयहेतुशरीरस्थितिकारणत्वेन वस्त्रादिग्रहणं परम्परया मुक्तिसाधनम् तदन्तरेणापि रत्नत्रयनिमित्तशरीरस्थितिसंभवात्' इति यदुक्तम् तत् प्रदर्शितन्यायेन प्रतिक्षिप्तं द्रष्टव्यम् । आहारग्रहणेऽपि अस्य समानत्वेन प्रदर्शितत्वात् । अत एव 'साक्षात् पारम्पर्येण वा मुक्त्यनुपयोगिवस्त्रादिग्रहणं रागाद्युपचयहेतुः तत् स्वीकुर्वंस्तृष्णायुक्तत्वात् यत्याभासो गृहस्थं नातिशेते' इत्यादि अपकर्णनीयम् आगमोक्तविधिना
३० वस्त्रादिग्रहणस्य हिंसाद्यपायरक्षणनिमित्ततया मुक्तिमार्गसम्यग्ज्ञानाद्युपबृंहकत्वात् तत्परित्यागस्य तु अर्वाक्कालीनयत्यपेक्षया तद्बाधकत्वात् । ततो विशेष्यसद्भावे 'सम्यग्ज्ञानाद्यन्वितत्वे सति' इति विशेषणमसिद्धम् सति च अस्मिन् विशेष्यमसिद्धम् इति व्यवस्थितम् । तत्र रागाद्यपचयनिमित्तता परव्यावर्णितस्वरूपस्य नैर्ग्रन्थ्यस्य सिद्धा । अत एव व्यावर्णितस्वरूपनैर्ग्रन्थ्यविपक्षभूतत्वेऽपि वस्त्रादिग्रहणस्य न रागाद्युपचयं प्रति गमकत्वम् तद्विरुद्धेन सम्यग्दर्शनाद्युपचयेन यथोक्तवस्त्रादिग्रहणस्य
३५ व्याप्तत्वेन तद्विरुद्धसाधकत्वात् । दृष्टान्तस्यापि परव्यावर्णितनैर्ग्रन्थ्यविपक्षभूतत्वासिद्धेः साधनविकलता । न च यथोक्ताङ्गनासंगादिरपि उपसर्गसहिष्णोर्वैराग्यभावनावशीकृतचेतसो योगिनो रागाद्युपचयहेतुः भरतेश्वरप्रभृतिषु तस्य तत्प्रक्षयहेतुत्वेन शास्त्रे श्रवणात् "जे जत्तिआ इ हेऊ भवस्स" [ ] इत्याद्यागमप्रामाण्यात् । रागाद्यपचयनिमित्तनैर्ग्रन्थ्यविपक्षभूतत्वं च

१-मार्थं वृष्यतरमां-वा० बा० ।-मार्थं वृषस्यतरमां-आ० हा० वि० ।-मार्थं वृषस्यत्तरमां-भां० मां० । २-यत्तदुः-आ० हा० वि० । ३-म्मूर्छनाश्च भां० मां० ।-म्मूर्छजाश्च वा० बा० । ४ संसक्तिदो-वा० बा० । ५ जे जेत्तिआ वृ० आ० हा० वि० ।

वस्त्राद्युपादानस्य असिद्धम् धर्मोपकरणत्वेन तस्य ग्रन्थत्वानुपपत्तेः । तथा च प्रयोगः—अर्हन्मार्गोक्तक्रियाव्यवस्थितानां सम्यग्दर्शनादिसंप्रयुक्तानां यतीनां वस्त्रादिकं न ग्रन्थः, धर्मोपकरणत्वात्, प्रमार्जनादिनिमित्तोपादीयमानपिञ्छिकादिवत्, यत् तु कर्मबन्धहेतुतया ग्रन्थत्वेन प्रसिद्धं तत् धर्मोपकरणमपि न भवति, यथा लुब्धकादेर्मृगादिबन्धनिमित्तं वागुरादिकम् । न च धर्मोपकरणत्वं वस्त्रादेरसिद्धम् वस्त्राद्यन्तरेण यतीनामुक्तलक्षणानामर्हत्प्रणीताऽब्रह्मपरित्यागादिलक्षणस्य व्रतसमूहस्य सर्वथा संरक्षणहेतुत्वानुपपत्तेः । यच्च व्रतसंरक्षणहेतुः तद् धर्मोपकरणत्वेन परस्यापि सिद्धम् यथा पिञ्छिकादि वैधर्म्येण वागुरादि । न च पिञ्छिकादेरभिष्वङ्गहेतुत्वानुपपत्तेर्धर्मोपकरणत्वं युक्तम् न वस्त्रादेः तद्विपर्ययात् इति वाच्यम् अनभिष्वङ्गनिमित्तस्यैव तस्यापि धर्मोपकरणत्वाभ्युपगमात् अभिष्वङ्गनिबन्धनस्य शरीरादेरपि अधर्मोपकरणत्वात् । न च शरीरेऽपि अप्रतिबद्धानां विदितवेद्यानां साधूनां वस्त्रादिषु 'मम इदम्' इति अभिनिवेशः । उक्तं च तत्त्वार्थसूत्रकृता वाचकमुख्येन—

"यद्वत् तुरगः सत्स्वप्याभरणविभूषणेष्वनभिषक्तः ।
तद्वद् उपग्रहवानपि न संगमुपयाति निर्ग्रन्थः" ॥ [प्रशमर० का० १४१]

अभ्युपगमनीयं चैतत् परेणापि अन्यथा शुक्लध्यानाग्निना कर्मेन्धनं भस्मसात् कुर्वतः परित्यक्ताशेषसंगस्य केनचित् तदुपसर्गकरणबुद्ध्या भक्त्या वा वस्त्राद्यावृतशरीरस्य ग्रन्थत्वात् परमयोगिनो मुक्तिसाधकत्वं न स्यात् । अथ यत् स्वयमादत्तं वस्त्रादि तद् अभिष्वङ्गनिमित्तत्वाद् न धर्मोपकरणम्, न; स्वयं गृहीतपिंछिकादिना व्यभिचारात् । अथ पिञ्छिकाद्यग्रहे अप्रमार्जितासनाद्युपवेशनादिसंभवतः सूक्ष्मसत्त्वव्यापत्तिसद्भावे प्राणातिपातविरमणादिमहाव्रतधारणानुपपत्तेः तदर्थं तद्ग्रहणम् धर्मोपकरणत्वं च पिंछिकादेः अत एव उपपन्नम् तर्हि अत एव पात्रस्यापि धर्मोपकरणत्वम् तद्ग्रहणं च उपपन्नम् तदन्तरेण एकत्रैव भुजिक्रियां हस्त एव विदधतामारम्भदोषतः कर-चरणक्षालने च जलगतासंख्येयादिसत्त्वव्यापत्तितो महाव्रतधारणानुपपत्तेः । न च प्रतिगृहम् ओदनस्य भिक्षामात्रस्य उपभोगाद् वस्त्रपूतोदकाङ्गीकरणाच्चायमदोषः तथाभूतप्रवृत्तेर्युष्मासु अनुपलम्भात् प्रवृत्तावपि प्रवचनोपघातप्रसक्तेः तस्य च अबोधिबीजत्वात्—

"छक्कायदयावंतो वि संजओ दुल्लहं कुणइ बोहिं ।
आहार" [ ]

इत्याद्यागमप्रामाण्यात् । न च गृहस्थवाससा पूतमपि उदकं निर्जन्तुकं सर्वं संपद्यते तज्जन्तूनां सूक्ष्मत्वात् वस्त्रस्य चाघनत्वाद् गृहिणां तच्छोधने अतिशयप्रयत्नानुपपत्तेश्च । न च कर एव प्रत्युपेक्ष्यतत्सत्त्वानुपलब्धौ[1] तदुपभोगाद् न पूर्वोक्तो दोषः तथा अनिरीक्षणात् तदनुपलब्धावपि तदभावनिश्चयायोगात् । न च यत्ननिरीक्षणानुपलब्धा व्यापाद्यमाना अपि सत्त्वा न व्रतातिचारकारिणः विषचूर्णादेरनुपलब्धभुक्तस्य प्राणनाशहेतुत्वोपलब्धेः । न च चतुर्थरसादेः प्रासुकोदकस्य उपभोगाद् अयमदोषः तत्रापि सत्त्वसंसक्तिसंभवात्—करप्रक्षिप्ते तस्मिन् तन्निरीक्षणे पानोज्झनयोस्तद्व्यापत्तिदोषस्य अपरिहार्यत्वात् पात्रादिग्रहणे तु तत्प्रत्युपेक्षणस्य तद्रक्षणस्य च सुकरत्वात् न व्रतातिचारदोषापत्तिः । न च त्रिवारोद्वृत्तोष्णोदकस्यैव परिभोगात् अयमदोषः तथाभूतस्य प्रतिगृहं तत्कालोपस्थायिनः तस्य अप्राप्तेः प्राप्तावपि तस्य तृडपनोदाक्षमत्वात् तद्युक्तस्य च अनुत्तमसंहननस्य इदानींतनयतेः आर्तध्यानोपपत्तेः तस्य च दुर्गतिनिबन्धनत्वात् । न च तृडादेर्दुःखस्य तपोरूपत्वेन आश्रयणीयत्वात् अयमदोषः अनशनादेर्बाह्यतपस आन्तरतपउपचयहेतुत्वेन आश्रीयमाणत्वात् अन्यादृग्भूतस्य च अतपस्त्वात्—

"सो य तवो कायव्वो जेण मणो मंगुलं न चिंतेइ[2]" । [पञ्चव० पृ० ३५ गा० २१४]

१-त्युपेक्षतत्सत्वा-बृ० वा० बा० भां० मां० ।-त्युपेक्षितसत्वा-आ० ।

२ "जेण न इंदिअहाणी जेण य जोगा ण हायंति" इत्युत्तरार्धम् । हरिभद्रः स्वीयेऽष्टकप्रकरणे यशोविजयः ज्ञानसारे च एनामेव गाथामनुसरतः । तथाहि—

"मनइन्द्रिययोगानामहानिश्चोदिता जिनैः । यतोऽत्र तत् कथं न्वस्य युक्ता स्याद् दुःखरूपता" ? ॥ ५ ॥—तपोऽष्टकम् ।

"तदेव हि तपः कार्यं दुर्ध्यानं यत्र नो भवेत् । येन योगा न हीयन्ते क्षीयन्ते नेन्द्रियाणि वा"—अष्ट० ३१ ॥ ७ ॥

इत्याद्यागमप्रामाण्यात् । स्तुतिकृताऽपि उक्तम्—

"बाह्यं तपः परमदुश्चरमाचरं[1] त्वमाध्यात्मिकस्य तपसः परिबृंहणार्थम्" [स्वयंभूस्तो० ८३]

इति । तत्र वस्त्र-पात्रादिविकलस्येदानींतनयतेः सर्वसावद्ययोगप्रत्याख्यानं संभवतीति कथं न तस्य धर्मोपकरणत्वम्? एवं 'यः स्वीकृतग्रन्थः' इत्यादिप्रयोगेऽपि वस्त्रादिधर्मोपकरणस्याग्रन्थ-
५ त्वप्रतिपादनात् 'स्वीकृतग्रन्थश्च मोक्षाध्वनि संचरन् वस्त्राद्युपकरणवान्' इति हेतुरसिद्धः । न च तथाविधवस्त्राद्युपकरणधारिणां चौरादिभ्य उपद्रवः संभवति, तद्वस्त्रादेरशोभनत्वाऽल्पमूल्यत्वाभ्यां चौराग्राह्यत्वात् । अथ अधमचौरास्तथाभूतमपि गृह्णन्तीति तदग्राह्यत्वं तस्यासिद्धम्, नन्वेवं पुस्तकाद्यपि मोक्षाध्वसंचारिणा न ग्राह्यं स्यात् तत्रापि अस्य दोषस्य समानत्वात् । अथ तदपि भगवता प्रतिषिद्धम्, न; तत्प्रतिषिद्धपुस्तकादिग्राहिणामिदानींतनऋषीणां तदाज्ञाविलोपकारित्वेन
१० अयतित्वप्रसक्तेः । ज्ञानाद्युपष्टम्भहेतुत्वेन तद्ग्रहणे पात्रादावपि तत एव ग्रहणप्रसक्तिः । न च पाथेयाद्युपकरणरहितस्य अध्वगस्यापि अभीष्टस्थानप्राप्तिः संभविनी इति दृष्टान्तोऽपि असंगत एव सर्वस्य विशिष्टफलारम्भिणस्तदुपकरणरहितस्य तत्फलाऽप्रसाधकत्वात् । तथाहि—यो यत्रोपायविकलो नासौ तत् साधयति, यथा कृष्याद्युपायविकलः तत्फलम्, अशेषकर्मविगमस्वभावमुक्तिफलवस्त्रादिधर्मोपकरणोपायविकलश्च मुनिर्भवद्भिरभ्युपगम्यत इति । न च क्षायिकज्ञान-दर्शन-
१५ चारित्राण्येव तदुपाय इति वक्तव्यम्, 'वस्त्रादिधर्मोपकरणविकलस्य क्षायिकज्ञानादेरेव असंभवात्' इति उक्तत्वात् । 'यो यद्विनेयः' इत्यादिकोऽपि प्रयोगोऽनुपपन्नः, 'सर्वथा परित्यक्तवस्त्रतीर्थकृद्विनेयत्वात्' इत्यस्य हेतोरसिद्धत्वात् भगवत एव परित्यक्तवस्त्रत्वानुपपत्तेः—

"सव्वे वि एगदूसेण णिग्गया जिणवरा"[2] [आवश्यकसू० गा० २२७]

इत्याद्यागमप्रामाण्यात् । न च अस्यान्यार्थत्वम्, आचाराद्यङ्गेषु तैस्तैः सूत्रैर्भगवतैकवस्त्रग्रहणस्य
२० श्रामण्यप्रतिपत्तिसमये प्रतिपादितत्वात् । न चैवं तदा सर्ववस्त्रपरित्यागावेदकस्तत्र कश्चिदागमः श्रूयते । योऽपि—

"वोसट्ठचत्तदेहो विहरइ गामाणुगामं तु" [ ]

इत्यागमः सोऽपि न श्रामण्यप्रतिपत्तिसमयभाविभगवन्नग्नत्वावेदकः किन्तु तदुत्तरकालं रागादिविप्रमुक्तत्वं भगवति आवेदयति न हि अनेन आगमेन भगवतो वस्त्रवैकल्यमावेद्यते ।

२५ किञ्च, यदि 'यो यद्विनेयः स तल्लिङ्गधारी तदा भवतामिव भगवतोऽपि कमण्डलु-टट्टिकादिलिङ्गधारित्वप्रसक्तिः । अथ न दैवचरितमाचरितुं[3] शक्यत इति तदगृहीतटट्टिकादिग्रहः अस्माभिः तद्व्यतिरेकेण महाव्रतधारणं कर्तुमशक्तैराश्रीयत तर्हि—

"जारिसयं गुरुलिङ्गं सीसेण वि तारिसेण होयव्वं"[4] [ ]

इत्याद्यभिनिवेशस्त्यज्यताम् । यदपि 'न च वस्त्राद्युपकरणाग्रहवत्सु प्रव्रज्यापरिणामः संभवति' इत्या-
३० द्यभिधानम् तदपि असंगतम्; परिग्रहाग्रहवत्सु प्रव्रज्यापरिणामस्य अस्माभिरपि अनिष्टेः । न च सर्वसावद्ययोगविरतिप्रतिज्ञानिर्वाहनिमित्तवस्त्रादिधर्मोपकरणयोगिषु परिग्रहाग्रहवत्त्वम् अन्यथा शरीरयोगिष्वपि परिग्रहाग्रहवत्त्वं स्यात् । अथ तत्र परित्यक्तुं शक्यत इति, अविधानेन तत्परित्यागे अनेकभवानुबन्धितदनुषक्तिप्रसक्तिः विधानपरित्यागस्तु तस्य प्रस्तुतविधिनैव तर्हि वस्त्राद्युपकरणत्यागेऽपि अयमेव विधिः अन्यथा प्रव्रज्यापरिणामस्य प्रकृष्टफलनिर्वर्तकस्य वस्त्राद्युपादानमन्तरेण
३५ असंभवात् तत्संभवे च शरीरत्यागवद् वस्त्रादित्यागस्यापि स्वतः सिद्धत्वात् उत्तीर्णमहार्णवपुरुषयानपरित्यागस्येव प्राक् तु तत्परित्यागो महार्णवयानमध्यासीनयानपरित्यागवद्[5] अपायहेतुरेव । तेन 'श्वेतभिक्षवो महाव्रतपरिणामवन्तो न भवन्ति' इत्यादिप्रयोगे 'परिग्रहाग्रहयोगित्वात्' इत्यस्य

१-चार (चरे) स्त्व-भां० मां० ।-चरस्त्व-बृ० वा० बा० ।

२ "चउव्वीसं । न य नाम अण्णलिंगे नो गिहिलिंगे कुलिंगे वा" ॥—आवश्यकसू० पृ० १३७ । विशेषाव० टी० पृ० १०२२, १०३२ ।

३ न देव-भां० मां० ।

४ "न हि होइ बुद्धसीसो सेयवडो नग्गखवणो वा" ॥ इत्युत्तरार्धम् ।—विशेषा व० टी० पृ० १०३२ ।

५-यानमध्यमध्यासीन-आ० हा० वि० विना ।

हेतोरसिद्धतैव । यदपि 'न च भगवद्भिर्वस्त्रग्रहणं यतीनामुपदिष्टम्' तदपि अनधीतागमस्याभिधानम्, आचाराद्यङ्गेषु वस्त्र-पात्रैषणाध्ययनादिषु तद्ग्रहणस्य यतीनां विस्तरतो भगवता प्रतिपादनात्। तथा च औघिकोपधिर्जिनकल्पिकानां द्वादशविधः स्थविरकल्पिकानां चतुर्दशविधः निर्ग्रन्थीनां पञ्चविंशतिविधो भगवद्भिरनुज्ञातः—

"जिणा बारसरूवा ओ थेरा चोद्दसरूविणो । ५
अज्जाणं पणवीसं तु अओ उड्ढमुवग्गहो[2]" ॥ [पञ्चव० गा० ७७१]

इत्याद्यर्हदुक्तागमप्रामाण्यात्। यदपि 'स्थितकल्पे आचेलक्यम् परीषहेषु वा अचेलत्वं यतेरुपदिष्टम्' तदपि शुक्लाऽकृत्स्नवस्त्रग्रहणापेक्षया वस्त्राभावेऽपि अनेषणीयतद्ग्रहणापेक्षया च अन्यथा वस्त्रादिग्रहणाभिधायकस्य अनेकस्य आगमस्य एतदागमबाधितत्वेन अप्रामाण्यप्रसक्तेः यथा च भुञ्जानोऽपि एषणीयमाहारम् क्षुत्परीषहजेता यतिः अनेषणीयाहारपरित्यागात् तथा वस्त्रैषणापरिशुद्धवस्त्रा-१० ग्रहणात् शुक्लजीर्णवस्त्रवानपि मुनिः अचेलपरीषहजेता किं न स्यात्?

"णगिणस्स वा वि" [ ]

इत्याद्यपि आगमः तथाविधवस्त्रवतोऽपि नग्नत्वमाह उक्तन्यायात् दृश्यन्ते हि लोके तथाविधवस्त्रवन्तोऽपि 'नग्ना वयम्' इत्यात्मानं व्यपदिशन्तः।

"जे भिक्खू कसिणं वत्थं पडिगाहेइ" [ ] १५

इत्यादेः प्रमाण-मूल्याधिकवस्त्रग्रहणप्रतिषेधविधायिनः योग्यायोग्य-तद्ग्रहण-प्रतिषेधविधायिनश्च आगमस्य

"पिण्डं सेज्जं च वत्थं च चउत्थं पायमेव य ।
अकप्पियं ण इच्छेज्जा पडिगाहेज्ज कप्पियं" ॥ [ ]

इत्यादेर्द्वादशाङ्ग्यन्तर्गतस्य अनेकस्य सद्भावाच्च गौणार्थवृत्तेरुत्तमसंहननपुरुषविशेषविषयप्रतिनियता-२० वस्थागोचरवस्त्रमोक्षप्रतिपादकतया मुख्यवृत्तेर्वा आगमलेशस्य श्रवणमात्राद् भगवत्प्रतिपादितं यतीनां वस्त्रादिग्रहणं प्रतिक्षेप्तुं युक्तम्। तत्प्रतिक्षेपकारिणो बृहस्पतिमतानुसारिण इव मिथ्यादृष्टित्वप्रसक्तेः। अतो वस्त्राद्युपकरणसमन्विताः श्वेतभिक्षवो निर्वाणफलहेतुसम्यग्दर्शन-ज्ञान-चारित्रयुक्ताः, अविकलार्हत्प्रणीतमहाव्रतसंपन्नत्वात्, गणधरादिवत्। तदेवं धर्मोपकरणयुक्तस्य महाव्रतधारिणो निर्ग्रन्थत्वाद् आर्यिकाणामपि मुक्तिप्राप्त्यविरोधः। २५

[स्त्रीणां मोक्षाधिकारसमर्थनपरा चर्चा][6]

अथ स्त्रियो मुक्तिभाजो न भवन्ति, स्त्रीत्वात्, चतुर्दशपूर्वसंविद्भागिन्य[7] इव। अत्र यदि 'सर्वाः स्त्रियो मुक्तिभाजो न भवन्ति' इति साध्येन[8] तदा सिद्धसाध्यता अभव्यस्त्रीणां मुक्तिसद्भावानभ्युपगमात्। अथ 'भव्या अपि तास्तद्भाजो न भवन्ति' इति साध्यते तदा अत्रापि सिद्धसाध्यता भव्यानामपि सर्वासां मुक्तिसंगानिष्टेः— ३०

"भव्वा वि ते अणंता सिद्धिपहं जे ण पावेंति" [ ]

इति वचनप्रामाण्यात्। अथ अवाप्तसम्यग्दर्शना अपि ता न तद्भाजः इति पक्षः अत्रापि सिद्धसाध्यता तदवस्थैव प्राप्तोज्झितसम्यग्दर्शनानां तासां तद्भाक्त्वानिष्टेः। अथ अपरित्यक्तसम्यग्दर्शना अपि न तास्तद्भाजः तथापि सिद्धसाध्यता अप्राप्ताऽविकलचारित्राणां सम्यग्दर्शनसद्भावेऽपि तत्प्राप्त्यनभ्युपगमात्। अथ अविकलचारित्रप्राप्तिरेव तासां न भवति, कुत एतत्? यदि स्त्रीत्वात् पुरुष-३५ स्यापि सा न स्यात् पुरुषत्वात्। अथ पुरुषे सकलसावद्ययोगनिवृत्तिरूपा चित्तपरिणतिः स्वसंवेदना-

१-मुयग्गहो वा० बा०। २ पञ्चव० पृ० १२१। ३-वस्त्रादिग्रहणावानपि मुनिः आ० हा० वि०।-वस्त्राग्रहणात् शुक्लजीर्णवानपि मुनिः बृ०। ४ पृ० ७४७ पं० ११। ५-शय्याश्रवमा-आ०।

६ दिगम्बरमार्गानुयायिनः स्त्रीमोक्षं न संमन्यन्ते तन्मतं प्रमेयकमलमार्तण्डतोऽवबोद्धव्यम्—पृ० ९४ प्र० पं० १०-९६।

सविस्तरं स्त्रीमोक्षसमर्थनं च उत्तराध्ययनपाइअटीका-प्रज्ञापनाटीका-शास्त्रवार्तासमुच्चयटीकातोऽवगन्तव्यम्-अ० ३६। पृ० २०-२२। पृ० ४२४-४३०।

७-पूर्वविद्भा-बृ० आ० हा० वि०। ८ साध्ये तदा बृ० सं० विना।

त्यक्षसिद्धा स्वात्मनि अन्यैरनुमानादवसीयते; ननु सा स्त्रियां तथैव किं नावसीयते येन तत्र तस्याः स्वाग्रहावेशवशादभावः प्रतिपाद्यते । अथ तासां भगवता नैर्ग्रन्थ्यस्य अनभिधानाद् न तत्प्राप्तिः, असदेतत्; तासां तस्य भगवता—

"णो कप्पइ निग्गंथस्स णिग्गंथीए वा अभिन्नतालपलंबे पडिगाहित्तए" [कप्पसु० उ० १ सू० १]

५ इत्याद्यागमेन बहुशः प्रतिपादनात् अयोग्यायाश्च प्रव्रज्याप्रतिपत्तिप्रतिषेधस्य—

"अट्ठारस पुरिसेसुं वीसं इत्थीसु" [ ]

इत्याद्यागमेन विधानाच्च । विशेषप्रतिषेधस्य शेषाभ्यनुज्ञापरत्वाच्च न तासां भगवत्प्रतिपादितनैर्ग्रन्थ्यनिमित्ताऽविकलचारित्रप्राप्त्यनुपपत्तिः । अथ तथाभूतचारित्रवत्त्वेऽपि न तासां तद्भाक्त्वमिति साध्यार्थः तथापि अनुमानबाधितत्वं पक्षस्य दोषः । तथाहि—यद् अविकलकारणं तद् अवश्य-
१० मुत्पत्तिमत् यथा अन्त्यावस्थाप्राप्तबीजादिसामग्रीकोऽङ्कुरः अविकलकारणश्च तस्यामवस्थायां सीमन्तिनीमुक्त्याविर्भावः इति कथं न पक्षस्य अनुमानबाधा? अथ स्त्रीवेदपरिक्षयाभावात् न अविकलचारित्रप्राप्तिस्तासामिति न मुक्तिभाक्त्वम् तर्हि पुरुषस्यापि पुरुषवेदापरिक्षयात् न अविकलचारित्रप्राप्तिरिति न मुक्तिप्राप्तिर्भवेत् । अथ तत्परिक्षये शैलेश्यवस्थाभाविचारित्रप्राप्तिमतः पुरुषस्य मुक्तिप्राप्तिर्न प्राक् तर्हि सीमन्तिन्या अपि एवं मुक्तिप्राप्तौ न कश्चिद् दोषः संभाव्यते । अथ अस्याः
१५ स्त्रीवेदपरिक्षयसामर्थ्यानुपपत्तेर्नायं दोषः; ननु तत्परिक्षयसामर्थ्याभावस्तस्याः कुतः सिद्धः? आगमात् इति चेत्, न; तस्य तथाभूतस्य द्वादशाङ्ग्यामनुपलब्धेः । तत्परिक्षयसामर्थ्यप्रतिपादकस्यापि तस्य अनुपलब्धिरिति चेत्, न;

"सव्वत्थोवा तित्थयरिसिद्धा तित्थयरितित्थे अतित्थयरिसिद्धा असंखेज्जगुणा" [ ]

इत्यादिसिद्धप्राभृतागमस्यानेकस्य सामर्थ्यवृत्त्या सीमन्तिनीनां स्त्रीवेदपरिक्षयसामर्थ्यप्रतिपादकस्य
२० उपलम्भात् न हि सर्वकर्मानीकनायकरूपमोहनीयकर्माङ्गभूतस्त्रीवेदपरिक्षयमन्तरेण तासां मुक्तिप्राप्तिरिति मुक्तिसद्भावावेदकमेव वचस्तासां सामर्थ्यावेदकं सिद्धम् । अथ स्त्रीत्वादेव न तासां तत्परिक्षयसामर्थ्यम्, न; स्त्रीत्वस्य तत्परिक्षयसामर्थ्येन विरोधासिद्धेः न हि अविकलकारणस्य तत्परिक्षयसामर्थ्यस्य स्त्रीत्वसद्भावादभावः क्वचिदपि निश्चितः येन अग्नि-शीतयोरिव सहानवस्थानविरोधस्तयोः सिद्धो भवेत् । नापि भावाभावयोरिव अनयोरन्योन्यव्यवच्छेदरूपता अवगता येन
२५ परस्परपरिहारस्थितलक्षणविरोधसिद्धिर्भवेत् । न चाविरुद्धविधिरन्यस्याभावावेदकः अतिप्रसङ्गात् । तत्र स्त्रीत्वादपि तासां तत्परिक्षयसामर्थ्यानुपपत्तिसिद्धिः । प्रत्यक्षस्य तु इन्द्रियजस्य अतीन्द्रियपदार्थभावाभावविवेचने अनधिकार एवेति नातोऽपि तत्परिक्षयसामर्थ्यानुपपत्तिसिद्धिस्तासाम् । अतोऽनेकदोषदुष्टत्वान्न प्रकृतपक्षः साधनमर्हति । 'स्त्रीत्वात्' इति हेतुरपि यदि 'उदितस्त्रीवेदत्वात्' इति उपात्तस्तदाऽसिद्धः मुक्तिप्राप्तिप्राक्तनसमयादिषु स्त्रीवेदोदयस्य तासामसंभवात् अनिवृत्तिगुणस्थान
३० एव तस्य परिक्षयात् । 'परिक्षीणस्त्रीवेदत्वात्' इति च हेतुर्विपर्ययव्याप्तत्वाद् विरुद्धः । न च 'स्त्रीत्वात्' इत्यस्य 'परिक्षीणस्त्रीवेदत्वात्' इत्ययमर्थः अत्रार्थे प्रकृतशब्दस्य अरूढत्वात् । अथ 'स्त्र्याकारयोगित्वात् स्त्रीत्वात्' इति हेत्वर्थस्तदा विपर्यये बाधकप्रमाणाभावात् संदिग्धविपक्षव्यावृत्तिकत्वाद् अनैकान्तिको हेतुः । चतुर्दशपूर्वसंवित्संबन्धित्वाभावोऽपि तासां कुतः सिद्धः येन साध्यविकलो दृष्टान्तो न स्यात्? सर्वज्ञप्रणीतागमात् इति चेत्, तत एव मुक्तिभाक्त्वस्यापि तासां सिद्धिरस्तु न
३५ हि एकवाक्यतया व्यवस्थितः दृष्टेष्टादिषु बाधामननुभवन् आप्तागमः क्वचित् प्रमाणं क्वचिन्नेति अभ्युपगन्तुं प्रेक्षापूर्वकारिणा शक्यः । अथ विवादगोचरापन्नाऽबला अशेषकर्मक्षयनिबन्धनाध्यवसायविकला, अविद्यमानाऽधःसप्तमनरकप्राप्त्यविकलकारणकर्मबीजभूताध्यवसानत्वात्, यस्तु अशेष-

---

१ स्त्रिया त-वा० बा० भां० मां० ।

२ "नो कप्पइ निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे अभिन्ने पडिगाहेत्तए—कप्पसु० पृ० १ पं० १ ।

३ वीसुं इ-बृ० सं विना । ४-रित्र्यप्रा-वा० बा० भां० मां० । ५-कस्या सा-आ० । ६-विरुद्ध-विरुद्धवि-वा० बा० आ० हा० वि० । ७-न्यस्य भा-भां० मां० । ८-णधर्म-भां० मां० ।

कर्मपरिक्षयनिबन्धनाध्यवसायविकलो न भवति नासौ अविद्यमानाधःसप्तमनरकप्राप्त्यविकलकारण-कर्मबीजभूताध्यवसानः, यथोभयसंप्रतिपत्तिविषयः पुरुष इति वैधर्म्यदृष्टान्तः । असदेतत्, यतोऽत्रापि प्रयोगे साध्य-साधनयोः प्रतिबन्धाभावान्नातो हेतोर्विवक्षितसाध्यसिद्धिः । तथाहि— यथोक्ताध्यवसानं निवर्तमानमबलातः अशेषकर्मक्षयाध्यवसायनिवर्तकं कारणं वा भवद् भवेत् व्यापकं वा? अन्यस्य निवृत्तावपि अपरनिवृत्तेरवश्यंभावाभावात् अन्यथा अश्वनिवृत्तावपि गवादे-५ र्नियमेन निवृत्तिप्रसक्तेः। आह च न्यायवादी—

"तस्मात् तन्मात्रसंबन्धः स्वभावो भावमेव वा।
निवर्तयेत् कारणं वा कार्यमव्यभिचारतः" ॥ [ ] इति।

तत्र न तावत् कारणं यथोक्ताध्यवसानमशेषकर्मक्षयाध्यवसानस्य येन तन्निवृत्त्या तस्यापि निवृत्तिः स्यात्। कारणत्वे वा यत्र अशेषकर्मक्षयाध्यवसानं योगिनि संभवति तत्र अधःसप्तमनरकपृथिवीप्राप्त्यव-१० न्ध्यकारणस्य बीजभूताध्यवसानसद्भावात् कार्यस्य कारणाव्यभिचारित्वात् तस्य नरकप्राप्तिसद्भाव इति अनिष्टापत्तिः। न च योगिनि अशेषकर्मक्षयनिबन्धनमध्यवसानं जनयदपि नरकप्राप्तिनिबन्धनकर्मबी-जभूतमध्यवसानं नरकप्राप्तिलक्षणं स्वकार्यं न जनयतीति वाच्यम्, अविकलकारणस्य अवश्यंतया स्वकार्यनिर्वर्तकत्वात् अन्यथा अविकलकारणत्वायोगात् । न च यदेव तथाभूतकर्मनिर्वर्तनसमर्थं तदेव तत्क्षयहेत्वध्यवसायनिबन्धनं भवति, भावाभावयोरेकस्मिन्नेकदा विरोधात् तन्निर्वर्तकस्य हेतोः१५ स्वभावान्तरमप्राप्नुवतस्तन्निर्व(न्निवर्त)र्तकत्वविरोधात् न हि यदेव यदैवाङ्गुलिद्रव्यस्य ऋजुत्वोत्पादकम् तदेव तदैव तस्य विनाशकं संभवति एकनिमित्तयोरेकदा भावाभावयोर्विरोधात् । नापि तत् तस्य व्यापकम् येन ततस्तन्निवर्तमानं तदपि आदाय निवर्तेत, व्यापकत्वे वा यत्र अशेषकर्मक्षयनिबन्धना-ध्यवसायसद्भावस्तत्र व्यापकस्य अवश्यंभावित्वात् अन्यथा तस्य तद्व्यापकत्वायोगात् योगिनस्तदध्य-वसायवतोऽधःसप्तमनरकप्राप्तिप्रसङ्गोऽनिष्टस्तदवस्थ एव स्यात्। न च यत्र क्लिष्टतराध्यवसायसद्भा-२० वस्तत्र अतिशुभतराध्यवसायेन भाव्यमिति प्रतिबन्धसंभवः तन्दुलमत्स्येन व्यभिचारात् । न च मनुष्यजातियोगित्वे सति अव्यभिचारः उत्तमसंहननेन चारित्रप्राप्तिकालार्वाक्समयभाविना सर्व-पर्याप्तिसंपन्नेन तथाविधक्लिष्टपरिणामवता पुरुषेण व्यभिचारात्। न च यत्र अतिशुभतरः परिणाम-स्तत्रापि अशुभतरपरिणामेन भाव्यमित्यत्रापि प्रतिबन्धः तथाविधयोगिना व्यभिचारात्।

किञ्च, स्त्रीणां सप्तमनरकपृथ्वीप्राप्तिनिबन्धनकर्मबीजाध्यवसायाभावः कुतः प्रतिपन्नः? आप्ता-२५ गमात् इति चेत् अशेषकर्मशैलवज्राशनिभूतशुभाध्यवसायसद्भावोऽपि तत एव अभ्युपगन्तव्यः। न हि अतीन्द्रिये एवंविधेऽर्थे अस्मदादेरर्वाग्दृशः आप्तागमाद् ऋते अन्यत् प्रमाणमस्ति। न च दृष्टेष्टाविरो-ध्याप्तवचनमसत्तर्कानुसारिजातिविकल्पैर्बाधामनुभवति तेषां प्राप्ताऽप्राप्तव्यापादकमतंगजविकल्पवद् अवस्तुसंस्पर्शित्वात्। उक्तं च भर्तृहरिणा—

"अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा। ३०
ये भावान् वचनं तेषां नानुमानेन बाध्यते" ॥ [

न च अत्र वस्तुनि आगमनिरपेक्षमनुमानं प्रवर्तितुमुत्सहते, पक्षधर्मादेर्लिङ्गरूपस्य प्रमाणान्तरतः प्रति-पत्तुमशक्तेः प्रतिपत्तौ वा साध्यस्यापि प्रतिबन्धग्राहिणा प्रमाणेन प्रतिपत्तेर्नैकान्ततोऽतीन्द्रियता भवेत्। आगमानुसारि चानुमानं प्रकृते वस्तुनि संवादकृदेव न बाधकमिति प्रदर्शितम् । न च आप्तवचनं स्त्रीनिर्वाणप्रतिपादकमप्रमाणम् सप्तमनरकप्राप्तिप्रतिषेधकं प्रमाणमिति वक्तव्यम् उभयत्र आप्तप्रणीत-३५ त्वादेः प्रामाण्यनिबन्धनस्य अविशेषात्। न च एकमाप्तप्रणीतमेव न भवति, इतरत्रापि अस्य समान-त्वात्, पूर्वापरोपनिबद्धाशेषदृष्टादृष्टप्रयोजनार्थप्रतिपादकाऽवान्तरवाक्यसमूहात्मकैकमहावाक्यरूप-तया अर्हदागमस्य एकत्वात् तथा चान्तरवाक्यानां केषांचिद् अप्रामाण्ये सर्वस्यापि आगमस्य अप्रामाण्यप्रसक्तेः अङ्गदुष्टत्वे तदात्मकाङ्गिनोपि दुष्टत्वापत्तेः। न च प्रदर्शितवाक्यात्मकः सर्वज्ञप्रणी-तागमत्वेन अस्मान् प्रति असिद्ध इति वक्तव्यम् नास्तिक-मीमांसकान् प्रति पुरुषनिर्वाणावेदकस्यापि ४० तत्प्रणीतत्वेन असिद्धेः। या च तान् प्रति तस्य तत्प्रणीतत्वावेदिका युक्तिः सा इतरत्रापि समाना

पूर्वापरैकवाक्यत्व-दृष्टादृष्टाबाधितार्थत्वादेरविशेषात्। अथ स्त्रीणां घातिकर्मक्षयनिमित्ताद्यशुक्लध्यानद्वयस्यासंभवाद् न निर्वाणप्राप्तिः संभविनी; ननु कुतस्तद्द्वयस्य तत्राभावगतिः? पूर्वधरस्यैव तयोः सद्भावात् "आद्ये पूर्वविदः" [तत्त्वार्थ० ९-३९] इति [1]वचनप्रामाण्यात्। न च पूर्वधरत्वं तासां तदनधिकारित्वादिति चेत् तर्हि प्राक्तनभवानधीतपूर्वाणां वर्तमानतीर्थाधिपत्यादीनामपि ५न तद् भवेत् तदध्ययनासंभवात् आद्यशुक्लध्यानद्वयासंभवतः तन्निमित्तघातिकर्मक्षयसमुद्भूताशेषतत्त्वावबोधस्वभावकेवलज्ञानाभावे न मुक्तिर्श्रासंगतिः स्यादिति अनिष्टापत्तिः। अथ शास्त्रयोगागम्यसामर्थ्ययोगावसेयभावेषु अतिसूक्ष्मष्वपि तेषां विशिष्टक्षयोपशम-वीर्यविशेषप्रभवप्रभावयोगात् पूर्वधरस्येव बोधातिरेकसद्भावाद् आद्यशुक्लध्यानद्वयप्राप्तेः कैवल्यावाप्तिक्रमेण मुक्त्यवाप्तिरिति न दोषः तदध्ययनमन्तरेणापि विशेषक्षयोपशमसमुद्भूतज्ञानात् पूर्ववित्त्वसंभवात् तर्हि १०निर्ग्रन्थीनामपि एवं [2]द्वितयसंभवे न कञ्चिद् दोषमुत्पश्यामः अभ्युपगमनीयं चैतत् अन्यथा मरुदेवीस्वामिनीप्रभृतीनां जन्मान्तरेऽपि अनधीतपूर्वाणां न मुक्तिप्राप्तिर्भवेत्। न चासौ तेषामसिद्धा सिद्धप्राभृतादिग्रन्थेषु गृहिलिङ्गसिद्धानां प्रतिपादनात्। न च ते अप्रमाणम् सर्वज्ञप्रणीतत्वेन तेषां प्रामाण्यस्य साधितत्वात्। अथ मायागारवादिभूयस्त्वाद् अबलानां न मुक्तिप्राप्तिः, न; तदा तासां तद्भूयस्त्वासंभवात् प्राक् तु पुरुषाणामपि तत्संभवोऽविरुद्धः। अथ अल्पसत्त्वाः क्रूरा- १५ध्यवसायाश्च ताः इति न मुक्तिभाजः, न; सत्त्वस्य कायगम्यत्वात् तस्य च तासु दर्शनात् अल्पसत्त्वस्वासिद्धिः। दृश्यन्ते हि असदभियोगादौ तृणवत् ताः प्राणपरित्यागं कुर्वाणाः परीषहोपसर्गाभिभवं चाङ्गीकृतमहाव्रता विदधानाः क्रूराध्यवसायत्वं दृढप्रहारिप्रभृतीनां प्रागवस्थायां तद्भवे विद्यमानमपि न मुक्तिप्राप्तिप्रतिबन्धकम् तदवस्थायां तु तस्य तास्वपि अभाव एव।

अथ लोकवद् लोकोत्तरेऽपि धर्मे पुरुषस्य उत्तमत्वात् मुक्तिप्राप्तिः न स्त्रीणाम् अनुत्तमत्वात्, २०न; अन्यगुणापेक्षाऽनुत्तमत्वस्य मुक्तिप्राप्त्यप्रतिबन्धकत्वात् अन्यथा तीर्थकृद्गुणापेक्षया गणधरादेरपि अनुत्तमत्वात् मुक्तिप्राप्त्यभावो भवेत्। अथ अशेषकर्मक्षयनिबन्धनस्य अध्यवसायस्य गणधरादिषु तीर्थकृदपेक्षया तुल्यत्वात् अयमदोषः, समानमेतद् अबलास्वपि तथाविधयोग्यतामापन्नासु। अथ महाव्रतस्थपुरुषावन्द्यत्वात् न तासां मुक्त्यवाप्तिस्तर्हि गणधरादेरपि अर्हदवन्द्यत्वात् न मुक्त्यवाप्तिः स्यात्। अथ

२५ "तित्थपणामं काउं"[3] [आवश्यकनि० समवस० गा० ४५]

इत्याद्यागमप्रामाण्यात् प्रथमगणधरस्य 'तीर्थ'शब्दाभिधेयत्वात् तदवन्द्यत्वं तस्यासिद्धं तर्हि चातुर्वर्ण्यश्रमणसंघस्यापि 'तीर्थ'शब्दवाच्यत्वात् तत्र तु तासामन्तर्भावात् महाव्रतस्थपुरुषावन्द्यत्वं तासामपि असिद्धम्। तन्न युक्त्यागमाभ्यां तासां मुक्तिप्राप्त्यभावः प्रतिपत्तुं शक्यः। तत्सद्भावस्तु प्रदर्शितागमात् युक्तितश्च प्रतीयत एव। तथाहि—विमत्यधिकरणभावापन्नाः स्त्रियो मुक्तिभाजः, ३०अवाप्ताशेषकर्मक्षयनिबन्धनाध्यवसायत्वात्, उभयाभिमतगणधरादिपुरुषवत् इत्याद्यागम-युक्तिगर्भमनुमानं निर्दोषं युक्तिशब्दवाच्यं समस्त्येव।

[प्रतिमाभूषाया आगमविहितत्वसमर्थनम्]

यदपि 'भगवत्प्रतिमाया न भूषा आभरणादिभिर्विधेया' इति स्वाग्रहावष्टब्धचेतोभिर्दिगम्बरैरुच्यते तदपि अर्हत्प्रणीतागमापरिज्ञानस्य विजृम्भितमुपलक्ष्यते तत्करणस्य शुभभावनिमित्ततया ३५कर्मक्षयाऽवन्ध्यकारणत्वात्। तथाहि—भगवत्प्रतिमाया भूषणाद्यारोपणं कर्मक्षयकारणम्, कर्तुर्मनःप्रसादजनकत्वात्, कुङ्कुमाद्यालेपनवत्। न च व्रतावस्थायां भगवता भूषणादेरनङ्गीकृतत्वात् न तत्प्रतिकृतौ तद् विधेयम् संमज्जनाङ्गरागपुष्पादिधारणस्यापि तदवस्थायां भगवताऽनाश्रितत्वात् न तद्

---

१ पूर्णं सूत्रं तु "शुक्ले चाद्ये पूर्वविदः" इत्येव। २ द्वितीय-भां० मां०।

३ "कहेइ आहारणेण सरेण। सव्वेसिं संनीणं जोअणनीहारिणा भयवं" ॥-आवश्यकनि० पृ० १०६।

४ तत्कार-मां०।

तत्र विधेयं स्यात्। अथ मेरुमस्तकादिषु तदभिषेकादौ इन्द्रादिभिस्तस्य विहितत्वात् अस्मदादिभिरपि कृतानुकरणादिभिः प्रयोजनैस्तत् तत्र विधीयते तर्हि तत एव आभरणादिभिर्विभूषादिकमपि विधेयम् कृतानुकरणादेः समानत्वात्। एवमन्यदपि आगमबाह्यं स्वमनीषिकया परपरिकल्पितमागम-युक्तिप्रदर्शनेन प्रतिषेद्धव्यम् न्यायदिशः प्रदर्शितत्वात्। तदेवम् अनधीताऽश्रुतयथावदपरिभावितागमतात्पर्या दिग्वासस इव आत्मानं विगोपयन्तीति व्यवस्थितम्॥ ६५॥ ५

[बहुश्रुतत्वादिदर्पात् तात्पर्यापरिज्ञानाच्चानिश्चितशास्त्रार्थस्य सिद्धान्तप्रत्यनीकत्वकथनम्]

यत एवं ततः—

जह जह बहुस्सुओ संमओ य सिस्सगणसंपरिवुडो य।
अविणिच्छिओ य समए तह तह सिद्धंतपडिणीओ॥ ६६॥

यथा यथा बहुश्रुतः सम्यगपरिभावितार्थानेकशास्त्रश्रवणमात्रेनः तथाविधाऽपराऽविदित- १० शास्त्राभिप्रायजनसंमतश्च शास्त्रज्ञत्वेन अत एव श्रुतविशेषानभिज्ञैः शिष्यगणैः समंतात् परिवृतश्च अविनिश्चितश्च समये तथाविधपरिवारदर्पात् समयपर्यालोचनेऽनादृतत्वात् तथा तथा सिद्धान्तप्रत्यनीकः यथावस्थितवस्तुस्वरूपप्रकाशकार्हदागमप्रतिपक्षः निस्सारप्ररूपणया अन्यागमेभ्योऽपि भगवदागममधः करोतीति यावत्॥ ६६॥

[क्रियाप्रधानानां ज्ञानयोगमसाधयतां क्रियाफलानुभवाभावकथनम्] १५

तस्मात् शास्त्रमधीत्य तदर्थावधारणं विधेयम् अवधृतश्च तदर्थो नय-प्रमाणाभिप्रायतो यथावत् परिभावनीयः अन्यथा तत्फलपरिज्ञानविकलताप्रसक्तिरित्याह—

चरण-करणप्पहाणा ससमय-परसमयमुक्कवावारा।
चरण-करणस्स सारं णिच्छयसुद्धं ण याणंति॥ ६७॥

चरणं श्रमणधर्मः— २०

"वय-समणधम्म-संजम-वेयावच्चं च बंभगुत्तीओ।
णाणाइतियं तव-कोहणिग्गहाई चरणमेयं"॥ [ओघनि० गा० २]

इति वचनात्। व्रतानि हिंसाविरमणादीनि पञ्च, श्रमणधर्मः क्षान्त्यादिर्दशधा, संयमः पञ्चाश्रवविरमणादिः सप्तदशभेदः, वैयावृत्त्यं दशधा आचार्याराधनादि, ब्रह्मगुप्तयो नव वसत्यादयः, ज्ञानादित्रितयं ज्ञान-दर्शन-चारित्राणि, तपो द्वादशधा अनशनादि, क्रोधादिकषायषोडशकस्य २५ निग्रहश्च इति अष्टधा चरणम्। करणं पिण्डविशुद्ध्यादिः—

"पिंडविसोही समिई भावण-पडिमाइ-इंदियनिरोहो।
पडिलेहण-गुत्तीओ अभिग्गहा चेव करणं तु"॥ [ओघनि० गा० ३]

इति वचनात्। तत्र पिण्डविशुद्धिः त्रिकोटिपरिशुद्धिराहारस्य—

"संसट्ठमसंसट्ठा उँद्धड तह अप्पलेविया चेव। ३०
उग्गहिया पग्गहिया उज्झियहम्माय सत्तमिया" ॥ इति

सप्तधा वा, समितिः ईर्यासमित्यादिः पञ्चधा, भावना अनित्यत्वादिका द्वादश, प्रतिमा मासादिका द्वादश भिक्षूणाम् दर्शनादिका एकादश उपासकानाम्, इन्द्रियनिरोधः चक्षुरादिकरणपञ्चकसंयमः प्रतिलेखनं मुखवस्त्रिकाद्युपकरणप्रत्युपेक्षणमनेकविधम्, गुप्तिः मनो-वाक्-कायसंवरणलक्षणा त्रिधा, अभिग्रहा वसतिप्रमार्जनादयोऽनेकविधाः—एतयोश्चरण-करणयोः प्रधानास्तदनुष्ठान- ३५ तत्पराः स्वसमय-परसमयमुक्तव्यापाराः अयं स्वसमयः अनेकान्तात्मकवस्तुप्ररूपणात् अयं च परसमयः केवलनयाभिप्रायप्रतिपादनात् इत्येतस्मिन् परिज्ञानेऽनादृता अनेकान्तात्मकवस्तुतत्त्वं यथावत् अनवबुध्यमानाः तदितरव्यवच्छेदेन इति यावत्। चरणकरणयोः सारं फलम् निश्च-

---

१-म्यकूप-भां० मां०। २ ओघनि० पृ० ५। ३ ओघनि० पृ० ६। ४ उव्वड आ० हा० वि०। ५ पञ्चाशकटी० पृ० २७९ द्वि० पं० ४। ६ भिक्षूणां द्वादशानामपि प्रतिमानां स्वरूपनिरूपणं पञ्चाशकमूलतोऽवगन्तव्यम्—पृ० २७७—२९१ गा० १—५०।

यच्छुद्धं निश्चयात् तत् शुद्धं च ज्ञान-दर्शनोपयोगात्मकं निष्कलङ्कम् न जानन्ति न अनुभवन्ति ज्ञान-दर्शन-चारित्रात्मककारणप्रभवत्वात् तस्य कारणाभावे च कार्यस्य असंभवात् अन्यथा तस्य निर्हेतुकत्वापत्तेः चरण-करणयोश्च चारित्रात्मकत्वात् द्रव्य-पर्यायात्मकजीवादितत्त्वावगमस्वभाव-स्याभावेऽभावात् ।

५ अथवा चरण-करणयोः सारं निश्चयेन शुद्धं सम्यग्दर्शनं ते न जानन्ति न हि यथावस्थितव-स्तुतत्त्वावबोधमन्तरेण तच्छुद्धिः न च स्वसमय-परसमयतात्पर्यार्थानवगमे तदवबोधः बोटिकादेरिव संभवी । अथ जीवादिद्रव्यार्थ-पर्यायार्थापरिज्ञानेऽपि यद् अर्हद्भिरुक्तं तदेव एकं सत्यमित्येतावतैव सम्यग्दर्शनसद्भावः—

"भण्णइ तमेव सच्चं णिस्संकं जं जिणेहिँ पन्नत्तं" [ ]

१० इत्याद्यागमप्रामाण्यात्, न; स्वसमयपरसमयपरमार्थानभिज्ञैर्निरावरणज्ञान-दर्शनात्मकजिनस्वरूपाऽ-ज्ञानवद्भिस्तदभिहितभावानां सामान्यरूपतयाऽपि अन्यव्यवच्छेदेन सत्यस्वरूपत्वेन ज्ञातुमशक्य-त्वात्; नन्वेवमागमविरोधः सामायिकमात्रपदविदो माष-तुषादेर्यथोक्तचारित्रिणस्तत्र मुक्तिप्रति-पादनात् सकलशास्त्रार्थज्ञताविकलव्रतस्य व्रताद्याचरणनैरर्थक्यापत्तिश्च तत्साध्यफलानवाप्तेः । न च यथोपवर्णितचरण-करणसम्यग्दर्शनवैफल्ये भवतः ज्ञानादित्रितयस्यापि तत्र पाठात् । न, ये यथोदि-

१५ तचरण-करणप्ररूपणासेवनद्वारेण प्रधानात् आचार्यात् स्वसमयपरसमयमुक्तव्यापारा न भवन्तीति-नञोऽत्र संबन्धात्-ते चरण-करणस्य सारं निश्चयशुद्धं जानन्त्येव गुर्वाज्ञया प्रवृत्तेः चरणगुणस्थितस्य साधोः सर्वनयविशुद्धतया अभ्युपगमात्—

"तं सव्वणयविसुद्धं जं चरणगुणट्ठिओ साहू" [आवश्यकनि० सामाइअनि० गा० १०२]

इत्याद्यागमप्रामाण्यात् अगीतार्थस्य तु स्वतन्त्रचरण-करणप्रवृत्तेः व्रताद्यनुष्ठानस्य वैफल्यमभ्युप-

२० गम्यत एव—

"गीयत्थो य विहारो बीओ गीयत्थमीसओ भणिओ ।"[5] [ ]

इत्याद्यागमप्रामाण्यात् ॥ ६७ ॥

[ज्ञानक्रिययोरन्यतरवैकल्ये मोक्षफलवन्ध्यत्वकथनम्]

अत्र च सम्यग्दर्शनस्य सम्यग्ज्ञानादभेदाज्ञा(दाद् ज्ञा)न-क्रिययोरन्यतरविकलयोर्नाशेषकर्मक्ष-

२५ यलक्षणफलनिर्वर्तकत्वं संभवतीति प्रतिपादयन्नाह—

णाणं किरियारहियं किरियामेत्तं च दो वि एगंता ।

असमत्था दाएउं जम्म-मरणदुक्ख मा भाई ॥ ६८ ॥

ज्ञायते यथावद् जीवाजीवादितत्त्वमनेनेति **ज्ञानम्** क्रियत इति **क्रिया** यथोक्तानुष्ठानम् तया **रहितम्** '**जन्म-मरण-दुःखेभ्यो मा भैषीः**' इति **दर्शयितुं दातुं** वा **असमर्थम्** न हि

३० ज्ञानमात्रेणैव पुरुषो भयेभ्यो मुच्यते क्रियारहितत्वात् दृष्टप्रदीपनकपलायनमार्गपङ्गुवत् । **क्रिया-मात्रं वा** ज्ञानरहितम् न 'तेभ्यो मा भैषीः' इति दर्शयितुम् दातुं वा समर्थम्-न हि क्रियामात्रात् पुरुषो भयेभ्यो मुच्यते सज्ज्ञानविकलत्वात् प्रदीपनकभयप्रपलायमानान्धवत् । तथा चागमः—

"हयं णाणं कियाहीणं हया अण्णाणओ किया ।

पासंतो पंगुलो डड्ढो धावमाणो य अंधओ" ॥

३५ [आवश्यकनि० पदमाव० गा० २२]

---

१ स्वसमयपरमा-वा० बा० भां० मां० आ० । २-रणै नै-मां० । ३-नवैकल्ये भां० मां० । नवि-कल्पे भ-वा० बा० । ४ "सव्वेसिं पि नयाणं बहुविहवत्तव्वयं निसामित्ता" । इति पूर्वार्धम् ।—आवश्यकनि० पृ० १९७ । ५ "एत्तो तइयविहारो णाणुण्णाओ जिणवरेहिं" इत्युत्तरार्धं हरिभद्रीयानुयोगद्वारवृत्तौ पृ० १२६ ।

६ अस्मदीयायां मूलप्रतौ इतोऽनन्तरमेका गाथा अधिका विद्यते । सा चेयम्—

जेण विणा लोगस्सवि ववहारो सव्वहा न निव्वडइ ।

तस्स भुवणेक्कगुरुणो नमो अणेगंतवायस्स ॥

इयं च गाथा टीकाप्रतिषु न क्वापि उपलभ्यते ।

७ सज्ज्ञान-बृ० सं० विना । ८ आवश्यकनि० पृ० १५ ।

उभयसद्भावस्तु 'तेभ्यो मा भैषीः' इति दर्शयितुं समर्थः । तथाहि—सम्यग्ज्ञान-क्रियावान् भयेभ्यो मुच्यते उभयसंयोगवत्त्वात् प्रदीपनकभयान्धस्कन्धारूढपङ्गुवत् । उक्तं च—

"संजोगसिद्धीए फलं वयंति"[1] [आवश्यकनि० पढमाव० गा० २३] इत्यादि ।

तस्मात् सम्यग्ज्ञानादित्रितयनयसमूहाद् मुक्तिः नयसमूहविषयं च सम्यग्ज्ञानम् श्रद्धानं च तद्विषयं सम्यग्दर्शनम् तत्पूर्वं च अशेषपापक्रियानिवृत्तिलक्षणं चारित्रम्—प्रधानोपसर्जनभावेन मुख्यवृत्त्या ५ वा-तत् त्रितयप्रदर्शकं च वाक्यमागमः नान्यः एकान्तप्रतिपादकस्य असदर्थत्वेन विसंवादकतया तस्य प्राधान्यानुपपत्तेः जिनवचनस्य तु तद्विपर्ययेण दृष्टवद् अदृष्टार्थेऽपि प्रामाण्यसंगतेः ॥ ६८ ॥

[अनेकान्तमयत्वेन जिनवचनस्य स्तवनं पार्यन्तिकमङ्गलविधानं च]

तस्य तथाभूतस्य स्तुतिप्रतिपादनाय मङ्गलार्थत्वात् प्रकरणपरिसमाप्तौ गाथासूत्रमाह—

भद्दं मिच्छादंसणसमूहमइयस्स अमयसारस्स । १०
जिणवयणस्स भगवओ संविग्गसुहाहिगम्मस्स ॥ ६९ ॥

भद्रं कल्याणम् जिनवचनस्य अस्तु इति संबन्धः मिथ्यादर्शनसमूहमयस्य; ननु यद् मिथ्यादर्शनसमूहमयं तत् कथं सम्यग्रूपतामासादयति ? न हि विषकणिकासमूहमयस्य अमृतरूपतापत्तिः प्रसिद्धा, न; परस्परनिरपेक्षसंग्रहादिनयरूपापन्नसांख्यादिमिथ्यादर्शनानां परस्परसव्यपेक्षतासमासादितानेकान्तरूपाणां विषकणिकासमूहविशेषमयस्य अमृतसंदोहस्येव सम्यक्त्वापत्तेः । १५ दृश्यन्ते हि विषादयोऽपि भावाः परस्परसंयोगविशेषसमासादितपरिणत्यन्तरा अगदरूपतामात्मसात्कुर्वाणाः मध्वाज्यप्रभृतयस्तु विशिष्टसंयोगावाप्तद्रव्यान्तरस्वभावा मृतिप्राप्तिनिमित्तविषयरूपतामासादयन्तः । न च अध्यक्षप्रसिद्धार्थस्य पर्यनुयोगविषयता अन्यथा अग्न्यादेरपि दाह्यदहनशक्त्यादिपर्यनुयोगोपपत्तेः । अत एव निरपेक्षा नैगमादयो दुर्नयाः सापेक्षास्तु सुनया उच्यन्ते । अभिहितार्थसंवादि चेदं वादिवृषभस्तुतिकृत्सिद्धसेनाचार्यवचनम्[2]— २०

"नयास्तव स्यात्पदलाञ्छना इमे रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतफला यतस्ततो भवन्तमार्याः प्रणता हितैषिणः" ॥ [ ] इति ।

अथवा सांख्याद्येकान्तवादिदर्शनसमूहमयैकस्य[3] चूर्णनस्वभावस्य मिथ्यादृष्टिपुरुषसमूहविघटनसमर्थस्य वा यद्वा मिथ्यादर्शनसमूहा नैगमादयः—एकैकस्य नैगमादेर्नयस्य शतविधत्वात्—

"एक्केक्को[4] वि सयविहो" [आवश्यकनि० उवग्घायनि० गा० ३६] २५

इत्याद्यागमप्रामाण्यात्—अवयवा यस्य तद् मिथ्यादर्शनसमूहमयम् जिनवचनस्य नैगमादयः सापेक्षाः सप्त अवयवाः तेषामपि एकैकः शतधा व्यवस्थितः इत्यभिप्रायः ।

[सप्तभङ्ग्यादिप्रदर्शनेनानेकान्तसमर्थनम्]

समूहरूपसप्तनयावयवोदाहरणापेक्षया च सप्तभङ्गीप्रदर्शनमागमज्ञा विदधति सामान्यविशेषात्मकत्वाद् वस्तुतत्त्वस्य— ३०

---

१ "न हु एगचक्केण रहो पयाइ । अंधो अ पंगू अ वणे समिच्चा ते संपउत्ता नगरं पविट्ठा ॥" इति संपूर्णा गाथा आवश्यकनि० पृ० १५ ।

२ सिद्धसेनीयत्वेन प्रसिद्धायां लभ्यायां च क्वापि स्तुतौ नेदं पद्यमुपलभ्यते ।
समन्तभद्रकृतित्वेन प्रसिद्धे स्वयंभूस्तोत्रे पञ्चषष्टितमत्वेन इदं पद्यं 'नयास्तव स्यात्पदसत्यलाञ्छिता' इति 'भवन्त्यभिप्रेतगुणा यतस्ततो' इति च पाठान्तरेण सहितं दृश्यते ।
हरिभद्रेण अनुयोगद्वारवृत्तौ "तदुक्तं च" इति निर्दिश्य 'भवन्त्यभिप्रेतगुणा' इति पाठसहितं पद्यमिदं समुद्धृतम् पृ० ११८ ।
आचाराङ्गटीकायां शीलाङ्काचार्येण एतादृशमेव एतत् पद्यं "स्वयूथ्यैरत्र बहु विजृम्भितम्" इति कृत्वा उद्धृतम् पृ० ८५ ।
